# आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ११५।

# रसरत्नसमुच्चयटीका ।

Ras- Rattan- Samuchaya -Tika

S
615.537
C 363 R

मूल्यम्--[illegible]

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ११५

खरेइत्युपनामकवामनात्मजपण्डितवरचिन्तामणिशास्त्रिविरचिता सरलार्थप्रकाशिन्याख्या

# रसरत्नसमुच्चयटीका ।

—०:++++++++++++++:०—

एतत्पुस्तकं 'विद्यालंकार-
पुरुषोत्तम गोविन्द रानडे
इत्येतैः संशोधितम् ।

तच्च
बी. ए. इत्युपपधारिभिः
विनायक गणेश आपटे
इत्येतैः
पुण्याख्यपत्तने
श्रीमन् 'महादेव चिमणाजी आपटे' इत्यभिधेय-
महाभागप्रतिष्ठापिते
आनन्दाश्रममुद्रणालये
आयसाक्षरैर्मुद्रयित्वा
प्रकाशितम् ।

शालिवाहनशकाब्दाः १८६३ ।
खिस्ताब्दाः १९४१ ।
( अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः ) ।
मूल्यं सार्धरूपकद्वयम् ( २॥ ) ।

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 5572
Date 14/10/65
SIMLA

S
615 537
C 363 R

Library IIAS, Shimla
S 615 537 C 363 R
00005572

श्रीः ।

# प्रस्तावः ।

-:++++:-

विदितमेव तत्रभवतां रसतन्त्रविदां तथाऽऽयुर्वेदज्ञानां पण्डितानां यत्प्रसिद्धेषु रसरत्नाकर–रसेन्द्रसारसंग्रह–रसेन्द्रचिन्तामणि–रसचण्डांशु– रससंकेतकलिका–रसहृदयतन्त्र–रससार–रसप्रकाशसुधाकर–रसकामधेन्वित्यादिषु रसतन्त्रेषु रसरत्नसमुच्चयेति नाम्ना प्रसिद्धो रसशास्त्रविषयकः संग्रहग्रन्थ इति ।

विस्तृतेऽस्मिन् भारते वर्षे भिन्नभिन्नप्रान्तेषु भिन्नभिन्नरसतन्त्राणां पठनपाठनचिकित्साव्यवहारः पूर्वमवर्तत महाराष्ट्रे पूर्वस्मिन्काल- इति । इतः पञ्चाशद्वर्षमितात् कालात् पूर्वस्मिन् काले आयुर्वेदस्य पठनपाठनव्यवस्थायां माधवविदानमष्टाङ्गहृदयं मदनपालनिघण्टुः क्वचिद् राजनिघण्टू रसरत्नसमुच्चयश्चेति ग्रन्था एव प्रामुख्येणाऽऽसन् । रसशास्त्रावगमे रसरत्नसमुच्चय एव सुपरिचितो महाराष्ट्रविदुषां विशेषतो विद्यते । मुद्रणकलया ग्रन्थमुद्रणसौलभ्येन मुद्रितेष्वायुर्वेदीयरसशास्त्रग्रन्थेषु महाराष्ट्रेऽस्मिन्नेवाऽऽनन्दाश्रमे रसरत्नसमुच्चयस्यैव प्राथम्येन मुद्रणं संवृत्तमिति सुपरिचितमेव । तेनैव ज्ञायतेऽस्मत्प्रान्ते रसरत्नसमुच्चयस्यैवास्ति बहुतरः प्रचार इति ।

रसशास्त्रं तावत् स्वतन्त्रं शास्त्रं देहधातुवादात्मकोभयहेतुकं विद्यते । तद्धेतुसिद्धिस्तु सर्वथा पारदसिद्ध्यधीनैव । श्रीमद्गोविन्दभगवत्पूज्यपादा अत एवाऽऽहुः—

काष्ठौषध्यो नागे नागे वङ्गेऽथ वङ्गमपि शुल्बे ।
शुल्बं तारे तारं कनके कनकं च लीयते सूते ॥
अमृतत्वं हि भजन्ते हरमूर्तौ योगिनो यथा लीनाः ।
तद्वत्कवलितगगने रसराजे हेमलोहाद्याः ॥
परमात्मनीव सततं भवति लयो यत्र सर्वसत्त्वानाम् ।
एकोऽसौ रसराजः शरीरमजरामरं कुरुते ॥ इति ।

नेदं शास्त्रं सर्वथाऽऽयुर्वेदविदधीनमपि तु धातुवादात्मकत्वादस्य प्रामुख्यतः स्वतन्त्रा एवाध्येतारस्तन्त्रकर्तारः शैवागमज्ञा जैना बौद्धास्तापसा जाटिलाः संन्यासिनो बभूवुः । आयुर्वेदविद्भिस्तावत्तस्य देहवादात्मकस्वरूप एव दत्तदृग्भिस्तत्परिचरणं कृतम् । अतोऽखिले भारतेऽस्य तन्त्रस्य रहस्यज्ञा वा पारंगता वा प्रायो वैद्येतरा एवाभूवन् । आयुर्वेदज्ञा अपि देहसिद्ध्यर्थं पारदसिद्धिमीप्सवस्तदर्थं बहुधा कृतश्रमाः केचनाऽऽसन् ।

अतोऽस्मिञ्शास्त्रे तन्त्राणामपि स्वरूपद्वैविध्यं दृश्यते—देहसिद्धिप्रधानानि तन्त्राणि लोहसिद्धिप्रधानानि च तन्त्राणीति । रसहृदयतन्त्रम्, रससारः, रसरत्नाकरः, रसकामधेनुरित्यादीनि तन्त्राणि लोहवादप्रधानानि । अपराणि देहवादप्रधानानि ।

रसरत्नसमुच्चयस्तु देहवादपरं तन्त्रम् । देहवादे देहस्य सर्वथा नीरुक्त्वसंपादनमेव साध्यं व्याधिप्रशमश्च । धातुवादे तु लोहादीनां धातूनां कनकत्वापादनमेव । अतो भिषग्भिः प्रायः पारदस्याष्टसंस्कारेष्वेव निर्भरो दत्तो नैवावान्तरसंस्कारेषु । अधुनातनास्तु भिषजो वैशिष्ट्येन महाराष्ट्रीया नैव कुर्वन्ति पारदस्याष्टसंस्कारानपि, केवलं तु दरदोत्थितपारदमेव स्वीये व्यवहारे युञ्जन्ति । तेनैव रसशास्त्रविद्यायाः परा हानिः संवृत्ता महाराष्ट्रदेशे । दरदोत्थितपारदापेक्षया संस्कारितपारदस्य चिकित्सायां व्यवहारोऽतीव फलप्रदो भवतीत्यनुभवसिद्धमेव । तत्संसाधितानि द्रव्याणि गुणतो वीर्यतश्चाधिकप्रभाववन्ति, आशुकार्यकराणि समर्थानीति विवादबाह्यमेव । संस्कारितपारदसाधितधातूपधातुमारणमपि तथैवातिसामर्थ्यसंपन्नं सद्देहसिद्धिविधायकं रोगोपद्रवध्वंसकं चेति पुनरुक्तमेव । सांप्रतं महाराष्ट्रे सुमहान्त आयुर्वेदविद्यालयाः संभारसंपन्ना औषधनिर्माणशालायुताः स्थाने स्थाने सुप्रतिष्ठिता राजशासनाधिकारिभिर्दत्तहस्ताः संमानिता विद्यन्ते । तेषु महाविद्यालयेष्वस्य सर्वथोपेक्षितस्य परमतीव्रोपयुक्तस्य तन्त्रस्योज्जीवने शतप्रयत्नेन विद्यालयपदाधिकारिभिर्भाव्यम् । सांप्रतं सर्वत्र वैद्यकव्यवहारे सूचीवेधकरणेऽतीव प्रबलतमा श्रद्धाऽवलोक्यते शीघ्रगुणोत्पादनत्वात्तदौषधद्रव्याणाम् । अस्माकमपि संस्कारितपारदसाधितरसायनानामपि तथैव तावानेवोपयोगो भवेदिति बलवान् विश्वासः । अस्माभिरेकदैकस्मिन्मण्डूके केवलं हिङ्गुलोत्थपारदसाधितायाः समीरपन्नगमात्रायाः सूचीवेधः कृतः । तेन तस्य हृत्स्पन्दनं वेगवत्तरमभवत् । तथैव तस्मिन्नेव मण्डूके सूतशेखरमात्रायाः सूचीवेधेन हृत्स्पन्दनतीव्रतारोधः संजात इत्यनुभूतम् । अतोऽस्माकं रसायनानि सूचीवेधदत्तद्रव्यैः संपादितकार्याणामिव कार्यकराणि सर्वथा विद्यन्त इति सुधीभिरवधेयम् ।

प्रायो नैव कुत्रापि गुरुपरम्परायां विद्यालयेषु वाऽधुनाऽप्यष्टसंस्कारसंपादनशिक्षणप्रणालिर्वा षड्गुणगन्धकजारणादिक्रियापाटवज्ञानदानं विद्यते । अतोऽस्मिन् रसशास्त्र आयुर्वेदविद्भिरायुर्वेदविज्ञातृभिश्च रसशालानिर्मापकैरपि सर्वथाऽध्यापनाध्ययनव्यवहारेषु परिश्रमपरैर्भूत्वा संस्कारितपारदस्यैव प्रचारः सर्वत्राङ्गीकर्तव्य इति । तदर्थमयं रसरत्नसमुच्चयनामा संग्रहस्तु परमोपयुक्तोऽत्र विषये नास्ति संशयः । अनेन संग्रहकर्त्रा नानातन्त्राणि समाहृत्य स्वानुभवसिद्धोऽयं संग्रहः सर्वलोकोपकाराय विरचित इति तेनैव—

'एतेषां क्रियतेऽन्येषां तन्त्राण्यालोच्य संग्रहः ।
रसानामथ सिद्धानां चिकित्सार्थोपयोगिनाम् ॥
सूनुना सिंहगुप्तस्य रसरत्नसमुच्चयः ।

प्रवक्ष्यते, इति गदितम् । प्रसिद्धमेवेदं तन्त्रं सुबहुकालात्पाठनपठनव्यवहाररूपतामवाप्तमिति प्रागुक्तमेव ।

अस्य तन्त्रस्य संग्रहकर्ता वाग्भट एवेति सर्वजनीना वर्तते श्रद्धा । सं चापि वाग्भटोऽष्टाङ्गसंग्रहाष्टाङ्गहृदयग्रन्थकर्ता सिंधुदेशजो वाग्भटाचार्य एवेति परमपूज्यगु. पं. गणेशशास्त्री तर्टे, पं. कृष्णरावशर्मा, पं. श्रीरुद्रपारशप्रभृतीनां मतम् । परं डॉ. प्रफुल्लचन्द्रराय, महामहोपाध्याय गणनाथसेनसरस्वती, वैद्यराजजादवजी आचार्य-वैद्यभूषणहरिशास्त्रिपराडकरादयः पण्डितास्तु स चायं रसरत्नसमुच्चयसंग्रहकर्ता वाग्भटस्त्वष्टाङ्गसंग्रहहृदयकर्तुर्वाग्भटात्सर्वथा भिन्न एवेति प्रतिपादयन्ति । परं नैव ददति तत्साधकानि प्रमाणानि । अस्माकं मतं तावत्—पं. रुद्रपारशप्र० श्री. पं. कृष्णरावशर्मणोर्मतं स्पृशति । तत्साधकानि कारणानि त्वधो दीयन्ते—

१ रसरत्नसमुच्चयादिमे पद्ये तृतीयायां पङ्क्तौ–' भक्तानां प्रभवप्रसंहृतिज-रागादिरोगाः क्षणात् ' इत्यत्र रागादिरोगा इत्यक्षरसमुच्चयो ' रागादिरोगाः सहजाः समूलाः ' तथा ' रागादिरोगान् सततानुषक्तान् ' इति संग्रहहृदयस्थादिमपद्याक्ष-रसमुच्चयसादृश्यं दर्शयति ।

२ तथैव ' शान्तिं यान्ति जगत्प्रधानभिषजे तस्मै परस्मै नमः ' इति नम-उक्तिस्तु संग्रहोक्तां ' तमेकं वैद्यं शिरसा नमामि '। तथा ' योऽपूर्ववैद्याय नमोऽस्तु तस्मै, इति हृदयोक्तां नमउक्तिसादृश्यं सर्वथाऽऽयाति । तथा च संग्रहग्रन्थसमाप्तौ ' सुतोऽभवत्तस्य च सिंहगुप्तस्तस्याप्यहं सिन्धुषु लब्धजन्मा ' इत्यनेन पद्येन साम्यं ' सूनुना सिंहगुप्तस्य रसरत्नसमुच्चयः ' इति पद्यार्धं समुपैति ।

( ३ ) अतोऽपि प्रबलतमं कारणं संग्रहे हृदये च ये श्लोकाः समागतास्त एव श्लोका रसरत्नसमुच्चयेऽपि तत्स्वरूपा एवोद्धृता वर्न्तते । यथा—अष्टाङ्गसंग्रहस्योत्तरस्थान ऊनपञ्चाशत्तमेऽध्याये ' युगप्रभावाद्यदि चौषधीनाम् ' इत्यादि यत् पद्यचतुष्टयं तदेव रसरत्नसमुच्चयस्य त्रिंशेऽध्याये १०५—१०९ इति संख्याङ्कितं विद्यते । तथैव संग्रहस्योत्तरस्थानस्यान्तिमे पञ्चाशन्मितेऽध्यायेऽध्याय-परिसमाप्तौ १ ' लोभयन्त्या० आत्मा यस्मात्सुदुर्लभः ' २ ' ते घुणाक्षर० शतानि नियतायुषाम् ' इति पद्यद्वयम् । ३ तथा ' यज्ञस्य हि शिरश्छिन्नं० ' इत्यारभ्य ' पूज्याः स्युर्नातिशङ्कितः ' इत्यन्ता सप्त श्लोका रसरत्नसमुच्चयस्य त्रिंशत्तमेऽध्याये ग्रन्थोपसंहृतौ समागता विद्यन्ते । तथा ' अष्टाङ्गहृदयस्योत्तरस्थानीयैकोनचत्वारिंशेऽध्यायेऽध्यायसमाप्तौ ।

' शास्त्रानुसारिणी चर्या चित्तज्ञाः पार्श्ववर्तिनः ।
बुद्धिरस्खलिताऽर्थेषु परिपूर्णं रसायनम् ' ॥ १ ॥

तदिदं पद्यं रसरत्नसमुच्चयस्य त्रिंशेऽध्याये ११० संख्याकं विद्यते । तथा च

' अज्ञातशास्त्रसद्भावाञ्शास्त्रमात्रपरायणान् ।
तान्वर्जयेद्भिषक्पाशान् पाशान्वैवस्वतानिव '

इति रसरत्नसमुच्चयस्य त्रिंशाध्यायगतं त्रयोदशाधिकशतसंख्याकं यत्पद्यं तदेव हृदयस्योत्तरस्थानस्य चत्वारिंशत्तमेऽध्याये षट्सप्ततिसंख्याकं विद्यते । तदिदं पद्यं—

अतन्त्रीकृतशास्त्रार्थाः शास्त्रमात्रोपजीविनः ।
राज्ञां प्रमादाद्राष्ट्राणि चरन्ति व्याधिवृत्तयः ।
तान् कालपाशसदृशान्वर्जयेच्छास्त्रधर्षणान् ॥

इति संग्रहस्थश्लोकार्थं दृष्टान्तं च सर्वथाऽनुकरोत्येव । तथा—

‘ एतदागमसिद्धत्वात्प्रत्यक्षफलदर्शनात् ।
मन्त्रवत्संप्रयोक्तव्यं न मीमांस्यं कथंचन ॥

इति पद्यं रसरत्नसमुच्चयाष्टाङ्गहृदयग्रन्थद्वयगोचरं भवति ।

‘ क्वचिद्धर्मः क्वचिन्मित्रं क्वचिदर्थः क्वचिद्यशः ।
कर्माभ्यासः क्वचिच्चेति चिकित्सा नास्ति निष्फला ’ ॥

स चायं संग्रहगतश्लोकः समुच्चये—

‘ क्वचिदर्थः क्वचिन्मैत्री क्वचिद्धर्मः क्वचिद्यशः ।
क्वचिदभ्यासयोगश्च चिकित्सा नास्ति निष्फला ’ ॥

इति दृक्पथमायाति । इत्यादिभिः कारणैरष्टाङ्गसंग्रहाष्टाङ्गहृदयरसरत्नसमुच्चयग्रन्थकर्ता वाग्भट एक एव न परस्परं भिन्न इति सिध्यति । चरकसंहितायां चिकित्सास्थानस्य प्रथमाध्यायस्य चतुर्थरसायनपाद ऊनचत्वारिंशच्छ्लोकसंख्यामारभ्य द्विषष्टिसंख्यामितश्लोकेषु बहवः श्लोकाः संग्रहस्योत्तरस्थाने परावर्तितस्वरूपा वा मूलस्वरूपा वा दरीदृश्यन्ते न सर्वे । अतोऽनुमीयते संग्रहकारेण चरकसंहितागतश्लोकोद्धरणं स्वीये संग्रहे हृदये समुच्चये च कृतम् । ततोऽपि संग्रहहृदयकर्ता वाग्भट एव समुच्चयकर्तेत्यत्र न कोऽपि संशयः । त्रिष्वपि ग्रन्थेषु समानश्लोकोद्धारात्, तथा स्वकृतपद्यानां ग्रन्थत्रयेष्वप्यवस्थानात् ।

नात्र कैरपीतरसंग्रहश्लोकवदिमेऽपि श्लोका नैजा अपि संग्रहकर्त्रा संगृहीता इति शङ्का कार्या । रसशास्त्राप्रतिपादकत्वात्तेषां केवलं संग्रहकरणेऽनौचित्यात् । तथा सामान्यार्थप्रतिपादकत्वात्स्वस्यैव ग्रन्थस्य श्लोकोद्धरणं ग्रन्थसमाप्तौ वरमिति तेनैव स्वीयश्लोकानामिवोद्धरणं कृतमिति प्रतिभाति ।

वाग्भटकालनिर्णये नैवास्माभिरधिकं प्रयत्यते । अस्मत्परमसुहृद्भिर्भिषग्वरैः पराडकरोपाह्वहरिशास्त्रिभिर्वाग्भटविमर्शे १५ पृष्ठ एव खिरस्तीयचतुर्थशतकस्योत्तरार्धे वाग्भटाचार्यः संबभूवेति यदुक्तं तदेव साधु । तथैव च श्रीमान्वाग्भटाचार्यो बुद्धानुयायी वा जिनधर्मीय एवेति मामकीनं मतम् । यतो ग्रन्थत्रयगतं मङ्गलाचरणं सर्वथा वैदिकसंप्रदायविरुद्धमेव । नैषा पद्धतिर्विद्यते वैदिकग्रन्थकर्तॄणाम् । ते हि निर्गुणब्रह्मोपासका अपि सगुणदेवतास्वरूपामेव ब्रह्मोपास्तिं मङ्गलाचरणेन प्रकुर्वते लोकसंग्रहबुद्ध्या ‘ नाथ तवाहं न मामकीनस्त्वम्, इति बुद्ध्या । अतस्तर्क्यतेऽयं वाग्भटाचार्यो न वैदिकधर्मीय इति । भवतु ।

अस्मिन् रसरत्नसमुच्चये पाठ्यमाने पठ्यमाने च बहूनि स्थलानि विवादास्पदानि दुर्ज्ञेयानि प्रतिभासन्ते स्म । प्रायो रसग्रन्था रसहृदयतन्त्रं विहाय टीकाभाष्यादिरहिता एवोपलभ्यन्ते । अटीकानामेव तेषां पठनपाठनं चलति । शास्त्रस्यास्य गुरुसांनिध्यतश्छात्रैः स्वेनैव परिश्रमपूर्वकं प्रत्यक्षतः कृतैः प्रयोगैरेव ज्ञायमानत्वादटीकात्वं ग्रन्थानामुपचरितं स्यात् । तथाऽपि नैष कालः संप्रति सर्वथा विद्यते । प्रत्यक्षतः प्रयोगैर्ज्ञायमानेऽपि शास्त्रे टीकाग्रन्था अपि दीपिकावन्मार्गदर्शका अवश्यं स्युरिति विद्यते तेषामपि निर्मितिरवश्यकेति मनसि

निधाय रसरत्नसमुच्चयोपरि पठनपाठनसौलभ्यायाऽऽयुर्वेद एवास्मत्सतीर्थ्यैरपि सर्वथा गुरुचरणप्रायैः परममान्यैर्नैकशास्त्रनदीष्णैर्वेदशास्त्रसंपन्नेतिविरुदावलिं सर्वथा सार्थीकृतवद्भिः खरेइत्युपनामकैर्वामनात्मजचिन्तामणिशर्मभिर्व्यरचि टीकाग्रन्थः । सोऽयं टीकाग्रन्थ आनन्दाश्रमसंस्कृतग्रन्थावल्यामद्य प्रकाश्यते तदधिकारिभिरिति महान्संतोषस्यावसरः ।

स्वर्गता वेदशास्त्रसंपन्ना चिन्तामण(णि) शास्त्रिणस्तु महाराष्ट्रीये रत्नागिरिप्रान्ते गुहागरनाम्नि ग्रामे शा. १७८८ कार्तिकशुद्धनवम्यां भृगुवासरे खरेइत्युपनामककुलेऽजीजनन् । एतेषां गोत्रं कौशिकं कृष्णयाजुषा ह्येते चित्तपावनब्राह्मणाः । पितृनाम वामनशर्मा, जननी च सौ. मनूबाईतिनाम्नी । पं. कृष्णशास्त्रिणः पं. वासुदेवशास्त्रिणः पं. परशुरामशास्त्रिणः पं. चिन्तामण(णि)शास्त्रिणश्चेति चत्वारो भ्रातरस्त्विम आसन् । सर्वेऽपि कुशाग्रबुद्धयो वेदविद्यायां शास्त्रेषु च कृतश्रमा बभूवुः । द्वितीयभ्रातरो वासुदेवशास्त्रिणस्तु महाराष्ट्रदेशे सुप्रथिता एवावर्तन्त । एतैर्महाभागैर्विद्यार्थिजीवनमारभ्य मरणपर्यन्तमुपासिता भगवती विद्यादेवी । पृष्ठतः कृता च भगवती कमला । विपुलबुद्धिभिरेभिस्तु सातारानगरे श्री. गजेन्द्रगडकरेतिसुप्रसिद्धे प्राच्यविद्याकुले संपादितानेकशास्त्रैर्यावदायुःस्वीकृताध्यापनवृत्तिभिर्भूत्वा विरचिता अनेकग्रन्था निर्मितानि नाटकानि । आविष्कृतं च सरसं महाकाव्यम् । विशेषतस्त्वितिहासविषयमधिकृत्यातीव सुमहान्सुदीर्घश्च प्रयत्नः कृतो महाभागैः । महाराष्ट्रदेशविभूषणानां प्रथितकीर्तीनां पराक्रमशालिनां वीराणां च राजनीतिकुशलानां चान्येषां राजकार्यधुरंधराणां सत्येतिवृत्तगवेषणार्थं तेषां पारस्परिकाणि लिखितपत्राण्यन्विष्यान्विष्य संकलय्य सुसंगत्या संपाद्य च सुमहानितिहासराशिरेभिर्द्वादशखण्डात्मकग्रन्थरूपेण संप्रकाश्याखिलमहाराष्ट्रलोकोपकारभरभरितः कृतः सुनामधेयैर्वासुदेवशास्त्रिभिः ।

इमे च रसरत्नसमुच्चयटीकाकाराश्चिन्तामण(णि)शास्त्रिणस्तु वयसा चतुर्षु भ्रातृषु कनीयांसोऽपि धिषणया सप्रतिभा एवादृश्यन्त । अस्माभिस्तु शैशवे नासिकक्षेत्रे संस्कृतपाठशालायां प्राथमिकीं शिक्षां शिक्षमाणैरवलोकिता इमे व्याकरणशास्त्रस्य महाभाष्यादिग्रन्थानामध्ययनं कुर्वाणा अस्मत्सदृशेभ्यो बालेभ्यः प्राथमिकीं शिक्षां ददानाः सर्वदा विद्याभ्यसनैकदत्तचित्ता यथाकथंचिदपि महता कष्टेन संचालितनित्यसंसारवृत्तयः सपत्नीका अपि यौवनावस्थायां विद्याध्ययनप्रेम्णा निःसारीकृतशृङ्गाररसाः शास्त्रिमहाशयाः । अस्मिन्नेवावसरे श्रीमद्भिश्चिन्तामण(णि)शास्त्रिभिरस्मद्गुरुचरणेभ्यो देवधरोपाह्वप्राणाचार्यकृष्णशास्त्रितातपादेभ्यः सकाशादधिगताऽऽयुर्वेदविद्या संपूर्णा । तदानीमेवैते कण्ठगतकृष्णयजुर्वेदा ( क्रमान्तवैदिका ) याज्ञिका वैयाकरणा आयुर्वेदज्ञा इति प्रथितनामानोऽभवन् । तत इमे प्रथिततमे पनवेलनगरे श्रीधूतपापेश्वरारोग्यमन्दिरकार्यालय आयुर्वेदाध्यापकत्वेनाधिकृतवैद्यत्वेन चाष्टवर्षीयं कालमूषुः । तदनन्तरं श्रीमद्भिरेभी राजकीयसंस्कृतमहाविद्यालय आयुर्वेदाध्यापकत्वेन द्वादशश्रा-

र्षिकः कालो नीतः । तत्रैव न्यायवेदान्तादिशास्त्राणामध्ययनं संपादयन्तः समासादितरसविद्याप्रत्यक्षानुभवा विद्याध्ययनाध्यापनपरा महर्षिजीवितं प्रथमतो द्वादशवार्षिकं सत्रमिव निन्युः । अनन्तरं बडोदरनगरीगतः पञ्चषवार्षिको राजकीयसंस्कृतपाठशालागत आयुर्वेदाध्यापकत्वेन कालोऽपि तेषां व्यतीयाय । ततः परं यावत्स्वर्गमनपर्यन्तं तैः पुनरपीन्दोरराजधान्यामध्ययनाध्यापनपरैर्नानाशास्त्रेषु ग्रन्थलेखनदत्तसमयैः सर्वथा भगवत्याः सरस्वत्या एवोपार्जनं संपादितम् । अस्मिन्नेव काले रसरत्नसमुच्चयटीकाख्यग्रन्थः प्रादुर्बभूव । पण्डितप्रवरैरेभिस्तु संपादिताः केचन ग्रन्थास्तेषु न्यायशास्त्रग्रन्थ एकष्टीकाग्रन्थः, कृष्णयजुर्वेदभाष्यम्, रसरत्नसमुच्चयटीका, इति प्रसिद्धतमा वर्तन्ते । अस्माभिस्त्वेकदा, इन्दोरनगरीं गतवद्भिः संपादितं दर्शनं महाभागानां गुरुकल्पानामेषाम् । तैरेवायं रसरत्नसमुच्चयटीकाग्रन्थो मया सुबहुप्रयत्नेन प्रत्यक्षतः संपादितरसोपरसधातूपधातुमारणेनोद्घाटितानेकदुर्बोधस्थलरहस्येन निर्मितोऽस्तीत्युक्तम् । यदि चायं मुद्रितः स्यात्तर्हि, अध्येतॄणां सुमहत्सहायं भवेदतस्त्वया सप्रयत्नेनास्मिन्विषये भवितव्यमित्याज्ञापितवन्तः । ततो मया पुण्यपत्तनीयानन्दाश्रमसंस्थाव्यवस्थापका माननीयाः श्रीमन्तो दत्तात्रेयविष्णुआपटेमहाभागा अस्य टीकाग्रन्थस्य मुद्रणे कृतप्रार्थना आसन् । तैस्तु विलोक्य टीकाग्रन्थं मुद्रणसुलभलेखं कृत्वा संग्राह्य योग्यसमये सुरुचिरैरायसाक्षरैः शोभनेषु पत्रेषु मुद्राप्याधुना प्रकाशं नीयत इति प्रमोदास्पदमेव । श्रीमतां चिन्तामण(×णि)शास्त्रिणां तनयैः डॉ. दत्तात्रेयचिन्तामणखरेनामभिरपि मुद्रणार्थं टीकाग्रन्थलेखः प्रादायीत्यतस्तेऽपि संमानार्हा एव ।

स चायं टीकाग्रन्थः सुरुचिरो गूढार्थबोधको ग्रन्थाध्येतॄणां संगतार्थत्वेन परमोपकारको भवेदित्यस्माकं विश्वासः । अस्य टीकाग्रन्थस्य प्रकाशनेन पण्डितवराणां खरेशास्त्रिणां विद्याश्रेष्ठ्यं प्रसिद्धिं यास्यतीति सर्वथा संमानार्हा एव तेऽतोऽभिनन्दामो वयं तान् । स चायं टीकाग्रन्थो सर्वेषामपि जनानां पाठनपठनकार्ये सुमहान्मार्गदर्शी भूयादित्याशास्य विरम्यते ।

श्रीमतां वशंवदो

**वामनशास्त्री दातारो**

वैद्यभूषणः । जनस्थानम् ।

---

( × श्रीमन्तो विद्याव्रतसाश्चिन्तामण( णि )शास्त्रिणस्त्वेकाधिकषष्टितमे वयसि शाके १८४९ तमे वत्सरे भाद्रपदकृष्णदशम्यां दिवं गता इति सर्वथा दुःखास्पदमेव ) ।

## श्रीशंकरः शरणम् ।

# प्रास्ताविकं किंचित् ।

अयि रसिकोत्तंसाः सहृदयमूर्धन्या आनन्दाश्रमग्रन्थावलिविहिश्वराः प्राणा भारतवासिनो विद्वांसः श्रीमद्भ्यो मुहुर्मुहुस्तत्तच्छास्त्रकृतभूरिपरिश्रमाणां प्रथितयशसां विदुषां प्रतिभाकरात्समुत्पन्नानि ग्रन्थरत्नानि समर्पयन्ती संस्थेयं भवतां चेतांस्यावर्जयितुं पुनरद्य रसरत्नसमुच्चयस्य 'खरे' इत्युपाभिधवामनात्मजचिन्तामणिशास्त्रिप्रवरविरचितां सरलार्थप्रकाशिनीं नाम कामपि अभिनवां व्याख्यां युष्मत्पाणिपल्लवे समर्पयतीति महदेतत्प्रमोदस्थानम् । व्याख्येयं श्रीगोदातटविराजमानजनस्थान–नाशिकक्षेत्र–निवासिभिः 'वैद्यभूषणम्,' इत्युपाधिसमलंकृतैस्तद्विभागललामीभूतैर्दातारवामनशास्त्रिवरेण्यैर्मुद्रणार्थं कतिपयेभ्यो हायनेभ्यः प्राक्संप्रेषिता । सूक्ष्मदृशाऽवलोकिता सा दुरूहरसरत्नसमुच्चयग्रन्थमध्येतॄन्बहूपकुर्यादियं व्याख्येति मुद्रणविषयिणीं मतिमबध्नीम ।

व्याख्यायामस्यां व्याख्यातुरेकैव व्याख्यानप्रणालिका न खलु नयनसरणिमारोहति । तत्र प्रकारत्रयं दृश्यते । तत्तदध्यायस्थं कतिपयश्लोकानां समुदायं संगृह्य तत्रत्यविषमग्रन्थस्य स्फुटीकरणमयमेकः प्रकारः । स च–आदितः षोडशाध्यायान् यावत्पर्यपालि व्याख्यात्रा । ततः सप्तदशाध्यायतो विंशाध्यायावधि भूयसां पद्यानां स्तोमानुररीकृत्य स्तोकेनांशेन तान्व्याख्याय पुनः पूर्णिकारूपेण तत्तद्विषयाणां महता विस्तरेण विवरणमित्ययं द्वितीयः प्रकारः । एकविंशाध्यायमारभ्याऽऽग्रन्थसमाप्तेः समग्रस्याप्यध्यायस्य व्याख्याविधानमित्यसौ प्रकारस्तृतीयः । तत्तदध्यायपूर्णिकासु प्रागागतानामपि विषयाणां क्वचित्पौनरुक्त्यं संलक्ष्यते । प्रसङ्गतोऽन्यस्याप्येकस्य वस्तुनोऽत्र निर्देशो ह्यनवसरकथनदोषभाग्भवेदिति धिया तद्विषयमन्तरेण मनागिव लेखन्यायास्यते ।

श्रीमद्भिर्वैद्यभूषणदातारवामनशास्त्रिवरैर्मुद्रणार्थं या लिखिता पुस्तिका–पोथी–अत्र प्रेषिता सा स्वयं व्याख्यात्रा लिखितपुस्तिकां प्रमाणीकृत्यैव लेखकेन लेखयित्वा प्रेषितेति निःसंदेहम् । व्याख्यातृलिखिता–मूलभूता–पुस्तिका तु प्रतिपृष्ठं भूयोभिः पश्चात्स्फुरितविचाराणां पूरकैः शोधैर्जटिलाऽऽसीत् । विहाय कतिचन स्वल्पानि पूरकशोधस्थलानि बहुत्र 'अयमत्रत्यः शोधोऽयमत्रत्यः' इति संकेतनिदर्शकं लेखकसंसारसंकेतितं काकपदमपि नावर्तिष्ट । तेन मूलभूतपुस्तिकाया मुद्रणार्थं प्रतिकृतिविधानावसरे बहुलेषु स्थलविशेषेषु मूलप्रतिकृत्योः पुस्तिकयोर्विपर्यासोऽजनिष्ट । मूले प्रतिस्थलं तत्तत्स्थानसंसूचककाकपदादिचिह्नासद्भावात्कथं नु नाम निपुणतरोऽपि लेखको निर्धारणया तत्तच्छोधानां तानि तानि मूलभूतास्पदानि ज्ञातुं प्रभवेत् । एतावता शोधविषयकनिर्दिष्टप्रकारकविपर्यासविप्रतिपत्त्या ग्रन्थसंशोधनकाले सूक्ष्मेक्षिकया शोधस्थलानां विहितेऽपि खलु विचारे कानिचित्स्खलनानि दृष्टिपथमागमेयुस्तानि संहरन्तु क्षमासारा भिषग्वरा इति बलीयान् विश्वासः । मूलपुस्तिकास्थानां केषांचिदक्षराणामपि संदिग्धतया काश्चनाशुद्धयः शक्यसंभवाः । यत्किमपि वा भवतु यद्यत्र ग्रन्थेऽस्मिन् विगुणं भासेत तन्निवेदनीयमायुर्वेदविचक्षणैरिति सनिर्बन्धाऽभ्यर्थना ।

क्वचिन्मूलस्थितानि पदानि व्याख्यायां नावलोक्यन्ते किंतु भिन्नान्येव दृश्यन्ते तत्राधःस्थितपाठगतानि पदानि व्याख्यानार्थं स्वीकृतानि व्याख्यात्रेति बोद्ध-

ष्यम् । ' मूलमुपरि तदधःस्थले टीका ' इत्युभयमप्येकत्रैव मुद्रयितुं युक्तं तथाऽप्येकत्र मुद्रित उभयोर्मूलटीकयोः पुस्तकस्य मूल्यं प्रभूतं स्यात्, अस्मत्संस्थायामवशिष्टानि प्राङ्मुद्रितानि मूलपुस्तकानि निष्फलतामापद्येरन्, येषां च ग्राहकाणां निकटे प्राक्संगृहीतानि मूलपुस्तकानि स्युस्तान्यपि निष्प्रयोजनतामाटीकेरन् तन्मा भूदिति नैकत्रोभयं मुद्रितम् । अपि च मूलग्रन्थो व्याख्या चेत्युभयमेकत्रैव संबन्धयितुं युक्तं तथाऽपि पाठकानां मूलग्रन्थव्याख्ययोर्युगपदेवावलोकनासंभवात्पृथगेव व्याख्याग्रन्थः संबद्धः । तथाकृतेन मूलवाचनावसरे व्याख्यान्तर्गतः स स विभागो द्रष्टुं सुलभः । मूलग्रन्थे विषयानुक्रमसत्त्वात्पुनर्व्याख्याया विषयानुक्रमः पौनरुक्त्यं मा भूदिति न व्यधायि, परं वाचकसौकर्याय मूलग्रन्थव्याख्यापृष्ठाङ्कानां झटित्यवगमार्थं पृष्ठाङ्कदर्शनिकाद्वारा संबन्धो व्यक्तीकृतः । व्याख्यातुः स्थलकालविद्वत्तावर्णनमपि प्रस्तावलेखकैर्वैद्यभूषणवामनशास्त्रिमहाशयैरुल्लिखितमिति तद्विषये न पुनस्तल्लेखनावश्यकता तथापि प्रकृतव्याख्याविषयकं गुणगौरवं वक्तुं हठादिव प्रेरयत्यस्मान् व्याख्यानकौतूहलम् । ' सरलार्थप्रकाशिनी ' इति निजनामधेयमन्वर्थयन्त्याममुष्यां व्याख्यायां मा भवतु व्याख्यानपद्धतेरेकस्वरूपभावः, वर्ततां वा तत्तच्छब्दार्थानां पुनः पुनः कथनम्, अस्तु वा प्रागगतविवेचनस्य मुहुर्मुहुर्निर्देशः, परं यत्सत्यं विशेषतो वेदविद्यायां कृतभूरिपरिश्रमाणामन्यास्वपि द्वित्रासु शास्त्रविद्यासु नदीष्णानां निसर्गदुरवगाहस्य सरत्नसमुच्चयग्रन्थस्य व्याख्याविधानं नाम न खल्वितरसाधारणमतिमता पारयितुं सुशकम् । तत्रासाधारणकुशाग्रधिषणत्वं प्रतिभाशालित्वं निरलसतया संततोद्यमप्रियत्वमित्यादिगुणवृन्दमेवापेक्षते । तदशेषमपि श्रीखरेचिन्तामणिशास्त्रिवरसमीप आसीदित्यस्मिन् वस्तुनि नतरां संदेहबिन्दुरपि । यद्गुणवृन्दस्य परिणतं फलं किलासौ सरलार्थप्रकाशिनी नाम व्याख्या । व्याख्यायामेतस्यां भूयसां रसायनानां प्रक्रियाकथनं, विविधानामोषधीनां परिज्ञानार्थं यथायथं स्वरूपनिदर्शनं, किं भूयसा तत्तासामोषधीनां प्राप्तिस्थानविवेचनं नैतावत्, अपि तु कस्मिन् विभागे का कौषधिः केन नाम्ना व्यवह्रियते तदादिप्रकटनमेवमादीनां व्याख्यास्थविषयाणामायुर्वेदशास्त्रे प्रविविक्षूणां महीयानुपयोगः । स्यादेव परं सिद्धकोटिप्रविष्टानां भिषक्प्रवराणामपि संभवेदिति वाढं विश्वसिमः । सर्वथा नितान्तपरिश्रमपरिप्लुतेयं व्याख्या सर्वानुपकुर्यादिति नात्र स्तोकोऽपि विशयावसरः ।

अन्ततश्च ग्रन्थसंशोनावसरेऽस्मद्व्यवसायबन्धूनां श्रीमतां ' मराठे ' इत्युपाह्वानां श्रीधरात्मजवासुदेवशास्त्रिणां तत्तच्छोधस्थलनिश्चित्यवसरे विचारविनिमयात्मकं सुमहत्खलु साहाय्यमभवत्तत्कृतज्ञतया समुल्लिख्य, डॉ. खरेमहाभागैर्मुद्रणसंमतिः प्रकटिता तथा वैद्यभूषणदातारशास्त्रिभिः प्रस्तावो लिखितो व्याख्यामुद्रणयोगश्च प्रापित इति तेभ्यो शतशो धन्यवादान् वितीर्य विरम्यतेऽल्पीयसोऽस्मात् प्रासङ्गिकात्किंचिन्निवेदनादिति शम् ।

वै. सुदि १२-१८६३ आनन्दाश्रमः ।

**' रानडे ' इत्युपनामको गोविन्दात्मजः पुरुषोत्तमशर्मा ।**

## रसरत्नसमुच्चयटीकाग्रन्थमूलग्रन्थयोः श्लोकसमुदायानामन्योन्यपृष्ठाङ्कदर्शिका ।

### प्रथमाध्याये ।


| श्लो. सं. | प्रारम्भः | टीकापृष्ठं | मूलपृष्ठं |
|---|---|---|---|
| १–७ | आदिम | ४ | १ |
| ८ | एतेषां | ४ | १ |
| ९–१० | रसोऽथ | ४ | १ |
| ११–१८ | अस्ति | ५ | १-२ |
| १९–३३ | नीहार | ५ | २ |
| ३४–३६ | मूर्छित्वा | ६ | २ |
| ३७–४१ | सुकृत | ७ | २ |
| ४२–४७ | अमृतत्वं | ८ | ३ |
| ४८–५१ | यज्ञात् | ९ | ३ |
| ५२–६० | राग | ९ | ३ |
| ६१–६७ | शैले | ९ | ३ |
| ६८–७६ | सदा | १० | ३-४ |
| ७७–८६ | रसनात् | १० | ४ |
| ८७–९० | प्रथमे | ११ | ४ |


### द्वितीयाध्याये ।


| श्लो. सं. | प्रारम्भः | टीकापृष्ठं | मूलपृष्ठं |
|---|---|---|---|
| १–११ | अभ्र | १२-१३ | ४-५ |
| १२–१६ | स्निग्ध | १३-१४ | ५ |
| १७–२३ | प्रतप्तं | १४-१६ | ५ |
| २३–२८ | धान्याभ्रं | १६ | ५ |
| २९–३१ | पादांश | १६ | ५ |
| ३१–३८ | पलं | १७-१८ | ५-६ |
| ३९–४७ | मधु | १८-१९ | ६ |

| श्लो. सं. | प्रारम्भः | टीकापृष्ठं | मूलपृष्ठं |
|---|---|---|---|
| ४८—५४ | सत्त्वस्य | १९-२० | ६ |
| ५५—६४ | अष्टास्र | २०-२१ | ६-७ |
| ६५—७३ | यत्र | २१ | ७ |
| ७४—७६ | भस्मत्वं | २१ | ७ |
| ७७—८६ | सुवर्ण | २२-२३ | ७-८ |
| ८७—९५ | त्रिंशांश | २३-२४ | ८ |
| ९६—१०४ | विमल | २४-२५ | ८-९ |
| १०५—१०८ | तत्सत्त्वं | २५ | ९ |
| १०९—११५ | शिला | २५-६ | ९ |
| ११६—१२५ | रसोप | २६-७ | ९-१० |
| १२६—१३४ | पीत्वा | २७-८ | १० |
| १३५—१४२ | निम्बु | २८ | १० |
| १४३—८ | गौरः | २८-९ | १०-११ |
| १४९—१५६ | रसको | २९ | ११ |
| १५७—१६४ | हरिद्रा | २९-३० | ११ |
| १६५—१७२ | यद्वा | ३०-३१ | ११ |

तृतीयाध्याये ।

| श्लो. सं. | प्रारम्भः | टीकापृष्ठं | मूलपृष्ठं |
|---|---|---|---|
| १—११ | गन्धाश्म | ३१ | १२ |
| १२—१९ | स चापि | ३२ | १२ |
| २०—३३ | पयः | ३२-३ | १२-१३ |
| ३४—४५ | क्षाराम्ल | ३३ | १३ |
| ४६—५० | पाषाण | ३-३४ | १३-१४ |
| ५१—५८ | कासीसं | ३४ | १४ |
| ५९—६५ | सौराष्ट्रं | ३४ | १४ |
| ६६—७५ | हरितालं | ३५ | १४-१५ |
| ७६—८७ | कुलित्थ | ३६-७ | १५ |
| ८८—९७ | मनः | ३७ | १५ |
| ९८—१०८ | सौवीर | ३७ | १५-६ |
| १०९—११९ | हिमवत् | ३८-९ | १६ |

| श्लो. सं. | प्रारम्भः | टीकापृष्ठं | मूलपृष्ठं |
|---|---|---|---|
| १२०—१२९ | कम्पिल्ल | ३९-४० | १६-७ |
| १३०—१४४ | पीतोभा | ४०-१ | १७-८ |
| १४५—१५६ | सद्लं | ४१-३ | १८ |
| | चतुर्थाध्याये । | | |
| १—१२ | मणयो | ४३-४ | १८-९ |
| १३—२५ | हलादि | ४४ | १९-२० |
| २६—४० | वज्रं | ४४-५ | २० |
| ४१—४८ | विलिप्तं | ४६-७ | २०-१ |
| ४९—५९ | जल | ४७ | २१ |
| ६०—७२ | शुध्यत्य | ४७-८ | २१-२ |
| ७३—७८ | श्वेत | ४८ | २२ |
| | पञ्चमाध्याये । | | |
| १—१२ | शुद्धं | ४८-५० | २२-३ |
| १३—२१ | लोहानां | ५०-१ | २३ |
| २२—२९ | सहजं | ५१ | २४ |
| ३०—३८ | तैले | ५१-२ | २४ |
| ३९—४३ | भाव्यं | ५२ | २४ |
| ४४—५१ | म्लेच्छं | ५२ | २५ |
| ५२—६४ | ताम्र | ५३ | २५-६ |
| ६५—७४ | सूतात् | ५३-४ | २६ |
| ७५—८३ | खरं | ५४ | २६-७ |
| ८४—९५ | भ्रामकं | ५४-५ | २७ |
| ९६—१०६ | सम्यक् | ५६-७ | २७-८ |
| १०७—११४ | तीक्ष्ण | ५७-८ | २८ |
| ११५—१२३ | अथ | ५८ | २८ |
| १२४—१२९ | जम्बीर | ५८-९ | २८-९ |
| १३०—१४१ | यत्पात्रे | ५९ | २९ |
| १४२—१५२ | पक्व | ५९-६० | २९-३० |
| १५३—१६३ | खुरकं | ६०-१ | ३० |

| श्लो. सं. | प्रारम्भः | टीकापृष्ठं | मूलपृष्ठं |
|---|---|---|---|
| १६४–१७० | वङ्ग | ६१ | ३०-१ |
| १७१–१८० | द्रुत | ६१-२ | ३१ |
| १८१–१९१ | अश्वत्थ | ६२ | ३१ |
| १९२–२०४ | रीतिका | ६२-३ | ३१-२ |
| २०५–२१६ | अष्ट | ६३ | ३२ |
| २१७–२३१ | जाति | ६३-४ | ३२-३ |
| २३२–२४२ | मूला | ६४-६ | ३३-४ |
| | **षष्ठाध्याये।** | | |
| १–१२ | रस | ६६ | ३४ |
| १३–२६ | आप | ६६ | ३४-५ |
| २७–३९ | वाङ्माया | ६६-७ | ३५ |
| ४०–५१ | एवं | ६७-८ | ३५-६ |
| ५२–६१ | बिडं | ६८ | ३६ |
| ६२–७१ | हर्ष | ६८ | ३६-७ |
| | **सप्तमाध्याये।** | | |
| १–१४ | रस | ६८-९ | ३७-८ |
| १५–२४ | मूषा | ६९-७० | ३८ |
| २५–३५ | सोद्यमाः | ७०-१ | ३८ |
| | **अष्टमाध्याये।** | | |
| १–९ | कथ्यते | ७१-३ | ३९ |
| १०–२० | रूप्यं | ७३-५ | ३९-४० |
| २१–३१ | लोहं | ७५-८२ | ४० |
| ३२–३८ | चूर्णाभ्रं | ८२-३ | ४० |
| ३९–४८ | मृतस्य | ८३-४ | ४०-१ |
| ४९–५४ | द्रुते | ८४-५ | ४१ |
| ५५–५७ | क्षारा | ८५-६ | ४१ |
| ५८–६१ | स्वेदा | ८६ | ४१ |
| ६२–६७ | रोध | ८६-७ | ४१-२ |
| ६८–७५ | चतुः | ८७-८ | ४२ |

| श्लो. सं. | प्रारम्भः | टीकापृष्ठं | मूलपृष्ठं |
|---|---|---|---|
| ७६–८४ | क्षारै | ८८-९२ | ४२ |
| ८५–९० | सिद्ध | ९२-३ | ४२-३ |

नवमाध्याये।

| श्लो. सं. | प्रारम्भः | टीकापृष्ठं | मूलपृष्ठं |
|---|---|---|---|
| १–५ | अथ | ९३ | ४३ |
| ६–१० | अष्टाङ्गुल | ९३-४ | ४३. |
| ११–२१ | भाण्ड | ९४-५ | ४३-४ |
| २२–२६ | जलपूर्ण | ९५-६ | ४४ |
| २७–३३ | ऊर्ध्वं | ९६-७ | ४४ |
| ३४–४१ | सुरसां | ९७-९ | ४४-५ |
| ४२–५० | वालुका | ९९-१०० | ४५ |
| ५१–५९ | चषकं | १००-१०१ | ४५-६ |
| ६०–६९ | मल्ल | १०१-२ | ४६ |
| ७०–८० | विधाय | १०२ | ४६-७ |
| ८१–९१ | खल्व | १०३-५ | ४७-८ |

दशमाध्याये।

| श्लो. सं. | प्रारम्भः | टीकापृष्ठं | मूलपृष्ठं |
|---|---|---|---|
| १–८ | मूषा | १०५ | ४८ |
| ९–१५ | दग्धा | १०६ | ४८ |
| १६–२८ | पाषाण | १०६-८ | ४८-९ |
| २९–३२ | तले | १०८ | ४९ |
| ३३–४९ | सत्त्वानां | १०८-११० | ४९-५० |
| ५०–५९ | रसादि | ११०-१ | ५० |
| ६०–६९ | पुटं | १११-२ | ५०-१ |
| ७०–७७ | सुवर्णं | ११२ | ५१ |
| ७८–९० | मूत्राणि | ११२-३ | ५१ |
| ९१–१०४ | पारावत | ११३-४ | ५२ |

एकादशाध्याये।

| श्लो. सं. | प्रारम्भः | टीकापृष्ठं | मूलपृष्ठं |
|---|---|---|---|
| १–१० | त्रुटिः | ११४ | ५२-३ |
| ११–१९ | अधुना | ११४-५ | ५३ |

| श्लो. सं. | प्रारम्भः | टीकापृष्ठं | मूलपृष्ठं |
|---|---|---|---|
| २०—२२ | तस्मात् | ११५ | ५३ |
| २३—३० | त्र्यूषणं | ११५-६ | ५३-४ |
| ३१—४० | ताम्रेण | ११६-७ | ५४ |
| ४१—४५ | सुष्टचम्चु | ११७-८ | ५४-५ |
| ४६—५३ | सर्पाक्षी | ११८-२२ | ५५ |
| ५४—७३ | पञ्च | १२२-४ | ५५-६ |
| ७४—८४ | वज्रादि | १२४-६ | ५६-७ |
| ८५—९५ | विष्णु | १२६-७ | ५७-८ |
| ९६—१०८ | त्रिफला | १२७-८ | ५८ |
| १०९—११८ | पलाश | १२८-९ | ५८-९ |
| ११९—१३२ | अथ | १२९-१३० | ५९-६० |

द्वादशाध्याये।

| श्लो. सं. | प्रारम्भः | टीकापृष्ठं | मूलपृष्ठं |
|---|---|---|---|
| १—१२ | ज्वरस्य | १३० | ६० |
| १३—२५ | विमर्दि | १३०—१ | ६०-१ |
| २६—३७ | पारदं | १३१ | ६१-२ |
| ३८—५० | रस | १३१-२ | ६२-३ |
| ५१—७१ | मेघ | १३२-३ | ६३-४ |
| ७१—९२ | वज्र | १३३ | ६४-५ |
| ९३—११५ | सूतं | १३३-४ | ६५-६ |
| १०६—११७ | शुद्धं | १३४-५ | ६६-७ |
| ११८-१३१ | गन्धका | १३५ | ६७-८ |
| १३२—१४५ | वङ्गं | १३५ | ६८ |
| १४६—१५६ | रस | १३५-६ | ६८-९ |

त्रयोदशाध्याये।

| श्लो. सं. | प्रारम्भः | टीकापृष्ठं | मूलपृष्ठं |
|---|---|---|---|
| १—१६ | कट्वम्ल | १३६ | ६९-७० |
| १७—२९ | सपटों | १३७ | ७० |
| ३०—४४ | शुद्ध | १३७ | ७१ |
| ४५—५८ | श्लेष्मो | १३७-८ | ७१-२ |

| श्लो. सं. | प्रारम्भः | टीकापृष्ठं | मूलपृष्ठं |
|---|---|---|---|
| ५९–९० | तारताम्र | १३८-९ | ७२-४ |
| | चतुर्दशाध्याये । | | |
| १–१८ | अग्निमान्द्यं | १३९ | ७४-५ |
| १९–४९ | शङ्खस्य | १३९-१४० | ७५-६ |
| ५०–७० | शङ्खस्य | १४०-४१ | ७६-७ |
| ७१–१०० | निष्कौ द्वौ | १४१ | ७७-८ |
| | पञ्चदशाध्याये । | | |
| १–२१ | गुदस्य | १४२ | ७९ |
| २२–४९ | अर्शोघ्नं | १४२ | ८०-१ |
| ५०–६५ | स्याद्रसं | १४३ | ८१ |
| ६६–८७ | वज्रकु( पाठ ) | १४३-४ | ८२-३ |
| | षोडशाध्याये । | | |
| १–२५ | रूक्षैः | १४४ | ८३-४ |
| २६–४१ | द्वौ भागौ | १४५ | ८४-५ |
| ४२–६४ | मलं | १४५ | ८५-६ |
| ६५–९४ | रसं | १४५-६ | ८६-८८ |
| ९५–१३२ | कपर्द | १४६-७ | ८८-९० |
| १३३–१६५ | गुल्वायो | १४७ | ९०-९२ |
| | सप्तदशाध्याये । | | |
| १–२६ | कटौ | १४८ | ९२-४ |
| २७–४७ | शोषः | १४८-९ | ९४-५ |
| ४८–७५ | वीर्यं | १४९-५० | ९५-६ |
| ७६–९८ | पलमात्रं | १५०-१ | ९६-७ |
| ९९–१४० | राजावर्तस्य | १५१ | ९७-९९ |
| | सप्तदशाध्यायपूराणिका । | | १५२-४ |
| | अष्टादशाध्याये । | | |
| १–२८ | अन्यै | १५४-५ | ९९-१०१ |
| २९–५१ | चूर्णं | १५५-६ | १०१-२ |
| ५२–७६ | भस्म | १५६ | १०२-३ |

| श्लो. सं. | प्रारम्भः | टीकापृष्ठं | मूलपृष्ठं |
|---|---|---|---|
| ७७—१०१ | विष्णु | १५६ | १०३-४ |
| १०२—१३२ | मृत | १५६ | १०४-६ |
| १३३—१६१ | भस्म | १५६-७ | १०६-७ |
| १६२—२०३ | रस | १५७ | १०७-९ |
| २०४—२२८ | अम्लो | १५७ | ११०-१११ |
| | अष्टादशाध्यायपूर्णिका। | | १५७-६३ |
| | **एकोनविंशाध्याये।** | | |
| १—३१ | उदरं | १६३ | १११-३ |
| ३२—६७ | खदिरं | १६४ | ११३-४ |
| ६८—११५ | एकैक | १६४ | ११४-७ |
| | एकोनविंशाध्यायपूर्णिका। | | १६४-८ |
| | **विंशाध्याये।** | | |
| १—२३७ | कान्त | १६८-९ | ११७-२९ |
| विंशाध्यायपूर्णिका | | १६९-७० | |
| एकविंशाध्याये पत्राणि | | १७९-८५ | १२९-३९ |
| १—१९६ | वातव्याधि | १७९-८५ | १२९-३९ |
| द्वाविंशाध्याये पत्राणि | | १७५-१९० | १३९-१४७ |
| त्रयोविंशाध्याये पत्राणि | | १९१-९५ | १४७-१५२ |
| चतुर्विंशाध्याये पत्राणि | | १९१-१८९ | १५२-१५७ |
| पञ्चविंशाध्याये पत्राणि | | १९९-२०२ | १५८-१६३ |
| षड्विंशाध्याये पत्राणि | | २०३-२०४ | १६३-१६६ |
| सप्तविंशाध्याये पत्राणि | | २०४-२१० | १६६-१७४ |
| अष्टाविंशाध्याये पत्राणि | | २१०-२१५ | १७४-१७९ |
| एकोनत्रिंशाध्याये पत्राणि | | २१५-२२१ | १७९-१८६ |
| त्रिंशाध्याये पत्राणि | | २२१-२२६ | १८६-१९२ |


इति पृष्ठाङ्कदर्शिका।

ॐ तत्सद्ब्रह्मणे नमः ।

# अथ रसरत्नसमुच्चयटीका ।

## प्रथमोऽध्यायः ।

यस्य ध्यानेन विविधं मम दुःखं विनश्यति ।
मोक्षज्ञानैकगुरवे शंभवे विभवे नमः ॥ १ ॥
क्षेत्रे परशुरामस्य कोंकणे विप्रवंशजः ।
नाम्ना महादेव इति खरे इत्युपनामकः ॥ २ ॥
वेदशास्त्रेषु पारंगोऽजानि ग्रामे गुहागरे ।
तत्सुतो वामनाख्यश्च वेदे शास्त्रे च कोविदः ॥ ३ ॥
अहं तस्माद्जनिषि तद्वृद्धियाबहुश्रमः ।
व्याख्यायते मयैतर्हि रसरत्नसमुच्चयः ॥ ४ ॥
विदित्वाऽस्य सुविज्ञाने हताशान् भिषजोऽधुना ।
दुर्बोधकारणं मन्ये वक्ष्यमाणैश्च हेतुभिः ॥ ५ ॥
संक्षेपोक्त्या पाठभेदैर्मन्दलेखककल्पितैः ।
सिद्धानां तन्त्रलोपाच्च येषां नामात्र दर्शितम् ॥ ६ ॥
तथौषधीनामधेयैः क्वचिद्व्युत्पत्तिसाधितैः ।
तत्तद्देशप्रसिद्धैश्च शब्दैः कोशविवर्जितैः ॥ ७ ॥
योगैर्दिव्यौषधीनां यत्पञ्चाङ्गपरिचायकम् ।
लभेत वसुमानेव बहुद्रव्यव्ययेन वै ॥ ८ ॥
सुनिर्मितोऽपि ग्रन्थोऽयं भिषग्भ्यो नातिरोचते ।
अज्ञेभ्योऽग्रे स्थापितं यद्रत्नं काचायते खलु ॥ ९ ॥
तस्मात्तेषां विबोधाय क्रियतेऽयं परिश्रमः ।
एतदुक्तक्रियाद्रव्यसंकेतरसयन्त्रकम् ॥ १० ॥
न जानेऽहं सविस्तारं [ सविस्तरं न जानेऽहं ] तथाऽपि मम भासते ।
यावत्तावत्प्रवक्ष्यामि नापराध्यामि तेन वै ॥ ११ ॥
शास्त्रं युक्तिं वृद्धवैद्यव्यवहारं च सुश्रुतम् ।
आप्तोक्तमनुसृत्यैवात्र वक्ष्यामि यथा तथा ॥ १२ ॥

इ[illegible] [illegible]रतखण्डे रसतन्त्रप्रणेतॄणां भैरवगोविन्दपूज्यपादनित्यनाथादीनां त-[illegible] स[illegible] [illegible]विधिवर्णितान्यपि धातुवादातिशयग्रन्थमिश्रितानि तदर्थकसंस्कारान्तर-[illegible] [illegible]नेनातिविस्तरं गृहीतानि मन्दमतीनामल्पकालेनाल्पश्रमेण च ग्रह-णाय नोपयु[illegible]न्ते । पूज्यपादग्रन्थे रसहृदये रससारं च चिकित्सार्थोपयोगिसिद्ध-

रसा अपि नात्यन्तं वर्णिताः । किंच तत्र यन्त्रकोष्ठिकामूषाणां च विभज्य कृतवर्गैः कृतं वर्णनं तु नास्त्येव । रावणप्रणीते त्वर्कादिवर्णनमेव प्राधान्येन । नागार्जुनतन्त्रं त्वत्यल्पमेव लोके चोपलभ्यते । साधारण्येन द्रव्यवाद एव तस्य निर्भरः । कामरत्नतन्त्रं नित्यनाथकृतं तथोड्डीशतन्त्रं च जारणमारणवशीकरणादिविचित्रक्रियामन्त्रादिभिर्द्रव्यवादैश्च प्रायः सर्वं पूरितम् । तस्मादेतदेव गम्यते तदानीं रसविद्याया रोगवारणोपयोगित्वेऽपि सुवर्णादिधातूत्पादन एव प्रायस्तामुपायुञ्जत । रोगवारणं तु चरकसुश्रुताद्युक्तक्रिययैव । अत एव तदा रोगनिदानक्रमानुरोधेन ते चिकित्साखण्डं नाकुर्वन् । वाग्भटावसरे तु लोकरक्षणार्थं लोकव्यवहारसिद्ध्यर्थं च सुवर्णमूल्यवर्धनाय वा तत्कालीनानां राज्ञामाज्ञयैव द्रव्योत्पादनव्यवहारो मन्थरमंशांशेन विलयमापद्यत । तदा रसरसायनरूपेण शैवी चिकित्सा, ओषध्यादिचूर्णकषायावलेहादिरूपा ब्राह्मी च साम्येनैव लोके प्रावर्तत । परं त्वेतदुभयाचिकित्साविषयकं सर्वमपि लोकप्रसिद्धं तन्त्रमव्यवस्थिताविषयमध्येतॄणां कष्टप्रदमिति विचार्याऽऽचार्योऽष्टाङ्गहृदयमिव सुव्यवस्थितं प्रतिरोगाचिकित्साखण्डोपहितामिमं ग्रन्थं च बबन्ध । सिद्धग्रन्थेभ्योऽत्यन्तोपयोगिनो द्रव्यपाठान् सिद्धरसरसायनादिपाठान् मूषादियन्त्रपरिभाषादिपाठांश्च सिद्धप्रोक्तवचनैरेव संगृह्य क्वचित्क्वचित्स्थले प्राचीनग्रन्थार्थानेव संगृह्य तदर्थकानि कानिचित्पद्यानि च स्वबुद्ध्यैव रचयित्वा यदत्र द्रव्यमात्रोपयोगिपरिभाषाध्याये खण्डनयिमप्याभिहितं तत्तु सांकेतिकशब्दमात्रज्ञानार्थमस्तु, इत्यभिप्रायेण । यदत्र रागसारणादिसंस्काराद्युपयुक्तमपि नाभिहितं तत्तु पूज्यपादादिग्रन्थेभ्योऽवधार्यमित्याशयः । एवं चेदं तन्त्रं सुव्यवस्थितपूर्णविषयमध्येतॄणां प्रियं समभूत् । एतद्ग्रन्थरचनापरिपाटीमेव योगरत्नाकरादिग्रन्थकारादयोऽनुचक्रुः । अथ सर्वविधचिकित्सासंग्रह एकत्र राशीकृतो लाघवं च लोकप्रियं भवतीति मत्वा तैश्चिकित्सितोभयं संगृहीतं रसशालापरिभाषादि च परित्यक्तं स्वग्रन्थेष्वित्यन्यदेतत् । अस्मिन्ग्रथे स्थानत्रयमेव विहितं सूत्रं चिकित्सा कल्पश्चेति । तत्र सूत्रस्थाने वक्ष्यमाणसर्वविषयसंग्रहः । कथमस्मिन्ग्रन्थे पारदासिद्धिः संस्कारसिद्धपारदकृतचिकित्सा च विषयः । तत्र पारदसिद्ध्युपयोगि यत्संस्कृतरसोपरससाधारणरसमणिलोहमन्त्रदीक्षादिपारदसंस्कारान्तं तत्सर्वं सिद्धरसबन्धाश्च चिकित्सोपयोगिन इत्येतत्सर्वं समासतः संगृहीतं सूत्रे मणिगणा इव । अत इदं सूत्रस्थानं नाम । ततो द्वादशाध्यायमारभ्य कल्पस्थानपर्यन्तं सर्वं चिकित्सास्थानं रोगजराशुक्रक्षयप्रतीकारस्यैव हि तेन विहितत्वात् । ततः परं कल्पस्थानं नाम रसासिद्धिविधिस्थानम् । इत्थं च स्थानत्रयात्मकोऽयं ग्रन्थः । तत्र सिद्धः पारदो द्विविधः । रोगवारणमात्रोपयोगिसिद्धिविशिष्टो मूर्छितो रोगजराशुक्रक्षयवारणपूर्वकचिरस्थायिदृढकायसिद्धिकरश्च । तत्राऽऽद्य एकादशाध्यायोक्तनिर्जीवबन्धान्तानामन्यतमबन्धत्वं प्राप्तो बोद्धव्यः । स च बद्धो यत्नविशेषेणास्थितो भवतीति मूर्छितशब्देन संग्राह्यः । अनन्तरोक्तबन्धान्यतमबन्धत्वं प्राप्तो द्वितीयो भवति । तत्र प्रथमोऽष्टसंस्कारैरेव सिध्यति ।

द्वितीयश्च तत्संस्कारसहितजारणादिसंस्कारैः सिध्यति । अयं विषयविभागश्चात्र सूचित आचार्येणैव सूत्रस्थानेऽष्टसंस्कारानव पठित्वा चिकित्सास्थानमुक्ताबद्धपारदभस्मकल्पे जारणासंस्कारं कथयता । अत्र रसशब्दो मूर्छितरसवाचकः, क्वचिद्द्विविधसिद्धरसवाचकः, क्वचिदभ्रकादिमहारसवाचकः केवलपारदवाचको वा प्रयुक्तो भवति । पञ्चमाध्याये मारितं लोहं विविधं प्रायो मूर्छितरसप्रयोगार्थमुपदिष्टं न तु स्वातन्त्र्येण भक्षणार्थम् । पारदसंयोगरहितस्य तस्य सदोषत्वात् । लोहकल्पोक्तं तु तत्स्वातन्त्र्येण भक्षणार्थं रसायनवाजीकरणार्थं जारणे बीजीभावार्थं चार्हति । अत एव तस्य मात्राजीर्णाजीर्णलक्षणतत्परिहारपथ्यादि लोहकल्प एवोपदिष्टम् । अत्र ग्रन्थे विषयसंग्रहो द्विविधो दृश्यते । सिद्धोक्तपाठसंग्रहोऽर्थसंग्रहश्च । तत्र पाठसंग्रह आर्षत्वं प्रयोगाणां क्वचिद्दृश्यते । स्वकल्पितपद्यैरर्थसंग्रहात्मके त्रिंशाध्यायादौ तु न तथेति न विस्मेतव्यमाचार्यग्रन्थे सदोषप्रयोगं दृष्ट्वा । किंचात्र पाठा एकस्थाने पुस्तकभेदेनानेकविधाः । क्वचित्पुनरुक्तपाठा विक्षिप्तपाठा गलितपाठाश्च बहवो दृश्यन्ते । तत्रानेकपाठस्थले युक्ततम एव पाठो व्याख्यास्यते । पुनरुक्तपाठानां वर्णनं पुनः पुनर्न कृतम् । विक्षिप्तपाठास्तु योग्यस्थाने संयोज्य तत्रैव व्याख्याताः । गलितपाठस्थले सिद्धग्रन्थेभ्यः पद्यानि संगृह्य संधाय च व्याख्यातम् । यत्र यत्र कोशादिप्रामाण्यरहिताः शब्दा देशभाषोक्तव्यवहारेण प्रयुक्ता इव दृश्यन्ते तत्र लौकिकभाषायां तत्समवर्णानुपूर्वीविशिष्टमोषधीशब्दमन्विष्य प्रयोगगुणानुकूलगुणं कोशादितोऽवगम्य स शब्दः पर्यायत्वेन प्रयुक्तः । यथाऽऽकुलीशब्दो मूले प्रयुक्तः । तत्राल्पशब्द एव लोकभाषायामाकुलीशब्देन व्यवहृत इति भाति । एवंविधाः शब्दा बहवो दृश्यन्ते । केषांचिद्वाच्याः पदार्था एव लोके नोपलभ्यन्ते व्यवहारलुप्ता एव प्रायशो भान्ति । यथा चपलकंकुष्टजीवनीयगणमूलीविषप्रभृतयः । महौषध्योऽपि बह्व्यो नोपलभ्यन्ते । तत्र गत्यन्तराभावेन यथास्थितं तादृशनामैव व्याख्यायां पठितम् । यत्र तु पर्यायमात्रोपलब्धिस्तत्र पर्यायं दत्त्वा व्याख्यातम् ।

अथ समाप्तिकामो मङ्गलमाचरेतेति वचनाद्ध्यातमिष्टदेवतानमस्काररूपं मङ्गलं शिष्यशिक्षार्थं ग्रन्थकारो ग्रन्थादौ श्लोकरूपेण निबध्नाति—यस्येति । यस्य करुणावीक्षासुधासिन्धुना करुणया वीक्षणं दुःखितस्वभक्तान्प्रति यदवलोकनं तच्च सार्द्रं भवति । स एव सुधासिन्धुरमृतसमुद्रस्तेन भक्तानां प्रभवप्रसंहृतिजरारागादिरोगाः क्षणाच्छान्तिं यान्ति । प्रभवो जन्म । प्रसंहृतिर्मरणम् । संसार इत्यर्थः । रागादीत्यत्राऽऽदिशब्देन क्रोधादिपरिग्रहः । जगत्प्रधानभिषजे तस्मै परस्मै नमो नमोऽस्तु । कथंभूतेन—करुणावीक्षासुधासिन्धुना । आनन्दभवेन भक्तकृतपरिचर्याजन्यो य आनन्दस्तद्भवेन तज्जन्येन । अथवा भवत्यस्माद्भवः कारणम् । आनन्दस्य भव आनन्दभवः । तेन भक्तानन्दकारणेनेत्यर्थः । पुनः कथंभूतेन । मङ्गलकलासंभावितेन । मङ्गलानि भक्तानां कल्याणानि तेषां कला अंशा मङ्गलान्येव

कला इत्यवधारणापूर्वकः कर्मधारयो वा । ताभिः संभावितेन तर्कितेनास्माकं कल्याणानि संप्रति भवन्ति, अस्मादुन्नीयतेऽस्मदुपरि भगवत्करुणार्द्रदृष्टिः समजनीति भावः । तथा स्फुरद्धाम्ना । स्फुरत्तेजसा । तथा सिद्धरसामृतेन । सिद्धिं गतो रसः पारदस्तदेवामृतं यस्मात्तादृशेन । ईशकृपां विना पारदसिद्धिर्नैव भवतीति भावः । अथवा सिद्धिं :साक्षात्कृतो रस आत्मा तदेवामृतं यस्मात्तादृशेन । ईशकृपयवाऽऽत्मसाक्षात्कारः । 'रसो वै सः' इति श्रुत्या प्रतिपादितं रसशब्दस्याऽऽत्मवाचकत्वम् । परस्मा इत्यत्र परशब्देन परमशिवो ग्राह्यः । यः परः स महेश्वर इति श्रुतेः । अत्र भक्ता द्विविधा ग्राह्याः । मोक्षप्राप्तिं कामयमाना आरोग्यं कामयमानाश्च । अत्राऽऽचार्येण युक्त्याऽनुबन्धचतुष्टयं प्रदर्शितम् । तथा हि– चिरस्थायिदृढकायाभिलाषिणोऽधिकारिणः । प्रतिपाद्यो विषयश्च पारदसिद्धिः । तस्य ग्रन्थस्य च प्रतिपाद्यप्रतिपादकभावः संबन्धः । प्रयोजनं च कायसिद्धिरेव । मोक्षेच्छूनामपि तस्या अपेक्षितत्वादिति भावः । तादृक्कायसिद्ध्या तत्साध्या धर्मार्थकामा अपि सुलभाः । एवं चेदं तन्त्रं परम्परया चतुर्विधपुरुषार्थसिध्युपयोगीति बोध्यम् ।

इदानीं चात्र प्रेक्षावतां प्रवृत्त्यर्थं स्वकृतावाप्तोक्तिमूलकत्वमाह—आदिम इति । आदिमः प्रथमः । 'प्रथमो दैव्यो भिषक्' इति श्रुत्या तु प्रधानभिषक्त्वमाम्नातम् । शिवावतारो भैरवाख्यो रसार्णवतन्त्रकर्ता । लङ्केशो रावणः । व्याडिः कश्चन ऋषिः । यस्य कारिकाः संगृह्य भगवान्पतञ्जलिः पाणिनिसूत्रे भाष्यं रचयामासेति किल श्रूयते । अग्रे निर्दिष्टौ भैरवमहादेवौ तु न भगवतोऽवतारपुरुषौ किंतु तन्नामानौ वार्तिकौ ॥ १ ॥

**मूलम्**—आदिम० ऋष्यशृङ्गः ॥ ७ ॥ **टीका**—अत्र केषांचित्तन्त्राणि त्रुटितांशानि दृश्यन्ते । तेषां तु ग्रन्थसंगतिदर्शने नोपयोगः । असंपूर्णत्वेन पूर्वापरग्रन्थालाभे विषयाकलनाभावात् ॥ ७ ॥

**मूलम्**—एतेषां० रत्नसमुच्चयः ॥ ८ ॥ **टीका**--चिकित्सार्थोपयोगिनाम् । सिद्धानां चिकित्सायामनुभूतफलानां संग्रहो रसरत्नसमुच्चयाख्यः सिंहगुप्तसूनुना मया क्रियत इत्यन्वयः । अत्र रसानां रत्नवल्लोकोपयोगित्वेनातिप्रियत्वात्, महामूल्यत्वाच्च रत्नशब्देन विशेषितम् । तादृशरसरत्नानां समुच्चयः संगृह्य राशीकरणं यत्र तादृशो ग्रन्थः । अत्र चिकित्सार्थोपयोगिनामिति रसविशेषणेन द्रव्योपयोगिनां व्यावृत्तिः कृता । तेषां हि प्रायो वङ्गादिविशिष्टत्वेन कायसिद्धावनुपयोगात् । एवं चेदं तन्त्रं समूलमादरेणाध्येतव्यं न तु कथंचन मीमांस्यं सत्यमेतद्भवेन्न वेति ॥ ८ ॥

**मूलम्**—रसोपरसलोहानि० करणं च प्रवक्ष्यते ॥ १० ॥ **टीका**—अत्र ग्रन्थे वक्ष्यमाणान्रससिद्ध्युपयोगिविषयानाह--रसोपरसलोहानीति । रसशब्देनात्र पारदो महारसा अभ्रकादयश्च ग्राह्याः । रससमीपे तद्बन्धनार्थमुपयुज्यन्ते । अभ्रकादिरसयोगोत्तरं वोपयुज्यन्ते । बिडादिरूपेणेति व्युत्पत्त्योपरसशब्देनात्र पारिभाषिता उपरसा गन्धकादयः कपिल्लादयः साधारणरसा मणयश्च ग्राह्याः । यन्त्रादिकरणानि चेति । यन्त्रं पारदादेरेकत्र स्थिरीकरणसाधनम् ।

तच्च दोलायन्त्रादि बोध्यम् । अत्राऽऽदिशब्देन मूषाकोष्ठीपुटतत्साधनद्रव्याणां परिग्रहः कार्यः । तेषामपि रससिद्धिसाधकत्वात् । साधकं हि करणमुच्यते । शुद्ध्यर्थमपि लोहानामिति । लोहशब्देनात्र पारदस्यापि ग्रहणम् । तस्य हि रसलोहवाच्यत्वात् । तेषां लोहानां शुद्ध्यर्थं तन्त्रादिकरणानीति । तन्त्रमितिकर्तव्यता । सा चात्र स्वेदनमर्दनादिरूपा धमनादिनानारूपा च ग्राह्या । अत्रत्यादिशब्देनावशिष्टमन्त्रग्रहणदीक्षारसशालादि सर्वं बोध्यम् । तथा शुद्ध्यादि च प्रवक्ष्यते । तच्च न प्रत्येकं रसोपरसलोहादेः किंतु यथासंभवम् । तेनाभ्रकं विनाऽन्येषां रसोपरसानां द्रुत्यकथनेऽपि, अग्निजारस्य शुद्ध्यकथनेऽपि साधारणरसानां द्रुत्यकथनेऽपि रत्नानां च प्रायः सत्त्वाकथनेऽपि न दोषः ॥ १० ॥

क्रमश्चात्राविवक्षितः । तेदतत्सर्वं यस्य संस्कारार्थं गुणप्रकाशार्थं च भवति स संस्कृतः पारदः किंगुणः स्यात् । तस्य च प्रभावः कः कति भेदाश्चेति जिज्ञासायामाह—**अस्तीति** ।

**मूलम्**—अस्ति नीहार० तारकितं नभ इति ॥ १८ ॥ **टीका**—नीहारनिलयो हिमालयः । एतन्नामोच्चारणेनैवास्य सोमगुणभूयिष्ठत्वं प्रदर्शितम् । ओषधीश एव हि सोमः । स च बलाधिष्ठानमतस्तत्रत्या ओषधयोऽपि विपुलायुर्बलकराः सर्वदा पथ्याश्च भवन्ति । अत एवाऽऽह ग्रन्थकारोऽयमष्टाङ्गहृदये—सौम्यं पथ्यं च तत्राऽऽद्यमिति । आद्यं हिमालयोत्पन्नम् । पथ्यत्वादेवात्र तपोविघ्नरोगाभावेन तपःफलसिद्धिः । अत एवात्रानुपदं वक्ष्यति—निर्मीलितदृश इति । महानुच्चः । उच्चत्वमेवाऽऽह—उत्तुङ्गेति । मेघमण्डलादप्युन्नत इत्यर्थः । तत्रोत्प्रेक्षते—विश्रामायेति । अम्बुमुचां मेघानां यच्छरदितिविशेषणं तद्धिमश्वेतधातुजलाद्व्याप्तदेहसाम्याय । एतादृगुच्चश्वेतमहापदार्थस्य भूमिस्थ(ष्ठ)स्याभावादुत्प्रेक्षायां मेघगणपर्यन्तानुधावनम् । अनयोत्प्रेक्षया दिने तस्योच्चपर्वतस्य साम्यवर्णनेऽपि रात्रिस्थस्य मुहुर्मुहुःस्फुरदग्निविद्युद्विलासनिभाभिर्ज्वलदोषधीमणिभाभिर्व्याप्तस्य तस्य न साम्यवर्णनं स्यादित्यभिप्रायेण पुनः प्रकारान्तरेणोत्प्रेक्षते—राशिरिति । फणाफलकरोचिषां फणाफलकस्थमणिरोचिषामित्यर्थः । द्वितीयोत्प्रेक्षाबीजमेवाऽऽह—ज्वलदोषधय इति । ज्वलन्त्य ओषधयो गुल्मज्योतिस्तृणज्योतिर्वृक्षज्योतिर्नीलज्योतिषा(रा)द्या यासु तास्तथोक्ताः । उक्तं हि रसार्णवे—'गुल्मज्योतिस्तृणज्योतिर्वृक्षज्योतिरिति त्रयम् । दृश्यते ज्वालवद्रात्रौ सूतं बध्नाति पूर्ववत्' इति । नितम्बः कटकः । गुहाधिगतः । गुहाख्येन पुत्रेणाधिगत उपाश्लिष्ट इति शिवविशेषणार्थः । अयं तु गुहा देवखातबिलानि यस्मिंस्तथोक्तः । अवाङ्मनसगोचरम् । 'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह' इति श्रुतेः । निरीक्षन्ते । प्रपातस्थान इति शेषः । तत्रैव शीकराणामाकाशे तथोद्गमनसंभवात् । भागीरथीशीकरोपाधिकमेतादृङ्‌ नभोदर्शनमत्र भवति । अन्यत्र पृथिव्यां तु तथा दर्शनं श्वेतबृहत्याख्यलक्ष्मणादिमहौषधीधारणेनैव । तत्स्थानस्य देवनिवासभूमित्वाद्यक्षा इत्युक्तम् ॥ १८ ॥

**मूलम्**—नीहार० गौरीपरिणयोत्सवमिति । प्रयाति परमं पदमिति ॥ २२ ॥

**टीका**—नीहारेति । गौरीपरिणयोत्सवमिति । भक्त्युद्रेकः प्रदर्शितोऽनेन वाक्येन । चकास्ति तत्रेति । अकृत्रिमदिव्यसंपत्त्या विभूषिते निराकुले तपःसाधके तस्मिन्देश आदिदेवो जगत्कारणो महेश्वरश्चकास्ति शोभते । यस्मान्महारसः पारदो जातः प्रादुर्भूतः । किमर्थम् । रसात्मना कुमारतरुणवृद्धमूर्तिबन्धादिरसरूपेण जगद्दैन्यगदाकुलं गत्वरस्वभावं भुवनं रक्षितुम् । एवं च जगद्रक्षणार्थमेव रसावतार इति भावः । पारददर्शनफलमाह—शताश्वमेधेनेति । संप्रति पञ्चविधायास्तत्पूजायाः क्रमेण पृथक्फलमाह—हन्तीति । अभिषेकः स्नानम् । सुगन्ध( न्धि )-पिष्टसूतेनेति । सुगन्धिद्रव्येण चन्दनादिना सह पिष्टो मर्दितो यः सूतस्तेन । इयं जारणात्मिका स्पर्शनात्मिका च पूजा ज्ञेया । तथा चोक्तं रसेन्द्रसारसंग्रहे—'चन्दनागुरुकर्पूरकुङ्कुमान्तर्गतो रसः । मूर्छितः शिवपूजा सा शिवसांनिध्यसिद्धये ' इति । पूर्वजन्मेति । अत एव तेन कुष्ठादिनाशः । त्रुटिमात्रं त्रुटिशब्दोऽत्रात्यल्पवाची । परिजारयेत् तद्ग्रासं दत्त्वा तप्तखल्वे संमर्द्य गर्भद्रुताभ्रसत्त्वं पारदं कच्छपादियन्त्रे बिडयोगेन जारयेदित्यर्थः । तथा च वक्ष्यति परिभाषाध्याये—' द्रुतग्रासपरीणामो बिडयन्त्रादियोगतः । जारणेत्युच्यते तस्याः प्रकाराः सन्ति कोटिशः ' इति । शतक्रतुफलमिति । फलोत्कर्षबोधकमिदं वचनम् । अतः शतक्रतुजन्यं किंतु महत्फलं शतक्रतुफलसममेवाऽऽप्नोतीत्यर्थः । अन्यथा महाकष्टप्रदाञ्शतं क्रतून् कोऽपि न कुर्यादिति भावः । यावत्कल्पविकल्पनेति । यस्मिन्कल्पे स निन्दको वर्तते तत्कल्पसमाप्तिपर्यन्तमित्यर्थः । परात्परम् । अदृष्टविग्रहश्चिन्मयो महेश्वरः परः । तस्मात्परं दृष्टविग्रहं महेश्वरांशरूपमित्यर्थः । पञ्चभूतात्मकस्य तस्य व्यापित्वात् । पूजादौ कर्मणि तद्ध्यानं दुष्करमित्याशङ्क्य विचित्रमेव ध्यानमाह । संकल्परूपमेवात्र ध्यानं न तदतिरिक्तमिति भावः । सिद्धे रस इति ॥ ३३ ॥

**मूलम्**--मूर्छित्वा हरति० निर्जरामरणाम् ॥ ३६ ॥ **टीका** । पारदे निरतिशयकारुण्यं दर्शयति—मूर्छित्वेति । सपाकं मूर्छित्वेत्यर्थः । गालनपातनाव्यतिरेकेण गगनहेमादिग्रासपूर्वकपूर्वावस्थानापन्नत्वं मूर्छितत्वम् । अत्र ग्रासदानं च वैकल्पिकम् । तथा मूर्छितो भूत्वा रुजं हरति । मूर्छितस्य लक्षणं ग्रन्थान्तरे चोक्तम्—' कज्जलाभो यदा सूतो विहाय स्वीयचापलम् । मूर्छितः स तु विज्ञेयः ' इति । मूर्छितस्यावान्तरभेदा एव पर्पटीभस्मरससिन्दूरादिकुपीस्थरसाश्च निर्जीवबन्धान्ता वक्ष्यमाणबन्धा बोध्याः । बन्धनं सुशुद्धस्याभ्रकसत्त्वहेमादिजारणपूर्वकं निश्चलाग्निसहत्वं बद्धत्वम् । ते च बन्धा बीजबन्धादयो वक्ष्यमाणाः । तादृशं बन्धनमनुभूय मुक्तिदो भवति । तस्य सेवनाद्दृढकायस्य मुमुक्षोः समाधियोगाभ्यासेन जीवन्मुक्तिः सुलभैवेति भावः । तथा स्वयं मृतो भूत्वा जारणया बन्धनपूर्वकं निरुत्थितभस्मरूपो भूत्वा तत्सेविनं नरममरी करोति । चिरंजीविनं करोतीत्यर्थः । मूर्छितरसभक्षणेन साध्यदुष्कर्मजव्याधिनाश इवासाध्यतादृक्व्याधिनाशोऽपि भवतीत्याह--सुरगुर्विति । मुमुक्षुभिरिवाऽऽयुष्कामैरपि सेव्योऽयमित्य-

भिप्रायेण रसबन्धं स्तुवन्नाह—रसबन्ध एवेति । यस्य रसबन्धस्याऽऽरम्भकाल एव साधकस्य हृदीति करुणा जायते । कथंभूता करुणा । सेत्स्यतीति । आत्मीयवर्गमात्रस्य जरामरणरहितत्वकरणं तूपायान्तरसाध्यं क्षुद्रं कर्मेति मत्वा जगद्विषयिणी करुणा जायते । तस्माज्जगद्रक्षणोपायानां मध्ये रसबन्धोपाय एव धन्यः प्रशस्ततमः ॥ ३६ ॥

ननु सन्त्येव बहूनि काष्ठौषध्यादिसाध्यानि रसायनानि ऋषिप्रणीतग्रन्थेषु । तैश्च वयं जरामरणरहिता भूत्वैहिकसुखं धनफलभूतसुखेन भुञ्जीमहीति नार्थो रसबन्धेन भस्मादिरूपेणेत्याशङ्क्य मोक्षरूपानित्यसुखार्थिभी रस एव सेव्यो न तानि रसायनानीत्याह—सुकृतफलमिति।

**मूलम्**—सुकृतफलं ताव० लीयते सूते ॥ ४१ ॥ **टीका**—सत्कुले जन्म तथोत्पन्नस्योदारा बुद्धिश्च पूर्वजन्मार्जितसुकर्मातिरिक्तोपायेन स्वाधीनेन न लभ्यते । किंतु सुकृतस्यैवैतत्फलम् । विशेषणेन बुद्ध्युत्कर्षमानमाह—सकलमहीतलेति । सकलमहीतलं यस्यास्तुलायां साम्यकरणे फलरूपं जेयरूपं भवेत् । सकलमहीतलं जेतुं समर्था इत्यर्थः । तादृश्यपि सा नोपेक्षावती किंतु तस्या व्यापारेण भूतलं जगद्विनयग्राहि भवेत् । उभयमेतत्पराधीनमिति सुकृतफलशब्देन सूचितम् । तदपि यथाकथंचिद्दैववशाल्लब्धमपि तत्फलं सर्वमनित्यमित्याह—भूतलविधेयताया इति । अस्थिरस्वभावत्वम् । स्वव्यापके लयं क्रमेण दर्शयति—काष्ठौषध्य इति । ताश्च कुमार्यादय एव विशिष्टा ग्राह्या न सर्वाः । सर्वासां हि नागप्रवेशासंभवात् । किंतु यद्यत्काष्ठौषधीरूपं चिञ्चाश्वत्थापामार्गदाडिमार्जुनादिनागशरीरमध्येऽभिव्याप्य नागशरीरलीनं मलमपाकर्तुं क्षाररसादिरूपेणान्तः प्रविशति । पारदशरीर एकीभूतं च नागं पृथक्करोति । उत्प्लवनगतिं च कुण्ठयति । लयनिबन्धन एव नागेऽवयवविश्लेषो रूपान्तरं च । सर्वावयवश एकीभावोऽत्र लयशब्दार्थः । स च सबाह्याभ्यन्तराभिव्याप्तिकरसंयोगविशेषेणैव प्रायः संभवति । पारदे तु संयोगसपाकमूर्छनाजारणाविधिसंस्कृते क्रमेण संयोगतादात्म्यसमवायान्यतमसंबन्धेन । भेदसहिष्णुरभेदस्तादात्म्यमिति वैयाकरणाः । निर्मलनागस्य समानगुणं वङ्गम् । अत एव वज्रमूषायामुभयं दत्त्वा यदा द्रुतं स्यात्तदा माक्षिकं किंचिद्दत्त्वा धमनेन नागं वङ्गे लीनं भवति । वङ्गस्य व्यापके ताम्रे लयस्त्वित्थम् । मूषायां द्वयं कृत्वा धमित्वा बीजावर्तकाले माक्षिकचूर्णं टङ्कणं चावाप्य पुनर्धमनेन द्रुतमेकीभूतं कांस्यं स्यात् । वङ्गं शुल्ब इत्यत्र वङ्गपदं तीक्ष्णस्य कान्तस्योपलक्षकम् । तयोरपि शुल्बेऽन्तर्भावो भवति । शुल्बं तीक्ष्णं च महामूषायां धृत्वा चिरं धमित्वा शशास्थिमाक्षिकचूर्णं बीजावर्तात्प्रथममवाप्य पुनर्धमनेन वरलोहकं स्यात् । एवमेव कान्तलयो बोध्यः । षोडशभागे तारे व्यापके द्वादशभागं ताम्रं दत्त्वा मूषायां प्रक्षिप्य माक्षिकं टङ्कणं दत्त्वा धमनेन द्रुतमेकीभूतं चन्द्रार्कं स्यात् । रजतव्यापकस्वर्णयोरेकत्वं भवतीति प्रसिद्धमेव । स्वर्णं च ग्रासविधिना कवलितगगने सूते लीयते जीर्णं भवति ।

रसोपरसमणीनां यथासंभवं सत्त्वद्रुत्यादिलयो जारणादिसंस्कारेण भवत्येव । एवं चोक्तरीत्या मूलिकाकाष्ठपत्रत्वक्फलपुष्पसर्वरसोपरसमणिलोहादीनां पारदे लयेनास्थिरस्वभावत्वं सिद्धम् । अत्र यासामोषधीनां नागे न लयस्तासां धात्वन्तरे लयः शास्त्रे द्रष्टव्यः । लोहादिषु व्यापकेषु व्याप्यस्य मित्रत्वेन लयो दीर्घकालावस्थायिषु धातुषु स्वल्पकालावस्थायिनो लयो भवति । अत्र लोहानामरिवर्गीया एव रसादयः । अतो यथासंभवं तेष्वपि लोहानां लयो वेद्यः । यथा तुत्थसहितं नागं वङ्गं वा मूषायां निक्षिप्य टङ्कणं दत्त्वा धमनेन नागवङ्गयोर्लयो भवति । अधिकधमनेन तुत्थनाशः स्यादिति त्वन्यदेव । एवमेव लोहस्यापि तुत्थे लयो वेद्यः । रजतमाक्षिक उक्तरीत्यैव ताम्रलयः । स्वर्णमाक्षिके रजतलयश्च वेद्यः । हिङ्गुले तु स्वर्णरजतताम्रलोहानामपि लयो बोध्यः । रसेषु लोहादिभ्यो विशेषस्त्वित्थं बोध्यः । सुवर्णादयो लयं कृत्वा तिष्ठन्ति । रसादयस्तु प्रायो नश्यन्त्येवेति । तुत्थादिषु प्रतिपादितो लयस्तु शास्त्रेऽनुपदिष्टोऽपि ताम्रादिजत्वोक्त्याऽवगम्यते । उदाहृतं च रावणेन 'स्वर्णजं स्वर्णमाक्षिकं तारजं तारमाक्षिकम् । तुत्थं ताम्रभवं ज्ञेयं कषको वङ्गसंभवः । रीतिश्च जसदोद्भूता सिन्दूरो नागसंभवः । शिलाजत्वद्रिसंभूतमेते सप्तोपधातवः ' इति ॥४१॥

**मूलम्**—अमृतत्वं हि० गोचरत्वम् ॥ ४७ ॥ **टीका**—अमृतत्वमिति । अमृतत्वं जीवन्मुक्तत्वम् । भजन्ते हरमूर्तौ लीना योगिनः । तद्वद्धेमादयोऽपि जीर्णाभ्रके पारदे लीनाः सन्तोऽमृतत्वं नित्यत्वं सुधारूपत्वं च भजन्ते । नित्याः सुधासमगुणाश्च भवन्तीत्यर्थः । निगमयति—एकोऽसाविति । महाप्रलयकाले सर्वसत्त्वानां स्वव्यापकेषु लयक्रमद्वारा यथा परमात्मनि सततं नित्यं लयस्तद्वदयमपि हेमादिलयो बोध्यः । योगिलयोपमया मर्यादितकालावस्थायी कृत्रिमो लयः सूचितः । परमात्मनि सत्त्वलयोपमया हेमादीनामेकत्वविशिष्टपारदत्वेनैवावस्थितिः सूचिता । 'एकमेवाद्वितीयं ब्रह्म' इति श्रुत्या परमात्मन एकत्वमाम्नातम् । हरस्याष्टमूर्तित्वेन तदुपमयोक्तधर्मेणावस्थितिः सूचयितुं न पार्यते । अतः परमात्मघटितोपमोदाहृता । अत एवाऽऽह—एकोऽसाविति । न पारदत्वातिरिक्तधर्मेणावच्छिन्नः । तादृगसौ बद्धः सञ्शरीरं स्थिरं कुरुते । एवं च रसबन्ध एव धन्यो नान्ये भावाः । ननु हरमूर्तौ लीनानामपि योगिनां मोक्षः कथं स्यात् । 'ज्ञानादेव तु कैवल्यम्' इत्युक्तेः । इत्याशङ्कयाभ्यासेन तदपि सुलभं तेषामित्याह—स्थिरदेह इति । अष्टगुणोपेतमणिमाद्यष्टसिद्ध्युपेतम् । ननु माऽस्तु कायसिद्धिः । विरक्तिसाधनेनैवास्माकं मोक्षः प्राप्नुयात् । 'त्यागेनैक अमृतत्वमानशुः' इति श्रुतेरित्याशङ्कयाऽऽह—एकांशेनेति । एकांशेनैकपादेनावष्टभ्य विवर्तोपादानात्मकमायारूपं भूत्वा त्रिभिः पादैरवशिष्टं परं परोक्षं ज्योतिःस्वरूपमतिमहद् ब्रह्म न सुलभम् । एवं चोक्तश्रुतिर्विरक्तिरूपं मुक्तिरूपसाधनं प्राहेति भावः । ननु मा[illegible] [illegible] जपाद्यप्यात्मसाक्षात्कारजनकं भविष्यतीत्याशङ्कयाऽऽह—नामापीति । देहसिद्धिमिति

हेतुगर्भं विशेषणम् । आत्मन इति पदाध्याहारं कृत्वा तत्र योज्यम् । देहेन सिद्धिर्यस्य तथोक्तस्याऽऽत्मनो नामापि शरीरं विना को नाम गृह्णीयात् । तस्यापि नीरुक्शरीरापेक्षाऽस्त्येवेति भावः । अपिशब्दलभ्ये तत्साक्षात्कारदौर्लभ्ये हेतुमाह—यद्योगगम्यमिति । चित्तवृत्तिनिरोधाभ्यासपूर्वकध्यानेनैव गम्यं प्राप्यम् । न नामग्रहणमात्रेण । नामापि योगसिद्धेरित्यपि पाठो दृश्यते । स तु सुगम एव । तत्रान्वयस्तु—तत्त्वं यद्योगगम्यं यस्या योगसिद्धेर्योगेन संबन्धेन गम्यं तस्या योगसिद्धेर्नामापि दृढशरीरं विना को नाम गृह्णीयात् । न कोऽपि । मनसोऽपि न गोचरं जपाद्यासक्तमनसोऽप्यविषयम् ॥ ४७ ॥

**मूलम्**—यज्ञाद्दानात्० इहैव चाऽऽप्नोति ॥ ५१ ॥ **टीका**—उपायान्तरं त्वपर्याप्तमेवाऽऽत्मसाक्षात्कार इत्याह—यज्ञादिति । यज्ञादेरपि तत्त्वमगोचरमिति पूर्वत्रान्वयः । अत्यन्तभूयसी, अतिप्रभूता । अनेन तु पञ्चकोशादिसंविवित्तिव्यावृत्तिः कृता । याऽऽत्मसंविवित्तिः सा योगादेव भवति । परं ज्योतिः परमशिवाख्यमुन्मीलति साक्षात्कारविषयं भवतीत्यर्थः । उत्सन्नकर्मबन्धः । उत्सन्नो ध्वस्तः कर्मजः पूर्वजन्मनि, एतज्जन्मनि च कृतं यत्कर्म तज्जो यो बन्धः संसाराख्यो यस्य तथोक्तः सन्निहैव जन्मनि ब्रह्मत्वं प्राप्नोति । ब्रह्मैवाहं न संसारीत्यपरोक्षानुभूतिग्रन्थोक्तभावनयोपरिनिर्दिष्टभावनया चाहंकारविनाशेन कर्मबन्धनाशो युज्यत एव ॥ ५१ ॥

**मूलम्**—रागद्वेष० हरगौरीसृष्टिसंयोगात् ॥ ६० ॥ **टीका**—संप्रति ब्रह्मानुभवचिह्नमाह—रागेति । सर्वत्र पुत्रमित्रशत्र्वादिषु निर्गत आत्मीयानात्मीयविशेषो येभ्यस्ते तथोक्ताः । सर्वत्र समबुद्धय इत्यर्थः । कथमिति । प्रत्यक्षं हि परोक्षस्य द्वारं पारदश्च प्रत्यक्षः । सेवितस्य तं स्वानुग्रहं विना परोक्षस्य महेश्वरस्य कथं नाम प्राप्तिः स्यादिति भावः । वार्धक्य एव प्रायो विरक्तिस्तदा शरीरपाटवं तु रससेवाधीनमेवेत्याह—यज्जयेति । बाल इति । ननु वृद्धावस्थायां विरक्तस्य वासनाक्षयेण निर्मलान्तःकरणस्याऽऽरब्धदेहनाशोत्तरं संसाराभाव एव । तदर्थं नास्ति रससेवापेक्षेत्याशङ्क्य देहावसानकाले दोषाकुलितचित्तस्य विक्षेपभयादिहैव मोक्षः संपाद्यस्तदर्थं यत्नोऽपि कार्य एवेत्याह—अस्मिन्नेवेति । उपसंहरति—तस्मादिति । हरगौरीसृष्टिसंयोगादिति । हरसृष्टिः पारदः । गौरीसृष्टिर्गन्धकः । अभ्रकमित्यपि केचित् ॥ ६० ॥

**मूलम्**—शैलेऽस्मिन्० बलाधानात् । न्यपतद्भुवि भारतः । पञ्चधाऽभवत् ॥ ६७ ॥ **टीका**—ईदृगयं रसो जगत्त्रातुं महादेवाज्जात इत्युक्तं स कथं जात इत्याकाङ्क्षायां संप्रति तदवतारप्रकारमाह । अन्यथा विनिवारकाभावेनोर्ध्वरेतसो हरस्य शुक्रपाताभावेन यदृच्छया संभोगसमाप्तिर्दीर्घकालेऽपि न स्यात् । तारकासुरनाशोऽपि न स्याच्चातः संभोगविघ्नोऽपि सत्कायार्थं न दोषायेति बुद्ध्या प्रेषित इत्यर्थः । अपक्षिभावसंक्षुब्धमिति । तिरश्चां विजातीयस्मरलीलाज्ञानाभावेन मनःसंक्षोभो न भवति ।

अयं तु स्मरलीलाविलोकनार्थं क्षुब्धोऽतोऽयं पक्षिवेषधार्यैवेति दृष्ट्वा । सोऽपतदिति । परिदन्दह्यमानेन वह्निना बहिः क्षिप्तो गङ्गायामपतत् । ते बलाधानादिति । गङ्गयाऽपि यत्र देशे बहिः क्षिप्तः पारदस्तत्र सोऽल्पसारः सुवर्णरूपो रसोपरससाधारणरसरूपश्चाभवत् । ते च सुवर्णादयो लोके धातुसंज्ञका अभवन् । सा च संज्ञाऽन्वर्थका शरीर उपयुक्ता बलमादधते स्थापयन्तीति व्युत्पत्त्या । प्रभूतसारस्य तस्य स्वरूपेण स्थितिरित्याह—वह्निमुखादिति । वह्निमुखात्तु यद्रेतो भुव्यपतत्तस्य भारतो गुरुत्वाद्वेगेन तच्छतयोजननिम्नान्पञ्च कूपान्कृत्वा न्यपतत् । शतशब्दोऽत्र बहुत्ववाचकः । पञ्चधा पञ्चविधप्रकारेण पञ्चधाऽभवत् ॥ ६७ ॥

**मूलम्**—तदाप्रभृति० रसायनोऽभवंस्तेन० रससिद्धिं च विन्दति ॥ ७६ ॥ **टीका**-कूपभेदेन पञ्चधाजातस्य रसस्य नामानि सलक्षणान्याह—रसो रसेन्द्र इत्यादिना । अतिनिर्मल इत्यपि पाठोऽतिचञ्चल इत्यत्र । रसायिनोऽभवन्निति । अत्र सेविते सतीत्यध्याहारः । तेन कृते रसायने सेविते सति नागा मृत्युजरोज्झिता अभवन् । दशाष्टसंस्कृतैरिति । संस्कृतं संस्कारः । ते चाष्टादश साकल्येन रसार्णवे भैरवेण निर्दिष्टाः । अत्र तु लाघवार्थं जारणान्ता एव सविस्तरं वक्ष्यन्ते । तेषामष्टादशानां क्रमेणोद्देशस्त्वेकादशाध्याये स्फुटी भविष्यति । पारदलक्षणेऽपि दशाष्टसंस्कृतैः सिद्ध इत्यनुवर्तनीयम् । देहं लोहं करोति । देहकरो जरारोगरहितचिरस्थायिदृढकायकरः । लोहकरः सुवर्णादिकरः । सामर्थ्यवृद्ध्यर्थम् । अथ तेषां संस्कृतानामपि तेषां कार्य एव विशिष्टक्रियोपयोग इत्याह—त्रय इति । निजकर्म । अष्टादशसंस्कारसंस्कृतानां वक्ष्यमाणकामधेनुवज्रपञ्जरादिविशिष्टरसविषयकं विशिष्टं कर्म मिश्रयति व्यतिषजतीति मिश्रकः । रससिद्धिं पारदसिद्धिं विन्दति ॥ ७६ ॥

**मूलम्**-रसनात्सर्व० निपुणेन तु कारयेत् ॥ ८६ ॥ **टीका**-एतेषां नाम्नामन्वर्थकत्वमाह—रसनादिति । रसनात्, जारणासंस्कारेण भक्षणात् । रस्यतेऽनेनेति रसः । लोकै रस्यत इति व्युत्पत्त्या वा रसशब्दः सिध्यति । देहसिद्धिर्दृढकायसिद्धिः । लोहसिद्धिः सुवर्णाद्युत्पादनम् । पारं नीरुजत्वं तस्य दानात्पारद इति ख्यातः । सूत उत्पादयतीत्यर्थः । तेजः प्रभावो दीप्तिश्च । तेजः प्रभावे दीप्तौ चेत्यमरसिंहः । दोषैश्च कञ्चुकाभिश्चेति । अत्र दोषशब्देन द्विविधा दोषा ग्राह्या नैसर्गिकयौगिकभेदेन । तत्र नैसर्गिका आधुनिकाः कृत्रिमसंबन्धयुक्ताः । ते च विषवह्निमलभेदेन त्रिविधाः । यौगिकौ कूपसंनिहितखनिस्थनागवङ्गसंसर्गेण जातौ । तौ च द्वौ दोषौ । एको नागजः द्वितीयो वङ्गजः । विक्रयावसरे तुलायां भारवृद्ध्यर्थं वणिजोऽपि कुशलाः क्रियायोगेन[ ण ] पृथङ्नागवङ्गाभ्यां सह पारदमेकी कुर्वन्ति । तस्मात्कारणादप्येतयोर्यौगिकत्वं मतम् । कञ्चुका गुणाच्छादका दोषाः । ते च सप्त वक्ष्यमाणा एकादशाध्याये पर्पटीपाटनीभेदीत्यादिग्रन्थेन । ते चो-

पाधिना जाता औपाधिकाख्याः । औपाधिका अनित्याः कृत्रिमाः संसर्गिद्रव्यवियोगेन नश्वरा इत्यर्थः । अत्रैकादशाध्याय द्वादशदोषमध्ये कञ्चुकीनां ग्रहणात् । अत्रापि दोषैर्नियोजितो रसराज इति लाघवार्थं किमिति नोक्तमिति चेदुच्यते । पर्पट्यादीनां सप्तानां समानधर्मप्रतिपादनार्थं कञ्चुकाभिरित्युक्तम् । स च धर्मः कञ्चुकत्वरूपः । विषादिषु तु नैतादृशः । समानधर्मः कश्चन बोधनार्थं संभवति । अतो दोषत्वेनैव तेषां ग्रहणमिति भावः । संप्रति पञ्चभूतात्मकस्य तस्य गतिभेदेन नामभेदमाह—जलग इति । यः पारदो जलरूपेण जलस्वभावेन गच्छति स जलगो जलगतिविशिष्ट इत्युच्यते । तन्मयास्तु सुवर्णादिलोहाः । स्थिरसत्त्वा रसादयोऽपि तन्मयाः । भूमिमलार्किट्टयोगेनैव तेषां घनत्वं स्थिरत्वं च । अत एव द्रुतिरूपेणैव तेषां स्थितिः संभवति । जलस्वभावोऽधोगमनरूपः । निर्मलद्रुतिरूपलोहानामप्यधोगमनं दृश्यत एव । यः पारदस्त्वरितस्त्वरया वेगेन युक्तो नात्युच्छ्रितमाकाशे गच्छति, किंतु भूमिसंनिहिताकाशे भुवि च स हंसग इत्युच्यते । हंस इवाऽऽकाशे गच्छतीति हंसगः । स तु मयूरगण्डूपदादिषु व्यवस्थितः । यस्तु मलरूपेण कृष्णवर्णेनांशेन विशिष्टो गच्छति स मलग इत्युच्यते । यश्च सधूमो धूमेन धूमसमानवर्णोर्ध्वरेखासहिताकाशगत्या सह वर्तत इति सधूमः स धूमग इत्युच्यते । स तु हरितालहिङ्गुलमनःशिलारसकगौरीपाषाणादिषु व्यवस्थितः । ते हि धूमरोधात्स्फोटं कृत्वोद्गच्छन्तीत्यनुभूयते । नाभियन्त्रभूधरलोहमूषादियन्त्रादिना निर्धूमजारणायामपि महता प्रयत्नेनापि तेषां स्थिरत्वं मीमांस्यं भवति भवेन्नवेति । अन्या चतुर्थी गतिः पारदस्यास्ति । सा तु जीवगतिरित्युच्यते । जीवस्येवादृश्या गतिर्जीवगतिः । अत एव सा दैवीत्यप्युच्यते । तस्या देवगतेरिवादृश्यत्वात्तया युक्तः स पारदोऽण्डाज्जीव इवादृश्यगत्या युक्तः स्वस्थानान्निष्क्रमेन्निर्गच्छति । अण्डाद्देहस्य निर्गमनं दृश्यते देहसहितस्य जीवस्य तु बहिर्निर्गमनं न दृश्यते । बालस्य चालनश्वासोच्छ्वासादिक्रियया चानुमीयते तद्वदस्यापीति भावः । तया गत्या युक्त एवायं जीवान्प्राणिनो जीवयेत्तेन स रसो जीवनाम्ना स्मृतः । कारयेत्तं संस्कारनिपुणवैद्यहस्तेन राजा तत्समो वसुमान्वाऽऽत्मनः प्रजानां च रक्षणार्थमिति भावः ॥ ८९ ॥

**मूलम्**—प्रथमे रजसि० सूतं हरन्ति च ॥ ९० ॥ **टीका**—अथ दुर्ग्राह्यस्य तस्य पारदस्य ग्रहणप्रकारमाह—प्रथमे रजसीति । वीक्षमाणां कूपान्तर्भागे पारदं प्रति वीक्षमाणाम् । अथ मृत्तिकालीनपारदग्रहणप्रकारमाह—पतित इति । दरददेशः काश्मीरादिसंनिहितः । पातनायन्त्रं यन्त्राध्याये वक्ष्यमाणम् ॥ ९० ॥

इति श्रीवामनात्मजचिन्तामणिविरचितायां रसरत्नसमुच्चयटीकायां सरलार्थप्रकाशिन्याख्यायां सूत्रस्थाने रसोत्पत्तिनामकः प्रथमोऽध्यायः ॥ १ ॥

## अथ द्वितीयोऽध्यायः ।

**मूलम्**—अभ्रवैक्रान्त० कोटिगुणाधिकम् ॥ ११ ॥ **टीका**—अथ तस्य सिद्धेः साधनानि भवितुमर्हन्ति । शुद्धानि मृदूकृतान्येव रसोपरससाधारणरसमणिलोहादीनि । अतोऽत्र प्रथमं मुख्यं साधनसंस्कारात्मक एव ग्रन्थः पञ्चमाध्यायसमाप्तिपर्यन्तं वक्ष्यते । तत्र द्वितीयाध्यायेऽभ्रकमुख्यान्रसान्वर्णयति । यतस्तस्य रसराजनैवेद्योपयोगित्वान्मुक्तिखेचरत्वजनकबन्धोपयोगिनि रसपक्षच्छेदने मुख्यसाधनत्वाद्रसोपरसरत्नलोहानां रसोदरे प्रवेशार्थं मार्गत्वाच्चाभ्रकमेव प्रथमं वर्ण्यं संस्कार्यं चातस्तदेव प्रथमं कृत्वा कांश्चित्पदार्थानुद्दिश्य रससंज्ञया बोध्यत्वं विधाय तत्संग्रहः पारदसंस्कारार्थं कार्य इत्याह—अभ्रेति । अधिकपदार्थव्यावृत्त्यर्थमष्टपदम् । रस्यन्ते पारदेनाऽऽस्वाद्यन्ते भक्ष्यन्त इति व्युत्पत्त्या यौगिकीयं संज्ञा । रसहृदये तु रसेषु मध्येऽभ्रकचपलयोर्न ग्रहणं किंतु कान्तदरदयोस्तत्स्थाने ग्रहणेनाष्टरसपूरणं दृश्यते । कान्तस्याभ्रकस्य च पूतीलोहेष्वेव परिगणनम् । अयमाचार्यस्तु कान्तं लोहेषु दरदं च साधारणरसेषु जग्राह । एवं चायं संज्ञाविषयकमतभेदोऽपि पारदकर्मणि न बाधकः । उभयोरपि कान्तदरदयोः कर्मभेदेन रसोपयोगित्वाहानेः । एतेषामभ्रकादीनां महारससंज्ञाऽप्याचार्यस्य संमता । 'महारसेषु कैश्चिद्धि चपलः परिकीर्तितः' इति वक्ष्यमाणतद्वचनात् । अत्र 'देव्या रजो भवेद्गन्धो धातुः शुक्रं तथाऽभ्रकम्' इति वचनं क्षेपकं केचित्पठन्ति । तस्य क्षेपकत्वं तु स्थलान्तरे तदर्थोक्त्या तस्य गतार्थत्वात्सिध्यति । तथा हि—संप्रति वदत्येव गौरीतेजः परमममृतमित्यादि । वक्ष्यति च तृतीयाध्याये 'तद्रजोऽतीव सुश्रोणि सुगन्धि सुमनोहरम्' । इति । संप्रत्यभ्रकगुणानाह—गौरीतेज इति । गौरीतेजोऽभ्रकं परमममृतं पारदेऽभिव्याप्त्या दीर्घायुःप्रदत्वेनामृतसमम् । प्रज्ञाबोधि, आवरकमूर्छादिदोषवारकत्वेन बुद्धिप्रसादकरम् । तत्तद्योगैर्यस्मिन्यस्मिन्रोगे यो यो योगश्चूर्णकषायादिरूपस्तत्तद्योगेन संयुतमिदं भक्षितं सत्सकलगदघ्नं भवेत् । तथा सुतेन्द्रबन्धिपक्षच्छेदादिद्वारेति बोध्यम् । तदेवाभ्रकं भूमिमध्ये राजहस्तात्सपादहस्तादधस्तादधोभागस्थं यत्खनिजं घनमभ्रकं वज्राख्यं तदेव पूर्वोक्तगुणम् । इतरत्तु वायुजलमूत्रमलतापकृमिसंबन्धान्निःसारं ज्ञेयम् । इदमुपलक्षणं सर्वेषां खनिजद्रव्याणाम् । प्रायस्तेषां हि भूमिगर्भस्थानामेव पूर्णात्मगुणत्वात् । अत्र घनशब्दोऽभ्रकमात्रवाचकोऽपि वज्राभ्रके पर्यवस्यति । तस्यैव यथोक्तगुणत्वात् । एवमन्यत्रापि सामान्यद्रव्यवाचकशब्दो विशेषे पर्यवसितो दृश्यते । यथा शुक्रवृद्ध्यर्थं पयो दद्यादित्युक्ते देयत्वेन गव्यं पय एव पर्यवसितं भवति तद्वत् । अधुना सदसज्ज्ञानार्थं सलक्षणानभ्रकभेदानाह—पिनाकमित्यादि । श्वेतादीति । श्वेतरक्तपीतकृष्णभेदेन प्रत्येकं तच्चतुर्विधं भवति । पिनाकमित्यादि । रूढा संज्ञा पिनाकेति । निर्मुक्ताशेषवैकृतमिति । वैकृतं चात्र दलत्यागध्वन्युत्प्लवनादि तद्विरहितम् । वज्रवत्तस्यातिकठोरस्य सारभूतस्य स्थितेर्वज्राभ्रमित्यन्वर्थकं बोध्यम् । तद्भेदानाह—श्वेतमिति । वज्रेतराणामप्यवान्तरभेदबोधका एते एव वर्णास्तत्राऽऽदिशब्दग्राह्याः । श्वेत-

क्रियास्विति । भित्त्यादौ श्वेतवर्णलेपादिका रजतत्वोत्पादिका चात्र श्वेतक्रिया । रक्तकर्मसुवर्णत्वोत्पादकं पारदादि रजकं कर्म । पीतकर्म पीतवर्णसुवर्णत्वोत्पादकं कर्मादि रक्तकर्मणि रसार्णवेऽभ्रकोपयोगं भगवान्भैरव उदाजहार । 'घनं माक्षिकचूर्णेन शुल्बचूर्णेन रञ्जितम् । द्वंद्वितं ताप्यसत्त्वेन रसराजस्य रञ्जनम् 'इति । धनमभ्रकं वज्राख्यं तत्सत्त्वं माक्षिकचूर्णेन शुल्बचूर्णेन च निर्व्यूढं ध्मात्वा द्वंद्वत्वमापन्नं तद्ग्रासक्रमेण यदा पारदे जीर्णं स्यात्तदा पारदस्य रञ्जकं भवतीत्यर्थः। एवमेव समाक्षिकसत्त्वं सताम्रचूर्णं वाऽ-भ्रकसत्त्वं द्वंद्वान[ द्वत्व ]मापन्नं ग्रासरूपेण जीर्णं पारदे रक्तवर्णमुत्पादयति । अत एव मर्दनसंस्कारवर्णनावसरेऽत्र क्षेपकं पद्यं केचिद्वक्ष्यन्ति—'जीर्णाभ्रकं तथा बीजजीर्णं सूतं तथैव च। नैर्मल्यार्थं हि सूतस्य खल्वे धृत्वा तु मर्दयेत् । गृह्णाति निर्मलो रागान्ग्रासे ग्रासे विमर्दितः '। इति। जीर्णाभ्रकं तप्तखल्वे चीर्णाभ्रकं तथा बीजजीर्णं चीर्णबीजमे-तादृशं सूतं पुनः पुनर्मर्दयेत् । किमर्थम् । सूतस्य नैर्मल्यार्थम् । निर्मलस्य किं लक्षणमत्र तदाह—गृह्णातीति तदर्थो बोध्यः । रसराजसुन्दरे पीताभ्रकोपयोगः पीतस्वर्णकरणे। तथा च तद्ग्रन्थः—' पीताभ्रं गन्धकं सूतं रक्तपुष्पं चतुर्थकम् । वज्रीक्षीरेण संयुक्तं वङ्गं तारायते क्षणात् ' । इत्येतत्तारत्वकरणमेकान्तरव्यापारः । मुख्यक्रिया तु चन्द्रदलस्य संजातस्य तस्यानलदलत्वकरणमेवामुख्यक्रियासिद्धिपर्यन्त-मुत्पत्तिविनाशशालिनां विविधवर्णानामन्तराऽन्तरा द्रव्यादेर्दर्शनात्। रसराजसुन्दरे मुख्य-क्रियाऽनुक्ताऽपि संयुक्तद्रव्यसामर्थ्यादवगम्यते । श्वेतक्रियोदाहरणं तु प्रसिद्धमेव । चतुर्विधमिति । चतुर्विधं व्योमवज्राख्यं निर्दोषमेवास्ति । शुद्धस्य तस्य रोगकरत्वा-भावात् । तथाऽपि वज्राभ्रप्रकारेष्वप्यवान्तरगुणतारतम्यमतीव दृश्यते । तद्बोध-नार्थमभ्यधात्कोटिकोटिगुणाधिकमिति । शतसहस्रलक्षकोटिशब्दानत्युत्कर्षप्रदर्शनार्थं व्यव-हरन्ति लोके । तद्वदत्रापि व्यवहारो बोध्यः । तथा च श्वेतवज्राभ्राद्रक्तवज्राभ्रं तैरेव गुणैः कोटिसंख्याकैरत्युत्कर्षवर्तिभिर्युक्तमस्ति । ये खलु श्वेतवज्राभ्रे वर्तन्ते रक्तवज्राभ्रस्यास्त एव गुणाः पीतवज्राभ्रे कोटिसंख्याका अत्युत्कर्षशालिनः । कृष्ण-वज्राभ्रे तु त एव गुणाः सर्वोत्कर्षेण वर्तन्त इति भावः । अनिर्वाच्योत्कर्षोऽत्राऽऽम्रे-डितकोटिशब्दार्थः ॥ ११ ॥

**मूलम्**—स्निग्धमिति० विकरोत्येव निश्चितम् ॥ १६ ॥ **टीका**—संप्रति प्रशस्तं वज्राभ्रं लक्षयति--स्निग्धमिति । पृथु दलं महद्दलम् । सुखनिर्मोच्यपत्रमिति । सुखे-नाकष्टेन शीर्णपत्रावयवं भवति । तद्वज्राभ्रं प्रशस्तमुक्तम् । अजमीराख्यनगरनिकटेऽभ्र-कखनिरस्ति । तत्रेदं महता प्रयत्नेन कदाचिदुपलभ्यते । वङ्गदेशेऽपि तदुपलब्धिः श्रूयते । एवंविधमपि व्योमाभ्रकं कठोरावयवं चेत्तद्रसो न ग्रासयेत् । न ग्रसेदि-त्यर्थः । स्वार्थे णिच् । किंतु विधिना भस्मसत्त्वद्रवत्वान्यतमावस्थापन्नं मृदूकृतमेवे-त्यर्थः । वक्ष्यति हि पञ्चमाध्याये—यच्च कठोरदेहं मृदूकृतं तत्खलु सूतयोग्यमिति ।

तद्ग्रासापेक्षा त्वावश्यकी । ग्रासाभावे ह्युपोषित इव रसः कार्यकरो न भवेदित्याह–सचन्द्रिकमिति । सचन्द्रिकं चाकचिक्यसहितम् । किट्टाभं प्रभूतकिट्टम् । ग्रसितश्च ग्रसिताभ्रकसत्त्व एव लोहे स्वर्णाद्युत्पादने लोहमारणे रोगवारणार्थं लोहप्रयोगे च नियोज्यः । तथा रसायने ज्वराङ्कुशादि तत्तद्रसे रसायने च लक्ष्मीविलासवज्रपञ्जरादिरूपे वक्ष्यमाण इत्यर्थः । रस ईयते प्राप्यतेऽनेनेति व्युत्पत्त्याऽत्र रसशब्देन रसरसायनयोः संग्रहात् । भक्षणार्थमपि तन्निश्चन्द्रिकं मृतमेवार्हतीत्याह—निश्चन्द्रिकमिति । ननु रसावतारादिग्रन्थानाश्रित्य पत्राभ्रकस्यापि सुशुद्धमात्रस्योपयोगोऽपि रसायनार्थं कैश्चित्कृतस्तत्कथं पत्राभ्रकं हि सचन्द्रिकमेवेत्याशङ्क्याऽऽह—येरुक्तमिति । युक्तिनिर्मुक्तैः । शास्त्रसहिता युक्तिर्या सा परित्यक्ता यैस्तादृशैः । एवं च तन्न श्रद्धेतेति भावः । रसहृदयेऽपि पत्राभ्रकभक्षणनिषेध एव कृतः । 'त्रिविधं गगनमभक्ष्यं काचं किट्टं च पत्ररजः' इति । एवं च तत्प्रयोगेण पारदपक्षच्छेदो जात इति भ्रम एवेति भावः । शोधनपूर्वकं यन्मृतं तदेव सेव्यमित्यभिप्रायेणाऽऽह——सत्त्वार्थमिति । अगुणं सदोषमनिर्मलं तद्विकारमुत्पादयेदेव ॥ १६ ॥

**मूलम्**—प्रतप्तं सप्तवाराणि० धान्याभ्रमिति कथ्यते ॥ २३ ॥ **टीका**—अतस्तच्छोधनपूर्वकं मारणमाह—प्रतप्तमिति । अभ्रकं तप्तं कृत्वा काञ्जिके क्षिपेदिति सप्तवारं कृत्वा तन्निर्दोषं जायते । औपाधिकदोषशून्यं भवतीत्यर्थः । औपाधिकदोषस्तु संनिहितखनिजद्रव्यान्तरसंसर्गादिः । एवमेव त्रिफलाक्काथगोदुग्धादीनामन्यतमे सप्तकृत्वः प्रक्षेपेणाभ्रकं शुध्यति । 'संधितं धान्यमण्डादि काञ्जिकं तत्प्रचक्षते' इति काञ्जिकलक्षणं समासतोऽभिहितं मदनविनोदनिघण्टे । विशेषलक्षणं तु राजनिघण्टे—'नूतनं मृन्मयं कुम्भं कटुतैलेन लेपयेत् । निर्मलं च जलं तस्मिन् राजिकाजाजिसैन्धवम् । हिङ्गुविश्वानिशाश्चैव, ओदनं वंशपल्लवाः । ओदनस्य कुलत्थानां जलं वटकखाण्डवम् । सर्वं तस्मिन्निधायाथ मुद्रां दत्त्वा दिनत्रयम् । रक्षयित्वा ततो वस्त्रे गालितं काञ्जिकं मतम्' इति । अपक्कद्रव्यसंधानकृतमपि काञ्जिकं ग्रथान्तरे चोक्तम्—'यवाद्यं निस्तुषं धान्यं प्लावयेदम्बुनि त्र्यहम् । तन्नीरं तु पृथङ् नीत्वा लवणं तत्र निक्षिपेत् । राजिकाजाजिमरिचहिङ्गुचूर्णं प्रमाणतः । तदेवात्यम्लतां प्राप्तं काञ्जिकं परिकीर्तितम् । एवं कुर्याद्वरारोहे युक्त्या मण्डतुषोदयोः' इति । रसरत्नाकरे तु धान्याम्ललक्षणमन्यादृशमेवोदाहृतम्—'नानाधान्यैर्यथाप्राप्तैस्तुषवर्ज्यैर्जलान्वितैः । मृद्भाण्डे पूरितं रक्षेद्यावदम्लत्वमाप्नुयात् । तन्मध्ये भृङ्गरामुण्डी विष्णुक्रान्ता पुनर्नवा । मीनाक्षी चैव सर्पाक्षी सहदेवी शतावरी । त्रिफला गिरिकर्णी च हंसपादी च चित्रकम् । समूलं कण्डयित्वा तु यथालाभं निवेशयेत् । पूर्वाम्लभाण्डमध्ये तु धान्याम्लकमिदं स्मृतम् । स्वेदनादिषु सर्वत्र रसरा-

जस्य योजयेत् ' इति । रसरत्नाकरे ततः परमुक्तम्—' त्र्यूषणं लवणं राजी रजनी त्रिफलाद्रवम् । महाबला नागबला मेघनादा पुनर्नवा । मेषशृङ्गी चित्रकं च नवसारं समं समम् । एतत्समस्तं व्यस्तं वा पूर्वाम्लेनैव पेषयेत् । तत्कल्केन लिपेद्वस्त्रं यावदङ्गुलमात्रकम् । तन्मध्ये निक्षिपेत्सूतं बद्ध्वा पच्याद्दिनत्रयम् । दोलायन्त्रेऽम्लसंयुक्ते स्वेदिते जायते रसः ' इति । ततस्तदभ्रकं धान्याभ्रकं कृत्वा मत्स्याक्षिकारसेनैकदिनपर्यन्तं संमर्द्य चक्रीं वर्तुलस्थूलवटिकां विधायावशोष्य शरावसंपुटितं कृत्वाऽर्धेऽभ्रके पुटे पुटेदर्धेऽभ्रके पुटमर्धगजपुटं तच्च गजपुटगतार्धभागं वनोपलैः पूरयित्वा भवति । पुटेत्पचेदित्यर्थः । प्रतिपुटमभ्रकस्य मर्दनं ततश्चक्रीं कृत्वा विशोष्य शरावसंपुटितं कार्यम् । द्विषड्वारं द्वादशवारामित्यर्थः । ततोऽभ्रके कलांशं षोडशांशं टङ्कणं तत्र दत्त्वा पुनर्नवारसेन सह संमर्द्य चक्रिकां विधाय संशोष्य शरावसंपुटितं कृत्वाऽर्धगजपुटे पचेत् । एवं प्रतिपुटं कलांशटङ्कणं दत्त्वा सप्तवारं पुटेत् । एवं कलांशटङ्कणं दत्त्वैव पृथग्वासारसतन्दुलीयरसाभ्यां पूर्वप्रोक्तार्धेऽभ्रपुटविधिना सप्तवारं पुटेत् । एवं रीत्या पक्वं घनमभ्रकं सर्वचिकित्सायोगेषु योजनार्हं भवति । मत्स्याक्षिका मीननेत्रसमानाकारतिक्तसूक्ष्मपत्रा भूमौ किंचित्प्रसरणशीलाऽतिक्षुद्रक्षुपा पल्वलसंनिहितदेश उत्पद्यते । जलब्राह्मीत्यपरपर्याया । लोके ' बांब ' इति ख्याता । हुनगुंदेति नाम्ना कर्नाटकदेशे प्रसिद्धा । वासा अटरूषः । अत्र प्रपुटेदित्यस्य केचिद्गजपुटे पचेदित्यर्थं कुर्वन्ति । आदौ तु मृदुतापार्थमर्धेऽभ्रपुटमुक्तमिति तदभिप्रायः । अत्र रसोपरसधातूनां भस्मवर्णस्तु द्रव्यसंधानुरोधेन च विविधो भवति । तेनानियतोऽपि स नैसर्गिकः प्रायोभाविनोदाह्रियते सुपाकज्ञानार्थमनुक्तवर्णस्थले । तद्यथा—अभ्रकभस्म किंचिद्रक्तवर्णं भवति । स्वर्णक्षीर्यादिरसकल्कयोर्न पुटितं चेत्पीतवर्णमपि भवति । वैक्रान्तभस्म किंचित्पीतवर्णम् । माक्षिकभस्म गैरिकसमानवर्णं कृष्णवर्णं वा । विमलभस्म रक्तवर्णम् । शिलाजतुभस्म कृष्णवर्णम् । सस्यकभस्म कृष्णवर्णम् । चपलो भस्मीकृतः सत्त्वीकृतो वा नागभस्मवर्णः । रसको जसदं तद्भस्म खनिजतन्मृत्तिकाभस्म वा श्वेतमिश्रपीतम् । पीतवर्णगन्धकभस्म श्वेतमिश्रकृष्णवर्णम् । लोहगन्धकसंभवं कासीसं तद्भस्म च रक्तवर्णम् । गैरिकभस्मविधिरेव शास्त्रेऽनुक्तः । भर्जितकाङ्क्षी तु श्वेतवर्णैव भवति । हरितालभस्म श्वेतवर्णम् । मनःशिलाभस्म किंचित्कृष्णवर्णम् । अञ्जनकङ्कुष्ठभस्मविधिस्तु नोक्तः । कम्पिल्लभस्मविधिरेव नोक्तः । गौरीपाषाणभस्म धूम्रवर्णम् । वराटभस्म धूम्रवर्णम् । नवसादरवह्निजारागिरिसिन्दूरमोद्दाशृङ्गाणां भस्मविधिः प्रायोऽनुक्त एव । तेषां हि सत्त्वरूपत्वात् । हिङ्गुलभस्म श्वेतवर्णम् । राजावर्तभस्म पीतवर्णम् । स्वर्णभस्म भर्जितमृत्पात्रवच्छ्वेतमिश्रपीतरक्तम् । रजतभस्म कृष्णवर्णं भसितं ताम्रं कृष्णं श्वेतं वा भवति । लोहभस्म कृष्णं रक्तवर्णं वा । नागभस्म किंचित्पीतं रक्तवर्णं वा । वङ्गं श्वेतवर्णं भवति । पारदभस्म प्रायः

श्वेतवर्णं कृष्णवर्णं वा । पित्तलभस्म नीलवर्णं कांस्यभस्म नीलवर्णं भवेदिति । वर्तलोहभस्म प्रायः कृष्णम् । अथ शुद्धावुपयुक्तं धान्याभ्रं तच्च किंलक्षणमित्याकाङ्क्षायां धान्याभ्रलक्षणमाह–चूर्णाभ्रमिति । पादांशेन शालिसंयुक्तं यदभ्रकचूर्णं तद्वस्त्रे धृत्वा तद्वस्त्रपोटलिकां मर्दनार्थं शिथिलोदरां बद्ध्वा तां काञ्जिकमध्ये त्रिरात्रं वासयित्वा पश्चाद्धस्ताभ्यां पोटलिकां संमर्द्य संमर्द्य वस्त्रान्निर्यातं निःसृत्याधोगलितं सूक्ष्मचूर्णरूपं यद्भवति तद्धान्याभ्रमिति कथ्यते । अत्र पोटलिकार्थं वस्त्रं कम्बलखण्डमेव ग्राह्यमिति भिषक्संप्रदायः ॥ २३ ॥

**मूलम्**—धान्याभ्रं कास० सिन्दूरसदृशप्रभम् ॥ २८ ॥ **टीका**–अथ सुकरमभ्रकभस्मविधिमाह–धान्याभ्रमिति । प्रतिपुटं कासमर्दरसेन मर्दनमपि कार्यम् । पुटमत्र गजपुटम् । एवमग्रेऽपि तद्बोध्यम् । एवं मुस्तारसेन तन्दुलीयरसेन वा संमर्द्य सप्तवारं पुटनाद्भस्मरूपं भवति । अथ प्रकारान्तरेण मारणमभिधत्ते—पीतामलकेति । यदामलकीफलं वृक्षे परिपक्वं पीतवर्णमेव भवति तादृशविशिष्टजातीयामलकीपरिपक्वफलस्वरसे चतुर्थांशटङ्कणसहितमभ्रकं संमर्द्य वटकीकृत्य च संशोष्य पुटं देयम् । इति षष्टिसंख्याकपुटैः सिन्दूरवर्णमभ्रकभस्म जायते । तच्चानुपानभेदेन क्षयप्रधानदारुणरोगघ्नं भवेत् । एवमेव वटमूलत्वक्कषायेण । अथवा ताम्बूलीपत्रस्वरसेन वासामत्स्याक्षिकोभयरसेन वा कटिल्लसहितमीनाक्षीस्वरसेन वा वटदुग्धेन वा प्रतिपुटं संमर्द्य संमर्द्य विंशतिवारं पुटनादप्यभ्रकभस्म सिन्दूरवर्णं भवति । मीनाक्षी मत्स्याक्षी । कटिल्लं दीर्घपत्रा पुनर्नवा । एवंविधिना वारितराभ्रकभस्मनोऽमृतीकरणं बृहद्योगतरङ्गिण्यामुक्तम् । ‘ वराम्बु गोघृतं चाभ्रकलाषट्दिक्क्रमांशकम् । मृद्वग्निना पचेल्लौह्यामभृतीकरणं त्विदम् ’ इति ॥ २८ ॥

**मूलम्**—पादांशटङ्क० शोषयेद्घर्मयोगतः ॥ ३१ ॥ **टीका**–अथाभ्रकसत्त्वविधिरुच्यते । तच्च सत्त्वं द्विविधम् । भस्मीकृताभ्रकस्य सत्त्वं धान्याभ्रकस्य सत्त्वं च । तत्राल्पवक्तव्यत्वादल्पपरिश्रमसाध्यत्वाच्च प्रथमं भस्मीकृताभ्रकसत्त्वविधिमाह—भस्मीकृताभ्रकं पादांशटङ्कणेति । चतुर्थांशटङ्कणसहितं मुशलीरसेन संमर्द्य गोलकीकृत्य कोष्ठयन्त्र एकद्वि( द्व )मुहूर्तपर्यन्तं दृढं ध्मातं सत्त्वरूपं भवति । टङ्कणेत्युपलक्षणम् । तेन गुडगुग्गुलुगुञ्जाज्यमधुयोगोऽपि कार्यः । तस्यापि द्रावणौषधत्वात् । अत्रानुक्तोऽपि श्वेतवर्णस्यास्य सत्त्वस्य दग्धकिट्टात्पुटिताच्चाभ्रकभस्मनः सकाशादुत्पन्नत्वेन स्वयं मृदुत्वाच्च न शोधनमृदूकरणभर्जनाग्निपुटनापेक्षेति भावः । अथ धान्याभ्रकस्य सत्त्वपातनं वक्तुकामः पिण्डीबन्धात्प्राक्तस्याभ्रकस्य सूर्यप्रखरतापपुटनमाह—कासमर्देति । कासमर्दः कासविन्देति लोके प्रसिद्धः क्षुपविशेषः । घनध्वानस्तन्दुलीयशाकम् । वासाऽटरूषः । मत्स्याक्षी प्रागवर्णितैव । काण्डवल्ली काण्डवेल इति नाम्ना लोके प्रसिद्धा । हंसपादी रक्तमूला लज्जालुः । एतेषां पृथग्रसैर्धान्याभ्रकं पिष्ट्वा पिष्ट्वा सूर्यतापेन शोषयेत् ॥ ३१ ॥

**मूलम्**—पलं गोधूम० योज्यं रसरसायने ॥ ३८ ॥ **टीका**—अथ तस्य धान्याभ्रस्य पिण्डीबन्धविधिमाह—पलमिति । त्रिंशत्पलभागमितं धान्याभ्रं गृहीत्वा पलमितं गोधूमचूर्णमार्द्रीः क्षुद्रमत्स्याष्टङ्कणं च प्रत्येकं धान्याभ्रभागस्याष्टमांशेन गृहीत्वा तत्सहितं तदभ्रकं मर्दयेत् । सर्वं मर्दनेनैकीभूतं यदा स्यात्तदा सूर्यतापेन शोषयेत् । दत्त्वा दत्त्वेति वीप्सयाऽत्राष्टमांशं मत्स्यटङ्कणं सकृदेव न दद्यात् । किंत्वल्पाल्पं दत्त्वा मर्दनं कार्यम् । एवं द्वित्रि[ त्र ]वारं मर्दनं शोषणं च कृत्वा ततः पञ्चाजाद्यन्यतमं क्षिप्त्वा संमर्द्य तिन्दुकीफलात्किंचिदधिकस्थूलान् गोलान् कुर्यात् । ततः संशोष्याधःपातनकोष्ठ्यां प्रतिसत्त्वपातनावसरे तान्गोलान्पञ्चपञ्चोर्ध्वद्वारेण दत्त्वा द्वित्रि[ त्र ]यामं धमनेन सत्त्वं निष्कासयेत् । रसार्णवे सत्त्वनिष्कासनार्हपिण्डीबन्धनार्थं त्रिंशत्पलामितमेव धान्याभ्रकं गृहीतं तदनुरोधेनात्रापि धान्याभ्रमनुक्तभागं तावद्भागमेव ग्राह्यम् । अङ्गारकोष्ठी वक्ष्यमाणा दशमाध्याये सैवात्राधःपातनकोष्ठीशब्देन बोध्या । तत्र हि कोकिलधमनीयद्रव्याणामूर्ध्वभागेनाधःप्रक्षेपात्तेषामधःपतनेन जातद्रवीभूतसत्त्वस्य चाधोगमनाच्चेयं कोष्ठी—अधःपातनकोष्ठीशब्देनाभिहिता । अभ्रकस्य च खरद्रव्यत्वात्तदर्थमङ्गारकोष्ठी, एवात्र युक्ता । अत्र हरितरक्तपीतादिज्वालां बीजावर्तकालीनामुद्भाव्य पश्चाद्वह्निः शुभ्रप्राकृतज्वालो यदा स्यात्तदा धमनजामग्निवर्णां धारां सत्त्वद्रव्यात्स्रवन्तीं दृष्ट्वा स एव सत्त्वनिर्गमनकालो ज्ञेयः । उदाहृतमेवैतत्परिभाषाध्याये—‘ यदा हुताशो दीप्तार्चिः शुक्लोत्थानसमन्वितः । शुद्धावर्तस्तदा ज्ञेयः स कालः सत्त्वनिर्गमः ’ इति। तावत्कालपर्यन्तमेव पुनः पुनः खादिरैः कोकिलैः कोष्ठीं संपूर्य भस्त्राद्वयेन धमेत् । तत उक्तलक्षणदर्शनावसर एव धमनाद्विरम्य गुरूपदिष्टमार्गेण झटिति सुग्राह्यं सत्त्वं गृह्णीयात् । कोष्ठ्यामवशिष्टसत्त्वं काचकिट्टसंश्लिष्टं कणरूपं दुर्ग्राह्यं तत्तु, अग्नौ शान्ते सति समाहृत्यैकीकृत्य बहिर्निष्कास्य संकुट्य विचूर्ण्य तत्संश्लिष्टं कणसत्त्वं हरेत् । किट्टात्पृथक्कृत्य गृह्णीयात् । अथ बहिःसंश्लिष्टसत्त्वशून्यं यत् किट्टं तत्पादांशटङ्कणमिश्रितं कृत्वाऽऽर्द्रगोमयं च तत्र दत्त्वा संमर्द्य पूर्ववद्गोलकान्कृत्वा घर्मे सूर्यतापे संशोष्य पूर्ववद्धमेत् । ततस्तस्मादपि सत्त्वकणान्पूर्ववत्पृथक्कृत्य संगृह्यावशिष्टं किट्टं गोलकीकृत्य पूर्ववद्ध्मात्वा सत्त्वमाहरेत् । कोष्ठी द्विविधा । भूमिकोष्ठी चलत्कोष्ठी च । तत्र या भूमिकोष्ठी भूमिस्थ[ष्ठ]गर्ताविशेषः । सा चानेकविधा विशिष्टक्रियानुरोधेनोपयोक्तव्या । येषां च द्रव्याणामत्यन्तकठिनानां सत्त्वानिर्गमनादिविधो सुदीर्घकालधमनापेक्षा सत्त्वकणाश्चेतस्ततो विकिरन्ति तेषां धमने भूमिकोष्ठ्येव समर्था । तदपेक्षया हीनकठिनगुणद्रव्याणां सत्त्वं तु कोष्ठीयन्त्रेण निष्कासयेत् । तेषां च द्रव्याणां रससारे परिगणनमपि कृतम् । तथा च तद्ग्रन्थः—‘ वैक्रान्तं सस्यकं ताप्यं कान्ताभ्रे विमलं गिरिः । गैरिकात्तुत्थकं चैव राजावर्तो विशेषतः । एषामुपरसानां च कोष्ठे सत्त्वनिपातनम् ’

इति। यद्यप्यत्रैषां सत्त्वनिपातनं मूषायामप्यभिहितं तत्र मूषां कोष्ठीयन्त्रे धृत्वा ध्मात्वा तत्र सत्त्वनिपातनं कार्यमित्यर्थः। गिरिर्गैरिजं शिलाजतु। अभ्रं भस्मीकृताभ्रम्। धान्याभ्रकस्य त्वङ्गारकोष्ठी, एव युक्ता। अल्पकालधमनसाध्यसत्त्वकानि यान्यल्पमानानि मृदुद्रव्याणि सत्त्वं च द्रवरूपं निर्गतं गोलकरूपमेव तिष्ठति तेषां सत्त्वनिपातने मूषैवोपयोक्तव्या। सत्त्वनिर्गमनाव्यवहितोत्तरकाले काचकलशीमूषाशरावमल्लादिपात्रमेव कल्पयेत्। संदंशादिनाऽल्पकायमूषाणां तप्ततप्तानामधोमुखकरणे सत्त्वानां मूषोदरेऽल्पावकाशसत्त्वेनेतस्ततो विक्षेपाभावकरणेऽल्पाग्निना द्रवीकरणे खोटकरणाद्यनेकक्रियायां सुकरत्वात्। तदुक्तं रससारे—'हिङ्गुलं च शिलाकाङ्क्षी कासीसं तालकं तथा। एतेषामेव सर्वेषां कूपे सत्त्वं निपात्यते' इति। कूपे काचकलश्यां कदाचिन्मूषायां च। एवं त्रिरावृत्त्या निष्कासितसत्त्वस्य काचकिट्टसंसर्गजमलदोषवारणार्थं संशोधनं विधत्ते—अथेति। शोधनीयगणो दशमाध्याये वक्ष्यमाणः। स च सत्त्वस्य चतुर्थांशेनाष्टमांशेन वा ग्राह्यः। वृन्ताकमूषामध्यस्थसत्त्वे तस्य वा पश्चादल्पाल्पशो देयो न सकृदेव। ततो धमनेन द्रावणात्, यदैकीभूतं गोलकरूपं स्यात्तदा धमनाद्विरम्याग्नौ शान्ते सति निष्कास्य पुनस्तत्सत्त्वं काञ्जिकैः संक्वाथ्य पूर्ववद्धमेच्छोधनीयगणोपेतं कृत्वा। इति द्विवारत्रिवारकरणेन शुद्धं तत्सत्त्वं पारदे जारणावसरे ग्रासार्थं रसायने वक्ष्यमाणकामधेन्वादौ घटकपाक्यद्रव्यैः सह योजनार्थं योग्यं स्यान्न साक्षाद्भक्षणार्हम्। भर्जितपुटितस्यैव हि तस्य भक्षणार्हत्वात् ॥ ३८ ॥

**मूलम्**—मधुतैल० सर्वरोगहरं परम् ॥ ४७ ॥ **टीका**—शुद्धमप्येतन्मृदूकृतमेव रसग्रासार्हमतोऽस्य मार्दवोत्पादकविधिमाह—मधुतैलेति। तत्सत्त्वं वृन्ताकमूषायां धमनेन द्रावितं द्रुतं कृतं मध्वादिषु परिवापयेत्। एवं दशवारकरणेन खरं यत्सत्त्वलोहादि सत्त्वं च लोहादि च तत्सर्वं मृदु स्यादिति। अथ तस्य सत्त्वस्य स्वातन्त्र्येण भक्षणार्हत्वसंपादकं श्लोकद्वयेनामृतीकरणाख्यं भर्जनमाह—पट्टचूर्णमिति। पट्टः शिलापट्टो दृषदाख्यः। तत्रोपलेन मृद्वभ्रसत्त्वस्य चूर्णं विधाय चुल्लीसंस्थितखर्परे तद्गोघृतेनाऽऽप्लाव्य तावत्कालपर्यन्तं भर्जनं कुर्यात्तद्यावदग्निवर्णं भवेत्। अथवोपरिक्षिप्तं तृणं दहेत्। तथा दृष्ट्वा स्वाङ्गशीते सत्येकवारमिदं भर्जनं संपन्नम्। एवमेव प्रतिवारं गोघृताप्लुतं कृत्वा सप्तवारं भर्जयेत्। एवमेव स्थलान्तरे कटाहे कठोरधात्वन्तरस्यापि सुभर्जनकाल उक्तलक्षणेनैव वेद्यः। ततः सत्त्वस्य भर्जितस्य भक्षणार्हत्वसंपादकं पुटयोगमाह—सगन्धकमिति। ततः समभागगन्धकं तत्सत्त्वं वटमूलकषायेण संमर्द्य संशोष्य संपुटीकृत्य वराहपुटं दद्यात्। एवं विंशतिवारं पुटानि वाराहाणि दद्यात्। दशपुटपर्यन्तं गन्धकं समभागं दद्यात्।

तत ऊर्ध्वं पुटेषु तु प्रतिपुटं गन्धकं विंशांशेनैव दद्यात् । ततस्त्रिफलाकषायेण प्रतिपुटं संमर्द्य विंशतिवराहपुटानि दत्त्वा पृथक्त्रिफलादिकषायैर्भावितं संशोषितं छायायामेतत्सत्त्वं सर्वरोगेषु भक्षणप्रयोगार्हं भवति । सत्त्वाभ्रादपरं किंचिदपि द्रव्यं निर्विकारं गुणाधिकं च नास्ति । एवमेव वटमूलकषायेण पञ्चाशत्पुटैस्त्रिफलाकषायेण च तावद्भिरेव वराहपुटैः साधितं पाचितं चेदेतत्सत्त्वमतीव गुणप्रदं भवति । अथ खगं तदेवाभ्रकसत्त्वं पूर्वोक्तं भस्माभ्रकस्य सत्त्वं वा किंचित्सचन्द्रिकं चेत्सगुडगन्धर्वपत्ररसेन भावयित्वा कृतं गोलकमध ऊर्ध्वं च वटपत्रैराच्छाद्य वराहपुटत्रयेण निश्चन्द्रिकं भवति । 'छाणैररत्निके कुण्डे पुटं वाराहमुच्यते ' इति वराहपुटलक्षणम् । गन्धकस्य विंशांशदानं तु हिङ्गुलेन लोहमारणप्रयोगरीत्या बोध्यम् । मुण्डिका भिक्षुः । मुण्डीति लोके प्रसिद्धा । भृङ्गपत्रं भृङ्गराजपत्रम् । वासाऽटरूषः । आममूलकं शाकविशेषः । गन्धर्व एरण्डः । मितिर्मानम् । एवं रीत्या कणरूपसत्त्वसंस्कार उक्तः ॥ ४७ ॥

**मूलम्**—सत्त्वस्य गोलकं० योगैरशेषामयान् ॥ ५४ ॥ **टीका**—अथ पूर्वोक्तधान्याभ्रपिण्ड्याः सकाशाद्धमनेन निर्गतं रसरूपं किंचित्कालेन शीतयोगाद्गोलकीभूतं सत्त्वं तस्य तु काचकिट्टलेशरहितत्वान्न शोधनापेक्षाऽतो भर्जनपुटान्याह—सत्त्वस्येति । सस्यसंयुक्तकाञ्जिकं निस्तुषापक्वधान्यसंधानकृतं काञ्जिकं तच्च प्रागुक्तमेवात्राध्याये । सस्यं धान्यम् । सस्यसंयुक्तशब्देन मण्डौदनकृतकाञ्जिकव्यावृत्तिः कार्या । केचित्त्वत्र सस्यं सस्यकं मयूरतुत्थं तद्युक्तं काञ्जिकमित्याचक्षते । कुट्टयेत् । ततोऽतिसूक्ष्मकणान् पृथक्कृत्वा रक्षेत् । स्थूलकणांस्तु संप्रताप्य काञ्जिके क्षिप्त्वा तत्क्षण एव पूर्ववत्कुट्टयित्वा सूक्ष्मकणान् कुर्यात् । एवं द्वित्रि( त्र )वारकरणेन सूक्ष्माञ्जातान्सर्वसत्त्वकणान् गोघृतेन पूर्ववद्भर्जयेत् । भर्जने भर्जने प्रतिभर्जनादावित्यर्थः । गन्धकैः समभागगन्धकैर्मिश्रयित्वा पुटेत् । शास्त्रे रसार्णवादिग्रन्थे । उक्तं हि रसार्णवे—'उमाफलैश्च पुष्पैश्च षष्ठिकाम्लपरिप्लुतैः । औमदण्डविमर्देन गगनं द्रवति स्फुटम् । अग्निजारं नवे कुम्भे स्थापयित्वाऽधरोत्तरम् । गगनं द्रवति क्षिप्रं मुक्ताफलसमप्रभम् । शतधा कञ्चुकीचूर्णं कञ्चुकीरसभावितम् । द्रावयेद्गगनं देवि लोहानि सकलानि च । धान्याम्लके पर्युषितं निचुलक्षारवारिणि । स्थितं तद्द्रवतां याति निर्लेपरससंनिभम् । अगस्त्यपुष्पतोयेन पिष्ट्वा सूरणकन्दके । गोष्ठभूमिगतं मासं जायते रससंनिभम् । छागमूत्रेण संसिक्तं कपितिन्दुकरेणुना । अभ्रकं वापितं देवि जायते जलसंनिभम् । काकिनीबीजचूर्णेन घृष्टमभ्रकजं रजः । स्नुहीक्षीरेण सप्ताहं सिक्तं ध्मातं द्रुतं भवेत् । अपामार्गस्य पञ्चाङ्गमभ्रकं च सुपेषितम् । स्थापयेन्मृन्मये पात्रे तद्द्रवेत्सलिलं यथा ' इति । अन्ये च तत्र ग्रन्थान्तरे च बहवो द्रुतिप्रयोगाः पठिताः । तेऽपि शंभुप्रसादमन्तरेण न सिध्यन्तीति

द्रव्यवाद इवाऽऽचार्येण तेऽपि कथन उपेक्षिताः । इदानीं रोगवारणार्थं विशिष्टा-नुपानसहितप्रयुक्ताभ्रभस्मसत्त्वसाधारणगुणानाह-वेल्लव्योषेति । दिव्याभ्रं कृष्णवज्राभं भस्मसत्त्वान्यतरावस्थापन्नम् । जूर्तिं ज्वरम् । योगैस्तत्तद्रोगचिकित्सोक्तकषायफाण्टचूर्ण-गुटिकादिमूर्छितरसादियोगैश्च सह भक्षितमेतत्सकलामयान्प्रशमयतीति । जठरव्यथाऽ-तिसारः । रससंकेतकलिकायामभ्रसेवनकाले वर्ज्यान्यप्युक्तानि—' क्षाराम्लद्विदलं वर्ज्यं कर्कोटं कारवेल्लकम् । वृन्ताकं च करीरं च तैलं चाभ्रकसेवने ' इति ॥ ५४ ॥

**मूलम्**—अष्टास्र० वैक्रान्तमिति सप्तधा ॥ ६४ ॥ **टीका**—एवं शुद्ध-भस्मसत्त्वद्रुतिभावैरभ्रकं पारदसंस्कारोपकारकं भवतीति तदभिधाय तत्तुल्यः सर्वेषु रसेषु लोहेषु च प्रभावातिशायी निर्मुखरसस्य शीघ्रमभ्रकग्रासभक्षणेऽत्युपयोगी वैक्रान्तक एवेत्यभ्रकवर्णनोत्तरं क्रमप्राप्तं च वैक्रान्तं वर्णयति—अष्टास्र इति । उक्तरसस्या-भ्रकग्रासभक्षणेऽत्युपयोगित्वमुदाहृतं रसार्णवे—" वैक्रान्तवज्रसंस्पर्शाद्दिव्यौषधिबलेन वा । निर्मुखो भक्षयेद्देवि क्षणेन गगनं रसः ' इति । अयं सुलक्षणो वज्रभू-मिज एव भवति । अष्टावस्राः कोणा यस्येति तथोक्तः । तथाऽष्टौ फलकाः कर-पत्रिकया चीरितकाष्ठफलका इव श्लक्ष्णाः फलकाकारा यस्येति तथोक्तः । षट्-कोणः षडस्रो वा मसृणः श्लक्ष्णः । शुद्धेनामिश्रेण केवलेन वक्ष्यमाणान्यतमवर्णेन युक्तो मिश्रवर्णयुक्तो वा पाषाणविशेषो वैक्रान्तक इत्युच्यते । अथ वर्णभेदेन तस्याष्टौ भेदानाह-श्वेत इति । पारावतच्छविः श्वेतपीतशबलकृष्णवर्ण इत्यर्थः । श्यामलः श्वेतशबलकृष्णो धूम्रवर्ण इत्यर्थः । कर्बुरो विचित्रवर्णः । अधुना तस्य गुणानाह—आयुरिति । पविसमानगुणो हीरकतुल्यगुणः । तरस्वी वेगेन कार्य-कारी । वपुर्बलं जीर्णकायस्य यौवनोत्पादकं बलं तत्कारी लोहकारी स्वर्णकारी चेत्यर्थः । तस्य हि धातुवादोपयोगित्वात् । रसायनेष्विति । अथ ग्रन्थान्तरोक्तं तस्योत्पत्तिप्रकारमाह—दैत्येन्द्र इति । तदुपलब्धिस्थानमाह—विन्ध्यस्येति । विन्ध्यनिकटवर्तिक्रमनिम्नाधोदेशे तत्प्रत्यन्तपर्वते वा तादृशे मालवप्रदेशे च शरदि पाषाणस्खलनेन विच्छेदितोदकानां कासांचिन्नदीनामपि तीरेषु च दृश्यतेऽयं वैक्रान्त-कपाषाणो बहिः किंचिन्मलिनक्षुद्रपाषाणमयपटलाच्छादितः । स चाकचिक्यशुक्लादिव-र्णविशिष्टो गारगोटीति लोके प्रसिद्धः । यत्स्फोटनेनान्तर्वर्तिखोटभूतातिदीप्तचाकचिक्य-विशिष्टपोगरसहितो भासते । स च मालवदेशे प्रायः सितवर्ण एवोपलभ्यत इति । तन्निरुक्तिमाह—विकृन्तयतीति । विकृन्तयति गुणक्रियासहितजात्यन्तर-रूपां विकृतिमुत्पादयतीति निरुक्त्या संपन्नो वैक्रान्तक इति शब्दः । निरुक्तशब्दे वर्णविपर्यासो वर्णान्तरं च सह्यमेव । जात्यन्तररूपा विकृतिर्यथा ताम्रे सुवर्णत्वम् । अथ वर्णभेदेन गुणभेदं ग्राह्याग्राह्यत्वं चाऽऽह—श्वेत इति । अत्र कृष्णनीलयो-

रैक्यं मत्वा सप्तविधत्वमेव प्रदर्शितं रसार्णवानुरोधेन । पीते पीतकार्ये सुवर्णोत्पादने पीतवर्णोत्पादने च । सिते रजतत्वोत्पादने कार्ये श्वेतवर्णोत्पादने च । शेषे नील-पारावतप्रभे ॥ ६४ ॥

**मूलम्**—यत्र क्षेत्रे० वैक्रान्तः सत्त्वमुत्सृजेत् ॥ ७२ ॥ **टीका**—अथ तस्याऽऽहरणविधिमाह—यत्र क्षेत्र इति । तच्छोधनमाह—वैक्रान्तकाः स्युरिति । वैक्रान्तचतुर्थांशमानेन यवक्षारसर्जकक्षारटङ्कणाद्यन्यतमं सैन्धवसौवर्चलाद्यन्यतमं च वैक्रान्तकसहितं वस्त्रपोटलिकया बद्ध्वा प्रत्येकं काञ्जिकाद्यम्लगोमूत्रकुलत्थक्वाथकदली-स्वरसेषु कोद्रवक्वाथे च क्रमेण दोलायन्त्रे त्रित्रिदिनानि संस्वेदिता वैक्रान्तका विशुद्धाः स्युः । अथवा केवलकुलत्थक्वाथे सप्तवासरपर्यन्तं स्विन्ना अपि परिशुध्यन्ति । अथ समभागगन्धकसहितं वैक्रान्तकचूर्णं निम्बुरसेन संमर्द्य संशोष्य संपुटितं कृत्वा गजपुटं देयम् । एवमष्टपुटैर्वैक्रान्तको म्रियते भस्मी भवति । अथवा वैक्रान्तोप-लान्प्रताप्याग्निवर्णान्कृत्वा तेष्वश्वमूत्रं सिञ्चेत् । एवं पुनः पुनः कुर्यात् । तावत्, यावत्तद्वैक्रान्तं रवरूपं कणरूपं चूर्णरूपं स्यात्ततो गजपुटं दद्यात् । तेन विधिनाऽपि भस्मी भवति । तच्च वज्रभस्मसमकार्यकरम् । अतो वज्रस्थाने योज्यम् । अथ तत्सत्त्वविधिमाह—मोक्षेति । शरावेण समायुक्तं द्वात्रिंशत्कर्षमितं वैक्रान्तचूर्णं मोक्षकादिक्षारोदके गोमूत्रे च क्रमेण भावितं कृत्वा वैक्रान्तसंभवं तच्चूर्णं प्रत्येकं समभागवज्रकन्दादियुतं कल्कीकृतं पृथक्चतुर्थांशमिताभ्यां टङ्कणलाक्षाभ्यां युतं सर्वमेत-न्मेषशृङ्गीकषायेण संमर्द्य गोलकीकृत्य संशोष्य वज्रमूषायां महामूषायां वा सापिधानायां संस्थाप्य कोष्ठयन्त्रे वा हठाग्निना दृढाग्निना ध्मापितं चेत्ततः सत्त्वं पतति । अथ-वाऽस्य सत्त्वपातनयोगो ग्रन्थान्तरे प्रतिपदोक्तः । सर्वरसोपरसवज्रपाषाणादिद्रव्याणां सत्त्वपातनसाधारणो वज्रपिण्डीयोगो वा रसहृदयोक्तस्तेनापि सहितः पिण्डीकृतो दृढा-ग्निना पूर्ववद्घटिकापर्यन्तं ध्मातोऽपि वैक्रान्तः सत्त्वं मुञ्चति । रसहृदये सत्त्वार्थं वैक्रान्तपिण्डीद्रव्याण्यन्यथैवाभिहितानि । तथा हि—"भस्त्राद्वयेन हठतो ध्मातव्यं पञ्च-माहिषसुबद्धम् । दत्त्वा दशांशस्वर्जिकपटुटङ्कणगुञ्जिकाक्षारान् । तद्गच्छति कठिनत्वं मुञ्चति सत्त्वं स्फुलिङ्गकाकारम् । मुक्तानिकरप्रायं ग्राह्यं तत्काचमधिवर्ज्य" इति । मोक्षकः कृष्णापाटला । मोरटो मूर्वा । वज्रकन्दो वन्यसूरणकन्दः । मूकमूषा सपिधानमूषा ॥ ७२ ॥

**मूलम्**—भस्मत्वं० गङ्गाम्भ इव पातकम् ॥ ७६ ॥ **टीका**—अथ वैक्रा-न्तभस्मप्रयोगगुणानाह—भस्मत्वमिति । त्रिकृतको वैक्रान्तकः । चतुर्थांशसुवर्णभ-स्मयुतः कणावेल्लचूर्णाज्यसहितो लीढः सन्यक्ष्मादीन्हन्ति । सूतभस्मेति । तुलितं तुल्यम् । त्रिःसप्तदिवसैरेकाविंशतिदिनैरित्यर्थः । रसार्णवे वैक्रान्तद्रुतिमप्युदाजहार । तत्पाठस्तु—" केतकी स्वरसः काङ्क्षी मणिमन्थं सखेचरम् । स्वेदनाज्जायते देवि वैक्रान्तं रससंनिभम् " इति । खेचरं कासीसम् ॥ ७६ ॥

**मूलम्**—सुवर्णशैल० रसायनविधावपि ॥ ८६ ॥ **टीका**—एवं वैक्रान्तवर्णनोत्तरं माक्षीकवर्णनमेवाऽऽरभ्यते । रसे हि स्थिररागप्रदं तस्य च प्राणवत्प्रियं तदुदरे जरणोपयोगि दुर्मेललोहमेलकं चेति बहुगुणं माक्षीकमेवातो वैक्रान्तवर्णनोत्तरं युज्यत एव तदारम्भः । तस्य रञ्जकत्वं च रसहृदये जगाद—"बाह्यो गन्धकरागो विलुलितरागे मनःशिलाताले । माक्षीकसत्त्वरसकौ द्वावेव हि रञ्जने शस्तौ" इति। आदौ तावत्तदुत्पत्तिमाह–सुवर्णेति । योऽयं काञ्चनरसो माक्षीकशब्देन व्यवहृतः शास्त्रे स विष्णुना निर्मितः । तस्य हि जगत्कारणत्वात्प्रतिपदोक्ततदिच्छाजन्यत्वोपदेशाश्रवणेऽपि तत्पादरक्तजन्येऽस्मिन्रसे तत्कर्तृकत्वारोपोऽयं विष्णुना निर्मित इति। तत्पादरक्तजन्यत्वं रसार्णवे स्फुटी चकार । तथा च तद्ग्रन्थः—"कृष्णस्तु भारतं श्रुत्वा योगनिद्रामुपागतः । तस्य पादतले विद्धं व्याधेन मृगशङ्कया । ये तत्र पतिता भूमौ क्षताद्रुधिरबिन्दवः । ते निम्बफलसंस्थानाज्जाता वै माक्षिकोपलाः" इति । तत्स्थानमाह—सुवर्णेति । सुवर्णशैलो मेरुपर्वतः प्रभव आद्योपलब्धिस्थानं यस्येति तथोक्तः । अन्यत्र क्वोपलभ्यते तदप्याह—ताप्यामिति । किराताः प्रायेण यत्र निवसन्ति स देशोऽपि किरातशब्देन व्यवह्रियते । स च देशः शिवशक्तिसंगमतन्त्र उदाहृतः–"तप्तकुण्डं समारभ्य रामक्षेत्रान्तकं शिवे । किरातदेशो विज्ञेयो विन्ध्यशैलेऽवतिष्ठते" इतितद्वचनात्कश्चन विन्ध्याचलसमीपवर्तिप्रदेश इत्यनुमीयते । चीनदेशस्तु सिद्ध एव । माधवे मासि तदा हि नदीजलशोषणात्स दर्शनविषयो भवतीत्यर्थः । तद्भेदमाह—द्विविध इति । तपतीतीरेति । तपती नदी तापीतिनाम्ना लोके प्रसिद्धा । तत्संभवं तु माक्षीकं पञ्चवर्णसुवर्णवद्भवति । किंचिद्रक्तपीतनीलकृष्णमिश्रं बहुलश्वेतवर्णमधमं सुवर्णं तत्सदृशं भवतीति स्थानभेदेन वर्णभेदेन च तस्यावान्तरभेदौ बोध्यौ । संप्रति माक्षीकस्य गुणान्तराण्याह—माक्षीकधातुरिति । प्राणस्तद्वत्प्रियः । अत एव तद्योगेनाभ्रकादिग्रासं सकलमेव पारदः शीघ्रं चरति । दुर्मेललोहं संकराख्यं यथा तीक्ष्णलोहं कठिनम्। स्वर्णं तु मृदुमिश्रितमेतदुभयं संकराख्यं भवति । मिथो विरुद्धगुणं तत्पारदो न ग्रसति । मेलनाभावेनैकीभावाभावात् । तन्मेलनं तु माक्षीकसत्त्वयोगेन भवति । ततो रसश्चरति । अत्र लोहमेलनश्चेति चकारेणास्य केवललोहनाशकत्वमपि संग्राह्यम् । तथा चोक्तं रसार्णवे—"न सोऽस्ति लोहमातङ्गो यन्न गन्धककेसरी । निहन्याद्गन्धमात्रेण यद्वा माक्षिककेसरी" इति । उत्तमस्वर्णमाक्षीकलक्षणं त्रिमल्लभट्टो व्याजहार बृहद्योगतरङ्गिण्याम् । यथा—'स्वर्णवर्णं गुरुस्निग्धमीषन्नीलच्छविच्छटम् । कषे कनकवद्घृष्टं तद्वरं हेममाक्षिकम्' इति । तच्छुद्धिमाह—एरण्डेति । माक्षिकोपलान्संचूर्ण्य चुल्लीस्थे मृत्खर्परे लोहे कटाहे वा, एरण्डतैलेनाऽऽप्लाव्य पाचितं त्रिवारं सप्तवारं वा पाचितं ततो मातुलुङ्गरसे तदभावे निम्बुरसे वा सप्तवारं पाचितं शुध्यति । घटिकाद्वयपर्यन्तं

कदलीकन्दस्वरसपक्कं वा तथा तप्ततप्तं त्रिफलाकाथे सप्तवारं क्षिप्तं वा शुद्धिमृच्छति । अथ शुद्धस्य तस्य भस्मविधिमाह—मातुलुङ्गेति । चतुर्थांशेन गन्धकसहितं माक्षीकचूर्णं बीजपूररसेन संमर्द्य संशोष्य मल्लमूषासंपुटितं कृत्वा वराहपुटे पचेत् । एवं पञ्चपुटैर्माक्षिकं भस्मी भवति । अथवा खर्परे कटाहे वा, एरण्डस्नेहेन मिश्रितं सप्तवारमुपरि क्षिप्ततृणदाहपर्यन्तं पक्त्वा ततो गव्याज्येन तथैव सप्तवारं पक्त्वा भस्मी भवति । अथवा केवलेन मातुलुङ्गरसेनैव खर्परे पक्कं तन्म्रियत इति मृतं तद्रसे रसायने च योग्यं भवेत् । धातुसंनिभं गैरिकसमानवर्णम् । क्रोडो वराहः । अथ गन्धकस्य चतुर्थांशभागोक्तिस्तु तरङ्गिण्यां त्रिमल्लभट्टेनोक्ता । यथा—' माक्षीकस्य चतुर्थांशं दत्त्वा गन्धं विमर्दयेत् । उरुबूकस्य तैलेन ततः कार्या सुचक्रिका । शरावसंपुटे कृत्वा पुटेद्गजपुटेन तु । धान्यस्य तुषमूर्ध्वाधो दत्त्वा शीतं समुद्धरेत् । सिंदूराभं भवेद्भस्म माक्षीकस्य न संशयः ' इति ॥ ८६ ॥

**मूलम्**--त्रिंशांशनाग० सत्त्वं माक्षीकजं द्रवेत् ॥ ९५ ॥ **टीका**—अथ माक्षीकसत्त्वाविधिमाह—त्रिंशांशेति । त्रिंशांशेन शुद्धनागचूर्णेन संयुक्तमाक्षीकचूर्णं क्षारोदकेन जम्बीराद्यम्लरसेन मर्दितं कृत्वा गोलकीकृतं संशोष्य प्रकटमूषायां वृन्ताकमूषायां प्रक्षिप्य ध्मातं सत्ताम्रवर्णं सत्त्वं मुञ्चति । अत्र माक्षीकस्य यः सारांशः सोऽग्निसंयोगाच्छुद्धावर्तकालोत्तरं सत्त्वरूपो भवति । स च सारांशो माक्षीकघटकावयवगन्धकसहितः । अतोऽग्निसंयोगेन गन्धकसहितं तस्यापि विनाशनं संभवेदिति भिया तस्य तत्कालपर्यन्तमग्नौ स्थिरत्वसंपादनार्थं नागयोगोऽभिहितः । नागस्य हि माक्षिकापेक्षया गुरुत्वादतिदुर्जरत्वाच्च तत्सङ्गेन माक्षीकसारमपि निर्गन्धकावयवं स्थिरं भवति । नागयोगाभावे तु सारांशनाशात्सत्त्वलाभो न स्यादिति भावः । ततः सत्त्वपातोत्तरं नागस्यानुपयोगात्तन्नाशकमुपायमाह—सप्तवारमिति । नागमिश्रं तत्सत्त्वं मूषायां पूर्वोक्तायां गोस्तनायां वा ध्मात्वा परिद्राव्य निर्गुण्डीरसे क्षिपेत् । एवं सप्तवारं कृत्वा नागो नश्यति । एतत्सत्त्वाकर्षणयोगेऽग्निमसत्त्वाकर्षणयोगे च पिण्डीकरणं ग्रन्थकृता यद्यपि नाभिहितं तथाऽपि रसहृदयस्थवाक्यान्तरादवसीयते । तथा च तद्वाक्यम्—' वज्राभ्रकान्तसस्यकमाक्षीकप्रभृतिसकलधातूनाम् । पातयति सत्त्वमेषां पिण्डी ध्माता दृढाङ्गारैः ' इति । अत्राधस्तान्नागेनाऽऽकर्षणान्माक्षिकस्य गन्धकेतरावयवानामुद्गमनभयाभावात्प्रकटमूषायामित्युक्तम् । साधारणसत्त्वपिण्डीं तु रसहृदये व्याजहार—" ऊर्णाटङ्कणगुडपुरलाक्षासर्जरसैः सर्वधातुभिः पिष्टैः । छागीक्षीरेण कृता पिण्डी शस्ता हि सत्त्वविधौ " इति । अथोद्गमनविरोधिद्रावकद्रव्यान्तरसंस्कारेण संस्कृतमाक्षिकस्य नागयोगेन रहितस्यापि सत्त्वविधिमाह—क्षौद्रेति । क्षौद्रस्यैरण्डतैलस्य चानुद्गमशालित्वात्कदलीकन्दसारस्यापि तादृग्गुणत्वाच्च तैः स्थिरीकृतमाक्षिकसारस्य सत्त्वोत्पादनपर्यन्तं विनाशाभावो युक्त एवेति भावः । द्रुतद्रावं शीघ्रद्रावणयोग्यम् ।

शीतलं शीतवीर्यम् । एतत्सत्त्वं देहसिद्धिकरं लोहसिद्धिकरं च । अत्र माक्षीकसत्त्वे पातव्ये शकट्यादिषु मूषायां माक्षीकपिण्डीं प्रक्षिप्य माधूककोकिलाङ्गारैः परिपूर्णायां धमन्या वृन्ताकेन लघुभस्त्रिकया वा धमनान्मृद्वग्निनैव सत्त्वपातो भवतीति क्रियाकुशला भिषज आहुः । मृदुद्रव्याणां हि सत्त्वपातनेऽल्पकालाग्न्योरेवापेक्षणादिति युक्तिमपि ब्रुवन्ति । अथ माक्षीकसत्त्वघटितरसायनमाह—माक्षीकसत्त्वेनेति । तत्सत्त्वेन सह समभागं पारदमेकीकृत्य मर्दनेन पिष्टीं विधाय मूषायां तद्द्रवीकृत्य विलीने विद्रुते सति तत्समभागं गन्धकं तत्र दत्त्वा खल्वमध्ये मर्दनेनैकीभूते कज्जलरूपे सति तत्कज्जलीसमानमभ्रकसत्त्वमग्नियोगेन मूषायां द्रुतीकृतं सत्तत्र दत्त्वा पुनः संमर्द्य जलेन संमर्दनाद्गोलकं विधाय संशोष्य विवृतमुखायां काचकलश्यां मृत्कर्पटसप्तकावेष्टनेन दृढीकृतायां प्रक्षिप्य लवणयन्त्रे निधाय तां प्रहरद्वयपर्यन्तं पचेत् । अत्र पाकः सर्वेषां समरसरूपेणैकीभावपर्यन्तं विवक्षितः । तस्य हि बहुकालापेक्षा नास्त्येव । अत एव द्रव्यमानं नोक्तम् । एवमन्यत्राप्याचार्याभिप्रायो वेद्यः । यत्र पाककालमात्रनिर्णयो द्रव्यमाननिर्णयो नास्त्येव तत्रेति । यत्र तु गन्धकादीनां जारणेष्यते तत्र भक्ष्यभक्षकद्रव्यमानानुरोधेनैव सधूमानिर्धूमजारणानुरोधेन च सम्यक्पाकस्तदर्थं सर्वद्रव्यमानं चावश्यं वक्तव्यं भवति । अन्यथा जीर्णाजीर्णग्रासः पारदो विक्रियां प्राप्नुयादिति । अथ माक्षीकसत्त्वद्रुतिमाह—एरण्डोत्थेनेति । अत्र वापो माक्षीकसत्त्वसमभागेन कार्यः । आवाप्यं वापनीये चेति परिभाषया समभागस्य ग्राह्यत्वेनोक्तत्वादिति ॥ ९५ ॥

**मूलम्**—विमलस्त्रिविधः प्रोक्तो० पतनेनात्र संशयः ॥ १०४ ॥ **टीका**—अथाऽऽकृत्या गुणैश्च माक्षिकसमो विमलः । अतो माक्षीकवर्णनानन्तरं विमलवर्णनमुपक्रमते-विमल इति । तल्लक्षणमाह—तत्कान्त्या चेति । एवं च हेमकान्तियुतो हेमलः । तारसमवर्णस्ताराविमलः । कांस्यवर्णतश्च कांस्यविमलो बोध्यः । संप्रति सर्वविमलसाधारणं स(त)ल्लक्षणं तद्गुणं चाऽऽह—वर्तुल इति । त्रिविधस्य पार्थक्येनोपयोगमाह—पूर्व इति । अयं रसो व्यवहारे लोके नाम्नाऽप्रसिद्ध एव । किंतु गुरुपरम्परोपदेशेन लक्षणैश्चावबोद्धव्यः । सन्ति च खल्वस्मिञ्शास्त्र एतादृशा बहवः पदार्था येषां शास्त्रोक्तः सोऽयं पदार्थ इत्यङ्गुलीनिर्दिष्ट एव ज्ञायते । तादृक्प्रत्यक्षोपदेशः प्रमाणीकर्तव्य एव भिषग्भिरसति बाधके । केवलोपदेशस्यापि सर्वशास्त्रेषु प्रमाणत्वेनाऽऽदृतत्वात् । तत्राऽऽप्तोपदेश एव शक्तिग्राहकः । केचित्तु विमलो रौप्यमाक्षीकमिति वदन्ति । तत्तु न सम्यक् । तारमाक्षीकस्य गुणैरल्पान्तरोऽप्ययं तत्पर्यायो भवितुं नार्हति । कोशादिप्रामाण्याभावात् । तारमाक्षिकात्पृथक्त्वेनाभिहितविमललक्षणभेदशुद्धिसत्त्वगुणपाठानां वैयर्थ्यापत्तेश्च । तच्छुद्धिमाह—आटरूषेति । आटरूषरसे जम्बीररसे मेषशृङ्गीरसे वा स्विन्नो विमलो रसो मलरहितो भवेत् । क इव तदाह—यथा परेऽन्ये धातवः स्वस्वशुद्धिसाधनसंस्कृता विमला भवन्ति तद्वत् । वस्तुत-

स्त्विदं वाक्यं पादपूरणार्थं बोध्यम् । गन्धेति । चतुर्थांशगन्धकसहितं विमलचूर्णं लकुचरसे दत्त्वैकदिनं संमर्द्य गजपुटं दद्यात् । एवं दशपुटैर्विमलो भस्मरूपो भवति । अथ सत्त्वप्रकारमाह—सटङ्केति । प्रतिपुटं चतुर्थांशटङ्कणसहितोऽयं लकुचरस एकैकदिनं संमर्दितस्ततो मेषशृङ्गीभस्मयुतश्चैकदिनं संमर्दितो वृन्ताकमूषोदरे संलिप्तः संशोषितः पिधानेन निरुद्धो ध्मानेन सीसकतुल्यवर्णं सत्त्वं मुञ्चति । अथवा प्रत्येकं चतुर्थांशकाङ्क्ष्यादियुतं विमलं शिग्रुरसेनैकदिनं संमर्द्य ततः कदलीकन्दरसेन तथैव संमर्द्य समभागमोक्षकक्षारसंयुतो वज्रकन्दकल्कोदरे सुगूढः साच्छादनवृन्ताकमूषायां स्थितः पुनः पुनः पूरणेन षट्प्रस्थकोकिलैर्ध्मातः सच्चन्द्रार्ककान्ति सत्त्वं त्यजति । काङ्क्षी तुवरी । वज्रकन्दो वन्यसूरणः । मोक्षकः कालमुष्ककः कृष्ण-पाटला ॥ १०४ ॥

**मूलम्**—तत्सत्त्वं० रशेषामयान् ॥ १०८ **टीका**—अथ तद्योगसिद्धरसमाह—तत्सत्त्वमिति । समभागपारदेन सह तत्सत्त्वं संमर्द्य पिष्टीं विधाय तां च पिष्टीं कटाहे समभागगन्धके वह्नियोगेन विलीने सति दत्त्वा पश्चात्तद्गोलकं वालुकायन्त्रे काचकूप्यां विवृतमुखायां दत्त्वा सत्त्वापेक्षया द्विगुणं हरितालं पञ्चगुणां शिलां च क्षिप्त्वा मन्दवह्निना जारयेदिति । पारदो हि सधूमजारणायां मन्दाग्निनैकप्रह-रेण कर्षचतुष्टयमितं हरितालं तावतीमेव मनःशिलां जरयतीति साधार-णनियमेन द्रव्यमानं दृष्ट्वा सुपाककाल उन्नेयः । अत्र मुहुर्मुहुरुद्गमशाली बाष्पोष्मा यदा नोद्गच्छेत्तदा मुखमुद्रां दद्यात्सुरक्तवर्णोत्पादनार्थमिति केचिद्विधिज्ञा भिषज आहुः । परंतु तथाऽस्माकं संप्रदायो नास्ति । ततस्तं सिद्धरसं बहिर्निष्कास्य तस्य दशांशेन रजतभस्म वैक्रान्तभस्म च दत्त्वा संमर्देनैकीकृतं वस्त्रगालितं कृत्वा कूपिकामध्ये संस्थाप्य यत्नतः शिवं रसमेनं च परिपूज्य व्योषाद्यनुपानसहितो लीढोऽयं विमलाख्यो रसो दुश्छायाकारकज्वरप्रभृतीन्रोगान्हन्ति । तत्तद्रोगचिकित्सा-योगविरहितोऽप्ययमेतान्रोगान्हन्ति चेत्, अपरतत्तद्रोगवारकयोगयुतोऽयमशेषामयान्हन्या-दिति किमु वक्तव्यमिति भावः । मूलार्तिमर्शोरुजम् । विमलप्रधानत्वात्तद्घटितर-सोऽयं विमलसंज्ञकः ॥ १०८ ॥

**मूलम्**—शिलाधातुर्द्विधा० देहे च लोहे हितम् ॥ ११५ ॥ **टीका**—विमलवत्सर्वरोगनाशकत्वेनोद्देशक्रमप्राप्तत्वाच्च विमलवर्णनानन्तरं शिलाजतु वर्ण्यते—शिलाधातुरिति । शिलाधातुः शिलाजतु । स च द्विविधः । तत्रैको गोमूत्राद्यो गोमूत्रशब्द आद्यः प्रथमो नाम्नि यस्येति तथोक्तो गोमूत्रशिलाधातुरित्यर्थः । गोमू-त्रगन्धविशिष्टत्वेन गोमूत्रशिलाधातुरित्युच्यते । अन्यो द्वितीयः कर्पूरपूर्वकः । कर्पूरः समस्तनाम्नि पूर्वपदरूपो यस्येति तथोक्तः । कर्पूरशिलाधातुरित्यर्थः । कर्पूरगन्धवर्णवि-शिष्टत्वात्स कर्पूरशिलाधातुरित्युच्यते । तत्राऽऽद्यस्य भेदद्वयमाह—ससत्त्वेति । तत्प्र-

भवस्थानमाह––ग्रीष्म इति । हिमभूभृतो हिमवतः पादेभ्यः प्रत्यन्तपर्वतेभ्योऽन्तस्थः शिलाधातुस्तप्तः सन् बहिर्निःसरेत् । कथंभूतेभ्यः पादेभ्यः । स्वर्णरूप्यार्कगर्भेभ्यः । अर्कस्ताम्रम् । स्वर्णादीनां खनिस्थानभूतेभ्यः । एवं च स्थानभेदेन त्रिविधस्य तस्य शिलाधातोः क्रमेण रसान्वर्णान्गुणांश्चाऽऽह—स्वर्णेति । जपापुष्पनिभो वर्णो रक्तवर्णः । अथ शुद्धशिलाजतुलक्षणमाह––वह्नाविति । सलिले जले क्षिप्तं चेद्विलीनं भवेत् । एकीभूतं भवेत् । अत्र लोहजं शिलाजतु नोक्तं तस्याऽऽग्नेयगुणत्वेन नातिपथ्यत्वात् । किट्टभूयिष्ठत्वेन कष्टशोध्यत्वाच्च । तच्च विन्ध्यस्योत्तरे प्रत्यन्तपर्वतेषु मालवे जयपुरराष्ट्रे चोपलभ्यते । स च विशेषेण कृष्णवर्णोऽम्लरसः पाण्डुरोगघ्नश्च । संप्रति साधारणशिलाजतुगुणानाह––नूनमिति । किमपरं सर्वत्वग्रोगनाशनमस्मादधिकमपरमन्यद्द्रव्यं किं नाम स्यात् । किमपि नेत्यर्थः । त्वग्रोगनाशनेऽयमेव सर्वोत्तम इति यावत् ॥ ११५ ॥

**मूलम्**––रसोपरस० विहितं बुधैः ॥ १२५ ॥ **टीका**—शिलाजतुनि भेषजभूतरसशास्त्रोक्तसर्वरूनिजद्रव्येभ्यो गुणातिशायित्वमाह––रसेति । तस्य च पाषाणकिट्टमृद्विश्लेषकरं शोधनं कुर्वन्ति भिषजः । तत्प्रकारस्तु - क्षुद्रपाषाणादिसंश्लिष्टं शिलाजतु कण्ठदघ्नपूरिते सजले लौहे पात्रे प्रक्षिप्य तत्पात्रं प्रखरतरातपे स्थापयेत् प्रातरारभ्य सायंकालपर्यन्तम् । तच्च पाषाणमृदादि विहाय जलेनैकीभावं प्राप्य यदा संतानिकारूपेण जलोपरि तरति तदा द्वितीयदिने प्रातरप्रकम्पितजलात्संतानिकारूपं संग्राह्य सजलेऽन्यलौहे पात्रे प्रक्षिप्याऽऽतपे प्रखरे पूर्वदिनवत्तत्पात्रं स्थापयेत् । तज्जलात्तृतीयदिने प्रातः संतानिकारूपं संग्रहीतमन्यस्मिन्सजले पात्रे प्रक्षिप्याऽऽतपे तत्पात्रं स्थापयेत् । एवं पञ्चवारं षड्वारं वा सजलेऽन्यत्रान्यत्र पात्रे स्थापनेन तच्छुद्धं भवति । एवंरीत्याऽशुद्धस्य ससत्त्वस्य गोमूत्राशिलाजतुनः प्रस्थमिताच्चतुष्कर्षमेवावशिष्यते । तादृक्शुद्धस्य तस्य किट्टभावान्तरसंश्लेषजगिरिजदोषाणां वारणाय प्रकारान्तरेण विविधां शुद्धिमाह––क्षाराम्लेति । क्षारो यवक्षारादि क्षारोदकम् । क्षाराम्लादिभिः प्रत्येकं जिलाजतु संमिश्र्य पटेन त्रिवारं सप्तवारं वा गालयेदन्तराऽन्तरा युक्त्या संग्राह्याऽऽतपे संशोषयेच्च । इत्येकस्तच्छुद्धिप्रकारः । तथा प्रत्येकं गोदुग्धादिभिरपि पूर्वोक्तजलेनैव त्रिस्त्रिवारं तत्संशोधयेत् । इति द्वितीयशुद्धिप्रयोगः । अत्र प्रयोगे केचिद्भिषजो दुग्धादिभिर्दोलायन्त्रपाकेन पक्वं संशोषयन्तीति । अथ तृतीयं प्रयोगमाह––क्षाराम्लेति । क्षारो यवक्षारः । अम्लं जम्बीरादिरसः । गुग्गुलुर्महिषाक्षः । तांश्च शिलाजतुनोऽष्टगुणान्पात्रोदरे दत्त्वा पात्रमुखं वस्त्रेण पिधाय बद्ध्वा वस्त्रोपरि शिलाजतु संस्थाप्य शरावादिना पिधायाधस्तादग्निं मन्दं कुर्यात् । एवं घटिकापर्यन्तं स्वेदितं पश्चात्संशोषितं शिलाजतु विशुध्यति । साम्बुस्थालीमुखाबद्धे वस्त्रे पावयं निवेशयेत् । अत्र विलीनो गुग्गुलुसंमिश्रः शिलाधातुः पृथक्कर्तुं न शक्यते । अतः क्रियासौकर्याय स्थालीकण्ठपार्श्वयोरन्तः कटकद्वयं गन्धकजार-

णायन्त्रसमं विधाय स्वल्पपात्रमुत्तानं शिलाजतुसंभूतं कटकद्वये संसक्तं कृत्वा भाण्डं पिधाय स्वेदयेदिति बोध्यम् । अथ ससत्त्वगोमूत्रशिलाजतुनो मारणं सत्त्वपातनविधिं चाऽऽह—शिलयेति । प्रत्येकं समभागैर्मनःशिलागन्धकहरितालैः सहितो मातुलुङ्गरसेनैकदिनं संमर्दितः शिलाधातुः संशोषितः संपुटितः कपोतपुटेन म्रियते । मृगस्य विशिष्टद्रव्यान्तरयोगयुक्तस्य प्रयोगजगुणानाह—भस्मीभूतेति । समतुलं समभागम् । अत्र शक्त्युत्कर्षार्थं कान्तादियोगो रसायनविधानतस्तद्विधिश्चाष्टाङ्गहृदयादौ बोध्यः । अथ तस्य शिलाधातोः सत्त्वविधिमाह—पिष्टमिति । जम्बीरादिजाम्लरससहितं द्रावणवर्गसहितं च शिलाधातुं संमर्द्य वृन्ताकमूषोदरे लिप्त्वा रुद्ध्वा च खादिरैः कोकिलैः संपूर्य दृढं ध्मातः शिलाधातुर्लोहवर्णं सत्त्वं पातयेत् । कर्पूरशिलाजतुगुणानाह—पाण्डुरमिति । तच्छुद्धिमाह—एलेति । संभिन्नं संमर्दितं तत्तोयेनैव दोलायन्त्रे स्वेदनीयन्त्रे वा मुहूर्तपर्यन्तसिद्धं स्विन्नं शुध्यति । तस्य च स्वतः सिद्धरूक्षशिथिलावयवत्वेन लघुत्वाच्छरीरे शीघ्रव्याप्तेश्च मारणं बुधा नेच्छन्ति । निःसत्त्वेन तस्य सत्त्वपातनमपि नेच्छन्ति ॥ १२५ ॥

**मूलम्**—पीत्वा० शुध्यते तुत्थकं परं० सत्त्वं भवति शोभनम् ॥ १३४ ॥

**टीका**—अथोद्देशक्रमप्राप्तं सस्यकं वर्णयति—पीत्वेति । पुरा तार्क्ष्यः किलाऽऽदावमृतं पीत्वा पश्चाद्धालाहलं पीतवान् । तस्य चासह्यत्वादाकुलेन गरुत्मताऽमृतमिश्रविषेण सहोदरस्थं प्राक्तनमशितपीतादिसर्वमन्नं वान्तमुद्गीर्णम् । क्व । मरकताह्वये गिरौ पर्वते । मरकतरत्नोत्पत्तिस्थानं नीलगिर्यादेरेव मरकताख्यपर्वत उच्यते । अत्र सहार्थे तृतीयायोगादल्पमात्राकृतं तस्याप्राधान्यं सूचितम् । आधिक्ये तु तन्मारणमेव स्यादिति सूचितम् । अमृतयोगिविषमिश्रं तद्वान्तमन्नदोषादिघनीभूतं सत्सस्यकं मयूरतुत्थमभूत् । रसहृदयटीकायां रस्यकश्चपल इति व्याख्यां चकार चतुर्भुजः । तत्प्रमाणं मृग्यम् । तस्य सतो लक्षणमाह—मयूरेति । नन्वेवं विषयोगाज्जीवितनाशभयेन तदग्राह्यमेवेत्याशङ्क्याऽऽह—द्रव्यमिति । द्रव्यं विषयुतमिति । अल्पमात्रया विषयुतमित्यर्थः । यथाऽल्पमात्रया विषेण युतोऽमृतप्राशावलेहः क्षयनाशेऽधिकगुणवान्भवति तद्वत् । सुधायुक्तं संयोगेन सुधायाः सहायभूतम् । एवं च प्रागुक्ततृतीया नार्थान्तर इति भावः । तद्गुणानाह—निःशेषेति । अथ तच्छुद्धिमाह—सस्यकमिति । सस्यकं मयूरतुत्थम् । रक्तवर्गेण रक्तवर्गकषायेण भावितं सप्तवारं भावितं शुध्यतीत्येकः शुद्धियोगः । कुसुम्भं खदिरो लाक्षेति दशमाध्याये रक्तवर्गो वक्ष्यमाणः । अथवा तस्मिन्तापेनाग्निवर्णे सति तत्क्षणमेव तत्र स्नेहवर्गेण सेचनं कार्यमिति तप्ततप्ते सप्तवारं सेचनेन तदद्दूषितं शुद्धं भवति । अथवा वस्त्रपोटलिकाबद्धं कृत्वा दोलायन्त्रे प्रत्येकं क्रमेण गोमहिष्याजमूत्रेषु प्रहरत्रयपर्यन्तं सुस्विन्नं पक्कं तुत्थकं परमतिशयेन शुध्यति । अथ मारणमाह—लकुचेति । प्रति-

पुटं समभागेन गन्धकेन चतुर्थांशटङ्कणेन च युतं तुत्थकं लकुचरस एकदिनं संमर्द्य वटिकां विधाय संशोष्य मल्लमूषामध्ये निरुध्य सप्तवारं कुक्कुटपुटदानेन म्रियते । अथ सत्त्वविधिमाह—सस्यकस्येति । सौभाग्यं टङ्कणम् । मूषा वृन्ताकमूषा । इन्द्रगोपो वार्षिको रक्तवर्णोऽतिक्षुद्रः कीटविशेषः । 'मृगकिडा' इति महाराष्ट्रभाषायां प्रसिद्धः । तदाकृति तत्तुल्यवर्णम् । आकृतिर्लक्षणम् । लक्षणं चिह्नमाकृतिरिति माधववचनात् ॥ १३४ ॥

**मूलम्**—निम्बुद्रवाल्प० नेत्ररुजापहम् ॥ १४२ ॥ **टीका**—अथ सत्त्वस्य विध्यन्तरमाह—निम्बुद्रवेति । अत्राल्पशब्देन चतुर्थांशग्रहणं बोध्यम् । ध्मानं चात्र तालवृन्तधमन्योरन्यतरेण कार्यम् । तच्च चतुष्पञ्चकोकिलानां दहनपर्यन्तम् । अथाव्यभिचारिसत्त्वोत्पादकविधिमाह—शुद्धं सस्यमिति । सस्यं तुत्थकं पूर्वोक्तप्रकारेण शुद्धं कृत्वा समभागमनःशिलायुतं कृत्वा पूर्वभेषजसंयुतं निम्बुद्रवाल्पटङ्कणयुक्तं च कृत्वा संमर्द्य वृन्ताकमूषायां गुटिकारूपं कृत्वा धमनीयोगेन धमनरूपविधिना द्रावणवर्गेण संमर्द्य, उक्तमूषोदरे लिप्त्वा धमनरूपविधिनोर्णादिभेषजैः सह पिण्डीं बद्ध्वा कोष्ठयन्त्रे धृत्वा भस्त्राधमनविधिनेति प्रत्युक्तनानाविधिना सत्त्वं ताम्ररूपं निश्चयेन मुञ्चति । एतत्सस्यकसत्त्वं समभागेन पञ्चमाध्यायोक्तखराख्यभूनागसत्त्वेन संयुतं कृत्वा गोस्तनमूषायां द्रावणेनैकीकृत्य च ततस्तत्कृता मुद्रिकाऽङ्गुलीयकम् । स्पर्शमात्रेण शूलादिनाशकृद्भवेत् । चरविषं सर्पादिजम् । अचरविषं स्थावरं मूलिकादि । रामवत्सत्यवक्ता कश्चित्सिद्धः सोमसेनानीत्याख्यो मुद्रितेऽस्यां मुद्रायामभिमन्त्रितजलपानविषयेऽक्षरं वर्णात्मकं मन्त्रमप्याह—हिमालयोत्तर इति । अस्य मन्त्रस्य सिद्धभालुकिप्रोक्तं विनियोगमाह—मन्त्रेणेति । मुद्रिकासंस्कृततैललेपप्रयोगं शूलादिघ्नमाह—अनयेति ॥ १४२ ॥

**मूलम्**—गौरः श्वेतो० चपलं तथा ॥ १४८ ॥ **टीका**—अथोद्देशक्रमानुरोधेन तुत्थवर्णनान्तरं चपलं वर्णयति—गौर इति । अयं पदार्थो व्यावहारिकनाम्नाऽस्मिन्देशे लोके न प्रसिद्धः । पाषाणविशेषोऽयं जसदखनिसंनिहितभूगर्भे उपलभ्यत इत्यनुमीयते । आङ्ग्लभाषायां रेडियमिति नाम्नोपलब्धः पदार्थोऽयमेवेति केचित् । कृत्रिमस्तु परिभाषाध्याये वक्ष्यमाणः । सच्चपलगुणानाह—चपलो लेखन इति । रसराजसहायः सुवर्णमिव पारदमित्रमित्यर्थः । अथ तच्छुद्धिमाह—जम्बीरेति । प्रत्येकं जम्बीरादिरसैः सप्तसप्तभावनाभिश्चपलः शुद्धो भवति । कर्कोटकं वन्ध्याकर्कोटकी । शृङ्गवेरमार्द्रकम् । अथ प्रभावत एव तस्यापक्वस्यापि भक्षणेन शरीरे शीघ्रव्याप्तिः सिद्धाऽतो भस्मविधिमनुक्त्वैव जिलाजतूपादानभूतशिलाखण्डोपलसत्त्वविधिं प्रदर्श्यास्य सत्त्वमतिदिशति—शैलं त्विति । शिलाजतुवर्णनदेश एवैतत्पद्यं रसार्णवे भगवान्भैरवो व्याजहार । रसार्णवे वज्रापिण्डीमुक्त्वा तया शिलान्तरजीवमृद्धचः सत्त्वपातोऽभिहतः । तथा च तद्ग्रन्थः—' लाक्षालवणसौभाग्यधूमसारकटुत्रयम् ।

शिग्रुमूलं मधूच्छिष्टं पथ्यागुग्गुलुधातवः । स्वर्जिकासर्जनिर्यासपिण्याकोर्णासमन्वितम् । पारावतमलक्षुद्रमत्स्यद्रावकपञ्चकम् । तिलसर्षपगोधूममाषनिष्पावचिक्कसम् । छागीक्षीरेण संयुक्ता वज्रपिण्डी तु कीर्तिता । अनया वज्रपिण्ड्या तु पञ्चमाहिषयुक्तया । महारसा मोदितास्तु पञ्चगव्येन भाविताः । कोष्ठे खराग्निना ध्माताः सत्त्वं मुञ्चन्ति सुव्रते । एवं शिलाभ्यो जीवेभ्यो मृद्भ्यः सत्त्वं प्रजायते ॥ इति । अत्र त्विति-देशबोधकसौकर्यार्थमाचार्येणात्रैवाभिहितम् । शिलाया इदं शैलम् । तस्येदमित्यण् । शिलाजतूपादानशिलायाः स्थूलखण्डं तत्संचूर्ण्योपविषं महाविषं च तस्य चतुर्थांशेन दत्त्वा धान्याम्लेन त्रिदिनं संमर्द्य वृन्ताकमूषायां धृत्वा पिधाय वक्ष्यमाणखर्परसत्त्वविधिना सत्त्वं पातयेत् । एवमेव विधिना चपलं पिण्डीकृत्य तत्सत्त्वमपि पातयेत् । खर्परसत्त्ववदेव स्थिरी कुर्याच्च । विषोपविषवर्गौ दशमाध्याये वक्ष्यमाणौ । तेषां संयोगोऽत्रास्य रसस्य सत्त्वपातनपर्यन्तमुद्गमनाभावार्थम् । तेषामुद्गमशालिद्रव्यस्य हि च्छिन्नपक्षपारदस्येव स्थैर्यकरत्वादिति भावः ॥ १४८ ॥

**मूलम्**—रसको द्विविधः प्रोक्तो० शुद्धस्वर्णप्रभं यथा ॥ १५६ ॥ **टीका**—अथोद्देशक्रमप्राप्तं रसकं वर्णयति—रसक इति । रसको जसदोपादानखनिजमृत्तिका । तत्सत्त्वं जसदतुल्यमेवोत्पद्यते । दासी । इच्छासमकालमवश्यं प्राप्या । हस्तगतेति यावत् । सा च सिद्धिस्तदग्निसहत्वाधीना । तत्सत्त्वस्याग्निसहत्वविधिस्तु रससारे पूज्यपादैः प्रकाशितः । तदनुपदमेवास्य सत्त्वपातविधिवर्णनोत्तरं वक्ष्यामि । अथ तच्छुद्धिमाह—कटुकेति । पचेत् । दोलायन्त्रे दिनमेकं पचेत् । खर्पर इति । नृमूत्र इति । संप्रति धातुरञ्जनकरीं शुद्धिमाह—नरमूत्र इति । एवं शुद्धोऽयं मूषायां रसीभूतताम्राद्यन्यतमे धातुवादोक्तविधिना समभागावापेन ताम्रादीञ्शुद्धस्वर्णप्रभान् करोति । अत्र पारदः छिन्नपक्षो बद्धः प्रवेशीष्यते ॥ १५६ ॥

**मूलम्**—हरिद्रा त्रिफला० रसकस्य मनोहरम् ॥ १६४ ॥ **टीका**—अधुना विविधांस्तत्सत्त्वपातविधीनाह—हरिद्रेति । शुद्धखर्परस्य प्रत्येकं चतुर्थांशान्हरिद्रादीन्खर्परसहितान्काञ्जिकाद्यम्लरसेनैकदिनं संमर्द्य वृन्ताकमूषोदरे तल्लेपं कृत्वा संशोष्य तन्द्वृताकमूषामुखोपरि पिधानार्थमन्यां लघुमूषां न्युब्जां न्यस्य धमनेन खर्परे प्रद्रुते जातद्रवे सति यदा नीलादिवर्णा ज्वाला पिधानं किंचिदपसार्य दृष्टा स्यात्तदा पिधानमन्यत्र निधाय तप्तामेव सतीं तां संदंशादिना धृत्वाऽधोमुखीं कृत्वा भूमौ शनैरास्फालयेत्, आघातयेत् । सत्त्वपातनोत्तरं पुनरवशिष्टं निर्गतसत्त्वकं तमेव खर्परचूर्णं मूषास्थं पतितं चैकीकृत्य पूर्ववद्धरिद्रादिसंमिश्रणेनैकीकृत्य संमर्द्य तत्कल्केन मूषोदरे लिप्त्वा धमनादिना पूर्ववत्सत्त्वं निपातयेत् । एवं त्रिचतुः कृत्वा सर्वसत्त्वनिष्कासनं भवति । सिन्धुः सैन्धवम् । धूमो गृहधूमः । अथ तत्सत्त्वविध्यन्तरमाह—साभयेति । एतदपि प्रत्येकं खर्परस्य चतुर्थांशं गृहीत्वा सर्वसहितं खर्परमम्लेन विमर्द्य पूर्ववदेवोदरे विलिप्यान्धवृन्ताकमूषागतं कृत्वा ध्मात्वा पूर्वरीत्या

पातेन खर्परं शुद्धं निर्मलं श्वेतवर्णं सत्त्वं मुञ्चति । अभयां हरीतकी । जतु लाक्षा । भूनागो वार्षिकः कोमलोऽतिक्षुद्रस्ताम्रवर्णः सर्पसमदीर्घः जन्तुविशेषः । निशा हरिद्रा । धूमजो गृहधूमः । अथ विशिष्टद्रव्ययोगेन( ण ) खर्परसत्त्वविध्यन्तरमाह—लाक्षेति । तच्छुद्धं खर्परं प्रत्येकं चतुर्थांशेन लाक्षादिभिर्मिश्रयित्वा क्रमेण गोदुग्धेन चतुर्गुणेन गोघृतेन च कटाहे पक्त्वा गुटिकां विधाय तां वृन्ताकमूषामध्ये पिहितां कृत्वा ध्मात्वा ध्मात्वा पूर्ववत्संदंशेनाऽऽकर्षणादिविधिना वङ्गसमानवर्णं मृदुलं च निपातितं सत्त्वं गृह्णीयात् । गुड इक्षुरसविकृतिविशेषः । आसुरी राजिका । पथ्या हरीतकी । सर्जः सर्जरसो राला ॥ १६४ ॥

**मूलम्**—यद्वा जल० श्वासं च हिध्मिकाम् ॥ १७२ ॥ **टीका**—उक्तसत्त्वयोगेष्वभिहितस्य सत्त्वनिष्कासनसमयस्य किंचिदतिक्रमे सत्त्वनाशसंभवात्तदपेक्षया सुकरं पातालकोष्ठिकया साध्यस्य खर्परसत्त्वस्य विधिमाह—यद्वेति । अधोमुखीं मूषामुक्तयोगान्यतमयोगेन कल्कितविलिप्तखर्परोदरां क्षिपेत् । क्षेपकरणमात्रमपेक्षितम् ' न तु तदनन्तरं द्रव्योष्मगतिप्रतिबन्धः । अप्रतिहतधूमोद्गत्यर्थं च । अत एव दृढं संधिरोधश्च नोक्तः ।सत्त्वनिपतनकालसूचिकायाः खर्परज्वालाया विशिष्टाया बहिर्निर्गच्छन्त्याः सूक्ष्मसंधिमार्गस्यावश्यकत्वात् । एवमन्यस्याप्यभिव्यापकधूमगपारदेन विशिष्टद्रव्यस्य मन्दाग्निना पच्यमानस्य सत्त्वनिष्कासनपर्यन्तं स्थिरीकरणाय धूमरोधो न कार्यः । अन्यथा धूमगतिबललाभेन प्रबलं द्रव्यं यन्त्रस्फोटं कृत्वोद्गच्छेत् । निर्धूमप्रमुखजारणायां तु वैश्वानरस्य क्रमवृद्धस्य योगेन पारदेन संयुक्तमेतादृशं नानाविधं सत्त्वं यन्त्रस्फोटं कृत्वा बहिर्गमनेन साधकपुरुषस्य पारदसिद्धिं न साधयेत् । अतः पूज्यपादैर्विशिष्टसत्त्वानामस्थिराणां जारणाविधेः प्राक्स्थिरीकरणविधी रससारे प्रदर्शितः । तथा च तद्ग्रन्थः—' चोरहंसाशिलाकाङ्क्षी कासीसा अलकस्तथा । एषामस्थिरसत्त्वानां स्थिरी कुर्याद्विचक्षणः । दग्धात्तुषात्तु भागैकं मृदो भागद्वयं तथा । किंचित्कार्पासकं दत्त्वा कुट्टयेन्मृत्तिकां दृढम् । मृत्पोलिकां ततः कृत्वा बुद्ध्या विस्तार्य यत्नतः । बुध्ने मृदधिका कार्या वेष्टयेत्कूपिकां ततः । यत्नेन वेष्टितां कूपीं छायायां शोषयेत्ततः । अञ्जनं तीक्ष्णसंयुक्तं तत्समं टङ्कणं कुरु । अन्धमूषागतं ध्मातं वरनाग इति स्मृतः । चोरभागचतुष्कं तु वरनागैकसंयुतम् । तत्सर्वं रेतयित्वा तु रक्तवर्गेण भावयेत् । सूर्यतापेन संशोष्य काचपात्रे निधापयेत् । वैश्वानरः प्रदातव्यो वर्धमानो ह्यहर्निशम् । स्वाङ्गशीता यदा कूपी यत्नात्तां स्फोटयेत्तदा । अत ऊर्ध्वं च तल्लग्नमेकी कृत्वा च मर्दयेत् । भावयेद्रक्तवर्गेण काचकूप्यां निधापयेत् । तावदेवं प्रकर्तव्यं यत्नात्सत्त्वं स्थिरं भवेत् । स्थिरीभूतं यदा सत्त्वं स्वेदयेज्जलयन्त्रतः । रसको बन्धमाप्नोति नात्र कार्या विचारणा । सप्तरात्रमिदं कार्यं सत्त्वबन्धनमुत्तमम् । एवं स्थिरत्वमन्येषामस्थिराणां च चोरवत् । अभावे वरनागस्य लोहचूर्णेन कारयेत् । अमुनैव प्रकर्तव्यं स्थिरत्वं गन्धकस्य च । अथवा

गन्धकं शुद्धं नवसारसमन्विम् । रक्तवर्गेण संभाव्य चक्रयन्त्रे स्थिरी कुरु । अस्थिराण्यपि सर्वाणि स्थिरत्वं प्राप्नुवन्ति हि । स्थिरीकरणमाख्यातं चक्रराजे सुशोभने । अन्ये च ये बिडाः ख्याताः श्रेष्ठाश्चारणकर्माणि । तेषां च चक्रयन्त्रेण स्थिरत्वं कारयेद्बुधः ॥ चोरो रसकः । हंसो हिङ्गुलः । शिला मनःशिला । काङ्क्षी सौराष्ट्री । अलको हरितालः । अथ तद्भस्मविधिमाह—तत्सत्त्वमिति । अत्र तालकं चतुर्थांशेन देयम् । रसकसत्त्वस्य हि मृदुद्रव्यत्वात् । खर्परे मृत्पात्रविशेषे । अत्र चुल्ल्यामग्निश्च मन्दो देयः । अथ तत्सत्त्वभस्मप्रयोगमाह—तद्भस्मेति । चूर्णं मिलितोभयचूर्णम् । तिलजास्तिलकाष्ठक्षारः । हिध्मिकां हिक्काम् ॥ १७४ ॥

इति वामनात्मजचिन्तामणिविरचितायां रसरत्नसमुच्चयटीकायां
सरलार्थप्रकाशिन्याख्यायां सूत्रस्थाने रसवर्णनात्मको
द्वितीयोऽध्यायः ॥ २ ॥

---

## अथ तृतीयोऽध्यायः ।

**मूलम्**—गन्धाश्म० विख्यातः क्षितिमण्डले ॥ ११ ॥ **टीका**—इदानीमुपरसा अपि वक्तव्याः । यतस्तेषामपि रससंस्कारोपयोगित्वात् । तेषां मध्ये षड्गुणजारणयाऽव्यभिचारिगदहन्तृत्वशक्तिरपि गन्धकयोगादेव पारदस्य सुशुद्धस्य भवति । पारदस्य बन्धाद्यनेककार्योपयोगित्वाच्च । तन्मुख्यानष्टौ पदार्थविशेषानुद्दिश्योपरससंज्ञाविधानपूर्वकं तत्संग्रहमाह—गन्धाश्मेति । पारदकर्माणि संग्राह्या इति शेषः । पारदकर्तृकभक्षणविषया अप्येते नोक्तरससमानगुणाः किंतु हीनगुणाः सन्ति । अत एवेयं संज्ञा उपरसा इति । उपरसा हीनगुणा रसा इत्यर्थः । उपधातुसंज्ञाऽपि केषांचित्कृता । तथा च तद्वचनम्—'स्वर्णजं स्वर्णमाक्षीकं तारजं तारमाक्षिकम् । तुत्थं ताम्रभवं ज्ञेयं कषको वङ्गसंभवः ॥ रीतिश्च जसदोद्भूता सिन्दूरो नागसंभवः । शिलाजत्वद्रिसंभूतमेते सप्तोपधातवः' इति । गन्धाश्मा गन्धकः । गैरि गैरिकम् । कासीसं 'हिराकस' इति महाराष्ट्रभाषायाम् । काङ्क्षी सौराष्ट्री । तालो हरितालः । शिला मनःशिला । अञ्जनं 'सुरमा' इति लोकभाषायाम् । कङ्कुष्ठं चाकचक्यविशिष्टः खनिजः पीतवर्णप्रमुखवर्णविशिष्टः पाषाणविशेषः । स तु संप्रति प्रायो लोके नोपलभ्यते । अतो भेषजादिकर्मणि तत्समानगुणं द्रव्यं किंचित्प्रतिनिधिभूतं साधारणरसविशेषं गृह्णन्ति भिषजो यत् 'मुरदाडशिंग' इति नाम्ना लोके प्रसिद्धम् । संप्रति प्रथमस्य गन्धकस्य माहात्म्यं पार्वतीपरमेश्वरसंवादमुखेनाऽऽह—पार्वत्युवाच । गन्धकस्येति । श्वेतद्वीपे चन्द्रद्वीपाख्ये द्वीपे । प्राकृतं प्रकृतिसिद्धम् । सुस्नाता ततः परिधृतवस्त्रान्तरेति शेषः ॥ ११ ॥

**मूलम्**—स चापि० गन्धकोऽतिमनोहरः ॥ १९ ॥ **टीका**—अथ तद्भेदानाह—स चापीति । तस्य त्रिविधस्य मध्येऽपि शुकचञ्चुसमानरक्तवर्णः श्रेष्ठ इति रसार्णवमतमुक्त्वा ग्रन्थान्तरोक्तं भेदविषयं मतमाह—चतुर्धेति । खठिका 'खडु' 'चास' इति नाम्ना लोके प्रसिद्धा । गन्धकस्य साधारणगुणानाह—गन्धाश्मेति । गौरीपुष्पं तस्या आर्तवं तद्भवो गन्धाश्मा सत्त्वात्मको वासुकिमुखज्वालासंसर्गात्प्राङ् न विषमिश्रः । आसीदिति शेषः । संप्रति सोऽयं सविष एव सर्वो लोके प्रसिद्धस्तत्कारणमाह—बलिनेति ॥ १९ ॥

**मूलम्**—पयःस्विन्नो० न पथ्यैर्विकृतिं व्रजेत्० कुष्ठरोगं विशेषतः ॥ ३३ ॥ **टीका**—अथ गन्धकशुद्धिमाह—पयःस्विन्न इति । आदौ कटाहे गव्यपयस्यतिमृद्वग्निना विपाच्य पयःशोषे सति रावणग्रन्थे रसोपरससंज्ञाविषयद्रव्याणां विपर्यासेन संज्ञासंख्यासंकोचश्च दृश्यते । तथा च तद्वचनम्—'सूतश्चतुर्धा गन्धश्च तालं तु द्विविधं स्मृतम् । रसोऽञ्जनं च कासीसं गैरिकं च रसा इमे । पारदाद्दरदो जातष्टङ्कणो गन्धजस्तथा । खटिकाऽभ्रकतो जाता हरितालान्मनःशिला । अञ्जनाच्छुक्तिशङ्खाद्याः कासीसाच्छङ्खमूर्वकः । एत उपरसाः' इति । शङ्खमूर्वकः 'मुरदाडशिंग' इति लोके प्रसिद्ध इति । स्वाङ्गशीतं घनीभूतं गन्धकं जलेन सुधौतं कृत्वा संशोष्य पश्चात्कटाहे लौहे घृतमध्ये मन्दाग्निना द्रुतीकृत्य वस्त्रे निक्षिप्याधस्तात्पयःपात्रे गालनेन पतितः सञ्शुद्धिमृच्छति । शुद्धिफलमाह—एवमिति । अम्बरे वस्त्रे । इति शुद्धगन्धको मात्रानुपानाभ्यां सह भक्षितः सत्पथ्यसेवायां सत्यां विकारं न कुर्यात् । अन्यथाऽशुद्ध एव सेवितश्चेदपथ्यसेवनेन पथ्यैरपि च सेवितैर्हन्यात् । अत्रानु[ म ]त्या लब्धं पदं पथ्यैरिति । नापथ्यैरिति पाठस्तु प्रामादिक एव । शुद्धगन्धकसेवायामपथ्यनिषेधस्य वक्ष्यमाणस्य वैयर्थ्यप्रसङ्गात् । एवं च शुद्धगन्धकस्त्वपथ्यैरेव विकारकर इति भावः । किमिव । पीतं हालाहलं यथा तद्विषस्याभक्ष्यत्वेन विषकल्पोक्तत्वात्सर्वथा हन्यादेव तथैवाशुद्धगन्धकः । शुद्धियोगान्तरमाह—गन्धक इति । मृद्वग्निना लौहे कटाहे द्रावितो गन्धको भृङ्गराजरसे क्षेप्यः । एवं सप्तवारकरणेन गन्धकः शुध्यति । अथवा तद्रसे दोलायन्त्रेण सप्तवारं स्विन्नोऽपि शुद्धः स्यादिति । इदानीं स्थलकूर्मपुटेन तच्छुद्धिप्रकारमाह—स्थाल्यामिति । गलितः सप्तवारं गलितः सञ्शुध्यति । अत्र वस्त्रे घृतसहित एव गन्धकः क्षेप्यः । गन्धकात्पृथग्भूतविषसंश्लेषार्थमिति भिषक्क्रियासंप्रदायः । अत्र 'शतवारं कृतं चैवं निर्गन्धो जायते ध्रुवम्' इति पद्यार्धमधिकं केचित्पठन्ति । अथ गन्धकयोगगुणानाह—इत्थमिति । गन्धकसत्त्वविधिरपि रसहृदये प्रदर्शितः—'गन्धाश्मनोऽपि तद्वत्कार्यं यत्नेन मृदुभावम् । लवणाम्लेन सुपुटितं माक्षीकमम्लेन मृदुभावम्' । मुञ्चतीति । तद्वन्माक्षीकवत् । अम्लेन मर्दितं गन्धकं पुनः सैन्धवजम्बीराद्यम्लरसेन वह्नौ प्रतापितं सत्, मृदुभावं सत्त्वं

मुञ्चतीत्यर्थः । अत्र वह्नौ प्रतापनं तु वृन्ताकमूषायां धृत्वा कार्यम् । तस्य च मृद्रूकृतगन्धकस्य स्थिरीकरणविधिस्तु द्वितीयाध्याये प्रागुक्तो बोध्यः । अथ गन्धकद्रुति-विधिमाह—कलांशेति । कलांशेन षोडशांशेन त्रिकटुचूर्णयुतं गन्धकं वस्त्रे विप्रकीर्य वस्त्रं वर्तिरूपं कृत्वा तां सूत्रेण वेष्टयित्वा तैले तिलजे मज्जयेत् । ततः संदंशेनाऽऽकाशे धृतायाः प्रज्वलितायाः सकाशादधः काचपात्रे बिन्दुशः पतिता या द्रुतिस्तया सह मात्रया पारदं भस्मीभूतं हस्ततलेऽङ्गुल्या मर्दयेत् । पुनर्गन्धकयोगमाह—घृताक्तेति । घृताभ्यक्तोदरे । दर्व्यां घृताभ्यञ्जनं तु संश्लेषाभावार्थम् ॥ ३३ ॥

**मूलम्**—क्षाराम्ल० वीर्यवृद्धिं करोति च ॥ ४५ ॥ **टीका**—अथ केवलगन्धकसेवायां त्याज्यानाह—क्षाराम्लेति । सौवीरं निस्तुषयवकाञ्जिकम् । विदाहि कुलत्थराजमाषादि । द्विदलं चणकादि । योगयुक्तेन हि तत्तद्रोगोक्तचूर्णरसादियोगयुक्तेऽस्मिञ्शीलनविषये तु न ह्येतत्त्यजेत् । किंतु तत्तद्रोगोक्तं त्याज्यं त्यजेत् । अधुनाऽन्तर्बहिःप्रयोगेण कुष्ठघ्नं तद्योगमाह—गन्धक इति । शम्याक आरग्वधः । तन्मूलेन तन्मूलकषायेण सह पीतो मरिचत्रिफलाचूर्णसहितः कुष्ठप्रदेशे संमर्दितश्च गन्धकः सर्वकुष्ठघ्नः । तन्मूलेति । द्विनिष्केति । तैलेन सह प्रत्यहं पीतं द्विनिष्कमितं गन्धकं कुष्ठघ्नं भवेदिति शेषः । अधुना पामाकण्डूघ्नं तद्योगविशेषमाह—अथेति । उक्तगन्धकभक्षणशीलनोत्तरामित्यर्थः । तिष्ठेत् । यथाबलं तिष्ठेदित्यर्थः । प्रगे प्रातः-काले । इष्टोष्णवारिणा सुखोष्णवारिणेत्यर्थः । तृतीयादिदिनेष्वपामार्गतैललेपोष्णतापाद्युक्तक्रमे पामादिवारणपर्यन्तं कार्यः । शतशोधनिकागन्धकप्रयोगे त्रिफलादिषष्टिसंख्याकभेषजैः पृथग्भावितगन्धकप्रयोगप्रभृतिगन्धकप्रयोगाणां शतं सोमदेवेन स्वग्रन्थे कीर्तितं तत्सर्वप्रयोगवृन्दं तु ग्रन्थविस्तरभीतेन मयाऽत्र न प्रकीर्तितम् । मयेति पदाध्याहारः कार्यः । अथ गन्धकतैलमाह—अथवेति । विकल्पार्थेऽथवेति । गन्धकभक्षणशीलनोत्तरं पामादिवारणाय लेपार्थमभ्यङ्गार्थं च तिलतैलस्थान इदमेव ग्राह्यमित्यर्थः । योगेषु लेपयोगेषु नित्यनाथकृतरसरत्नाकरस्थे सिद्धिखण्डे तु गन्धकतैलमन्यादृशमेवोक्तम् । तथा च तद्ग्रन्थः—‘ अम्लपर्णी देवदाली दाडिमं मातुलुङ्गकम् । नारङ्गं वा यथालाभं द्रवमेकस्य चाऽऽहरेत् । गन्धकस्य तु पादांशटङ्कणद्रवसंयुतम् । एताभ्यां गन्धकं भाव्यं घर्मे वारत्रयं पुनः । धत्तूरतुलसी कृष्णा लशुनं देवदालिका । शिग्रुमूलं काकमाची कर्पूरं शङ्खपुष्पिका । कृष्णागरु च कस्तूरी वन्ध्या कर्कोटकीसमम् । मातुलुङ्गरसैः पिष्ट्वा क्षिपेदेरण्डतैलके । अनेन लोहपात्रस्थं भावयेत्पूर्वगन्धकम् । त्रिवारं क्षौद्रतुल्यं तज्जायते गन्धवर्जितम् । इदं गन्धकतैलं स्यात्तत्तद्रोगेषु योजयेत् ’ इति । शुद्धगन्धकस्य पूर्वानुक्तविशिष्टगुणानाह—शुद्धगन्ध इति ॥ ४५ ॥

**मूलम्**—पाषाणगैरिकं० एकत्वं गुणवत्तरम् ॥ ५० ॥ **टीका**—अथोद्देशक्रमानुरोधेन गन्धकवर्णनोत्तरं गैरिकं वर्णयति—पाषाणगैरिकमिति । मसृणं श्लक्ष्णम् ।

क्षाराम्लेति—क्षाराम्लरसैर्भावितं संमर्द्य गुटिकां विधाय प्रकाशमूषायां धृत्वा ध्मानेन सत्त्वं पीतवर्णं पततीत्यर्थः । राजावर्तसत्त्वविधिनाऽप्यस्य सत्त्वं कार्यमिति वक्ष्यति । एतत्सत्त्वं पारदेन सहैकीभावं शीघ्रं गच्छतीति । तद्योगेन गुणवत्तरं च जायत इति ॥ ५० ॥

**मूलम्**—कासीसं वालुकाद्येकं० विनाशयति निश्चितम् ॥ ५८ ॥ **टीका**—अथोद्देशक्रमप्राप्तं कासीसं वर्णयति—कासीसमिति । वालुकाकासीसं वालुकाशब्दो नाम्नि प्रथमो यस्येति तादृशं वालुकादि । तच्च वालुकासमानवर्णं भवति । अपरं पुष्पकासीसं तच्च नीलपुष्पसमानवर्णं भवति । तस्य पुष्पकासीसस्य समासतो रसवर्णगुणानाह—क्षाराम्लमिति । अथोभयसाधारणगुणानाह—वालुकापुष्पेति । तयोर्मध्ये यत्पुष्पादि कासीसं पुष्पकासीसं तदतिप्रशस्तं भवेत् । वक्ष्यमाणगुणं च । तच्छुद्धिमाह—सकृदिति । भृङ्गराजरसेनैकवारं क्लिन्नं भावितं चूर्णीकृतकासीसं निर्मलं भवेत् । तुवरी सौराष्ट्री । तत्सत्त्वमनुपदमेव वक्ष्यमाणं तद्विधिनैवास्य सत्त्वमाहरेत् । तस्य च स्थिरीकरणं रसकव्याख्यायां प्रागुक्तमेव । प्रकारान्तरेण शुद्धिमाह—कासीसमिति । पित्तैर्नागाश्वशिखिगोमत्स्यजैः, अप्रसूतायाः स्त्रिया आर्तवेन च क्रमाद्भावितं कासीसचूर्णं शुध्यति । अथ कासीससत्त्वयोगमाह—बलिनेति । बलिना समभागगन्धकेन मारितं कासीससत्त्वं कासीसभस्मना समभागेन मारितं कान्तं लोहं च कुर्यात् । ततः समभागमुभयमेतच्छाणमितं त्रिफलादिचूर्णमिश्रितं विषमांशघृताद्यालोडितं प्रत्यहं प्रगे प्रभाते सेवितं चेच्छ्वित्रादीन्वेगेन हन्ति । रसायनविधिश्चाष्टाङ्गहृदयादिग्रन्थादवबोद्धव्यः ।

**मूलम्**—सौराष्ट्रेऽश्मनि० क्रामणं चातिगुह्यकम् ॥ ६५ ॥ **टीका**—अथ पारदजारणक्रामणोपयोगित्वात्क्रमप्राप्तत्वाच्च काङ्क्षीवर्णनमाह—सौराष्ट्र इति । सुराष्ट्रः ' काठियावाड ' इति प्रसिद्धो देशः । तदुत्पन्ने पाषाणे पाषाणमयस्थले या विशिष्टा मृत्स्ना प्रशस्तमृत्तिका सा तुवरीतिनाम्ना प्रसिद्धा । सा च किंलक्षणा स्यात्तदाह—वस्त्रेष्विति । या रागद्रवदानात्प्राग्रञ्जनीयवस्त्रेषु लिप्यते चेत्पश्चाद्दत्तं मञ्जिष्ठादिद्रववर्णं प्रकाशीकृत्य स्थिरी कुर्यादित्यर्थः । तद्भेदावाह—स्फटिकी पीतिकेति । स्फटिकी लेपाच्छतवारं ताम्रपत्रं लोहपत्रं प्रति वा लिप्ता सती तत्पत्रं चरेत्पारदेन प्रयोज्यकर्त्रा चारयेद्भक्षितां कारयेदित्यर्थः । यतो जारणायामस्या बिडद्रव्यत्वेनोपयोगात् । अन्तर्भावितण्यर्थोऽत्र चरधातुः । अधुना तस्याः साधारणगुणानाह—काङ्क्षीति । तच्छुद्धिमाह—तुवरीति । त्रिदिनात्त्रिदिनं भावयित्वेत्यर्थः । सत्त्वपातनविधिमाह—क्षाराम्लैरिति । क्षाराम्लैर्मर्दितां तां वृन्ताकमूषायामन्तर्लिप्त्वा ध्मात्वा सत्त्वं मुञ्चति । विध्यन्तरमाह—गोपित्तेनेति । अनेन विधिना पातितं सत्त्वमतिगुप्तं क्रामणं पारदस्य लेपावापाद्युपयुक्तस्य लोहधात्वन्तःप्रवेशाभिव्याप्तिकारकमस्तीत्यर्थः । अस्य सत्त्वस्य स्थिरीकरणविधिः प्रागुक्तरसकवर्णनव्याख्यायां स्पष्टीकृतः ॥ ६५ ॥

**मूलम्**—हरितालं द्विधा० शुद्धं योगेषु योजयेत् ॥ ७५ ॥ **टीका**—एतदुद्देशक्रमप्राप्तं हरितालं वर्णयति—हरितालमिति । पत्राद्यं पत्रशब्दपूर्वकम् । पत्रहरितालं वर्खीहरिताल इति नाम्ना लोके प्रसिद्धम् । तच्च संश्लिष्टपत्रसमुच्चयरूपम् । पिण्डहरितालं तु गोलकरूपम् । तदाह—स्वर्णेति । भेषजान्तरा संयुक्तं संस्कृतं यद्धरितालं तत्सेवितं चेत्स्त्रिया आर्तवनाशकरम् । योगयुक्तं केवलं वा तादृशं तदुपयुक्तं श्लेष्मादिदोषनाशकरमिति भावः । अथ तच्छुद्धिमाह—कूष्माण्डतोय इति । चूर्णसंयुक्ते सुधासंयुक्ते जले द्वादशप्रहरपर्यन्तमस्य संततं दोलास्वेदः कार्यः । अन्यथाऽस्य सदोषत्वसंभवात् । एतच्च वैद्यसंप्रदायमनुरुध्य लिखितम् । केचिद्भिषजस्तु, अग्निसंयोगादृते सुधाजलभावनयैव हरितालशोधनं कुर्वन्ति । तद्यथा—एककर्षमितहरितालस्य वस्त्रेण पोटलिकां शिथिलां बद्ध्वा मृत्पात्राभ्यन्तरे दशकर्षसुधया मिश्रिते जले त्र्यङ्गुलं मग्नां कृत्वा यावद्दशरात्रं स्थापयेत् । तथा कृते सुधाजलोष्मस्वेदेन स्विन्नं हरितालं शुध्यति । अन्तराऽन्तरा किंचिज्जलप्रक्षेपेण पोटलीं सुधां चाऽऽर्द्रामिव सदा रक्षेत् । दशरात्रे च व्यतीते सति तामेव पोटलीं तस्माद्घटादुद्धृत्य यथोक्तमानसुधाजलगर्भके घटान्तरेऽपि यावद्दशरात्रं यथाविधि स्थापयेत् । एवमन्यत्रान्यत्र घटे यथाविधिस्थापनादिक्रमेण सुधाकर्षशतदानेन शतसंख्याकैरहोभिरेककर्षमितं हरितालं निर्दोषं भवतीति । सुशुद्धिज्ञानार्थमशुद्धहरितालदोषमाह—अशुद्धमिति । विध्यन्तरमाह—तालकमिति । दोलायन्त्रे सचूर्णे नारनालेन धान्याम्लेन दिनं पचेत् । ततः कूष्माण्डरसे शाल्मलीतोये चैकादिनपर्यन्तं दोलायन्त्रे स्वेदेन हरितालं शुध्यति । रसार्णवे तु तालकशुद्धिप्रकारोऽन्यादृश एवोक्तः । तथा च तद्ग्रन्थः—'कूष्माण्डे तु शतं वारांस्तालकं स्वेदयेद्बुधः । स्नुक्क्षीरकटुकालाबुरसयोः सप्तधा पृथक्' इति । तथैव तत्सत्त्वविधिरप्यन्यादृशः । तद्यथा—'तिलसर्षपशिग्रूणि लाक्षा च लवणं गुडः । टङ्कणेन युतैर्ह्येतैस्तालकं भूधरे धमेत् । व्याधिघातफलक्षारं मधुकूष्माण्डकं तथा । द्रवैः पुनर्नवोद्भूतैः सप्ताहं मर्दयेद्बुधः । दत्त्वा पादांशकं सर्वं ततः पातनयन्त्रके । दद्यात्पुटं गजाकारं पतेत्सत्त्वं सुतालकात्' ॥ इति । तत्र भूधरे धमेदित्येको योगः सत्त्वपातनविषयः । तद्यन्त्रोपरि पुटस्थाने धमनं कार्यमित्यर्थः । सर्वव्याधिघातक्षारसहितं तिलसर्षपादि तत्सहितहरितालमूर्ध्वस्थाल्युदरे विलिप्योर्ध्वपुटयोगेनाधः सत्त्वं पातयेदिति द्वितीययोगः । अथ तद्भस्मविधिमाह—मधुतुल्य इति । मधुनीवाङ्गुलिहार्ये घने पलाशकषाये चूर्णीकृतं तालकं त्रिदिनं भावयेत् । ततो माहिषमूत्रे तथा भावयित्वा शरावसंपुटादियत्नेन निरुध्य दशगिरिण्डैरल्पपुटं दद्यात् । पुनः प्रतिपुटं पलाशकषायभावनायुक्तसर्वविधिना द्वादशपुटैर्भस्मीभूतं निर्दोषं हरितालं योगयोग्यं भवति ॥ ७५ ॥

**मूलम्**—कूलत्थक्काथ० · प्रोक्तं रसरसायने ॥ ८७ ॥ **टीका**—अधुना स्थालीयन्त्रेण तत्सत्त्वाकर्षणविधिमाह—कुलत्थेति । कुलत्थक्काथाद्यालोडितं संमर्दितं च हरितालं चुल्लीस्थस्थाल्यां क्षिप्त्वा धूमगतिदर्शनार्थं कृतार्द्रगोमयरुद्धच्छिद्रेण शरावेण न्युब्जेन पिधाय सम्यक्संधिरोधं च कृत्वा क्रमेण मृदुमध्यतीक्ष्णाग्निं कुर्यादेकप्रहरपर्यन्तम् । उत्कृष्योर्ध्वलग्नमुद्धृत्य समाहरेत् । एकीकुर्यादित्यर्थः । हरितालस्य पाषाणविशेषरूपत्वात्तत्सत्त्वविधिवर्णनेन पाषाणान्तरसत्त्वविधानं स्मरणम् । तच्च विधानं सोमदेवनित्यनाथप्रमुखग्रन्थेभ्यो विज्ञेयमित्याभिप्रायेणाऽऽह—सर्वेति । एवं च नात्र न्यूनतादोषः शङ्कनीय इति भावः । समासतः पाषाणसत्त्वविधिस्तु रससारेऽभिहितः—' नानाक्षेत्रसमुद्भूताः पाषाणा धातुसंज्ञकाः । पिष्टीं बद्ध्वा द्रवन्त्याशु सर्वे जार्या रसेश्वरे । ध्माताः सत्त्वं विमुञ्चन्ति वङ्कनालद्वयेन च । विज्ञाय पतितं सत्त्वं गृहीत्वा तद्धरेत्पुनः । दुग्धादिस्नेहरक्तैश्च कर्तव्यं सिञ्चनं तथा । यदा शुद्धं भवेत्सत्त्वं सेचनं च विवर्तयेत् । शिलाजितशिलासत्त्वविधिमुक्त्वा शिलान्तरसत्त्वविधिरातिदिष्ट एव रसार्णवे—' एवं शिलाभ्यो जीवेभ्यो मृद्भ्यः सत्त्वं प्रजायते ' इति वचनेन । ' नागं त्रिगुणमुत्तार्य सत्त्वं शुद्धं भवेत्तदा । भूनागस्यापि कर्तव्यः सत्त्वार्थं विधिरेष हि । पिण्डीबद्धस्य कान्तस्य कोष्ठे सत्त्वं निपातयेत् ' इति । अथ स्थालीयन्त्र एव पाकेनाधःस्थसत्त्वविधिमाह—पलालकमिति । पलमितं हरितालम् । रविदुग्धयोग उद्गमनगतिनिरोधार्थं निपतितसत्त्वस्योत्तरकालमग्नियोगेन नाशाभावार्थं च बोध्यः । षोडशगुणे तैले मिश्रयित्वा मर्दनेन संशोष्य । तदस्य परिमाणमिति ठक् । षोडशिके तिलतैलयोगो द्रावणार्थं बोध्यः । तिलतैलेन मिश्रितं हरितालं पूर्ववन्निक्षिप्य विवृतापिधानाच्छिद्रां स्थालीं कृत्वा मृदुमध्यतीक्ष्णाग्निनाऽनावृतप्रदेशेऽङ्गणादौ पचेत् । तत्रापि प्रथमं तैलांशशोषणपर्यन्ते दीपाग्निरेव देयः । द्वित्रप्रहरादूर्ध्वं यदा पूर्ववद्बाष्पोद्गमो न दृश्येत तदा मुखमुद्रां शिथिलां दत्त्वा सप्तप्रहरपर्यन्तं पक्त्वा ततः स्वाङ्गशीतगतस्तलगतं सत्त्वं गृह्णीयात् । भित्तिपटाद्यावृतगृहमध्ये पाककरणे तु कुपिकण्ठोद्गतसधूमबाष्पेण परितो व्याप्त्या नेत्रबाधामूर्छादिसंभवभयतोऽनावृतप्रदेश इत्युक्तम् । एवंविधिनाऽशुद्धमेवैतदधःस्थसत्त्वाकर्षणम् । अत उक्तं तस्य पूर्वोक्तस्य च शुद्ध्यर्थं विधिमाह—छागलस्येति । छागलस्याश्वबालस्य वालाश्वस्योरस्थेन बलासेन कफेनाऽऽलोड्यातियत्नेन दिवसद्वयपर्यन्तं संमर्द्य पश्चाद्द्रावणवर्गेण मिश्रयित्वा गोलान्विधाय काचकूप्यामनावृतमुखायां त्रिवारमृत्कर्पटलिप्तायां प्रक्षिप्य मुखमुद्रां दत्त्वा प्रखरातपे संशोष्य चुल्लीस्थखर्परगर्भवालुकखर्परकस्य च्छिद्रं विधाय तत्रोत्तानामर्धां कूपिकां प्रवेश्याधस्तात्क्रमेणाभिवृद्धाग्निं द्वादशप्रहरपर्यन्तं कुर्यात् । ततः परं सुशुद्धमेव सत्त्वमाहरेत् । बलिना च समन्वितमिति पाठः प्रामादिक एव । मारकस्य गन्धकस्य हि क्वापि सत्त्वाकर्षणसहायत्वेनानुपदेशादिति । गुडगुग्गुलुगुञ्जाज्यसारघैटङ्कणा-

न्वितैः । दुर्द्रावाखिललोहादेर्द्रावणाय गणो मतः । इति द्रावणवर्गः । संप्रति मृदुसत्त्वस्याऽऽकर्षणविधिमाह—पलार्धेति । वस्त्रे कौशेयखण्डे बद्धपोटलिकां गन्धकेन त्रिवारं लिप्त्वा प्रतिलेपं संशोष्य च भस्ममग्नायां भस्ममूषायां धमनेन त्रिपलं ताम्रं द्रुतीकृत्य तत्र तत्क्षण एव तां पोटलीं क्षिपेत् । शीघ्रं भस्मनाऽऽच्छादयेच्च । स्वाङ्गशीते सति ताम्रवेष्टनं शस्त्रेण पृथक्कृत्य शुभ्रं मृदुसत्त्वं ग्राह्यम् । तिलभस्म द्विरंशं तु इष्टिकांशसमन्वितम् । भस्ममूषा तु विज्ञेया तारसंशोधने हिता ॥ इति रसार्णवे ॥ ८७ ॥

**मूलम्**—मनःशिलात्रिधा० ध्मानात्सत्त्वं त्यजत्यसौ ॥ ९७ ॥ **टीका**—मनःशिलेति । त्रिविधमनःशिलायाः पृथग्रूपमाह—श्यामरक्तेति । तस्याः साधारणगुणानाह—मनःशिलेति । कण्डूतिः कण्डूः । तस्या अशुद्धाया दोषमाह—अश्मरीमिति । तच्छुद्धिमाह—अगस्त्येति । शृङ्गवेरेति । शृङ्गवेरमार्द्रकम् । शुद्धियोगान्तरमाह—जयन्तीति । प्रत्येकं जयन्त्यादिरसैश्छागमूत्रेण च क्रमेण यामं यामं दोलायन्त्रे पक्वां तत आरनालेन क्षालितां शुद्धां मनःशिलां सर्वरोगेषु योजयेत् । आरनालं काञ्जिकम् । अथ तत्सत्त्वविधिमाह—अष्टमांशेनेति । लोहकिट्टादिभिः सहितां मनःशिलां संमर्द्य वृन्ताकमूषायां प्रक्षिप्य विधानेन पिधाय दृढं ध्माता सती सत्त्वं श्वेतवर्णं मुञ्चेत् । अल्पकालधमनसाध्यसत्त्वस्य योगान्तरमाह—भूनागेति । कारवल्लीपत्ररसेन भूनागादीन्संमर्द्य कृतमूषायां क्षाराम्लपिष्टां मनःशिलां क्षिप्त्वा तदनन्तरं कोकिलद्वयध्मानेनापि मनःशिला शीघ्रं सत्त्वं मुञ्चेत् । भूनागधौतं परिभाषाध्याये वक्ष्यमाणम् । सौभाग्यं टङ्कणम् । मदनं सिक्थकम् । एतत्सत्त्वस्य स्थिरीकरणविधिर्द्वितीयाध्यायोक्तरसकवर्णनव्याख्यायां स्पष्टीकृतः ॥ ९७ ॥

**मूलम्**—सौवीरमञ्जनं० ग्राह्यं स्रोतोञ्जनादपि ॥ १०८ ॥ **टीका**—अथोद्देशक्रमप्राप्तमञ्जनं वर्णयति—सौवीरमिति । पञ्चविधाञ्जनस्य स्वरूपवर्णनं प्रतिजानीते—तेषामिति । सौवीरं 'कृष्णवर्णसुरमा' इति लोकभाषायाम् । रसाञ्जनमिति । एतत् 'रसोद' इति ब्रिजभाषायामुत्तरदेशे प्रसिद्धम् । एतद्रीतिकिट्टजन्यं दारुहरिद्राकषायाजदुग्धपाकजन्यं तु रसाञ्जनमित्यपि वदन्ति । स्रोतोञ्जनमिति । श्वेतवर्णसुरमा इति लोके प्रसिद्धम् । पुष्पाञ्जनमिति । एतद्रीतिपुष्पजन्यम् । 'जस्तफूल' इति महाराष्ट्रभाषायां प्रसिद्धम् । नीलाञ्जनमिति । नीलवर्णसुरमा इति लोके प्रसिद्धः । तच्छुद्धिमाह—अञ्जनानीति । तेषां सत्त्वं च मनोह्वासत्त्वविधिना समाहरेत् । मनोह्वा मनःशिला । स्रोतोञ्जनलक्षणमाह—वल्मीकेति । संस्कारविशेषेण तदुपयोगमाह—गोशकृदिति । गोमयरसादिषु पृथक्सप्तवारं भावितं तत्पारदबन्धकरं भवेत् । रसाञ्जनस्य विशिष्टां शुद्धिमाह—सूर्यावर्तादीति । अयं गणोऽनुपदं वक्ष्यमाणः । प्रखरातपे क्षाराम्लभावनाभिस्तथैव तद्गणघटकान्यतमरसभावनाभिश्च सप्तवारं कृताभी रसाञ्जनं शुध्यति । तत्सत्त्वं स्रोतोञ्जनाच्च सत्त्वं राजावर्तसत्त्वविधिना वक्ष्यमाणेन ग्राह्यम् ॥ १०८ ॥

मूलम्—हिमवत्पाद० भूयो भूयः पिबेन्नरः ॥ ११९ ॥ टीका—अथ क्रमप्राप्तं कङ्कुष्ठं वर्णयति—हिमवदिति । स च पीतवर्णः । श्लक्ष्णानेकसचाकाचिक्यफलकविशिष्टः खनिजः क्षुद्रपाषाणः प्राणिजश्च । उभयमपि द्विविधं नलिका रेणुकश्चेति खनिजभेदौ । तयोर्लक्षणमाह—पीतप्रभमिति । नागपुंगदापहम् । पुंगद् उपदंशप्रमेहादिः । श्यामपीतमिति । केचिदिति । वर्चः प्रथमोत्पन्नं पुरीषम् । मतान्तरमाह—कतिचिदिति । कतिचिद्वदन्ति किं तेजिवाहानां प्रबलवेगसामर्थ्यविशिष्टाश्वानां नालं सद्योजातानां तेषां नाभिनालं कङ्कुष्ठमिति । तत्र खनिजः प्रथमोक्तो लोकेऽप्रसिद्ध एवेति प्रागुक्तमेव । नालं तु रसे रसायने च नेष्यते । बहुबाधाकरत्वात् । तदाह—निःसत्त्वमिति । इदानीं कङ्कुष्ठस्य साधारणगुणानाह—कङ्कुष्ठमिति । संप्रति रसोपरसानां द्रावणसहितां साधारणशुद्धिमाह—सूर्यावर्तेति । लवणक्षाराम्लेति पदं लुप्ततृतीयान्तम् । प्रखरसूर्यतापे सूर्यावर्ताद्यन्यतमौषध्या रसेन सप्तवारं भावनाभिर्लवणोदकेन क्षारोदकेनाम्लरसेन च प्रत्येकं प्रखरातपे सप्तभावनाभिश्च भाविता रसोपरसाः शुध्यन्ति । तथा द्रावणार्थं द्रावणवर्गमेलनं पृथक्पृथग् रसोपरससत्त्वपातनविधौ यदुक्तं तेन विनाऽपि यथायथं मूषायां कोष्ठ्यां वा केवलं ध्माता अपि सत्त्वं मुञ्चन्ति । एवं च रसोपरसानां शुद्धिपूर्वकसत्त्वपातने विकल्पः सिध्यति । प्रतिपदोक्ततत्तद्विधिना शुद्धिः सत्त्वपातनं च कार्यम् । अथवा सूर्यावर्तादिगणयोगेनेति । सूर्यावर्तो विशालपीतपुष्पोऽयं क्षुपः सूर्यसंमुखपुष्पावर्तनेनाऽऽत्मानं भक्तमिति प्रकाशयति । अत एवास्य सूर्यभक्त इति नामान्तरमन्वर्थं युज्यते । सूर्यफूलवल्लीति महाराष्ट्रभाषायाम् । कदली रम्भा । वन्ध्या वन्ध्याकटोटकी मृदुकण्टकफला । कोशातकी जालिनी । सुरदाली देवदाली भूमौ प्रसरणशीला, एरण्डफलसमानमृदुकण्टकिततिक्तफला ' बंदालदोडी ' इति ब्रिजभाषायाम् । व्रजकन्दो वन्यसूरणकन्दः । केचित्तु, अब्धितटसंनिहितवालुकायां कन्दा अतितीक्ष्णोष्णाकण्डुलाः पलाण्डुसमानपत्राः सहस्रश उत्पद्यन्ते । त एव वज्रकन्द इति वदन्ति । पांजणकांदा इति महाराष्ट्रभाषायां प्रसिद्धः । नीरकणा जलपिप्पली । इयं वल्ली जलाशयतटे वर्षाकाल उत्पद्यते । सार्धद्विहस्तकृशदीर्घदण्डा कालाञ्जनीसदृशचीरितपत्रा क्षुद्रपिप्पलीसदृशपीततीक्ष्णकटुतण्डुलावृतयवसमानदीर्घपिप्पलिका खामगांवसंनिहितनलिकोदकमूलस्थाने तटाकतटे उपलभ्यते । तथा जुन्नरग्रामनिकटदेशे गुर्जरे ' महीकाठा एजन्सी ' ' अम्लियारा ' ग्रामे चास्या उपलब्धिरपि । काकमाची करडकांकणीति कोंकणे प्रसिद्धा । क्षुपोऽयं मकोय इति ब्रिजभाषायां प्रसिद्धः । लवणवर्गः क्षारवर्गोऽम्लवर्गश्च दशमाध्याये वक्ष्यमाणः । सूर्यावर्तादिगणघटकान्यतमस्य रसेनाम्लवर्गरसेन च त्रिक्षारं पञ्चकटुकं च तीव्रघर्मे दिनावधि भावयेत् । एतत्कल्केन मंक्षिकं रसोपरसं दोलयन्त्रे सारनाले पूर्वकल्कयुते पचेत् । ' तीव्रानले दिनैकेन शुद्धिमायान्ति तानि वै ' इति विधिविशेषो रसरत्नाकर उक्तः ।

इदानीं कङ्कुष्ठस्य विशिष्टां शुद्धिमाह—कङ्कुष्ठमिति । शुद्धस्य योगमाह—भजेदिति । ग्राहिभिर्मुस्ताबिल्ववालकादिभिः सहैनमुपरसं यवमात्रं भजेत् । आमजूर्तिमामातिसारसहितं ज्वरे । ताम्बूलपत्रसहितोऽयं भक्षितो विषरूपी विरुद्धो भूत्वा प्राणनाशको भवति । अतोऽयं तथा न सेव्यः । प्रमादेन सेवितकङ्कुष्ठविषबाधानाशार्थं बर्बुराकुलिकाकाथं जीरकटङ्कणचूर्णसहितं कृत्वा पुनः पुनः पिबेत् । सौभाग्यकमिति । तृतीयार्थे द्वितीया बोध्या । बर्बुरो दीर्घकण्टकिवृक्षः । 'बाभूल' इति प्रसिद्धः । आकुली आवीरं इति केरलभाषायाम् । महाराष्ट्रभाषायां 'चर्मकारामलकी' । इयं दन्तकाष्ठोपयोगिनी । गुर्जरे 'आवलो' इति नाम्ना प्रसिद्धा । इयं प्रायो नर्मदानिकटदेश उत्पद्यते । निघण्टे तु—आहुल्यमिति नाम्ना वर्णितम् ॥ ११९ ॥

**मूलम्**—कम्पिल्लश्च परो गौरी० चूलिका लवणं मतम् ॥ १२९ ॥

**टीका**—अथ साधारणरसानामपि नानाविधपारदकर्मोपयोगित्वाद्रसोपरसवद्रसांशत्वाच्चोपरसवर्णनोत्तरं वक्तव्यान् तानष्टसंख्याकानुद्दिश्य परिभाषिता काचित्संज्ञा विधीयते—कम्पिल्ल इति । साधारणरसाः शास्त्रे साधारणत्वं च पारदसिद्धिकर्मणि सामान्यतयोपयोगित्वं तच्च प्रत्येकं कम्पिल्लादिष्वस्त्येवेति युज्यत एव कृता साधारणसंज्ञेति । तेष्वपि कम्पिल्लः पर उत्तमोऽनेकगुणभूयिष्ठत्वादित्यर्थः । अथवा परस्तस्मादुत्तरो गौरीपाषाण इति । गौरीपाषाणविशेषणं कार्यं पर इति । कम्पिल्लः क्षुद्रपाषाणविशेषः कपिलेति नाम्ना लोके प्रसिद्धो गौरीपाषाणो दारुणविषरूपोऽयं पाषाणविशेषः सोमल इति महाराष्ट्रभाषायां प्रसिद्धः । संख्या अथवा 'संवल' इत्युत्तरदेशे प्रसिद्धश्च । नवसागरः सुप्रसिद्ध एव । कपर्दिः समुद्रोदरजो विशिष्टप्राणिकवचरूपः । सोऽपि प्रसिद्ध एव । अग्निजारो बहिरर्णवोज्झितो विशिष्टनक्रजरायुः । अम्बरोऽथवाऽमर इति लोके प्रसिद्धो प्रभूतमूल्यः खदिरसारखोटसमानवर्णो मृदुश्च किंचित् । गिरिसिंदूरः पर्वतपाषाणोदरे रक्तवर्णः पदार्थविशेषः । हिङ्गुलश्चूर्णपारदः स्वनाम्नैव लोके प्रसिद्धः । मोद्दारशृङ्गं मुरदाडशिंगेति लोके प्रसिद्धम् । एते नागार्जुनप्रमुखै रसशास्त्रज्ञैः सर्वेऽपि रससिद्धिकरा इति प्रोक्ताः । प्रतिपादितश्चायं साधारणधर्म एव । अथ कम्पिल्लस्वरूपं वर्णयति—इष्टिकेति । तच्चूर्णसमानः किंचिद्रक्तवर्णो इत्यर्थः । सौराष्ट्रदेशः काठियावाड इति गुर्जरदेशे प्रसिद्धः । तद्गुणानाह—पित्तेति । व्रणातिरिक्तपित्तादिघ्नत्वं विरेककरणेन तेन लेपाद्युपयोगेन चास्य व्रणघ्नत्वं बोध्यम् । मूलमर्शोरोगः । रेच्यगदा उदरादयः । अथ क्रमप्राप्तं गौरीपाषाणं वर्णयति—गौरीपाषाणक इति । त्रिविधस्य तस्य स्वरूपमाह—यः किंचित्पीतवर्णो विकटकराल आहतः सञ्चूर्णरूपो भवति स गौरीपाषाण इत्युच्यते । अयमेव स्फटिकसमानधाकच्चिक्यविशिष्टः । एतद्विशेषणं

द्वितीयभेदस्यापि संभवति । द्वितीयः शङ्खाभः सोऽपि चाकचिक्यविशिष्टः । तृतीयभेदापन्नो यः स तु हरिद्राभो हरिद्रासमानः पूर्णपीतवर्णः । त्रिविधमध्य उत्तरोत्तरात्पूर्वपूर्वः श्रेष्ठः । अथ शुद्धिमाह—कारवल्लीति । कारवल्लीफलमध्ये धृत्वा हण्डिकामध्ये फलं वस्त्रबद्धं तत्सजलं क्षिप्त्वा स्वेदयेत् । कारवल्लीफलशब्देन तत्फलरसो ग्राह्य इत्यर्थं कृत्वा तद्रसमध्य एनं साधारणरसमतलस्पर्शिरसमग्नवस्त्रपोटलिकां बद्धां धृत्वा स्वेदयन्ति भिषजः । अस्य सत्त्वं हरितालसत्त्वविधिना ग्राह्यम् । स्थिरीकरणविधिश्चापि तद्वदेव बोध्यः । तद्गुणानाह—रसबन्धकर इति । अथ क्रमप्राप्तं नवसारमाह । स च द्विविधः । काष्ठविशेषभस्मज इष्टिकाभस्मजश्च । तदाह—करीरेति । अतिसूक्ष्मपत्रः शुक्तोपयोगिफलः । अयं वृक्षो गुर्जरदेशे प्रसिद्धः । पीलुवृक्षस्त्रिचतुःपुरुषोच्छ्रायस्तीक्ष्णघनदलः । अयमपि गुर्जरे प्रसिद्धः । तत्काष्ठेषु पच्यमानेषु यद्भस्म तज्जः क्षारो नवसार इति कीर्तितः । तस्यैव चूलिकालवणेति पर्यायान्तरम् । कुम्भकारकृतामपाकावसर इष्टिकादहनेन यत् किट्टभस्मरूपं पतति तज्जलेन सहाग्निना विपाच्य जातं यल्लवणं तदप्येतन्नामद्वयं बोध्यम् । एतच्चूलिकालवणं भिडाख्यं लवणं च त्रिदोषघ्नं मतम् ॥ १२९ ॥

अथ क्रमप्राप्तान्कपर्दान्वर्णयति ॥ मूलम्—पीताभा० पातयेन्नात्र संशयः ॥१४४॥
**टीका**—ते च द्विविधाः । क्षुद्रमहद्भेदेन । तत्र क्षुद्रा वराटिकाख्याः । महान्तो वराटाख्याश्च भवन्ति । तेषां लक्षणमाह–पीताभा इति । मानेनोत्तममध्यमाधमाँल्लक्षयति–सार्धेति । वराटिकानां साधारणगुणानाह–परिणामादीति । तदन्ये पुंवराटाः स्युरिति पाठः । गुरवो महान्तो–भारवन्तश्च । तच्छुद्धिमाह–वराटा इति । अथ क्रमप्राप्तं वह्निजारमाह अग्निजार इति । अग्निनक्रस्य, अग्न्याख्यनक्रस्य । एते नक्रास्तत्र निवसन्ति यत्रामेरिकासंनिहितसागरे वडवानलस्तिष्ठति । तत्रैवास्योपरसस्योपलब्धिः । इति सर्वसिद्धं मतम् । अन्ये तु नक्रस्यास्य सागरे सर्वत्र प्रसर इति मत्वा पश्चिमसमुद्रतीर आगतं नक्रान्तरजं जरायुमपि संगृह्य संशोष्य पारदकर्मणि तदुपयुञ्जन्ति च । तद्गुणानाह—अग्निजार इति । अथ गिरिसिन्दूरमाह—महागिरिष्विति । अल्पीयोऽत्यल्पः । अयं लोके प्रायो नोपलभ्यते । केचित्तु ‘ कामियां सिन्दूर इति नाम्ना प्रसिद्धोऽयं पदार्थोऽतिरक्तवर्ण इति वदन्ति । लोकेऽतिप्रसिद्धस्तु नागसंभव एव । स एव चात्र ग्राह्य इति रावणमतम् । सिन्दूरो नागसंभव इति तद्वचनादिति । अथोद्देशक्रमप्राप्तं हिङ्गुलं वर्णयति—हिङ्गुल इति । अयं रसः पारदस्तनिजमृद्विशेषः । अत एव प्रथमाध्याय उक्तम्—‘ तां मृदं पातनायन्त्रे पातयन्ति रसं ततः ’ इति । कृत्रिमोऽपि लोके दृश्यते पारदगन्धकनवसागरपाकजन्यः । खनिजोऽयं द्विविधः । तस्य चोत्तमस्य लक्षणमाह—श्वेतरेख इति । स च हंसपाक इति नाम्ना कथितः पाकेन व्यवस्थितः । श्वेतरक्तवर्णविशिष्टत्वात् ।

अयमुत्तमः । प्रथमस्तु हीनश्वेतरेषोऽल्पगुणः । स तु चर्मार इति निगद्यते । हिङ्गुलस्य साधारणगुणानाह—हिङ्गुल इति । अस्य गन्धकयोगेन जन्यत्वात् । एतस्य गुणमाह—एतस्मादिति । जीर्णगन्धो जारणासंस्कारेण जीर्णगन्धकः पारदः। स तु यथा रोगवारणयोगार्हस्तद्वदयमपीति भावः । अनुकल्प एवायम् । अव्यभिचारेण रोगहन्तृत्वं त्वष्टसंस्कारशुद्धस्य षड्गुणगन्धकजीर्णस्यास्य शुद्धिमाह—सप्तेति । लकुचः ' लिचा ' इति हरिद्वारक्षेत्रसंनिहितदेशे प्रसिद्धम् । बेळगांवकर्नाटकादौ तु बढारफलेति प्रसिद्धम् । हीनवर्णस्वर्णस्य गुणोत्कर्षप्रदयोगार्हामस्य विशिष्टां शुद्धिमाह—किमत्रेति । अयं मेषीक्षीरेणाम्लवर्गेण च पृथक्शतवारं भावितः शुध्यति । एवं शुद्धोऽयं बहुघर्मतापितं मूषायां धमनेन अन्योष्मणाऽग्निजेन द्रुतं हीनसुवर्णं वापेन रङ्गद्रुतियोगेन वा धातुवादोक्तेन श्रेष्ठकाश्मीरजसमानपीतरक्तवर्णं साक्षात्करोति प्रत्यक्षं कुर्यादित्यत्राऽऽश्चर्यं किं न किमपि । रञ्जकत्वं चास्य हि सहजधर्म एवेति भावः । अत एव रससारेऽभिहितम्—' तालो नागः शिलाचौरः शुल्वो हंसश्च गन्धकः । एते रङ्गं विमुञ्चन्ति विद्रुमं गैरिकं तथा ' इति । तद्रङ्गद्रुतिविधिरपि तत्रैव देगयन्त्रेणोक्तः । तथा च तद्ग्रन्थः—' मणैकं लोहचूर्णस्य स्वर्जिकाया मणद्वयम् । त्रिभागं चूर्णकं दत्त्वा एकस्थमतिमर्दयेत् ॥ क्षिप्त्वा चूर्णं बृहद्भाण्डे जलमूत्रेण पूरयेत् । चुल्लिकोपरि संस्थाप्य वह्निं प्रज्वालयेत्ततः ॥ यदा फेनः समागच्छेच्छ्वेतवर्णस्तदूर्ध्वतः । अन्यपात्रे तदा स्थाप्य यावद्बध्नाति रक्तताम् ॥ पश्चात्तं रक्तफेनं च पात्रमध्ये क्षिपेत्पुनः । क्षीणे मूत्रे जलं दद्याद्यावद्रक्तं च दृश्यते ॥ तावद्रक्तं च गृह्णीयात्पुनः पात्रे निधापयेत् ॥ यदा रक्तं न दृश्येत तदा वह्निं निवारयेत् ॥ रक्तं वस्त्रेण संगाल्य मलशेषं विवर्जयेत् । श्वेतफेनेन संयुक्तं तस्यैतज्जलशोषणम् ॥ काचसारितघट्या तु तद्धार्यं तदनन्तरम् । बृहद्भाण्डं समादाय कुक्षौ च छिद्रसंयुतम् । भाण्डमध्ये घटीं क्षिप्त्वा मुखं छिद्रे नियोजयेत् । तदास्ये काचनालं स्यात्तच्च नालमधोमुखम् ॥ रुद्ध्वा तदा तयोः संधिमर्धं च नालकं दिहेत् । भाण्डं वालुकयाऽऽपूर्य तस्य द्वारं निरुध्य च। वह्नेः प्रज्वालनं तावद्यावत्तन्नालकं द्रवेत् । शीतं यन्त्रं समुत्तार्य घटीं प्रक्षालयेत्ततः ॥ द्रावं क्षिप्त्वा पुनर्दद्यात्पुनः पाको विधीयते । एवं रङ्गद्रुतिः प्रोक्ता देगयन्त्रेति शोभना ॥ वालुकादेगयन्त्रेण पिच्छकेशा द्रवन्ति च । अम्लादिद्रावणं कार्यं यन्त्रेणानेन यत्नतः '॥ इति । तत्सत्त्वमाह—दरद इति । सत्त्वं सूतकसंकाशमिति । ऊर्ध्वपातनयन्त्रे घटकाधोभाण्डान्तःस्थले स्थापितोऽयं दरदोऽधस्ताद्वह्नियोगेनोर्ध्वं पातितश्चेत्पारदतुल्यवर्णद्रवमात्मीयं सत्त्वमूर्ध्वभाण्डमध्ये पातयेदिति ॥ १४४ ॥

**मूलम्**—सदलं पीत० सत्त्वं पतति शोभनम् ॥ १५६ ॥ **टीका**—अथ क्रमप्राप्तं मृद्दारशृङ्गं वर्णयति—सदलमिति । गुर्जरमण्डले गुर्जरदेशे । अर्बुदगिरेः

पार्श्वे नागखनिस्थानभूते च जातमुत्पन्नं यद्विशिष्टं क्षुद्रपाषाणात्मकं द्रव्यं सदलपीतवर्णात्मकं तन्मृद्दारशृङ्गनाम्ना प्रथितं भवेत्। तद्गुणानाह—सीससत्त्वमिति। सीससत्त्वस्योपादानं कारणम्। पुंगदः प्रमेहादिः। अथ सर्वसाधारणरसानां शुद्धिकारकयोगमाह—साधारणेति। येषां प्रतिपदोक्ता शुद्धिरुक्ता तेषां तच्छुद्धिरेव कार्या। येषां कम्पिल्लनवसारादीनां तथा शुद्धिरनुक्ता तेषां तु मातुलुङ्गरसादिना शुद्धिः कार्या। इति शुद्धिव्यवस्था बोध्या। अथवा कालभैरवमतमेतत्प्रतिपादितं सर्वसाधारणरसशुद्धिविषयम्। स चान्यदप्याह—सर्वसत्त्वानि मिथो विरुद्धगुणानि मृदुखराणि, अल्पकालदीर्घकालधमनसाध्यद्रवाणि तानि मातुलुङ्गरसादिनैव शुध्यन्ति। ततः शुद्धिवर्गेण काचटङ्कणसौवीरात्मकेन गोस्तनाकारमूषायां धमनकालेऽन्तराऽन्तरा प्रतिवप्तेन(प्रत्युप्तेन) सह ध्मातानि तानि सत्त्वानि रसरूपाणि भूत्वा मिथो मिलन्तीति। संकराख्यं तु दुर्मेल्यम्। मिथो मिलितमेवैकाकारं सत्त्वसमूहं बीजसमूहमेव च पारदो ग्रसतीति तद्ग्रासार्थमेवात्र मिथो मिलनविधिरुक्त इति भावः। इदानीं राजावर्तरसं वर्णयति। स च रसोपरससाधारणरससमः। किंचिद्धर्मेण किट्टासारमलक्षेत्रदोषरूपेणाऽऽवृतत्वात्। अतिभासुरत्वाचिन्त्यप्रभावत्वादिसर्वरत्नगुणविशिष्टत्वाच्चायं रत्नवर्गसंग्राह्य एव। एवं चात्र विशिष्टरसत्वं रत्नत्वं च संभूय तिष्ठति। अतोऽयमाचार्येणान्तरैव पठितः। केवलं परिगणनाभावेन नास्य रसत्वमुपरसत्वं साधारणरसत्वं वा। वैक्रान्तोऽपि एतत्सम एव। किंतु तस्य रसगणमध्ये परिगणनं कृतमिति विशेषः। तस्य तु किट्टसमानासारपाषाणकवचावृतत्वात्क्षेत्रदोषविशिष्टत्वाच्च रसत्वमुपरसत्वं साधारणरसत्वं वा वक्तव्यमिति विचार्य गुणैर्वज्रसमोऽयमिति सर्वोत्तमत्वं प्रतिपादयितुमेनं रसेषु प्रथमरसोत्तरमेव पपाठ नात्रेति भावः। अथ राजावर्तस्योत्तममध्यमत्वं लक्षयति—अल्परक्तेति। तद्गुणानाह—प्रमेहेति। तच्छुद्धिमाह—निम्बुद्रवैरिति। प्रत्येकं निम्बुद्रवादिषु द्विदिनं त्रिदिनं वा दोलायन्त्रे स्वेदिता राजावर्तसदृशा धातवः पर्वतोद[र]स्था अप्यप्रसिद्धनामकास्तेजस्विपदार्थाः शुध्यन्ति। क्षारः क्षारोदकम्। शुध्यन्तरमाह—शिरीषेति। आर्द्रमार्द्रकं शृङ्गवेरम्। तद्भस्मविधिमाह—लुङ्गाम्बुवेति। प्रतिपुटं समांशगन्धकयुतो राजावर्तचूर्णो मातुलुङ्गकरसेन चूर्णितः संमर्दितो वटकीकृतः संशोष्य गजपुटे पुटितः कार्यः। एवं सप्तपुटै राजावर्तो मृतो भवेदिति। अथ तत्सत्त्वविधिमाह—राजावर्तस्येति। राजावर्तचूर्णं कुनटीचूर्णसमभागमेकीकृत्य गोघृतेन संमर्द्य तत आयसे लौहे कटाहे चतुर्गुणं माहिषं क्षीरं दत्त्वा विपचेत् क्षीरसंशोषणपर्यन्तम्। ततोऽवतार्य तस्य चतुर्थांशेन टङ्कणं दत्त्वा पञ्चगव्येन संमर्द्य पिण्डीबद्धं पिण्डाकारं कुर्यात्। ततः पातालकोष्ठ्यां वृन्ताकमूषायां वा खदिराङ्गारैरेकभस्त्रिकया ध्मापितं सत् सत्त्वं मुञ्चति। अनेनैव विधिक्रमयोगेन(ण) गैरिकं विमलं ध्मापितं क्रमेण पीतवर्णं रक्तवर्णं च सत्त्वं मुञ्चति। कुनटी

मनःशिला । विधिविकल्पार्थमयमतिदेशः । प्रतिपदोक्तप्रागुक्तसत्त्वाकर्षणविधिनाऽनेन विधिना वा गैरिकविमलयोः सत्त्वं पातयेदित्यर्थः ॥ १५६ ॥

इति वामनात्मजचिन्तामणिविरचितायां रसरत्नसमुच्चयटीकायां सरलार्थप्रकाशिन्याख्यायां सूत्रस्थान उपरससाधारणरसवर्णनात्मकस्तृतीयोऽध्यायः ॥ ३ ॥

---

## अथ चतुर्थोऽध्यायः ।

अथ प्रथमं बालजारणोपयोगिरसोपरससाधारणरसवर्णनोत्तरं बद्धजारणा संभवति । तस्यां च पारदबन्धः प्रथमं कार्यो भवति । अतो मणीनां द्रुत्या पारदस्य बन्धोपयोगित्वाद्रसायनोपयोगित्वाच्च तेषां वर्णनमारभ्यते—

**मूलम्**—मणयोऽपि च० कर्मजव्याधिनाशनम् ॥ १२ ॥ **टीका**—मणयोऽपि चेति । सूतबन्धस्य कारका इति । अनेन पारदबन्धात्मककर्मरूपैककार्योपयोगित्वसंगतिः प्रदर्शिता । तन्मणिविषये परिगणनाभेदश्चतुर्विधो दृश्यते । ते चाष्टावित्येकं मतम् । षडिति द्वितीयम् । पञ्चेति तृतीयं मतम् । नवेति चतुर्थं मतम् । तद्भेदान्क्रमेणाऽऽह—वैक्रान्त इति । वैक्रान्तो द्वितीयाध्याये प्रागुक्त एव । सूर्यकान्तः श्वेतपाषाणविशेषः । यस्मिन्प्रखरसूर्यतापमध्ये धृते सति तेन प्रच्छन्नमध्यस्थं काष्ठगोर्वरादि ज्वालां गृह्णातीति प्रसिद्धमेव । हीरकं वज्रम् । मौक्तिकं शुक्तिसंपुटजं प्रसिद्धम् । मणिर्विद्रुमं प्रवालमिति लोके प्रसिद्धम् । चन्द्रकान्तः पाषाणविशेषः स्वनाम्नैव प्रसिद्धः । यो हि चन्द्रोदये सति जलं स्रवतीति प्रसिद्धमेव । राजावर्तो ‘ राउटी ’ इति ब्रिजभाषायाम् । गरुडोद्गारकं तार्क्ष्यं मरकत इत्यपरपर्यायद्वयम् । ‘ पन्ना ’ इति लोके प्रसिद्धम् । पुष्परागं ‘ पुखराज ’ इति लोके प्रसिद्धम् । महानीलमिन्द्रनीलम् । पद्मरागं माणिक्यम् । प्रवालं तु प्रसिद्धमेव । वैडूर्यं तत्, यदाकाशे सजलमेघशब्दादङ्कुराविशिष्टं भवति । अत एवास्याभ्रलोहमिति पर्यायान्तरम् । एतत् ‘ पिरोजा ’ इति लोके प्रसिद्धम् । नीलं नीलशब्देनैव लोके प्रसिद्धम् । अथ नवग्रहरत्नान्याह—माणिक्येति । एतानि सूर्यादिनवग्रहाणां क्रमेण रत्नानि बुध्येत । भिदुरं वज्रम् । पुष्पं पुष्परागम् । विदूरकं वैडूर्यम् । संप्रति प्रतिकूलग्रहाणामानुकूल्यसाधकामिष्टोदर्कं विशिष्टक्रमेण रत्नानां मुद्रायां धारणमाह—ग्रहानुमैत्र्येति । कुरुविन्दादीनां सूर्यादिस्थानक्रमेण मुद्रायां धारणं ग्रहानुकूलमैत्रीसंपादनद्वारेष्टसिद्ध्यै भवतीत्यर्थः । कुरुविन्दो माणिक्यम् । सुलक्ष्माणि सुलक्षणानि । रावणेन तूपरत्नान्यपि पठितानि । तथा च तद्ग्रन्थः—‘ उपरत्नानि काचश्च कर्पूराश्मा तथैव च । मुक्ता शुक्तिस्तथा शङ्खा इत्यादीनि बहून्यपि ’ इति । अथ नवग्रहोक्तोद्देशक्रमेण रत्नानां पृथग्भेदं सद्स-

लक्षणं चाऽऽह—माणिक्यमिति । द्विविधं माणिक्यं पद्मरागं नीलगन्धि च । पद्मं रक्तवर्णं कमलं तद्वद्रागो रक्तवर्णो यस्येति तथोक्तम् । नीलवर्णस्य गन्धः संबन्धो यस्येति नीलगन्धि । यत्पद्मरागमाणिक्यं तत्तु कुशेशयपत्रसमानरक्तवर्णादिविशिष्टं श्रेष्ठं भवति । नीलमाणिक्यं तु यद्गङ्गोदकस्थानजन्यं गर्भे नीलवर्णं बहिररुणवर्णं तदपि श्रेष्ठम् । अष्टदोषान्यतमविशिष्टं तु माणिक्यमधमम् । तान्दोषानाह—रन्ध्रेति । रन्ध्रं गर्ताविशेषः । कार्कश्यं करालत्वम् । रौक्ष्यं खरस्पर्शम् । अवैशद्यमनुज्ज्वलत्वम् । तद्गुणानाह—दीपनमिति । भूतादिघ्नत्वं तु प्रभावादेव बोध्यम् । कर्मजव्याधिः कुष्ठापस्मारादिः । अत्र रसोपरसादिवत्प्रतिरत्ननैसर्गिकदोषशुद्धिसत्त्वद्रुतिभस्मानि यथाविधि यथासंभवं स्वस्थान एव वक्तुमुचितम् । परं तु तेषां शुद्धेरल्पवक्तव्यत्वादेकत्रैवोक्त्या सुग्राह्यत्वाच्च वक्ष्यत्याचार्यः । सर्वरत्नवर्णनान्त एव तां शुद्धिं द्रुतिभस्मकरणमपि तेषामैकैकयोगेनैव व्याहरिष्यति । क्षेत्रजगिरिजजलजप्राणिजमलकिट्टादि तदावरणकरं नास्त्येव । अत एव तानि सत्त्वरूपाण्येवातः सत्त्वाकर्षणं न प्रोक्तम् । निर्दोषत्वे वचनमपि वक्ष्यति—' क्षेत्रतोयभवा दोषा रत्नेषु न लगन्ति ते ' इति ॥ १२ ॥

**मूलम्**—ह्लादि श्वेतं दीपनं पाचनं लघु ॥२५॥ **टीका**—मौक्तिकस्य सतो लक्षणं गुणं चाऽऽह—ह्लादीति । ह्लादि आह्लादकरम् । स्निग्धं मसृणं लघु, अकालत्वेन मनोज्ञम् । ख्यातं प्रसिद्धम् । सहजतया चक्षुष्मतां दृष्टिवशकरमित्यर्थः । जलनिधेर्मौक्तिकस्थानमधुरजलाशयादुत्पन्ना मौक्तिकावरकशुक्तिरपि तद्गुणा । पक्तिरुजं परिणामशूलम् । अथ साधारणमौक्तिकगुणानाह—कफपित्तेति । अथोद्देशक्रमप्राप्तं प्रवालं वर्णयति—पक्वेति । धूसरं कृष्णमिश्रलोहितवर्णम् । कण्डरान्वितं शिरावृतम् । विषभूतादीत्यत्राऽऽदिशब्देन दृष्टिदोषादिपरिग्रहः । तार्क्ष्यं वर्णयति—हरिद्वर्णमिति । शुभ्रं दृष्टिप्रियम् । मसृणं खरत्वरहितम् । गात्रं सुशरीरवत्पुष्टमित्यर्थः । लाघवं भाररहितमित्यर्थः । विकटं करालम् । तद्गुणानाह—ज्वरेति । पुष्परागं वर्णयति—पुष्परागमिति । कर्णिकारप्रसूनं रक्तवर्णम् । पीतश्यामं पीतमिश्रश्यामम् । कपिशं कपिरोमसमवर्णम् । कपिलमधिकपीतवर्णम् । तद्गुणानाह—पुष्परागमिति ॥ २५ ॥

**मूलम्**—वज्रं च त्रिविधं० उक्तवान्रसकौतुकी ॥ ४० ॥ **टीका**—अथ वज्रं वर्णयति—वज्रमिति । तस्य त्रैविध्यं लक्षणसहितमाह । अष्टास्रमष्टकोणमष्टफलकम् । अष्टचिपिटावयवम् । ' अष्टपेलु ' इत्यर्थः । कोणसंख्याविकल्पमाह—षट्कोणमिति । अम्बुदेति । सजलमेघमध्ये यदिन्द्रधनुस्तत्तुल्यवर्णं यद्वारि जलसारमतिचञ्चलं तेज इत्यर्थः । तदतिशयेन यस्मिंस्तथोक्तम् । पुंवज्रेण विना क्वचित् तत्तु सर्वत्र युज्यते । त्रिविधस्यापि तस्य प्रत्येकं वर्णभेदेन चतुर्विधजातिभेदमाह—श्वेतादीति । आदिशब्देन रक्तपीतकृष्णवर्णपरिग्रहः । श्वेतं ब्राह्मणजातीयम् । किंचिद्रक्तं क्षत्रियजातीयम् । पीतं वैश्यजातीयम् । कृष्णं शूद्रजातीयम् । उत्तमोत्तमवर्णं वर्णो

द्विजत्वाद्द्विजातिः । प्रवरं द्रव्यं स्वजातीयावरस्थाने प्रयुक्तमवरगुणान्पूर्णतया संपादयति । अवरं तु प्रवरस्य पूर्णगुणलाभार्थं नोपयोक्तव्यम् । तस्य तादृक्सामर्थ्याभावात् । मुण्डलोहस्थाने कान्तमुपयोक्तव्यम् । कान्तलोहस्थाने तु पूर्णगुणलाभार्थं मुण्डं नोपयुञ्जीत । इतरवज्राभ्रार्थं कृष्णवज्राभ्रमुपयुञ्जीत । कृष्णवज्राभ्रस्थान इतरवज्रं तु पूर्णगुणलाभार्थं नोपयुञ्जीत । एवं द्रव्यान्तरमप्यूह्यहर्तव्यम् । परं तु, असति बाधक इति शेषः कार्यः । तेन धातुवादे पीतवज्रमेव ग्राह्यं न तदर्थे कृष्णं तदिति बोध्यम् । हीरकस्य गुणानाह—आयुष्प्रदमिति । यस्य यावदायुर्जीवितकालः सामुद्रिकज्यौतिषाद्यनुमितो हिताहारविहारकारिणस्तस्य तावत्कालपर्यन्तं मारकरोगवारणपूर्वकं स्वस्थं सप्राणं रक्षयतीत्यर्थः । तथा पारदस्य बन्धवधसद्गुणान्करोतीति तथोक्तम् । मृत्युंजयमपमृत्युजयम् । अथ साधारणान्सर्वरत्नदोषानाह—ग्रासस्त्रासश्चेति । ग्रासो ग्रसितैकदेशत्वम् । त्रासः सबाह्याभ्यन्तरमलविशिष्टत्वम् । बिन्दुः प्रसिद्धः । स चानेकविधः । रेखा प्रसिद्धा । जलगर्भता । यत्रान्तः कोटर इवान्तः शुषिरविशिष्टजलाभासो भवति तादृशत्वम् । अथ तस्य सत्त्वविध्यनुक्तौ हेतुमाह—क्षेत्रेति । वक्ष्यमाणशुद्धिस्तु प्रतिपद्योक्ताऽपि तस्य न पर्याप्ता भवेदिति धिया द्विविधं तच्छुद्धियोगमाह—कुलत्थेति । कुलत्थानां ह्यन्तःप्रवेशेन पाषाणस्य विश्लिष्टावयवानां नैसर्गिकमलनिःसारणकरत्वाच्छिथितामित्युक्तम् । अथान्यतन्त्रकारोक्तं तद्भस्मविधिमाह—वज्रमिति । मत्कुणः स्वेदादिमलजो मानवत्वक्स्थरक्तपो मलिनशय्यावस्त्रादिस्थो रक्तबीज इत्यपरपर्यायः कीटविशेषः । तद्रक्तेन चतुर्वारं वज्रं भावयित्वा वर्तितैष्टङ्कणं दत्त्वा शिथिलावयवीकृतैः सुगन्धिमूषिकामांसैश्छुच्छुन्दरीमांसैः सह संमर्द्य तस्या एव मांसकल्केन संवेष्ट्य शरावसंपुटितं कृत्वा वराहपुटेन पुटेत्पचेत् । एवं त्रिंशद्वारं कार्यम् । ‘ छाणैरत्निके कुण्डे पुटं वाराहमुच्यते ’ इति वराहपुटलक्षणम् । ततो वज्रद्रावणकाख्यायां मूषायां वज्रं निक्षिप्य खदिराङ्गारैः परिपूर्य भस्त्रयाऽऽध्मायाग्निवर्णं संजातं वज्रं कुलत्थक्काथे क्षिपेत् । एवं प्रताप्य क्काथे कौलत्थे निक्षेपणं शतवारं कार्यम् । शतवारान्कर्तव्योऽयं क्रमविधिः वज्रभस्मविधिक्रमः । क्काथनिक्षेपणपर्यन्तो रसशास्त्रज्ञैरन्यैरमुख्यैस्तन्त्रकारैरुक्तः । परं तु तेन सम्यग्भस्म भवेन्न वेति संविहाम आचार्यस्त्वान्तरसशास्त्रप्रोक्तं भालुकिसंमतं वज्रभस्मविधिमाह—कुलत्थेति । कुलत्थक्काथमिश्रो यो लकुचफलरसस्तेन मनःशिलां पिष्ट्वा तेन कल्केनाभ्यन्तरलिप्तायां मल्लमूषायां शुद्धं हीरकं निक्षिप्य कर्पटमृल्लेपादिना संधिरोधं कृत्वा गजपुटे पचेत् । एवं शुष्कवनोपलैरष्ट पुटानि दत्त्वा ततो वज्रद्रावणकाख्यमूषायां खदिराङ्गारैरेकभस्त्रिकया दृढं ध्मात्वाऽग्निवर्णं वज्रं लोहपात्रस्थे शुद्धपारदे निक्षिपेत् । एवं ध्मानपूर्वकनिक्षेपस्य शतवारकरणेन निश्चयेन पारदभस्म वारितरं भवेत् । निश्चयहेतुमाह—सत्यवागिति । दृष्टो यः प्रत्ययोऽनुभवस्तद्युक्तमनुभूतमित्यर्थः ॥ ४१ ॥

**मूलम्**—विलितं मत्कु० साड्गुण्यसंसिद्धये ॥ ४८ ॥ **टीका**—अथाल्पश्रमसाध्यं वज्रभस्मविधिद्वयमाह—कासमर्देति । वज्रद्रावणकमूषायां निक्षिप्तं वज्रं खदिराङ्गारैर्दृढं ध्मात्वाऽग्निवर्णं सल्लोहपात्रस्थकासमर्दरसे निषेचयेत् । एवं सप्तधा ध्मानपूर्वकनिषेचितं वज्रं भस्मरूपं खलु निश्चयेन भवेत् । तत्रापि साधकानां विश्वासार्थमाप्तोक्तिमाह—ब्रह्मज्योतिरिति । तदाख्यो मुनिविशेषः । नीलज्योतिर्लताकोशादौ व्यवहारे च संप्रति नोपलभ्यते । परं तु किंवदन्त्या ज्ञायते । तथा हि—बुन्दीतिख्यातान्माण्डलिकराजनगरान्नातिदूरे विराजमानस्य शिखरिणः पार्श्वे वृक्षवल्लीजलाहिंस्रपश्वाकर्णे दुर्गमे स्थले भीमाख्यपाण्डवकृतलत्ताप्रहारेण संजातं गुहासदृशगर्तास्थलं भीमलतेति नाम्ना संप्रति प्रसिद्धमस्ति । तत्संनिहितदेशे रात्रौ विराजमानानां कनकप्रभाणां कासांचिद्दिव्यौषधीनां मध्ये नीलज्योतिषा विराजत इयं कन्दवल्ली । दिवा तु तत्तेजोरहिता । तत्प्रदेश एवाञ्जनेप्रयोगिरसपत्रा काचिदोषधी वर्तते । [तद्रसेनाञ्जितदृष्टिः कश्चिद्धानुष्को, ज्योतिषा नीलवर्णेन तां लक्षीकृत्य यदि शरेण विध्येत्तर्हि परेद्युः शरविद्धायास्तस्या उपलब्धिर्भवति । तत्पत्रभक्षणेन लघुदेहो भूत्वैकदिनेनैव षष्टिक्रोशपर्यन्तं मार्गमश्रमेणैव गच्छति । एतयैवौषध्योक्तकल्पेन सिद्धिं गतः पुरुषः कश्चन बुन्दीराजधान्यां राजाश्रितः शीघ्रगमनकार्यार्थे सप्तदशशतक आसीदिति । अनया च जनश्रुत्या नीलज्योतिर्लता तत्रास्तीति विज्ञायते । तत्कन्दरसे बहुवारं घृष्टं संमर्दितं वज्रं निश्चयेन भस्मरूपं भवति । तत्रोपमामाह—कर्मवदिति । "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन" इति गीतावचनं तत्र प्रमाणम् । अथ शुद्धवज्रस्य चूर्णकारकं योगमाह—मदनस्येति । क्षोणिनागका भूनागाः । वज्रचूर्णं वज्रभस्मचूर्णम् । पुनरपि भस्मीभूतवज्रस्य सूक्ष्मचूर्णकारकं योगान्तरमाह—तद्वज्रं भस्मीभूतवज्रं पूर्वयोगेण संचूर्ण्य तस्य विंशांशेन खरभूनागसत्त्वं तत्र दत्त्वा पादांशेन टङ्कणं च दत्त्वा वज्रद्रावणकोश्रिकायां खदिराङ्गारैर्दृढं भस्त्रयाऽऽध्मानेनाऽऽवर्तयेत् । अग्निवर्णद्रावेणैकीं कुर्यात् । पश्चात्समभागं स्वर्णं तत्र दत्त्वा पुनर्ध्मानेन ध्मातं तद्रसरसायनादिषु प्रयोगार्हं भवति । अथ दन्तदार्ढ्यकरं तद्योगमाह—त्रिगुणेनेति । रसेन पारदेन । अथ पूर्णगुणसिद्धिकारकं वज्रभस्मप्रयोगमाह—त्रिंशेति । कलाभागिकं षोडशभागात्मकम् । वज्रभस्मापेक्षयाऽष्टगुणितं रौप्यभस्म । सितामृतवरं श्वेतपुष्पं वत्सनाभं विषं तत्तु वज्रभस्मन एकादशांशेन ग्राह्यम् । ताप्यकं स्वर्णमाक्षीकभस्म । तत्तु वसुगुणमष्टगुणितम् । एवंरीत्या योजनीयम् । सर्वरसानां न केवलमुद्देशः कृतः किंतु पृथक्पृथग्भागोऽप्युदित उक्तः । यथाभागमुक्तरसैरेकत्र कृत्वा संमर्दितः समूहात्मकोऽयं वज्ररसः । शीलिनः पुरुषस्य साड्गुण्यसंसिद्धये पूर्णवज्रगुणप्रदो भवतीत्यर्थः । वज्रद्रुतिस्तु रत्नवर्णनोपसंहारे वक्ष्यमाणा । राजनिघण्टे सद्वज्रपरीक्षाऽपि प्रोक्ता ।

तथा हि—'यत्पाषाणतले निकाषनिकरे नोत्पिष्यते निष्ठुरैर्यच्चोलूखललोहमुद्गरघनैर्लेखां नयत्याहतम् । यच्चान्यन्निजलीलयैव दलयेद्वज्रेण वा भिद्यते तज्जात्यं कुलिशं वदन्ति कुशलाः श्लाघ्यं महार्घं च तत्' इति ॥ ४८ ॥

**मूलम्**—जलनीलेन्द्र० दीपनं मलमोचनम् ॥ ५९ ॥ **टीका**—अथ क्रमप्राप्तं नीलमाह—जलनीलेति । इन्द्रनीलं शक्रनीलम् । अस्यैव महानीलमित्यपरपर्यायः । श्वैत्येति । गर्भे श्वेतवर्णं बहिर्नीलम् । एकच्छायं बहिर्नीलमात्राविशिष्टम् । नीलमुत्तममिन्द्रनीलमित्यर्थः । तच्चैकच्छायादिसप्तभेदविशिष्टं भवति । कोमलत्वादिभेदेन जलनीलमपि सप्तधा । कोमलं पञ्चवर्णम् । वि(ह)तं विरुद्धवर्णेन हतं विद्धम् । अर्धभागेन संपूर्णश्वैत्यगर्भितनीलाभमर्धभागेन पञ्चवर्णम् । रक्तगन्धि रक्तवर्णसंबद्धम् । चिपिटाभं चिपिटाकारम् । सुसूक्ष्ममस्थूलम् । नीलसाधारणगुणानाह—श्वासेति । दुर्नामार्शोरोगः । अथ गोमेदं वर्णयति । तच्च किंचित्पीतमिश्रश्वेतवर्णम् । तदाह—गोमेद इति । पीतरत्नं सुस्वच्छमकलुषितं यद्गोजलं गोमूत्रं तत्समानवर्णम् । समं विषमगर्तादिरहितम् । मसृणं कोमलस्पर्शम् । अथ तद्गुणानाह—गोमेदमिति । अथ वैडूर्यं वर्णयति—वैदूर्यमिति । अस्य लोकभाषायां 'लशन्याखडा' इति प्रसिद्धिः । सममविकटम् । भ्रमादिति । चञ्चलशुभ्रवस्त्रसमानाभासगर्भम् । तद्गुणानाह—वैदूर्यमिति ॥ ५९ ॥

**मूलम्**—शुध्यत्यम्लेन० सप्ताहाद्द्रवतां व्रजेत् ॥ ७२ ॥ **टीका**—अथ रत्नशुद्धिमाह—शुध्यत्यम्लेनेति । अम्लेन काञ्जिकजम्बीरादिरसेन भावितं माणिक्यं शुध्यति । जयन्त्याऽरणिकया तद्रसेनेत्यर्थः । क्षारवर्गेण क्षारवर्गोदकेन । भावितमिति सर्वत्रैवान्वेतव्यम् । संधानं धान्याम्लं तच्च कुलत्थकाथमिश्रितमत्र ग्राह्यम् । नीली गुळीति लोके प्रसिद्धा । वस्त्ररञ्जनोपयोगिरसौषधिः । रोचनाऽम्ललोणिकाशाकम् । अत्र भावनासंख्यानुक्तावपि सा भावना सप्तवारं कार्या । अथ रत्नभस्मविधिमाह—लकुचेति । लकुचमम्लमधुरं फलम् । 'लिच्चा' इति ब्रिजभाषायाम् । कर्नाटके देशे 'बढारफल' इति प्रसिद्धम् । अत्र शिलागन्धकतालानि प्रतिपुटं रत्नसमभागानि गृहीत्वा लकुचरसेन संमर्द्य रत्नस्याध ऊर्ध्वं च दत्त्वा शरावसंपुटितं कृत्वा गजपुटं दद्यात् । एवमष्टपुटैर्वज्रेतररत्नानि भस्मसाद्भवन्ति । वज्रभस्मविधिस्तु प्रागुक्त एव । अथ रत्नद्रुतिविधिमाह—रामठमिति । रामठं हिङ्गु । पञ्चलवणानि काचलवणादीनि । 'काचसैन्धवसामुद्रबिडसौवर्चलैः समैः । स्यात्पञ्चलवणं तच्च मृज्जोपेतं षडाह्वयम्' इति राजनिघण्टे । क्षारत्रयं यवक्षारसर्जकटङ्कणात्मकम् । मांसद्रावीत्यम्लवेतसविशेषणम् । सहस्रवेधीत्यपरपर्यायः । अयमम्लवेतसोऽत्यन्ततीक्ष्णोऽतिवीर्यवान्भवति । चूलिकालवणं नवसारः । ज्वालामुखी वन्या क्षुद्रफला जम्बूरिति केचित् । 'भाडजांभूळ' इति महाराष्ट्रभाषायां प्रसिद्धा । लाङ्गली इत्यपि केचित् । द्रवन्ती महादन्ती । रुदन्ती चणकसमानपत्रा वन्यचणकः । पयस्या दुग्धिकासंधानं धान्याम्लम् । अथ

मौक्तिकद्रुतिविधिमाह—मुक्ताचूर्णमिति । पुटं दत्त्वा लघु पुटं दत्त्वा । अथवा सूर्यतापपुटमेव दद्यात् । अथ विशिष्टविधिना वज्रद्रुतिमप्याह—वज्रवल्लीति । वज्रवल्लीकल्कोदरस्थं कृत्वा भूर्जपत्रेण तदुपरि वस्त्रेण च वज्रं पोटलिकया निरुध्य बद्ध्वाऽम्लवेतसरसपूर्णभाण्डे दोलायन्त्रेण सप्तदिनपर्यन्तं स्वेदेन द्रवरूपं स्यात् । वज्रवल्ली महौषधीविशेषः । तल्लक्षणं दिव्यौषधीकल्पे महादेवविरचिते—वज्रनाम्नी तु सक्षीरा तत्पत्रं कण्टकैर्युतम् । कटु तिक्तं च सस्वादु साऽपि बध्नाति पारदम् ’ इति । केचित्तु वज्रवल्ली हडसंधी, अथवा ‘ हडजोडी ’ इति महाराष्ट्रभाषायां प्रसिद्धा । इयं वल्ली त्रिचतुष्कोणकाण्डा सूक्ष्मबहुपर्वका वृक्षोपर्येवोत्पद्यते तिष्ठति चेति वदन्ति ॥ ७२ ॥

**मूलम्**—श्वेतवर्णं तु० भूतादिनिर्नाशनम् ॥ ७८ ॥ **टीका**—अथ वैक्रान्तकद्रुतिविधियोगमाह—श्वेतवर्णं त्विति । खरघर्मे प्रखरसूर्यातपे सर्वविधवैक्रान्तस्य द्रुतिविधिमाह—केतकीति । स्वर्णपुष्पिका स्वर्णकेतकी लाङ्गली वा । इन्द्रगोपका वार्षिका रक्तवर्णा कीटविशेषाः । भाण्डे दोलायन्त्रभाण्डे । अस्य द्रावकयोगस्य प्रभावेण लोहाष्टकं तथा वज्रं च द्रवेत् । कथंभूताविधिना । वज्रद्रावणकमूषायां द्रुते लोहे वज्रे वा । अस्याऽऽवापेन तथा दोलायन्त्रभाण्ड एतद्भेषजरसपूर्णे स्वेदेन च । द्रुतीनां चिरस्थायित्वविधिमाह—कुसुम्भतैलेति । मुद्रितद्रुतिपात्रं तत्तैलमग्नं स्थापयेदित्यर्थः । रत्नधारणगुणानाह—सूर्यादीति ॥ ७८ ॥

इति वामनात्मजचिन्तामणिविरचितायां रसरत्नसमुच्चयटीकायां सरलार्थप्रकाशिन्याख्यायां सूत्रस्थाने रत्नशुद्ध्यादिवर्णनात्मकश्चतुर्थोऽध्यायः ॥ ४ ॥

---

## अथ पञ्चमोऽध्यायः ।

**मूलम्**—शुद्धं लोहं कनक० तत्स्यान्नु पूर्णवर्णम् ॥ १२ ॥ **टीका**—अथ ‘ सूतो लोहयुतो दोषांस्त्यजेल्लोहं च सूतयुक् । सूतलोहसमायोगात्प्रयोगो देहधारकः ’ इति रसार्णवोक्तेः पारदस्य जारणायां बीजरूपेणोत्कृष्टोपकारकत्वाद्वक्ष्यमाणलोहकल्पोक्तविधिसिद्धानां लोहानां तादृगुपयोगित्वसिद्धावपि प्रकृते वक्ष्यमाणरोगचिकित्साविषये भस्मीभूतलोहानामपेक्षायाः संभवात्पाषाणसाररूपत्वेन मणिसाम्याच्च तद्वर्णनोत्तरमाचार्यः संप्रति लोहवर्णनमारब्धुकामः प्रथमं शुद्धपूतिमिश्रभेदसहितं लोहानुद्दिशति—शुद्धमिति । लोहान्तरमिश्रणरहितं तच्चतुर्विधं कनकं रजतं भानु, अश्मसारं च । भानु ताम्रम् । शिलाजतुरत्नादीनां बहूनां द्रव्याणामश्मजसाररूपत्वात्तद्व्यावृत्त्यर्थं लोहेति विशेषणमश्मसारस्य । तथा च लोहेति नाम्ना शास्त्रलोकप्रसिद्धं यदश्मसारमयस्तदित्यर्थः । नागाभिधं लोहं तत्तथा वङ्गाख्यं चेति द्वितयं पूतीलोहसंज्ञमुदितमुक्तम् । असम्यग्जीर्णनागवङ्गस्य हि पारदस्य भक्षणे सति स्फोटकुष्ठादिरूपेण शरीरस्य दौर्गन्ध्यकरत्वात्प्रभूतमलविशिष्टत्वाच्चेति भावः । पित्तलादीनि

त्रीणि तु लोहमिश्रणजनितानीति मिश्रलोहानीत्युक्तम् । भ्वादेराकृतिगणत्वात्, ‘ लुह लोहे ’ इति धातुर्लोहशब्दसाधको भौवादिकः । सोऽपि कर्षार्थवाची । एवं च लोहे कर्षण इत्यर्थः । कर्षणं भेदनं तत्स्वभावं सर्वमपि सुवर्णादि वर्तत एवेति युक्त्या लुहधातोरयोवाचकत्वमेवेति केषांचिद्भ्रमो दूरीकृत इत्यर्थः । वर्तलोहं ‘ भर्त्या ’ इति नाम्ना लोके प्रसिद्धम् । तस्य च लोहाष्टकातिरिक्तत्वेऽपि लोहमिश्रणजन्यत्वात्तस्यापि संग्रहः कृतः । तत्र स्वर्णस्य पञ्च भेदानाह—प्राकृतमिति । पञ्चविधस्यापि तस्य सुवर्णस्य साधारणगुणप्रदर्शनपरं रौप्यगुणप्रदर्शनपरं च यद्ग्रन्थान्तरपठितं पद्यं तदाह—आयुरिति । लक्ष्मीः शोभा । भूतावेशस्य भूतपिशाचादिसंबन्धनिवारणकरम् । स्मरः कामस्तस्य यो भरः सवेगव्यापारस्तत्संबाधिसुखप्रदं वृष्यं कामोत्तेजकं चेत्यर्थः । एतादृग्गुणविशिष्टं गाङ्गेयं स्वर्णं भवति । रूप्यं रजतं तु गदहरत्वादिगुणविशिष्टं भवेत् । अथ पूर्वोक्तपञ्चधा स्वर्णस्यान्वर्थत्वमाह—ब्रह्माण्डमिति । रजोगुणभुवा विरिञ्चिना कर्त्रा कार्यब्रह्मणो महाभूतादिरूपस्याण्डमावरणकोशं येन सुवर्णेनाऽऽवृतं वेष्टितं कृतं तत्सुवर्णं प्राकृतं प्रकृतिसिद्धम् । तच्च देवानामपि दुर्लभम् । तदानीं तेषामनुत्पत्तेः । उक्तं हि मार्कण्डेयपुराणे सप्तशतीरहस्ये—‘ स्वरया सह संभूय विरिञ्चोऽण्डमजीजनत् । बिभेद भगवान्रुद्रस्तद्गौर्या सह वीर्यवान् । अण्डमध्ये प्रधानादि कार्यजातमभून्नृप । महाभूतात्मकं सर्वं जगत्स्थावरजङ्गमम् ’ इति । द्वितीयप्रकारमाह—ब्रह्मा येनेति । येन सुवर्णेन सह ब्रह्मा जात उत्पन्नः । उक्तं हि मनुना—‘ तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ’ इति । तृतीयमाह—विसृष्टमिति । अग्निना स्वमुखे शिवेन प्रक्षिप्तं यच्छैवं तेजः शुक्रं तद्वह्निना बहिः क्षिप्तं सत्सुवर्णमभवत्तद्वह्निजमित्युच्यते । तत्त्रिविधं षोडशवर्णयुक्तम् । ते च वर्णा ग्रन्थान्तरे विशिष्टद्रव्यसाम्यमुदाहृत्य पृथक्प्रदर्शिताः—‘ श्वेतः श्वेतजपापुष्पे वलक्षः कदलीसुमे । स्यादर्जुनस्तु कुमुदे विद्वद्भिः परिकीर्तितः । पाण्डुवर्णो भवेद्रेणौ केतकीपुष्पजे तथा । हरिणः पीतशबलशुक्लद्रव्ये सुनिर्दिशेत् । धूसरो बकुले पुष्पे कृष्णः स्यादतसीसुमे । हरिच्छिरीषजे पत्रे रक्तो रक्तोत्पले स्मृतः । कृष्णमिश्रे लोहिते स्यादरुणः श्वेतरक्तके । पाटलोऽथो मर्कटे तु कपिशः कृष्णलोहिते । भवेद्धूम्रो रोचनाभः पिङ्गोऽथो स्यात्पिशङ्गकः । पद्मधूलौ कर्बुरश्च स्मृतश्चेन्द्रधनुःसमः ॥ इति । वह्निजस्वर्णोत्पत्तिप्रकारमन्यथाऽवदत् । तथा हि—‘ पुरा निजाश्रमस्थानां सप्तर्षीणां जितात्मनाम् । पत्नीर्विलोक्य लावण्यलक्ष्मीसंपन्नयौवनाः । कन्दर्पदर्पविभ्रान्तचेतसो जातवेदसः । पतितं यद्धरापृष्ठे रेतस्तद्धेमतामियात् ’ इति । प्रसिद्धस्वर्णं खनिसंभवमाह—तत्र तत्रेति । गिरीणाम् । एते च गिरयो हिमालयविन्ध्यसह्यकर्नाटकस्थनीलगिरिप्रभृतयः स्वर्णखनिस्थानत्वेन प्रसिद्धाः सन्ति । काष्ठां प्राप्तो

पीतरक्तवर्णौ परिपूर्णौ विहाय चतुर्दशवर्णपूर्णं खानिजं भवति । रत्नपरीक्षकैस्तेषामेव वर्णानामुत्कर्षविभाजका यावच्छतं विकल्पिताः कक्षा लोके प्रसिद्धाः । पञ्चमभेदमाह—रसेन्द्रवेधेति । पारदस्य द्रुतलोहादौ लेपक्षेपादिरूपेण यो वेधोऽन्तःप्रवेशस्तज्जं कृत्रिमं सुवर्णं वेधजमिति प्रोक्तं भवति । रसेन्द्रवेधेत्युपलक्षणं मेरुसानुपतज्जाम्बूफलरसयोगजदिव्यौषधीयोगजमणिस्पर्शजस्वर्णानाम् । तेषामपि हि ग्रन्थान्तरे प्रसिद्धत्वात् । अथ खानिजस्वर्णगुणानाह—स्निग्धं मेध्यमिति । अशुद्धामृतस्वर्णदोषानाह—सौख्यमिति । अशुद्धममृतं च स्वर्णं सौख्यादि हन्ति । अतः शुद्धं कुर्यान्मारयेच्च । अथ वर्णोत्कर्षकरीं स्वर्णस्य शुद्धिमाह—कर्षप्रमाणमिति । कर्षमितं स्वर्णपत्रं सैन्धवगैरिकसंलिप्तं शरावसंपुटरुद्धं च कृत्वा कोष्ठेऽङ्गारेष्वर्धप्रहरपर्यन्तं भस्त्रया धमानेन तत्पूर्णवर्णं भवेत् । एतच्छुद्धेः प्राक्कर्तव्यं शुद्धिद्वयं त्रिमल्लभट्टेन तरङ्गिण्यामुदाहृतम्—' मृत्तिकामातुलुङ्गाद्यैः पञ्चवासरभाविताम् । सभस्मलवणां हेम शोधयेत्पुटपाकतः ' इति । तथा—' सुवर्णमुत्तमं वह्नौ विद्रुतं निक्षिपेत्त्रिशः । काञ्चनारद्रवे शुद्धं काञ्चनं जायते भृशम् ' । भक्षणार्हस्वर्णलक्षणमपि तत्रोक्तम्—' दाहे रक्तं सितं छेदे निकषे कुङ्कुमप्रभम् । तारशुल्बोज्झितं स्निग्धं मृदु हेम गुरूत्तमम् ' इति । अत्र तैले तक्रे गवां मूत्रे, इति वक्ष्यमाणसाधारणशुद्धिविधिनैव भवेत्स्वर्णस्य नैसर्गिकदोषशुद्धिरित्यभिप्रायेणाऽऽचार्यः शुध्यन्तरं नोक्तवान् ॥ १२ ॥

**मूलम्**—लोहानां मारणं० सदोषं मरणं करोति ॥ २१ ॥ **टीका**—अथ लोहमारणमुच्यते । तस्याऽऽदौ साधनभेदेनोत्तममध्यमाधमत्वान्याह—मारणमिति । सुशुद्धस्य जीर्णग्रासस्य बद्धस्य पारदस्य भस्मना निरुत्थितेन लोहानां स्वर्णरूप्यताम्रायसां यन्मारणं तच्छ्रेष्ठमुच्यते । तन्मारितानां लोहानां श्रेष्ठत्वमित्यर्थः । तेनाऽऽत्मीययोगवाहिपारदगुणानां तत्राभिव्याप्तेरिति भावः । मूलीभिश्चाण्डालीप्रमुखानां पञ्चपञ्चाशत्संख्याकानां रसार्णवोक्तानामौषधीनां मूलिकाभिस्तथाऽन्यौषधीनामपि मूलिकाभिर्मारणं मध्यममुक्तम् । अभिव्याप्तायास्तच्छक्तेरल्पकालावस्थायित्वादल्पत्वाच्चेति भावः । मूलीत्युपलक्षणम् । तेन पत्रपुष्पफलत्वग्रसादिसंग्रहः । गन्धकमनःशिलाहरितालमूत्रादिभिर्मारणं त्वधममुक्तम् । तेषां प्रायः क्षाररूपत्वेन लोहशक्तेरपचयादिति भावः । तथाऽरिलोहेनापि लोहस्य मारणं दुर्गुणप्रदं भवति । अरिलोहमित्यत्रारिभूतं लोहमिति कर्मधारयः । लोहानां मिथोऽरित्वात्संसृष्टारिमार्ययोर्लोहयोर्मध्येऽग्नियोगेन गाराकोष्ठीस्थमूषायां धमनेन प्रथमं यन्नश्यति ततोऽवशिष्टं चिरकालस्थायि च भवेत्तत्तस्यारिरिति विद्यात् । अरिभूतं च लोहं प्रायो मार्यव्यापकमेव भवति । उक्तकोष्ठ्यां ताम्रवङ्गयोर्धमनेन घोषाकृष्टाख्यं ताम्रमवशिष्यते । अतस्ताम्रवङ्गारितेन तालनिर्गुण्ड्यादिसहायेन वङ्गमारणं दुर्गुणप्रदं भवेत् । एवमेव नगारिताम्रमेव बोध्यम् । तच्च हिङ्गुलत्रिफलादिसहायेन कोष्ठ्यामुक्तायां धमानेन लोहमारकं

भवति । तच्च ताम्रं माक्षिकगन्धकान्यतरसहायेन रजतेन सह ध्मानात्प्रथमं नश्यति रजतं चोत्तरकाले तिष्ठति । अतो रजतं ताम्रारि । तदपि स्वर्णमाक्षिकसहायेन स्वर्णेन सह धमनात्प्रथमं नश्यतीत्यतः स्वर्णं रजतारीति । योगवाहिनो हि लोहा मारकयोगेनात्यग्नियोगेन च मारकाः । तद्विरहेण मित्रभूता इति भावः । अथ स्वर्णभस्मविधिमाह । कण्टकवेध्यानि पत्तलीकृतानि स्वर्णपत्राणि कृत्वा मातुलुङ्गरसमर्दितेन पारदभस्मना विलिप्य संशोष्य शरावसंपुटितं कृत्वा त्रिंशद्वन्योपलैर्लघुपुटं दद्यात् । प्रतिपुटं विलिप्यैवं दशपुटैः स्वर्णं भस्मी भवति । पुनः स्वर्णस्य भस्मविध्यन्तरमाह । गोस्तनमूषायां स्वर्णे धमनेन द्रुते सति तादृक्स्वर्णाख्यलोहस्य सममानं पारदभस्मसमेन हिङ्गुलेन सहैकत्र कृत्वा मातुलुङ्गरसेन विचूर्ण्य संमर्द्य संशोष्य संपुटीकृत्य पूर्ववल्लघुपुटं दद्यात् । एवं प्रतिपुटं [मातु]लुङ्गरससंमर्दितसहिङ्गुलपारदभस्म द्रुते स्वर्णे क्षिप्त्वा द्वादशपुटैः स्वर्णभस्म कुङ्कुमवर्णं भवेत् । विध्यन्तरमाह । हेम्नः पत्रे जम्बीराद्यम्लेन केनचित्संमर्दितं पारदभस्म चतुर्थांशमितं विलिप्य संशोष्य संपुटीकृत्याष्टभिर्लघुपुटैर्हेमभस्म भवेदिति । स्वर्णद्रुतिविधिमाह—मण्डूकास्थीति । वसाऽपि मण्डूकस्यैव ग्राह्या । टङ्कः टङ्कणः । हयलालाऽश्वलाला । इन्द्रगोपका वार्षिका रक्तवर्णाः कीटविशेषाः । मृगकीट इति ख्याताः । तैः कृतो द्रुतस्वर्णे प्रतीवापः । तेन कनकं द्रुतमेव तिष्ठति । द्रुतेर्विध्यन्तरमाह—चूर्णमिति । सुरेन्द्रगोपाः कीटाः प्रागुक्ता एव । स्वर्णभस्मप्रयोगमाह—एतदिति । गरमल्पवीर्यं विषम् । अत्र क्षेपकं श्लोकं केचित्पठन्ति—बलं चेति । रोगव्रजं रोगसमूहम् ॥ २१ ॥

**मूलम्**—सहजं खनि० सर्वरोगापहारकम् ॥ २९ ॥ **टीका**—अथ क्रमप्राप्तं रजतं वर्णयितुकामस्तस्य त्रिविधभेदानाह—सहजमिति । तेषां श्रेष्ठत्वतारतम्यमाह—पूर्वं पूर्वमिति । यद्यस्मात्पूर्वं तत्तस्माद्गुणैरुत्तरं श्रेष्ठं तेन सहजं सर्वोत्तमम् । तदपेक्षया हीनगुणं खनिजम् । ततोऽपि हीनगुणं कृत्रिममिति भावः । तेषां स्वरूपं वर्णयति—कैलासाद्रिसमुद्भूतमिति । हिमाचलादीति । आदिशब्देन विन्ध्यसह्यादिपर्वतग्रहणम् । तेषां कूटेषु शिखरेषु । श्रीरामपादुकान्यस्तामिति । इयमाख्यायिका पुराणादौ द्रष्टव्या । तस्य नामान्तरमाह—पादरूप्यमिति । धातुवादोक्तमपि कृत्रिमं बोध्यम् । स्फोटरहितं शकलमोचनरहितम् । स्फुटं यत्स्फुटति शकलं विमुञ्चति घाते सति तत्स्फुटम् । स्थूलाङ्गं शिथिलावयवम् । रूप्यगुणानाह—रूप्यमिति ॥ २९ ॥

**मूलम्**—तैले तक्रे० भस्मसाज्जायतेतराम् ॥ ३८ ॥ **टीका**—संप्रति सर्वलोहानां साधारणीं शुद्धिमाह—तैल इति । तैले तिलतैले । गोजनितं तक्रं मूत्रं च ग्राह्यम् । आरनालं काञ्जिकम् । कुलत्थजः कुलत्थक्वाथः । संप्रत्यशुद्धस्यामृतस्य च दोषानाह—आयुरिति । तच्छुद्धिमाह—नागेनेति । मूषायां रजतं

धमनेन प्रताप्य चतुर्थांशटङ्कणं दत्त्वा पुनर्धमनेन रजते द्रुते सति चतुर्थांशं नागमल्पाल्पमावपेत् । ततस्तप्ततप्तमेव कङ्गुणीतैले निक्षिपेत् । एवं त्रिवारकरणेन तारं शुध्यति । पुनः शुध्यन्तरविधिमाह—खर्पर इति । खर्परे मृत्पात्रखण्डे । चूर्णं सुधा । अथ रूप्यभस्मविधिमाह—लकुचेति । तारपत्रं लकुचरसेन संमर्दितेन चतुर्थांशपारदभस्मना विलिप्य शराव ऊर्ध्वाधो गन्धकं समभागं दत्त्वा संपुटीकृत्य तां मूषां वालुकागूढसर्वाङ्गां कृत्वा वालुकायन्त्रे पाचयेदेकदिनपर्यन्तम् । तत उद्धृतं पिष्टीरूपं तं चतुर्थांशं हरितालं दत्त्वैकीकृत्याम्लेन जम्बीरादिजेन मर्दितां कृत्वा त्रिंशद्वन्योपलैर्लघुपुटे पचेत् । एवं द्वादशपुटैस्तारं भस्मी भवति । भस्मविध्यन्तरमाह—माक्षीकेति । माक्षीकमत्र प्रतिपुटं समभागं देयम् । तत्सहितं तारं मातुलुङ्गाम्बुरसेन सह संमर्द्य संपुटीकृत्य लघुपुटे पचेत् । इति त्रिंशत्पुटैस्तारं भस्मी भवति ॥ ३८ ॥

**मूलम्**—भाव्यं ताप्यं० पित्तरोगानशेषान् ॥ ४२ ॥ **टीका**—पुनः भस्मविध्यन्तरमाह—भाव्यमिति । निरुत्थं भस्म जायते । पञ्चमित्रसंस्कारेणापि न पूर्वावस्थां रजतत्वरूपां प्राप्नोतीत्यर्थः । तारपत्रमिति । तारपत्रस्य चतुर्थांशं हरितालं जम्बीरद्रवेण संमर्द्य तेन तारपत्राणि लिप्त्वा शोषयेत् । तोधयेत् (?) । संपुटितं कुयात् । ततो लघुपुटे पचेत् । एवं चतुर्दशपुटैर्निरुत्थं भस्म जायते । अथ स्वर्णतारसाधारणद्रुतिविधिमाह—सप्तधेति । स्वर्णतारयोः । स्वर्णस्य तारस्य चेत्यर्थः । अथ रजतभस्मप्रयोगमाह—भस्मीभूतमिति । व्योमभानू व्योमभस्माभ्रकभस्म ताम्रभस्म च । सवरं वरा त्रिफला तत्सहितम् ॥ ४३ ॥

**मूलम्**—म्लेच्छं नेपालकं० सप्तवारेण जायते ॥ ५१ ॥ **टीका**—अथ क्रमप्राप्तं ताम्रं वर्णयति—म्लेच्छमिति । ताम्रस्य खनिद्वयं वर्तते । तत्रैकखनिस्थं नेपालमिति ख्यातम् । नेपाली कुनटी । तत्समरक्तवर्णत्वात् । खनेर्नेपालदेशसंनिहितत्वाद्वा नेपालेति संज्ञा । अथवा रूढसंज्ञेयम् । ततोऽन्यखनिस्थं तु म्लेच्छमित्यभिधीयते । यथा म्लेच्छधातुरस्पष्टशब्दे तथा स्पष्टशब्दरक्तवर्णत्वान्म्लेच्छमिति संज्ञा । म्लेच्छं लक्षयति—सितकृष्णेति । नेपालं लक्षयति—सुस्निग्धमिति । घनघातेति । घनः शस्त्रविशेषः । तेनाऽऽघातेऽपि यन्न भिद्यत इत्यर्थः । ताम्रगुणानाह—ताम्रमिति । पाके मधुरम् । अथाशुद्धताम्रदोषानाह—अशुद्धमिति । न मृतममारितं तु कुष्ठशूलकृत् । तस्माच्छोध्यं मार्यं चेति भावः । पुनरशुद्धस्य तस्य दोषकथनपूर्वकं शुद्धस्य गुणानाह—उत्क्लेदेति । उत्क्लेद उपस्थितवमनस्याऽऽभासः । भेदो विरेचनम् । तच्छुद्धिमाह—ताम्रमिति । ताम्रपत्रं क्षारोदकेऽम्लरसे च त्रिदिनं सप्तदिनं वा भावितं कार्यम् । ततो मूषायां प्रक्षिप्य खदिराङ्गारैर्ध्मानेन च द्रुते सति तत्क्षणं गैरिकं तत्राऽऽवाप्य महिषीतक्रे निक्षिपेत् । एवं सप्तवारं कार्यम् । तथा महिषीछगणेऽपि च सप्तवारनिक्षेपेणोत्क्लेदादिपञ्चदोषरहितं स्यात् ॥ ५१ ॥

**मूलम्**—ताम्रनिर्मलपत्राणि० तत्सोमनाथाभिधम् ॥ ६४ ॥ **टीका**—पुनः शोधनान्तरमाह—ताम्रनिर्मलेति । निम्बवम्बुकल्कितसैन्धवेन लिप्तताम्रपत्राणि ध्मानेनाग्निवर्णानि कृत्वा सौवीरे काञ्जिकविशेषे क्षिपेत् । अथवा पूर्ववल्लेपध्मानपूर्वकं तान्यग्निवर्णानि कृत्वा निर्गुण्डीरसे क्षिपेत् । इत्यष्टवारकरणेनापि ताम्रं निर्दोषं भवति । ताम्रस्थकलङ्ककालिमनाशार्थमुवाच नित्यनाथः—'अथोत्तमस्य ताम्रस्य नागशुद्धस्य कारयेत् । निर्गुण्डिकारसेनैव पश्चाशद्वारढालनम् । कूष्माण्डस्वरसेनैव सप्तवारं तु ढालनम् । निशायुक्तेन तक्रेण सप्तवारं तु ढालनम् । एवं ताम्रं द्रुतं ढाल्यं कालिमारहितं भवेदिति' । अथवा दोलायन्त्रे गोमूत्रेण यामपर्यन्तं दृढाग्निना तेषां पचनेनापि तानि शुध्यन्ति । यदा तानि कलङ्करहितानि स्युस्तदा शुद्धानीति विद्यात् । अथ ताम्रमारणविधिमाह—जम्बीरेति । अत्र पुटानि गजपुटानि । अयं पाठो रसमञ्जरीकारस्यापि संमतः । मारितताम्रस्य निर्दोषकरणविधिं रसरत्नाकरोक्तमाह—अथवेति । सूरणस्य वन्यसूरणस्य । रुद्ध्वा । सूरणचक्रिकयैव रुद्ध्वा तं सूरणं बहिर्वस्त्रमृदा लेपयेत् । ततः संशोष्य गजपुटे पचेत् । इत्ययममृतीकरणाख्यो योगः प्रसिद्धः । अथ स्थालीयन्त्रेण ताम्रभस्मविधिमाह—ताम्रपत्राणीति । दोलायन्त्रे गोमूत्रपक्वानि ताम्रपत्राणि कृत्वा तानि भाण्डे स्थाल्यां क्षिप्त्वा तेषामधस्तादुपरिष्टाच्च समभागपारदेन सह संमर्दितं ताम्राद्द्विगुणं गन्धकं दद्यात् । कज्जलीसंवेष्टितस्य ताम्रपत्रस्याभितः समन्ततोऽम्लपर्णीं प्रपिष्य कल्कीकृत्य देहि दद्यात्समन्ततः । तत्कल्केन ताम्रपत्रमाच्छादयेदित्यर्थः । तद्भाण्डं स्थालीं शरावेण सम्यग्रुद्ध्वाऽधस्तादग्निं तीक्ष्णं प्रहरपर्यन्तं दद्यात् । अम्लपर्णी, अतिक्षुद्रवल्ली साऽऽर्द्रभूमौ प्रसरणशीला । अम्लरसा प्रतिशाखं त्रिचतुःसूक्ष्मदला सर्वकालं दृश्यते । अथ सोमनाथाख्यं ताम्रभस्माऽऽह—शुल्बतुल्येनेति । तत्समेन सूतसमेन बलिना गन्धकेन शुल्बार्धांशेन हरितालेन मनःशिलया चेति सर्वं यथोक्तभागं गृहीत्वाऽञ्जनसमानवर्णां संमर्दनेन कज्जलीं विधाय तां च यन्त्राध्यायस्थगर्भयन्त्रमूषोदरे क्षिप्त्वा तदुपरि ताम्रपत्राणि च क्षिप्त्वा पिधाय संधिरोधं कृत्वा करीषतुषाग्निना यामपर्यन्तं पाचयेत् । भूम्युदरे हस्तमात्रां गर्तां विधाय करीषं तुषं वाऽर्धमध उपरिष्टाच्च भेषजगर्भमूषासंपुटस्य दत्त्वा वायुनिर्गमनार्थं किंचिच्छिद्रं विधाय मृत्तिकया सर्वां गर्तां चतुरङ्गुलस्थूलं भूमिसममाच्छाद्य पुटं दीयते यत्र तद्गर्भयन्त्रमिति विद्यात् । मूलामयमर्शः ॥ ६४ ॥

**मूलम्**—सूताद्द्विगुणितं० विशोध्य मारयेत् ॥ ७४ ॥ **टीका**—सूताद्द्विगुणितमिति । पारदाद्द्विगुणितमतिसूक्ष्मताम्रपत्रं पारदसमभागं बलिं गन्धकमित्येतत्त्रयं कुमारिरसालोडितं कृत्वा संमर्द्य गोलकं कृत्वा लवणयन्त्रभाण्डमध्येऽन्तस्तले तं गोलकं निक्षिप्य न्युब्जेन लघुशरावेण तं चाऽऽच्छाद्य तदूर्ध्वं लवणेन भाण्डं मुखपर्यन्त-

मापूर्य मुखे शरावं पिधानार्थं दत्त्वाऽधस्तात्तीक्ष्णं वह्निं यामचतुष्टयपर्यन्तं कुर्यात् । अथ क्रमप्राप्तमयो वर्णयितुमादौ तस्य भेदत्रयमाह--मुण्डमिति । तत्र मुण्डस्य भेदत्रयमाह—मृद्विति । द्रुतद्रावं शीघ्रद्रावम् । अविस्फोटं प्रताप्याऽऽहनने सत्यपि यन्न विस्फुटति न खण्डशो भिद्यते तन्मृदुमुण्डमुच्यते । यत्तु प्रताप्याऽऽहननेऽपि शीघ्रं न प्रसरति किंतु दुःखात्कष्टेन तत्कुण्ठमिति प्रोक्तम् । कडार-मित्यस्य स्थाने कुठारमित्यपि पाठः । मुण्डगुणानाह--मुण्डं परामिति । अथाशु-द्धस्य लोहस्य सर्वविधस्य मारणे तदुत्तरं भक्षणे दोषानाह--अशुद्धलोहमिति । यदशुद्धलोहं तस्य निषेवणान्न हितं भवति । नाऽऽयुर्नापि बलं भवेत् । परं कान्तिविनाश्यपि निश्चितं भवेत् ॥ ७४ ॥

**मूलम्**—खरं सारं च० एकैकस्माच्छतोत्तरम् ॥ ८३ ॥ **टीका**—सर्वलोहानामे-कविधविधिनैव शोधनं तथैव प्रायो मारणं च वक्ष्यति । अतः संप्रति मुण्डस्य भेदानेव केवलानुक्त्वा तथैव तीक्ष्णकान्तयोर्भेदानाह—खरमिति । ग्रन्थान्तरे पाठभेदो दृश्यते । तद्यथा—' खरसारं च हृन्नालं तारावर्तं बिडं तथा । काललोहं गजाख्यं च षड्विधं तीक्ष्णमुच्यते ' इति । यत्परुषं कठोरं पोगरोन्मुक्तं पोगरमलकवत्कुटि लरेखास्ताभिर्मुक्तं तद्रहितमित्यर्थः । यस्य नमनार्थं यत्ने कृते भङ्गुरं भवति तत्ख-रलोहमिति प्रोक्तम् । पोगरशब्दोऽत्राऽऽगतः । स चाप्रसिद्धार्थः । अतो बोधार्थं तत्पर्यायानाह—'अङ्गच्छाया च वङ्गं चिकुरं च इति पोगरस्याभिधात्रयं नामत्रयमस्ति । एवं च नामान्येतानि विशिष्टाकारतेजस इत्यर्थः । वङ्गस्येव रेखानां श्वेतच्छायात्वाद्व-ङ्गमिति संज्ञा । कान्तीनां चिकुराकारत्वात्केशाकारत्वाच्चिकुरमित्यपि नाम । यदु-क्तमेव खरलोहं तद्यदि लोहाद्भङ्गुरं लोहमयघनघातेन भङ्गुरं भवति परंतु पोगरं पोगरविशिष्टं दृश्येत तर्हि तत्खरलोहमपि परमुत्तमं मतम् । यल्लोहवेगाभं गुरुधारं खड्गादिरूपं कृतं पश्चाद्धन्तुं सवेगमुपयुक्तं चेदप्यभङ्गशीलधार भवेत्सार-लोहमुक्तम् । क्रमस्य विवक्षाधीनत्वात् । अतः परं तारावट्टमेव लक्षयति । यत्पो-गराभासकं पाण्डुभूमिजं च भवेत्तत्तारं तारावट्टमीरितम् । यल्लोहं कृष्णमिश्रपाण्डु-देहमेरण्डबीजसमानप्रभूतपोगरं तच्छेदेऽतिपरुषं न सुलभं किंतु महता यत्नेनैव च्छेत्तुं शक्यते तद्धृन्नालमिति कथ्यते । अभङ्गात्मधारं भङ्गरहितस्वधारम् । खर-लोहगुणानाह—रूक्षमिति । इतरभेदान्मन्दगुणानाह—खरलोहादिति । अत एव गुणा उत्तरोत्तरेषु सारलोहादिभेदेषु क्रमेण शतगुणवृद्ध्या वर्तन्त इति भावः । उत्तमतीक्ष्ण-लोहस्य लक्षणं योगतरङ्गिण्यां त्रिमल्लभट्टेनोक्तम्—' पत्रेऽङ्गं दृश्यते लौहे तीक्ष्ण-लोहं तदुत्तमम् । कासीसामलकल्काक्ते लोहेऽङ्गं दृश्यते सुखम् " इति ॥ ८३ ॥

**मूलम्**—भ्रामकं चुम्बकं० योगेन सर्वार्तिनुत् ॥ ९५ ॥ **टीका**—अथ क्रम-प्राप्तमयसस्तृतीयभेदं कान्तं वर्णयितुकामः प्रथमं तद्भेदानाह—भ्रामकमिति । तस्य चोक्तो व्यस्तः समस्तो वा भेदोऽयं जारणायां सकलधातुभक्षणार्थं पारदस्य मुख-

रूपो भवतीत्याह—एकद्वित्रीति । केवलभ्रामकसत्त्वस्य प्रथमं यथाविधिजारणेनापि पारदस्य मुखं भवति । ततः पारदः सर्वांल्लोहादीन्ग्रसति । अत एकभेदोऽपि कश्चित्पारदमुखं भवति । यस्य तदेकमुखम् । भ्रामकचुम्बकयोः सत्त्वद्वयस्यैकीकृतस्य यथाविधिजारणेन पारदमुखं कृतं चेत्संयुक्तभेदद्वयविशिष्टं तत्कान्तं द्विमुखमुच्यते । एवमेवार्थस्त्रिमुखादौ बोध्यः । विजातीयद्रव्यग्रासान्तरसहितमप्येतत् प्रथमं जारितं चेन्मुखं भवतीत्यतः सर्वतोमुखमित्युक्तम् । सजातीयविजातीयव्यस्तसमस्तं भेदविशिष्टमेतन्मुखं भवतीत्यर्थः । भ्रामकत्वचुम्बकत्वादिधर्मा निसर्गत एव एकत्र कान्ते संभूय निवसन्ति चेत्तस्य सर्वोत्तमत्वमेव बोध्यम् । उक्तं च ग्रन्थान्तरे—'अभावेऽभ्रकसत्त्वस्य कान्तसत्त्वं प्रदापयेत् । कान्तसत्त्वस्य चाभावे तीक्ष्णलोहं प्रजारयेत्' इति । अत्रापि त्रिंशाध्याये तथैवाऽऽचार्यो वक्ष्यति च । पीतादिभेदेन प्रत्येकं तावत्त्रिविधम् । तेषां चाधिष्ठातृदेवता आह—क्रमेणेति । अथ भेदनिबन्धनानधममध्यमोत्तमत्वानाह—भ्रामकमिति । भ्रामकादिलक्षणान्याह—भ्रामयेदिति । केचित्तु यत्कान्तमेकदिगभिमुखस्वावयवेनान्यतमं भ्रामणचुम्बनादि स्वीयं कर्म करोति तदेकमुखं द्विदिगभिमुखस्वावयवाभ्यां भ्रामणाद्यन्यतमं कार्यं करोति तद्द्विमुखम् । एवमेव त्रिमुखचतुर्मुखाद्यर्थो बोध्य इति वदन्ति । तत्र मुखशब्दस्वारस्यं न संभवतीत्यतोऽस्माभिरन्यादृशोऽर्थ उदाहृतः । परंतु तादृशोऽर्थोऽपि मम संमत एवेति विद्यात् । संप्रति दिव्यं कान्तस्य सामर्थ्यं वर्णयति—मदोन्मत्तेति । अत एव रसार्णवेऽप्युदाहृतम्—'न सूतेन विना कान्तं न सूतः कान्तवर्जितः । कान्तसूतसमायोगात्प्रयोगो देहधारकः' इति । संप्रति तस्याऽऽहरणविधिमाह । क्षेत्रं कान्तखनिदेशं राजहस्तपर्यन्तं खात्वा तदधोभागस्थं कान्तपाषाणमुद्धृत्य तापगालनयन्त्रादिसाहाय्येन प्रयत्नतः कान्तं गृह्णीयात् । मारुतातपसंबन्धयोग्यं भूम्युपरिस्थं कान्तपाषाणं वर्जयेत् । रसार्णवे चोक्तम्—'बहिःस्थितं त्वयस्कान्तं छागरक्तेन भावयेत् । छागरक्तप्रलिप्तेन वाससा परिवेष्टयेत् । छागचर्म परीवेष्ट्य विन्यसेत्पूर्ववत्क्षितौ । उद्धृतं सप्तभिर्मासैस्तोयकुम्भे विनिक्षिपेत् । रक्तपुष्पैः सदा पूज्यं रक्तगन्धानुलेपनैः । पूजितं मद्यमांसैश्च योज्यं रसरसायने' इति । खनित आहृत्य गृहादौ बहुवर्षोषितमिति बहिःस्थितशब्दार्थः । कान्तखनिप्रदेशो गवालियराख्यस्य माण्डलिकराजनगरस्य नातिदूरदेशे वर्तते । तत्रत्याः क्षुद्रजनाः पाषाणानाहृत्य तस्मिन्नगर आपणे विक्रीणन्ति । मकनातीस इति लौकिकनाम्ना तत्र प्रसिद्धमिदं द्रव्यम् । तस्य हि मलमूत्रक्षारादिसंबन्धसंभवेन विकृतशक्तित्वादिति भावः । अथ साधारणं कान्तस्य लक्षणमाह—पात्र इति । मृन्मये पात्रे संभृतजले पातितस्तैलबिन्दुर्न प्रसरति । तथा लिप्तं हिङ्गुगन्धं त्यजति । लिप्तं निम्बपत्रकल्कास्तिक्ततां त्यजति । इदानीं कान्तलोहगुणानाह—कान्तायेति । सर्वरोगोच्छेदे योगबाह्ये तदपरं किमपि द्रव्यं नास्तीत्यर्थः ॥ ९५ ॥

**मूलम्**—सम्यगौषध० मखिलामये योज्यम् ॥ १०६ ॥ **टीका**—अथ सुसिद्धं लोहं हि रसरसायनयोः सर्वत्राधिकारिनिरपायं भूरिचिरस्थायिफलप्रदमल्पमात्रतया सुभक्ष्यं प्रमादे सत्यपि सहसा न मारकं चेति तत्करणस्योत्तमत्वमाह—सम्यगिति । सिद्धविषस्य प्रमादे सहसा मारकत्वान्महता यत्नेन सुशुद्ध्या द्वादशदोषरहितस्यापि रसस्य जारितमारितस्य शीलनावसरे प्रमादेन स्त्रीसंगतपुरुषस्य सद्यो मरणभयं दुष्प्राप्यानामोषधीनां च भक्षणार्हबहुमात्रत्वाच्चिरस्थायिगुणाभावाच्च विषरसौषधीकल्पेभ्योऽपि लोहकल्प एव साधकाय प्रशस्ततरः । अत एव वक्ष्यति- 'जारितादपि सूतेन्द्राल्लोहानामधिको गुणः' इति । तस्मात्किं कर्तव्यं साधकेन तदाह—तस्मादिति । अयं विषयो लोहाख्यसुवर्णवर्णनोपक्रम एव वक्तव्यः । परंतु सुवर्णस्य बहुमूल्यत्वेन तत्कल्पोऽपि साधकस्य प्रायो दुष्करः स्यादित्यभिप्रायेणायःपर्यन्तानुधावनम् । तस्य प्रमाणमर्यादामल्पप्रभूतविषयामाह—नायः पञ्चेदिति । पञ्चपलाद्धीनमात्रं तापकण्डनादिक्रियायां क्षीयेत ततः सुसिद्धिपर्यन्तमर्धक्षये तदधिकक्षये वा कृतकष्टस्य साधकस्य किंचिदेव फललाभः । त्रयोदशपलादधिकमात्रस्यायसस्तु मारणे वक्ष्यमाणप्रमाणमितखल्वे मर्दनं दुष्करम् । कटाहे दर्व्या चालनमविलम्बेन सेचननिवापादिपरिगणितपुटमानपाककालादि च सर्वमपर्याप्तं भवेत् । लोहं च तेन सुसिद्धमपि न स्यात् । हीनाधिकपाकं तु लोहं नेष्टमिति दशमाध्याये वक्ष्यति । तस्मादधिकलोहविषयिणी सिसाधयिषा चेत्साधकेनाऽऽरम्भात्प्रभृति लोहपाकविधेर्द्वितीयावृत्तिरेव कार्येति भावः । तत्र सक्रमं समन्त्रपाठं लोहानां मारणं तज्जातप्रत्यक्षं फलं चाऽऽह—आदाविति । ॐ अमृतोद्भवाय स्वाहेति मन्त्रः । मन्त्रार्थस्याचिन्त्यशक्तित्वात्तदर्थवर्णनमुपेक्षितम् । मन्त्रपूर्वकमारणक्रियया मुण्डापेक्षया तीक्ष्णं लक्षगुणेनाधिकम् । तेषामवान्तरभेदेष्वप्युत्तरोत्तरं गुणवृद्ध्यन्वयो बोध्यः । कान्तं तु लोहानां मध्ये स्वयमेव कोटिगुणमस्त्येव । तदप्येवंरीत्या मारितं चेदधिकगुणं भवेत् । लोहशुद्धिमाह—शशेति । क्षतजं रक्तम् । तेन लिप्तं ततोऽग्नौ परितापितमित्यस्याग्रे ततस्त्रिफलवारिणा सिक्तं कुर्यादिति वाक्यशेषः । एवं त्रिवारकरणे मुण्डादि शुध्यति । सर्वदोषान्गिरिजजलजप्राणिमललालसंश्लेषजमृत्तिकासंश्लेषजादिदोषानात्मीयदोषांश्च विमुञ्चति । शुद्ध्यन्तरमाह—क्वाथमिति । पुनः शुद्धियोगान्तरमाह—सामुद्रेति । सजलतल्लवणस्य कल्केन लिप्तं पश्चात्तप्तं लोहपत्रं त्रिफलाक्वाथे निक्षिपेत् । एवं चिञ्चाफलक्वाथे निर्वापेणापि लोहं शुध्यति । अथवा जलस्थाने गोमूत्रं दत्त्वा त्रिफलां दत्त्वा लोहं च दत्त्वा पचेत् । तादृशं क्वथितं लोहं दोषमुदस्यति त्यजति । अत्र वक्ष्यमाणलोहभस्मविधौ भानुपाको नोक्तः । रसेन्द्रसारसंग्रहे तु स एव प्राक्कर्तव्यतयोक्तः । अन्यदपि तत्र विधिविशेषः । तथा च तद्ग्रन्थः—'भानुपाकात्तथा स्थालीपाकाच्च पुटपाकतः । निरुत्थो जायते लोहो यथोक्तफलदो भवेत्' इति । भानुपाकेऽपि तादृगेव लोहं प्रयोजयेत् । यद्रेतितं

कानसाख्यशस्त्रविशेषेण चूर्णीकृतमाघातेन वा ततस्त्रैफलादेकेन मुहुर्गालयित्वा किट्टादिद्रव्यान्तरेण वियुक्तं स्यात् । तस्य च गालनक्षालनार्थं त्रिफलाक्काथमानमपि तत्रैव स्पष्टीकृतम्—' क्षालने भानुपाके तु लोहतुल्यं फलत्रिकम् । जलं द्विगुणितं दत्त्वा चतुर्भागावशेषितम् । एवमुक्तफलक्काथजलं दत्त्वा पुनः पुनः ॥ शोषयेत्सूर्यतेजोभिर्निरन्तरमहत्रयम् । इत्थमादित्यपाकान्ते स्थाल्यां पाकमुपाचरेत् ॥ स्थालीपाके फलं ग्राह्यमयसस्त्रिगुणीकृतम् । तस्य षोडाशिकं तोयमष्टभागावशेषितम् । मृदुमध्यकठोराणामन्येषामयसा समम् । क्वथनीयं समादाय चतुरष्टौ च षोडशम् । गुणानां स्थाप्यते तोयं शोषयेदयसा समम् । स्वरसस्यापि लोहेन स्थालीपाके समानता । स्थाल्यां क्काथादिकं दत्त्वा यथाविधिविनिर्मितम् । पाकेन क्षीयते यस्मात्स्थालीपाक इति स्मृतः ' इत्युक्त्वा स्थालीपाकार्थं त्रिफलाक्काथसाध्यपाकोत्तं( क्तं ) हस्तिकर्णादिगणं ततः सामान्यपुटपाकोपयोगित्रिफलादिगणं पृथग्दोषविशेषवारणोपयोगिगणानेरण्डाकिरातशृङ्गवेराद्याख्यान्संसर्गवारणोपयोगिशृङ्गवेरगोक्षुरपटोलकिंशुकादीन् , तथा वाजीकरणरसायनार्थं शतावरीविदार्यादिगणावपि स कथयामास । तदेतत्सर्वं तद्ग्रन्थादेवावगन्तव्यम् । अथायोभस्मविधिमाह—रेतितामिति । कानसाख्यशस्त्रविशेषेण घर्षणं कृत्वा सूक्ष्मकणरूपं कृतमयोलोहं खर्परे खण्डितमुखे मृतत्पात्रविशेषे क्षिप्त्वा गोघृतमग्नं तन्मुहुर्मुहुश्चालयित्वोपरिक्षिप्ततृणदाहपर्यन्तं पचेत्ततः पेषयेच्छिलापट्टाख्ये दृषत्युपलेन संचूर्णयेत् । इति पेषणपूर्वकं पाचनं पञ्चवारं कृत्वा तत आमलकफलरसेन संमर्द्य गजपुटं दद्यात् । इति पुटचतुष्टयेन, अथवैवमेव त्रिफलाक्काथमर्दनपूर्वकगजपुटचतुष्टयेन वा पक्कं लौहं भस्म वारितरं भवेत् । तस्य च भस्मनः प्रयोगार्हत्वसंपादकं भर्जनमाह । लौहं तद्भस्म गोघृतेन संमर्द्याजामूत्रे लौहकटाहस्थ उपरिक्षिप्ततृणदाहपर्यन्तं भर्जनं कार्यम् । एवमञ्जनपूर्वकभर्जनं सप्तवारं कुर्यात् । ततस्तथैव हरिद्रास्वरस आमलकीफलस्वरसे च पृथक्सप्तवारं भर्जितं लोहभस्मानुपानविशेषेण सर्वरोगघ्नं भवेत् ॥ १०६ ॥

**मूलम्**—तीक्ष्णलोहस्य पत्रा० दत्त्वा दत्त्वैव हिङ्गुलम् ॥ ११४ ॥ **टीका**—उक्तप्रकारेण साधारणो यो भस्मविधिरुक्तः संप्रति ततोऽपि प्रबलं तीक्ष्णलोहभस्मविधिं वक्तुकामः प्रथमं तच्चूर्णकरणमाह—तीक्ष्णलोहस्येति । लोहपारया स्थूललोहदण्डेन कृतं सूक्ष्मं तीक्ष्णलोहचूर्णं पारदगन्धककज्जल्या समभागया शरावसंपुट ऊर्ध्वमधश्च दत्त्वा संपुटितं तत्संशोष्य गजपुटे पचेत् । प्रतिपुटं शिलापट्टेऽतिपेषणं ततः कज्जलीसंवरणं च कार्यम् । रससिन्धुस्थं कान्तगुणपाठमाह—कान्ताय इति । नापरमेतदेव मनुजानां लभ्यममृतमित्यर्थः । तस्य मारणविधिस्तु पूर्वोक्त एव बोध्यः । अत एव पार्थक्येन न तदुक्तिः । अथ प्रकारान्तरेण सर्वलोहस्य मारणविधिमाह—हिङ्गुलस्येति । पच्यात्, दशवारमिति शेषः । प्रतिपुटं समानभागहिङ्गुलदानं

कार्यम् । ततस्त्रिफलाकषायेण दशपुटेषु तथा जम्बीररसेन, आरनालेन च पृथग्दशसु मर्दनपूर्वकपुटेषु प्रतिपुटं विंशेनांशेन हिङ्गुलदानं कार्यम् । वाशब्दः समुच्चये । तदुत्तरं तद्द्रवैः पृथङ्नारीस्तन्यादिद्रवैः क्रमेण तद्भस्म खर्परे लोहकटाहे वोपरिक्षिप्ततृणदाहपर्यन्तं पाचयेत् ॥ ११४ ॥

**मूलम्**—अथ पूर्वोदितं तीक्ष्णं० मवश्यं म्रियते ह्ययः ॥ १२३ ॥ **टीका**—संप्रति तीक्ष्णभस्मनः पूर्वोक्तस्य रक्तवर्णोत्पादकं विधिमाह—अथेति । वसुभल्लकः श्वेतपुनर्नवा । वासाऽटरूषः । तयोः पृथक्पत्ररसेन प्रतिपुटं तीक्ष्णलोहभस्म संमर्द्य त्रिंशद्वारं पुटेत् । तेन रक्तवर्णं भस्म जायते । अथवा तद्भस्म त्रिफलाजलेन पिष्ट्वा तत ओदनमिश्रं कृत्वा संमर्द्य पिण्डिकां विधाय संशोष्य संपुटितं कृत्वा गजपुटे पचेत् । इति पञ्चपुटैरपि भस्म रक्तवर्णं भवेत् । अथ त्रिविधलोहस्य मारणविध्यन्तरमाह—मत्स्याक्षीति । लकुचरसेन सह संमर्द्य कल्कीकृतैर्मत्स्याक्ष्यादिभिः सर्वं लोहं विलिप्य मत्स्याक्षीकल्केनैव लेपितं वेष्टितं कृत्वा सायंकाले कोष्ठ्यां संस्थाप्य भस्त्राभ्यां धमेत् । त्रिशूलीनिर्गमनपर्यन्तं ततस्तप्ततप्तं तल्लोहमुद्धृत्य गोमूत्रपक्वत्रिफलारसे क्षिपेत् । तत उद्धृत्य कुट्टयेल्लोहपारया । तेन विधिना मृतं लोहं पुनरपि पूर्ववद्ध्मात्वा त्रिफलारसे क्षिपेत् । ततस्ताडयेच्च । एवंविधिना सर्वं लोहं खण्डयित्वा मारयेत् । ततो गन्धकं लोहसमभागं गुडं च त्रिफलाकषायेण संमर्द्य प्रतिपुटं तेन लोहभस्म मिश्रयित्वा गजपुटे पचेत् । एवं त्रिंशत्पुटैर्लोहभस्म निरुत्थं जायते । मत्स्याक्षी द्वितीयाध्याये वर्णिता । गन्धो गन्धकः । बाह्लीकं हिङ्गु । लकुचोऽशल्यकण्टकिफलमम्लमधुरं बेळगांवसंनिहितखानापुरग्रामे बाहुल्येनोत्पद्यते । तत्र त्वेतत्फिरिंग इति नाम्ना लोके प्रसिद्धम् । हरिद्वारक्षेत्रे 'लच्चा' इति प्रसिद्धम् । त्रिशूली त्रियामा रात्रिस्तदवसानपर्यन्तम् । विध्यन्तरमाह—समगन्धमिति । समभागगन्धमिश्रं लोहचूर्णं कुमारीरसेन संमर्द्य संपुटीकृत्य गजपुटे पचेत् । एवं कियत्कालपर्यन्तं पुनः पुनः पुटीकृतं लोहमवश्यं म्रियते ॥ १२३ ॥

**मूलम्**—जम्बीररस० पुरातितुः ॥ १२९ ॥ **टीका**—लोहस्य मारणविध्यन्तरमाह—जम्बीरेति । निम्बुरसेन सह मर्दनेन पङ्किले हिङ्गुले प्रतप्तं लोहं निक्षिपेत् । एवं बहुवारं कृत्वा लोहं म्रियते । तथा त्रिफलां क्षिप्त्वा पक्वे गोमूत्रे लोहचूर्णं भावयेत् । एवं प्रत्यहं नवीने तादृशे गोमूत्रे भावनावृत्त्यैकविंशतिदिनेषु व्यतीषु ततस्तल्लोहचूर्णमेकदिनपर्यन्तं त्रिफलायास्तादृशेन क्वाथेनैव मर्दयित्वा शरावसंपुटितं कृत्वा रात्रौ गजपुटे पचेत् । एवं प्रत्यहं नूतनेन तादृशक्वाथेन प्रातरारभ्य सायंकालपर्यन्तं मर्दनं ततः शरावसंपुटितं कृत्वा रात्रौ गजपुटे पाचनमिति संततक्रियाक्रमेणैकविंशतिपुटैस्त्रिविधं लोहं म्रियते । अथ तीक्ष्णचूर्णस्य द्रुतिमाह—त्रिःसप्तकृत्वेति । सपञ्चाङ्गदेवदाल्या भस्म गोमूत्रेण सहैकविंशतिवारं भावयेत् । ततः संशोषितं तद्भस्म महामूषायामग्नियोगेन द्रुते तीक्ष्णलोहचूर्णं आवपेत् । तेन

तत्तीक्ष्णं द्रुतिरूपं भवेत् । सुरदालिभस्म गलितामिति यदुक्तमग्रिमं पद्यं तत्पूर्वश्लोकेन गतार्थमिति न व्याख्यातम् । केनचित्क्षिप्तोऽयं पाठ इति भाति । उक्तगोमूत्रत्रिफलाक्वाथमर्दनप्रभृतिक्रमासिद्धलोहभस्मनः प्रयोगमाह—एतदिति । अपुनर्भवं यत्पञ्चमित्रसंस्कारेणापि न पूर्वावस्थापन्नं भवतीत्यर्थः । उक्तं चैतच्चिकित्साकलिकायाम्—' लोहमध्वाज्यगं तारं स्वप्रमाणं भवेद्यदा । तदा निरुत्थमित्युक्तं लोहं तदपुनर्भवम् ' इति ॥ १२९ ॥

**मूलम्**—यत्पात्रेऽध्युषिते० रुग्जन्मजराविनाशम् ॥ १४१ ॥ **टीका**—अथ रामराजीस्थपाठं संगृह्णाति । तत्र पारदभस्मना लोहस्य मारणविधिं वदन्नादौ कान्तलक्षणं समासत आह—यत्पात्रेति । यस्मिन्कान्तमये पात्रेऽध्युषिते संभृते जले क्षिप्तस्तैलबिन्दुर्न सर्पति यच्च मूषायां तारेण सह वह्नियोगेन द्रुतं सदावर्तत एकीभवेत्तदुत्तममिति ज्ञात्वा तनुपत्रीकृतमतिप्रतप्तं कृत्वा मुहुस्त्रिफलाकषाये निक्षिपेत् । इति सप्तवारकरणेन शुध्यति । एवंरीत्या सर्वाणि लोहानि संशोध्य जम्बीराद्यन्यतमस्य रसेन संमर्द्य सुसंस्कृतजारणचतुर्थांशपारदभस्मनाऽम्लेनैव कल्कीकृतेन लिप्त्वा गजपुटे पचेत् । अथवा मिथस्तुल्यस्य कज्जलीकृतस्य ताप्यादिसमूहस्य भागं लोहानां चतुर्थांशेन गृहीत्वा तत्प्रलेपपूर्वकं मारयेत् । पुनः कान्तलोहस्य शुद्धिविध्यन्तरमाह—तप्तमिति । शशरक्ते सप्तदिनं निधापितं भावितं ततः सक्षाराम्लेन लिप्तं प्रताप्य त्रैफलोदके क्षेपेण शुद्धं भवति । अत्र त्रैफलोदके क्षेपो ग्रन्थान्तरप्रामाण्यादुदाहृतः । संप्रति, अग्नियोगेन विना लोहमारणप्रयोगमाह—शुद्धसूतमिति । कन्यका कुमारी । आच्छाद्येत्यस्याग्रे प्रखरातपे धारयेदिति शेषः । एतादृग्विधिना साधितं लोहं सुपक्वं भवेन्न वेति न मीमांस्यम् । आप्तोक्तेः । स्वानुभवाच्चेत्याह—सिद्धयोग इति । एतद्विधिसिद्धलोहगुणानाह—लोहमिति । किट्टं च कान्तादिवदिति पाठः पुस्तकान्तरेऽस्ति । स एव साधुः । यस्य लोहस्य यत्किट्टं तत्तत्समानगुणमित्यर्थः । ' ध्मायमानमयो वह्नौ परित्यजति यं मलम् । स किट्टसंज्ञां लभते तदनेकविधं मतम् । ईषच्छोणं गुरु स्निग्धं मुण्डकिट्टं जगुर्बुधाः । भिन्नाञ्जनप्रभं किंचिद्विशेषाद्गुरु निर्व्रणम् । निष्कोटरं च विज्ञेयं तीक्ष्णकिट्टं मनीषिभिः । पिङ्गं रूक्षं गुरुतमं मन्ददीर्घमकोटरम् । छिन्नेऽत्र रजतच्छाया स्यात्तत्किट्टं तु कान्तजम् ' । इति तरङ्गिण्यां त्रिमल्लभट्टः । रसी भवन्ति रसोऽमृतं तत्तुल्यानि भवन्ति । युक्तानि रोगजरादिवारणाय प्रयुक्तानि सन्ति । रुग्जन्म रोगोत्पत्तिः ॥ १४१ ॥

**मूलम्**—पक्वजम्बूनि भ० श्रेष्ठतमं हि जन्तोः ॥ १५२ ॥ **टीका**—संप्रति द्रुत्यर्हं सत्कान्तं लक्षयति—पक्वेति । छायावर्णाश्रितं तेजः । तत्कान्तद्रुतिविधिमाह—सुरदालीति । सुरदाली देवदाली जालिनीत्यपरपर्याया । सपञ्चाङ्गतद्भस्म नरमूत्रेण सहैकविंशतिवारं वस्त्राद्गालितं कृत्वाऽग्नियोगेन मृत्पात्रे संशोध्य संजातस्य

क्षारस्य महामूषायामग्नियोगेन द्रुतकान्त आवापात्कान्तद्रुतिर्भवेत् । लोहाष्टकद्रावकं विधिमाह—गन्धकमिति । कान्तपाषाणं लोहचुम्बकोपादानपाषाणम् । लोहाष्टकं वर्तलोहं विना प्रागुक्तं सुवर्णादि । द्रुतेर्विध्यन्तरमाह—देवदाल्या इति । लोहशुद्धिविधानेनैव लोहकिट्टं शोधयेत् । अथ लोहकिट्टमारणोपायमाह—अक्षाङ्गारैरिति । तच्चप्ततप्तं किट्टमक्षपात्रान्तःस्थे गोजले सेचयेन्निर्वापयेत् । अथवा तप्ततप्तमक्षपात्रमध्ये निधाय तत्क्षणे तदुपरि गोमूत्रसेकः कार्य इत्यर्थः । एवं सप्तवारं कार्यम् । ततः कुट्टनं ततस्तप्ततप्तस्य तस्य सप्तवारं गोमूत्रे क्षेपः पुनः पेषणं पुनस्तप्ततप्तस्य सप्तकृत्वो गोमूत्रे क्षेपः । एवं पुनः पुनः करणेन चूर्णीभूतं किट्टं यदा स्यात्सोऽयं चूर्णो मण्डूर इति ख्यातः । स च प्रयोगार्हो भवति । अक्षो बिभीतकवृक्षः । विध्यन्तरमाह—गोमूत्रैरिति । त्रिफलापेक्षया षोडशगुणैर्गोमूत्रैः । किट्टलोहेषु गुणतारतम्यविषयं ग्रन्थान्तरस्थपाठं संगृह्णाति—किट्टादिति । अशुद्धलोहं न हितमिति पद्यं क्षेपकोऽयमित्यभिप्रायेणोपेक्षितम् । अथ लोहं स्तौति । अयोरूपः पदार्थ आयुरादिगुणसमूहप्रदोऽस्ति । अतो जन्तोर्नरस्योपयोगिसर्वरसायनश्रेष्ठमय एवेति भावः ॥ १५२ ॥

**मूलम्**—खुरकं मिश्रकं चेति० काष्ठाग्नौ याति पञ्चताम् ॥ १६२ ॥ **टीका**—अथ क्रमप्राप्तं वङ्गं वर्णयति—खुरकमिति । न हितमिति । तत्र नागमिश्रणेनाशुद्धत्वात् । अथ सद्वङ्गगुणानाह । तच्छुद्धिमाह—द्रावयित्वेति । मृत्खर्परे लौहकटाहे वा द्रावयित्वा निशायुक्ते हरिद्राचूर्णमिश्रिते । मिश्रकस्वशुद्धिमाह—अम्लेति । चूर्णीकृतैर्वर्षाभूवृषसिन्धुभिर्युक्तं यदम्लतक्रं तत्प्रातिसप्तद्दिनं निक्षिप्तं ततः कटुतुम्बीफलमध्ये सप्तदिनं स्थापितं मिश्रकं शुध्यति । वर्षाभूः पुनर्नवा । वृषोऽटरूषः । सिन्धुः सैन्धवम् । नागवङ्गकांस्यताम्राणामेकेनैव योगेन शुद्धिमाह—शुध्यतीति । एकैकं नागादिप्रखरसूर्यतापेऽग्नियोगेन द्रुते वा निर्गुण्डीरसेन सेचनं कुर्यात् । एवं सप्तवारं कृत्वा ततः कटाहमध्ये द्रुते तस्मिन्नागादौ निर्गुण्डीमूलचूर्णं क्षिपेत् । इति सप्तधा चूर्णप्रक्षेपेण च नागादि शुध्यति । घोषा कांस्यम् । रविस्ताम्रम् । अशुद्धस्य वङ्गस्य नागस्य च मारितस्यापि सेवने ग्रन्थान्ते दोषा उक्ताः । तथा हि—'वङ्गं विधत्ते खलु शुद्धिहीनमाक्षेपकं पौचाकिलासगुल्मौ । कुष्ठानि शूलं किल वातशोथं पाण्डुं प्रमेहं च भगंदरं च ॥ विषोपमं रक्तविकारवृन्दं क्षयं च कृच्छ्राणि कफज्वरं च । मेहाश्मरीविद्रधिमुष्करोगान्नागोऽपि कुर्यात्कथितान्विकारान्' इति । वङ्गस्य शुद्धेर्विध्यन्तरमाह—सतालेनेति । तालं हरितालम् । तद्भागोऽत्र वङ्गस्य चतुर्थांशेन ग्राह्यः । तन्मिश्रार्कदुग्धेन वङ्गदलानि प्रलिप्य संशोष्य शरावसंपुटमध्ये बोधिचिञ्चावृक्षयोर्वल्कलक्षारैरूर्ध्वाधो दत्त्वा संपुटितं कृत्वा लघुपुटे पचेत् । एवं सप्तपुटानि दद्यात् । अथवा सतालार्कदुग्धकृतलेपपूर्वकं पुटनमुक्तक्षारैर्लिप्त्वा पृथक्पुटनमिति पुटविधियोगद्वयं बोध्यम् । बोधिरश्वत्थः । लघुपुटमर्धगजपुटम् । ततो मर्दनेन भस्म भवेदित्यर्थः ।

तस्य विध्यन्तरमाह—प्रद्राव्येति ॥ स्वल्पशब्देन हरितालं वङ्गस्य चतुर्थांशेन ग्राह्यम् । तथा तन्मुहुर्मुहुर्देयम् । भारद्वाजकाष्ठं कार्पासीकाष्ठम् । रसादिषु प्रमेहादिवारकरसादिषु । पलाशेति । भल्लातेति । वस्त्रवेष्टनोत्तरं तस्य शरावसंपुटनं कार्यम् । अथवा वेष्टितस्य तस्य परितोऽङ्गुलस्थूलार्द्रमृत्तिकया लेपः कार्यः । अत्र गजपुटगर्तायां वन्योपलस्थाने चिञ्चादिकाष्ठैः पूरणं कार्यम् । योगतरङ्गिण्यां त्रिमल्लभट्टेन वङ्गभस्मविधिः सम्यगुक्तः—' वङ्गं संशोधयेत्तत्र तप्ततैलादिके गणे । ततः क्षिपेद्दृहण्डिकायां चुल्लीस्थायां शनैः शनैः ॥ तदधो ज्वालयेद्वह्निं द्रुते वङ्गे क्षिपेत्पुनः । अपामार्गचतुर्थांशं चूर्णं संचालयेद्दिनम् ॥ स्थूलाग्रया लोहदर्व्या यावत्ताद्भस्म जायते । ततः शरावपिहितं स्थापयेत्तत्र तद्भिषक् ॥ स्वाङ्गशीतलमादाय शुद्धतालेन योजयेत् । समेन निम्बुजद्रावैर्मर्दयेत्तत्पुनर्दृढम् ॥ तदुत्तरं घर्मशुष्कं पिप्पलस्य त्वगन्तरे । संस्थाप्य पश्चादेवं तत् सप्तधा विपचेद्भिषक् ॥ सर्वोत्तमं वङ्गभस्म सर्वकार्यकरं भवेत् ' इति ॥ १६२ ॥

**मूलम्**—वङ्गभस्मसमं कान्तं० पथ्याय शस्यते ॥ १७० ॥ **टीका**—वङ्गभस्मेति । वङ्गकान्ताभ्रकभस्मानि मिथः समभागानि गृहीत्वा पृथक्पृथक्कनकादिरसैः संमर्द्य ततः सर्वसमांशं भूपालावर्तभस्म तत्र दत्त्वा गोमूत्रेण शिलाजतुजलेन च तत्पृथक्संमर्द्य गुग्गुलुरसेन सहाष्टदिनं पेषयित्वा ततो बब्बुलनिर्यासैः सह घृष्टं संमर्दितं कृत्वा संशोष्य संचूर्ण्य समभागमाकुलीबीजचूर्णं दत्त्वा पुनः संमर्द्य वस्त्रगालितं कृत्वा करण्डमध्ये निदध्यात् । कनको धत्तूरः । मयूरोऽपामार्गः । भूपालावर्तो राजावर्तः । शिलाधातुः शिलाजतु । आकुली आवीरमिति केरलभाषायाम् । महाराष्ट्रभाषायां चर्मकारामलकी इत्यनुमानम् । इयं दन्तकाष्ठोपयोगिनी । तिलोद्भवं तैलम् ॥ १७० ॥

**मूलम्**—द्रुतद्रावं महाभारं० सर्वदोषमुक्तं रसायनम् ॥ १८० ॥ **टीका**—अथ क्रमप्राप्तं नागं वर्णयति—द्रुतद्रावमिति । अतोऽन्यथेत्यस्याग्रेऽशुद्धमिति शेषः । उक्तलक्षणरहितमशुद्धमित्यर्थः । सीसकगुणानाह—अत्युष्णमिति । दुष्टतोयदोषस्तडागादिसंभूतमलिनप्रथमवार्षिककीटलालादुर्गन्धादिजलसेवनजन्यो दोषस्तृष्णाध्मानचिरज्वरकासाग्निमान्द्याभिष्यन्दकण्डूगण्डादिर्भावमिश्रोक्तो बोध्यः । श्लीपदस्नायुकगण्डमालाविषमज्वरादिदोषः । संप्रति सीसकशुद्धिविधिमाह—सिन्दुवारेति । चुल्लीस्थे खर्परे लोहे कटाहे वाऽग्नियोगेन नागे द्रुते सति क्रमेण सिन्दुवारादिचूर्णमल्पाल्पं मुहुर्मुहुः क्षिपेत् । दर्व्या मुहुश्चालयेच्च । भस्मीभूतं तच्चूर्णमन्तराऽन्तरा तालवृन्तादिवायुनाऽपसार्य बहिः क्षिपेच्च । ततस्तप्ततप्तं तन्निर्गुण्डीरसपूरिते सच्छिद्रमहाभारपिधानेन पिहिते चोलूखलादौ तादृशपात्रान्तरे वा दर्व्याऽन्तः क्षिपेत् । तेनोत्प्लवनजबाधाभयं न स्यात् । एवं शुद्धो नागो मूर्छादिदोषकरो न भवेत् । नागभस्मविधिमाह ।

तिर्यगाकारा तिरश्चीना या दीर्घा चुल्ली आहाळ इति महाराष्ट्रभाषायां प्रसिद्धा तस्यां घटं तिर्यग्वक्त्रमेतादृशं घटं न्यसेदधिश्रयेत् । तं घटं च वक्त्रं विना बाह्ये समं ततोऽङ्गुलस्थूलं मृदा गोपयेल्लेपयेत् । भूष्टयन्त्राख्ये तस्मिन्विंशतिपलमितं सीसं विनिक्षिपेत् । तस्मिन्द्रुते सति, एककर्षं शुद्धसूतं तत्र क्षिप्त्वा ततो दर्व्या विघट्य, इतस्ततः संचाल्यैकीभूते सत्यर्जुनादीनां प्रत्येकं क्षारं पलमितं क्षिपेत् । ततो दोर्भ्यां लोहदर्व्या विघट्टयंश्चालयन्विंशतिरात्रपर्यन्तं तीव्राग्निना पचेत् । तेन विधिना नागभस्म रक्तवर्णं कपोतच्छायं कृष्णमिश्ररक्तवर्णं वा भवेत् । तापस्फोटादिकरत्वरूपदोषरहितं भस्मीभूतं नागं रसायनं भवति । तद्भस्म दोषरहितं केन विधिना भवेत्तदाह—हतमिति । यन्नागमुक्तरीत्या हतं मारितं पञ्चमित्रसंस्कारेण पुनरुत्थापितं पुनर्मारितं पुनरुत्थापितमेवमुत्थापनपूर्वकं मारणं दशवारं कुर्यात् । दशमावृत्त्या भस्मीकृतं नागं सिध्यति यथोक्तगुणप्रदं भवति । तदेव नागं दोषरहितं रसायनं च भवेत् । पञ्चमित्रं गुडगुञ्जासुखस्पर्शमध्वाज्यसमूहरूपम् । तत्संस्कारस्तेन सह मिश्रितलोहादिद्रव्यस्य मूषायां वह्नियोगेन प्रकृत्यापादकयत्नरूपः । अर्जुनः श्वेतवर्णत्वचाविशिष्टो वृक्षः । ककुभेत्यपरपर्यायो रेवातट उत्पद्यते । तत्र 'कहुवा' इति लोकभाषायां प्रसिद्धः । 'अर्जुनसादडा' इति महाराष्ट्रभाषायाम् । अक्षो बिभीतकः । महाराजगिरिः सुरालयो मेरुपर्वतः स्वर्णमयः सुवर्णाख्यश्चाऽऽरग्वधो महाराजगिरिशब्देन बोध्यते । मयूरोऽपामार्गः ॥ १८० ॥

**मूलम्**—अश्वत्थचिञ्चा० तत्तद्रोगानुपानतः ॥ १९१ ॥ **टीका**—संप्रति नागमारणस्य विध्यन्तरमाह—अश्वत्थेति । लोहचाटुना लोहदर्व्या । पुटे गजपुटे । प्रतिपुटमारम्भे विंशत्यंशमनःशिलायुतं कृत्वाऽम्लेन मर्दनं कार्यम् । प्रकारान्तरेण नागस्य मारणविधिमाह—शिलयेति । शिलया मनःशिलया । पुटयोगेन षष्टिपुटैरित्यर्थः । अथ नागभस्मप्रयोगमाह—एवं नागोद्भवमिति । उक्तरीत्या मारितं नागभस्म विमलो माक्षीकसमगुणो धातुर्महारसाख्यः संप्रति नोपलभ्यते । अतस्तत्प्रतिनिधित्वेन रौप्यमाक्षिकभस्म ग्राह्यम् । स्फटिकस्य भस्मीकृतस्य स्फटिकाख्योपरत्नस्य त्रिंशद्वन्योपलैः पुटेत् । प्रतिपुटं विचूर्ण्य त्रिफलारसेन संमर्द्येत्यर्थः । एवं त्रिंशत्पुटानि दत्त्वा तत्समं प्रत्येकं व्योषादिचूर्णेन मेलयेत् । धनुर्वातः शरीरस्यान्तर्बहिर्वा नमयिता दारुणो वातव्याधिविशेषः ॥ १९१ ॥

**मूलम्**—रीतिका काकतुण्डी च० दीपनं पाचनं हितम् ॥ २०४ ॥ **टीका**—क्रमप्राप्तं पित्तलं वर्णयति—रीतिकेति । तत्पित्तलं द्विविधम् । रीतिका काकतुण्डी चेति भेदात् । तत्र रीतिकाया द्वौ भेदौ । किंचित्ताम्राभा स्वर्णवर्णा च । तयोर्लक्षणं गुणांश्चाऽऽह—रीतिस्तिक्तेति । योगात्कृमिकुष्ठनाशकद्रव्यान्तरसंयोगं कृत्वा प्रयुक्ता चेदित्यर्थः । संप्रति सदसद्रीतिलक्षणमाह—गुर्वीति । बर्बरा कृष्णवर्णा ।

रीतिशुद्धिमाह—तप्त्वेति । श्यामा रजःश्यामारात्रिर्हरिद्रा तच्चूर्णमित्यर्थ. । अथ रीतिकाद्रुतिमाह—सुवर्णेति । सुवर्णवर्णरीतिकायाश्चूर्णं छागविशेषाय सान्नं युक्त्या दत्त्वाऽन्नगृध्नुना तेन भक्षयित्वा जरणोत्तरं विष्ठारूपेण परित्यक्तं यत्तत्खर्परे खण्डितमुखमृत्पात्रोदरे लिप्त्वा तच्चुल्ल्यामधिश्रित्य विष्ठासंश्लिष्टचूर्णं दग्धं सत्स्वर्णाभां द्रुतिं मुञ्चति । सा च दृढदेहसिद्ध्यर्थं धातुवादे चार्हति । अथ रीतिमारणविधिमाह—निम्बूरसेति । निम्बूरसमर्दिताभ्यां रीतिसमाभ्यां शिलागन्धाभ्यां मिथोमिश्रिताभ्यां संवेष्ट्य कृतं गोलशरावसंपुटितं कृत्वा गजपुटं दद्यात् । एवमष्टवारं शिलादि दत्त्वा गजपुटानां दानेनोक्तताम्रमारणविधिनाऽष्टवारं पुटैर्मारणेन वा प्रयोगार्हा भवति । अथ रीतिभस्मप्रयोगमाह—मृतेति । मृतं भस्मीकृतं यदारकूटं रीतिः कान्तभस्म व्योमसत्त्वभस्म च सर्वं मिथः समं गृहीत्वा संमर्द्य तत्तुल्यं व्योषादि प्रत्येकं दत्त्वा मर्दनेनैकीकृतं जन्त्वादिनाशनं दीपनत्वादिगुणं च भवेत् । जन्तुघ्नं विडङ्गम् । ब्रह्मबीजं पलाशबीजम् । अग्निश्चित्रकः ॥ २०४ ॥

**मूलम्**—अष्टभागेन ताम्रेण॰ योजनीयं यथाविधि ॥२१६ ॥ **टीका**—अथ क्रमप्राप्तं कांस्यं वर्णयति—अष्टभागेनेति । सौराष्ट्रभवं सुराष्ट्रदेशे चोत्पन्नं हितं रसादिष्विति शेषः । हितं पथ्यमिति चेत्यर्थः । तस्य च सदसल्लक्षणमाह—तीक्ष्णशब्दमिति । तत्तप्तमिति । कांस्यगुणानाह—कांस्यं लघ्विति । घृतमेकमिति । घृतं तु तन्नस्थं विरुद्धं भवति । वापितं निर्वापितं सप्तवारमिति शेषः । कांस्यं समभागेन गन्धकेन हरितालेन च गोमूत्रे कल्कीकृतेन विलिप्य गजपुटं दद्यात् । एवं पञ्चपुटैस्तद्भस्म निरुत्थं जायत इति । रससंकेतकलिकायां तु शोधनमारणं प्रोक्तम् । ताम्रवत्कांस्यपित्तले इत्युक्तम् । तत्र ताम्रांशस्याधिक्यादिति भावः । कांस्यरीत्योर्भस्मविधौ मतान्तरमाह । केचिद्वदन्ति जम्बीरादिरसेन त्रिक्षारं पञ्चलवणं च पृथक् सप्तधा भावयेत् । ततस्तेन कल्केन कांस्यपत्रस्याऽऽरकूटपत्रस्य च लेपेन ततः शरावसंपुटितं कृत्वा गजपुटे पाकेन पक्वमेव शुद्धिमायाति । उत्क्ले( त्क्ले )दभ्रमादिदोषरहितं भस्मी भवतीत्यर्थः । अन्यथा तु कृतं भस्म सदोषमेवेति । रोमकं विना सामुद्रादीनि दशमाध्याये वक्ष्यमाणानि पञ्च लवणानि । अथ वर्तलोहं वर्णयति—कांस्येति । कांस्यादिपञ्चधातुजं कृत्रिमं यल्लोहं तद्वर्तलोहमिति ख्यातम् । तद्गुणानाह—हिमाम्लेति । तच्छुद्धिमाह—द्रुतमिति । द्रुतं मूषायां ध्मानेन द्रवीकृतम् । अत्रापि गन्धतालौ मारणार्थमुक्तौ । तौ च वर्तलोहस्य तुल्यभागावेव ग्राह्यौ । पुटितं सप्तवारं गजपुटे पक्वमित्यर्थः ॥ २१६ ॥

**मूलम्**—जातिमद्भिर्वि॰ हन्यात्प्रसूतिग्रहम् ॥ २३१ ॥ **टीका**—अथ श्लोकद्वयेन मुख्यसाधनसंस्कारवर्णनमुपसंहरति—जातिमद्भिरिति । नान्यथा । अतः प्रथममेतावता ग्रन्थेन स एव विधिरुक्त इति वाक्यशेषः । तत्र द्वितीयश्लोकेन पारदसंस्कारयोग्यानां द्रव्याणामुक्तानुक्तानां साधारणः संग्रह उपपादितः । कठोरदेह-

मिति पदेन स्वयं सिद्धमृदुद्रव्यस्य महारसादिवर्गघटकस्य नास्ति भस्मसत्त्वादिकरणापेक्षेति सूचितम् । भस्मीकृतमिति पदं मृदूकृतस्योपलक्षणम् । शल्यमास्थिनखकण्टककाचादि । अथ वज्राणां द्रावणे यद्यपि प्रागुदाहृता एव वज्रवल्ल्यादियोगास्तेभ्योऽपि शीघ्रं निश्चयेन वज्रद्रावणसमर्थं भूनागसत्त्वम् । अतस्तद्विधिमाह—वज्राणामिति । परमं तेजः सामर्थ्यम् । इन्द्रवज्रं इन्द्रस्य वज्रम् । इन्द्रधनुःसमतेजोविशिष्टं सत्पुंवज्रमित्यर्थः । तच्च सत्त्वं द्विविधं खरं मृदु च । तद्विधिं क्रमेणाऽऽह—धौतमिति । धौतम्—' भूभुजङ्गशकृत्तोयैः प्रक्षाल्यापहृतं रजः । कृष्णवर्णं हि तत्प्रोक्तं धौताख्यं रसवादिभिः ' इति परिभाषाध्याये वक्ष्यमाणम् । द्रावणगणः—' गुडगुग्गुलुगुञ्जाज्यसारघैष्टङ्कणान्वितैः । दुर्द्रावाखिललोहादेर्द्रावणाय गणो मतः ' इति दशमाध्याये वक्ष्यमाणः । निरुध्य दृढमूषायां पिहितमहामूषायामित्यर्थः । द्विदण्डं घटिकाद्वयपर्यन्तम् । पट्टके विशालश्लक्ष्णाशिलायामित्यर्थः । रेणुरसारा धूलिः । गो( ? )खरहिता सा तु त्याज्या । ततो वियोज्य खका ग्राह्याः । खकान्रेण्वपेक्षया किंचित्स्थूलान् । अतिभरान्वितान् । अतिभारान्वितांश्च फूत्कारेण धमनीध्मानेन तालवृन्तादिवायुना मलधूलिभस्मतः पृथक्कृत्य तत्र द्वादशांशेन ताम्ररजो दत्त्वैकीकृत्य ध्मानेन मूषायां खोटीभूतं तच्छिलापट्टे संपेष्य खकान्कुर्यात् । ततश्चिरस्थायिखकाञ्जलैः प्रक्षाल्य प्रयत्नतः समादाय संगृहीतं तदेव खसत्त्वम् । अत्र रेणुमध्येऽपि रेणुसमाः सूक्ष्मसत्त्वकणास्तान्रेणुमलादिभ्यो वियोज्याऽऽत्मीयखकान्प्रति समाकृष्य संश्लिष्टान्कर्तुं सजातीयताम्रचूर्णयोग उदाहृतः । अयं हि निसर्ग एव द्रव्यस्य यदाऽऽत्मीयं समाकर्षति, इति । एवमेकस्यां द्वयोस्तिसृषु वा मूषासु ध्मानेनैकवारं द्विवारं त्रिवारं वा ध्मानेनेत्यर्थः । अथ मृदुसत्त्वविधिमाह—भुजंगमानिति । भूभुजंगमान् भूनागानित्यर्थः । खोटं क्षुद्रपाषाणसमं गोलकम् । सुवर्णमानवत्सुवर्णस्य द्रावकरणे यावान्कालो ध्मानार्थमपेक्ष्यस्तावत्कालपर्यन्तं ध्मात्वा खं कृत्वा द्रावेणैकीभूतं गोलकं कृत्वा स्थिरखरोद्भूतं स्थावरजङ्गमम् । प्रसूतिगृहं गर्भसङ्गम् । बृहद्योगतरङ्गिण्यामन्यादृश एव भूनागसत्त्वविधिप्रकार उपपादितः—' ताम्रभूभवभूनागान् त्रिंशत्पिष्टान्समेन तु । गुडगुग्गुलुलाक्षोर्णामत्स्यपिण्याकटङ्कणैः । दृढमेतैश्च संयोज्य मर्दयित्वा धमेत्सुखम् । मुञ्चन्ति ताम्रवत्सत्त्वं ते पक्षा अपि बर्हिणाम् , इति ॥ २३१ ॥

**मूलम्**—मूलान्युँत्तरवारुण्या० पक्षादुद्धृतं तैलमाहरेत् ॥ २४२ ॥ **टीका**—अथ तैलस्यापि सारणादिसंस्कारेषु पारदोपयोगित्वात्तैलाहरणविधिमाह—मूलानीति । उत्तरवारुण्या मूलानां चूर्णं काञ्जिके जर्जरीकृत्य काञ्जिकेन सह संमर्द्येत्यर्थः । तत्कल्कीभूतमङ्कोलस्य बीजानां संबन्धिपेशिकामन्तस्थमज्जाखण्डिकां संमर्दनेन कल्कीकृतां प्रतिक्षिपेत् । क्षिप्त्वैकी कुर्यादित्यर्थः । ततोऽत्युष्णजल एकीभूतं तत्सर्वं क्षिप्त्वा जलमध्ये हस्ताभ्यां संमर्द्य संमर्द्य यावच्छीतीभावपर्यन्तं स्थापयेत् । ततः शीत-

जलोपर्यागतघृतवत्स्त्यानं घनं संजातं हस्तादिना ग्राह्यम् । अथवोत्तरवारुणीपेटकार्योर्दलानि संमर्द्य तेन कल्केन सह संमर्दितमङ्कोलबीजचूर्णं विरलवस्त्रे पोटलिकां बद्ध्वाऽऽकाशस्थे तिर्यग्दण्डे सूत्ररज्ज्वादिबन्धेन विलम्ब्य तीव्रातपे धारणेनाधो निपातितं तैलं काचपात्रे धारयेत् । पुनरङ्कोलतैलाहरणविध्यन्तरमाह—अङ्कोलबीजसंभूतमिति । काष्ठतः काष्ठपट्टिकाद्वयमध्ये धृत्वा निष्पीड्य तद्बीजानां पुनस्तैलाहरणविध्यन्तरमाह । अङ्कोलस्यापि समूलकाकतुण्डीयोगेनापि । अङ्कोलबीजतैलमाहरेदित्यर्थः । अपामार्गेति । तत्कषायेण विषमुष्टिबीजं संमर्द्य पोटलिकां बद्ध्वाऽऽतपे धृत्वाऽङ्कोलबीजवत्तैलं ग्राह्यम् । पूर्ववत्कन्दुकयन्त्रेण वा तैलं समाहरेत् । एवमेव कुमारीमूलक्काथेन जेपालतैलमाहरेत् । काकतुण्डीबीजतैलाहरणविधिमाह । कृष्णाऽऽसुरी रक्तसर्षपेत्यपरपर्याया । काकतुण्डी तद्बीजचूर्णम् । तैलमाहरेत् । तत्कल्कं वस्त्रपोटलिकया बद्ध्वा काष्ठपट्टिकाद्वयमध्ये दृढं निष्पीडनेन तैलमाहरेदित्यर्थः । एवं रीत्यैव तिलैरण्डबीजादीनामपि तैलं यथाविधि निष्कासयेत् । उत्तरवारुणी फलपत्रदुग्धा क्षुपवृक्षेषु दीर्घप्रसरणशीला कारवल्लीसदृक्कण्टकितदीर्घद्वित्रफलगुच्छा वल्ली प्रसिद्धा । उतरणीति नाम्ना महाराष्ट्रभाषायाम् । पेटकारी पेटारीति लोके प्रसिद्धा । काकतुण्डी काकनासा, इत्युक्तमर्बुदाचलतन्त्रे भगवता परशुरामेण । साऽपि वल्ली दुग्धफला क्षुपे प्रसरणशीला कार्पासपङ्क्तिबीजगर्भितात्रिकोणद्वित्रफलगुच्छा निष्कोणार्कफलसमद्वित्रफलगुच्छा वा महाराष्ट्रभाषायां कावळीति नाम्ना प्रसिद्धा । केचित्तु काकतुण्डी काकादनीति वदन्ति । तस्या अपरपर्यायः काकमारीति । सा जम्बूफलसमानवर्णद्वित्रक्षुद्रफलगुच्छा तिक्तरसा वल्ली कोंकणे प्रसिद्धा । अस्याश्च फलभक्षणान्मत्स्याः काकाश्च म्रियन्त इति । विषमुष्टिर्महानिम्बोऽतितिक्तरसः । तैलविधिप्रसङ्गाद्भूनागतैलं सारणातैलं चात्र लिख्यते । तस्यापि पारदसंस्कारोपयोगित्वात् । तत्र गोमूत्रक्षालितानां सजीवभूनागानां समभागं सौवीराञ्जनं क्षिप्त्वा महिषीमूत्रेण सह संमर्द्य गोलकं कृत्वा तस्मात्पातालयन्त्रेण तैलं ग्राह्यमिति रसरत्नाकरे नित्यनाथ उवाच । तत्र तेनैव सिद्धेन सारणातैलमप्युक्तम् । तथा च तद्ग्रन्थः—'ज्योतिष्मतीकरञ्जाख्यकटुतुम्बीसमुद्भवः । तैलमेकं समादाय मण्डूकवसया समम् ॥ कूर्मसूकरमेषाहिजलौकामत्स्यकाऽपि च । एतेष्वेका वसा ग्राह्या पूर्वतैलं समाहरेत् । रक्तवर्गपीतवर्गक्काथैः क्षीरैश्चतुर्गुणैः । पुष्पाणां रक्तपीतानामनेकानां द्रवं हरेत् ॥ एतद्द्रवविभागं स्यात्पूर्वक्काथचतुर्गुणम् । पाटलीकाकतुण्ड्युत्थमाहरेच्च द्रवं तथा ॥ प्रत्येकं भागमेकैकं पूर्वतैलं वसायुतम् । योज्यं भागद्वयं तच्च ×भू ( नागमल )लतामलताप्यकम् ॥ द्वंद्वमेलापयोगैकं तले षोडशकांशकम् । प्रत्येकं

× अत्र कल्कविशेषोऽपि रसहृदयेऽभिहितः । यथा विद्रुमभूनागमलं विण्मक्षिकाध्वांक्षशलभानां च कर्णमलं महिषीणां क्रमेण कल्कं कलांशेनेति ।

योजयेत्तस्मिन्सर्वमेकत्र वा पचेत् ॥ ग्राह्यं तैलावशेषं तु वस्त्रपूतं सुरक्षयेत् । विख्यातं सारणातैलं रसराजस्य सारणे ॥ इति ॥

इति वामनात्मजचिन्तामणिविरचितायां रसरत्नसमुच्चयटीकायां सरलार्थप्रकाशिन्याख्यायां पञ्चमोऽध्यायः ॥ ५ ॥

---

## अथ षष्ठोऽध्यायः ।

**मूलम्**—रसशास्त्राणि सर्वाणि० वरं लब्ध्वा सुसाधयेत् ॥ १२ ॥ **टीका**—अथ यथाशास्त्रं गुरोः सकाशाद्यथाविधिगृहीतसिद्धमन्त्रकेण साधकेन समारब्धा रसक्रिया सिध्यति । किंच पारदस्य पञ्चमा(म)गतिरोधार्थं सिद्धमन्त्रावश्यकता । अतो मन्त्रदीक्षाविधिक्रमबोधनार्थं शिष्योपनयनीयाध्याय आरभ्यते । तत्राऽऽदौ स्वकृतौ प्रामाण्यं शास्त्रोक्तक्रमज्ञानफलं चाऽऽह—रसशास्त्राणीति । न क्रमेणेति । क्रमेणानेककार्याणामेककालं प्रसक्तानां पूर्वोत्तरकालिकेतिकर्तव्यताया अनुक्रमः । तेन रहितं शास्त्रं ज्ञातं न साधकसिद्धिप्रदमिति शेषः । तेन विना क्रमोऽपि न तथा। संप्रति गुरुसच्छिष्ययोः क्रमेण लक्षणमाह—आचार्य इति । अनेन शिष्याणामन्नवस्त्रदानपूर्वकमध्यापयिता वेदशास्त्रादिपारंगत आचार्य उच्यते । महावीरः सिद्धिपर्यन्तं कार्यं धैर्ययत्नाभ्यां कर्तुं समर्थः । सदा धीरोऽभयद इत्यर्थः । सहायाः कर्मकारा भृत्या अपि सच्छिष्यसमगुणाः । अथवा ततोऽप्यधिगुणाः । असच्छिष्यलक्षणमाह—नास्तिका इति । चुम्बकाः कृपणाः । अपरात्, भक्तिसेवातिरिक्तसाधनात् । तदेव साधनमाह—चौर्येति । खलोत्सवो मिथ्यास्तुतिरूपः । विद्याग्रहणसदुपायमाह—तस्मादिति । हस्तमस्तकेति । परमतुष्टेन गुरुणा छात्रमस्तके हस्तं दत्त्वा गच्छ त्वं कृतार्थो भविष्यसीति वरं लब्ध्वा । सुसाधयेत्, रसकर्म कुर्यादित्यर्थः ॥ १२ ॥

**मूलम्**—आतङ्करहिते देशे० पीतवस्त्रां विभावयेत् ॥ २६ ॥ **टीका**—अथ शुभे देशे परिष्कृतभूमिं तत्र लिङ्गपूजनार्थं ध्यानं च क्रमेणाऽऽह—आतङ्करहित इति । आतङ्को रोगादिः । रुक्तापशङ्कास्वातङ्क इत्यमरः । काहलं वाद्यविशेषः । तत्र रसमण्डपे वेद्यां स्थापितलिङ्गस्य पूजोपयोगिमन्त्रमुद्दिशति—ऐं ह्रीं श्रीमघोरेण मन्त्रराजेन चार्चयेत् । अघोरेण मन्त्रेण सह ऐं ह्रीं श्रीमित्याकारकैकदेशसंग्राह्यरसाङ्कुशामन्त्रमुच्चार्य पूजयेन्मन्त्रद्वयोच्चारणपूर्वकमेकैकोपचारार्पणं कार्यमित्यर्थः । तत्र ध्यानमाह—अष्टादशेति । दक्षे दक्षिणहस्ते ॥ २६ ॥

**मूलम्**—वाङ्मायाश्रीकाम० कालिनीसमा ॥ ३९ **टीका**—उद्दिष्टयोर्मन्त्रयोर्मध्येऽघोरमन्त्रोपदेशावसरे स्फुटीकृत्वा वक्ष्यति । तदानीमेव च रसाङ्कुशाख्यं च महादेवीमन्त्रं परोक्षं वक्ष्यति । तेन शिष्याणां सुबोधो न स्यात् । अत इदानीं स्फुटं रसाङ्कुशामन्त्रस्वरूपमाह—वाङ्मायाश्रीकामेति । तत्र वाग्बीजमैं मायाबीजं

ह्रीं श्रीबीजं श्रीं कामराजबीजं क्लीं शक्तिबीजं सौः । इति बीजपञ्चकोपेतरसाङ्कुशायै नम इति द्वादशार्णैषा द्वादशवर्णरूपा रसाङ्कुशाख्या विद्या मन्त्रो ज्ञेयः । ध्यानोत्तरमनया विद्यया मन्त्रेणाघोरमन्त्रसहितेन देवीं महेश्वरार्धोपेतां पूजयेत् । लिङ्गस्य परितोऽधिदेवता नन्यादीन्पूजयेन्नाममन्त्रेण । ततो रसलिङ्गे पूर्वस्यां वरुणपूजनं कार्यम् । योनिकुण्डलक्षणं कुण्डार्कादिग्रन्थादावुदाहृतम्—'क्षेत्रेऽजिनांशे पुरतः शरांशान् संवर्ध्य च स्वीयरदांशयुक्तान् । कर्णाङ्घ्रिमानेन लिखेन्दुखण्डे प्रत्यक्पुरोऽङ्कादगुणतो भगाभम्' इति । जिनशब्दश्चतुर्विंशतिसंख्याबोधकः । आहुतिसंख्यानुरोधेन व्यवस्थितगभीरगर्तालक्षणमपि तत्रैवोक्तं वेद्यम् । उक्तं च तत्र—'सहस्रे हस्तं स्यादयुतहवने हस्तयुगुलं चतुर्हस्तं लक्षे प्रयुतहवने षट्करमितम् । ककुद्भिर्वा कोटौ नृपकरमितं प्राहुरपरे' इति । ककुच्छब्दो दशहस्तसंख्याबोधकः । नृपशब्दः षोडशसंख्याबोधकः । हवनसंख्या यत्रानुक्ता तत्राष्टोत्तरशतसंख्यैव तर्क्या । अत्र प्रथमं तत्संख्याकतिलहोम आज्यहोमश्चाघोरमन्त्रेण कार्यः । पश्चात्तत्संख्याकपायसक्षतपुष्पादिहोमश्च रसाङ्कुशविद्यामन्त्रेणैव कार्यः । अथवाऽघोरेण रसाङ्कुशया च पार्थक्येनोक्तसंख्याकसर्वहवनीयद्रव्यहोमः क्रमेण कार्यः । व्यवस्थायां मानाभावात् । ततः शिष्यं दीक्षादानमन्त्रोपदेशार्थमाहूयोपनमेत् । कथंभूतं शिष्यम् । कालिनीशक्तिसहितम् । विशिष्टलक्षणा स्त्री कालिनी । तया युक्तः शिष्यः कार्यः । तेन पारदवशीकरणरूपा या तस्यां शक्तिः । तेन ( तया ) युक्तो भवतीत्यर्थः । कालिनीलक्षणमाह—यस्या इति । भिन्ना शरीरे स्फुटमन्मथलक्षणा । संकीर्णहृदया कामाकुलहृदया । कालिनीतिपदस्थाने काकिनीत्यपि पाठः । प्रयोगे सिद्धरससेवायां क्रामणोपयोगि यत् स्तनाभ्यां शरीरमर्दनं चुम्बनालिङ्गनादि तदर्थं सा प्रशस्तेत्यर्थः । रसायने शुक्रवृद्ध्यर्थं च प्रशस्ता । तथा च वाग्भटाचार्यो रसायनाध्यायान्ते—'नामापि यस्या हृदयोत्सवाय' इत्यारभ्य श्लोकद्वयेन निजगाद ॥ ३९ ॥

**मूलम्**—एवं शक्तियुतो० पूजयेद्रसाङ्कुशान्वितम् ॥ ५१ ॥ **टीका**—दीक्षापूर्वकमन्त्रोपदेशमाह—एवमिति । पृथग्जपेत् । अघोरमन्त्रं रसाङ्कुशां विद्यां च पृथग्जपेत् । अघोरमन्त्रस्य शिव ऋषिः । नीलकण्ठो देवता । अनुष्टुप् छन्दः । रससिद्धये जपे विनियोगः । रसाङ्कुशविद्यायास्तु शिव ऋषिः । महादेवी देवता । जगती छन्दः । रससिद्धये जपे विनियोग इति ऋष्यादि बोध्यम् । तान्यत्राऽऽह । तत्राघोरमन्त्रपाठमाह—ॐ ह्रामिति । इमं मन्त्रं जपेदित्यन्वयः । रसाङ्कुशविद्यामेकदेशरूपेण प्रच्छन्नां कृत्वाऽऽह—ॐ कामराजेति । द्वादशाक्षररूपेण सा प्रागेव स्फुटीकृता । देवानां परोक्षप्रियत्वादेतादृशोक्तिर्न सदोषा । अत्रैव वक्ष्यति च—'रसविद्या परं गोप्या' इति । इमां विद्यां रसाङ्कुशाख्यामाज्ञाय, उक्तप्र-

कारेण सम्यग्ज्ञात्वा जपेत् । ' आज्ञैया ' इत्यशुद्धपाठः । तथैव, इमामङ्कुश-विद्यामित्येव पाठः साधुः । अङ्कुशविद्यां पूज्यां देवीमित्यर्थः । आचार्यकर्तृक उपनयनाङ्गहोमो योनिकुण्डे प्रागभिहितः । संप्रति विद्याग्रहणाङ्गहोमं शिष्यकर्तृकं त्रिकोणकुण्ड आह—दशांशेनेति । जपस्य दशांशेन हुनेद्धवनं कुर्यात् । पूर्णान्ते पूर्णाहुत्यन्ते । तद्बहिः । षट्कोणमण्डलस्य परितो बाह्यभागे चतुरस्रमष्टपत्रबाह्य-भागे तदेव चतुष्कोणं कृत्वा तस्य रङ्गवल्ल्यादिनिर्मितस्य विशालकमलस्य कर्णि-कायां खल्वं न्यसेत् । तत्र पारदमुक्तान्यतममानं पूर्वोक्तरसलिङ्गं तुल्येन मन्त्रध्या-नादिना पूजयेत् । ततः षट्पत्राणामुदरेषु वज्रादीन्पूर्वादिक्रमेण पूजयेत् । अष्टदलेषु गन्धकादीन्पूजयेत् । अग्रेषु तु रसकादीन्पूजयेत् । अङ्कुशान्वितमङ्कुशविद्यास-हितेनेत्यर्थः ॥ ५१ ॥

**मूलम्**—बिडं काञ्जिक० ततः कुर्याद्रसार्चनम् ॥ ६१ ॥ **टीका**—देव-ताधिष्ठितान्युपसाधनान्यपि पूजयेत् । जपस्तु ब्राह्मणद्वारा स्वयमेव वा कार्यः । बिडं काञ्जिकेति । बिडवङ्कनाललक्षणं परिभाषाध्याये वक्ष्यमाणम् । रञ्जकद्रव्याणि मञ्जिष्ठादीनि । स्नेहनानि द्रव्याणि कङ्गुणीप्रभृतीनि । वाग्बीजम् ऐं । मायाबी-जम् ह्रीं । तस्याग्रेऽपि ह्रींबीजं पुनर्ग्राह्यम् । तदुत्तरं क्ष्मं क्ष्मः इति पञ्चबीजा-त्मकोऽयं मूलमन्त्रः । व्याड्याचार्यः । यत्प्रणीतकारिकासारमादाय भगवता पतञ्जलिना महाभाष्यं प्रणीतमिति किल श्रूयते । एते सर्वे तु सूतेन्द्रास्तदाराधनेन तद्रूपा इत्यर्थः । राजेन्द्रा इति पाठो दृश्यते । स तु च्छात्रेन्यानेन यथाकथंचित्पठित इति बोध्यम् । ततः कुर्याद्रसार्चनमिति । रसलिङ्गपूजारम्भात्प्रागेतेषां नामकीर्तनं कार्यमित्यर्थः ॥ ६१ ॥

विद्योपदेशोत्तरं रसलिङ्गपूजान्ते संप्रति—**मूलम्**—हर्षयन् । द्विज० भवेन्निर्वीर्यमौप-धम् ॥ ७१ ॥ **टीका**—रसोत्सवाङ्गमन्यदपि कर्तव्यमाह—हर्षयन्निति । मेलकसाधकान् । मेलकः सङ्गः । रसोत्सवावसर आगमनमात्रेण कृतो यः संगमस्तेन कार्यसाङ्गतासाधकान्कुमार्या-दीनन्नपानादिना तृप्तान्कुर्यात् । उपसंहरति—तस्मादिति । संप्रति शास्त्रक्रममनुसृत्य गुरोः सकाशाद्यथाविधिगृहीतसिद्धमन्त्रका अपि साधका याद्दग्गुणसंपदुपेताः पारदसिद्ध्यर्थं प्रशस्यन्ते तानाह—सम्यगिति । तेषां विधिबलात्सम्यगुत्कर्षप्रददैवसाह्येन श्रीपारदोऽ-पारसंपत्तिप्रदः पारदः सिध्यति । यथाशास्त्रोक्तफलप्रदो भवतीत्यर्थः । निर्वीर्यम-सारम् ॥ ७१ ॥

इति वामनात्मजचिन्तामणिविरचितायां रसरत्नसमुच्चयटीकायां सरलार्थ-प्रकाशिन्याख्यायां सूत्रस्थाने शिष्योपनयनीयाख्यो षष्ठोऽध्यायः ॥ ६ ॥

---

## अथ सप्तमोऽध्यायः ।

**मूलम्**—रसशालां प्रकुर्वीत० कुर्याद्धर्तुं सूक्ष्मतरं रजः ॥ १४ ॥ **टीका**—

अथ रसस्य सुपाकसमाप्तिपर्यन्तमुपकरणद्रव्यवृन्दं यद्यद्रसोपयोगिमन्त्रोपदेशस्याङ्गमनङ्गं वा तस्य सुव्यवस्थया ऽऽसादयितुं सम्यक्स्थानभूता शालाऽपेक्ष्यते । तां च निर्मातुं विशिष्टप्रदेशमाह—रसशालामिति । सर्वबाधाविवर्जिते । क्षुद्रजनकोलाहलदुष्टहिंस्रसर्पपश्वादिदुष्टवाय्वम्ब्वादिकण्टकगर्तापाषाणादिरहिते । तथा यक्षराजसहस्राक्षदिग्विभाग ईशानीपूर्वदिग्वर्तिनि । पक्षत्र्यक्षां सहस्राक्षदिग्विभाग इति „पाठे” तु पूर्वदिग्स्थे देश इत्यन्वयः । पक्षत्र्यक्षामिति पदं शालाविशेषणम् । प्रतिपक्षं त्रीणि गवाक्षाणि यस्यास्तथोक्तामिति तदर्थः । बाह्ये समन्ततः प्राकारेण सुशोभिताम् । शालां कुर्वीत । सिद्धवस्तूनां सिद्धरसादीनाम् । सत्त्वपातनेति । सत्त्वपातनकोष्ठी द्विविधा । अङ्गारकोष्ठी पातालकोष्ठी च । तथा गाराकोष्ठीति तिस्रो दशमाध्याये वक्ष्यमाणाः । भूमिकोष्ठी भूम्यन्तर्गतगर्ताविशेषरूपा । सा च रसकसत्त्वपातनावसरे द्वितीयाध्याये प्रागुदाहृता । चलत्कोष्ठी यन्त्राध्याये कोष्ठीयन्त्रनाम्ना वक्ष्यमाणा । सा चाभिमतस्थल इतस्तत आनेतुं नेतुं वा सुखेन शक्यतेऽतोऽन्वर्थमेव नाम चलत्कोष्ठीति । जलद्रोण्योऽनेकविधास्तप्तद्रव्यनिर्वापणार्थं क्षालनाद्यर्थं च । भस्त्रिकायुगुलमल्पमहद्भेदेन । नालिके द्विविधे । वंशमयी लोहमयी च । स्वर्णादिमय्यः कुण्ड्यो वर्तुलपात्राणि । चर्मकृतां चर्मकाराणां कुण्ड्यः । करणानि कार्यसाधनानि यन्त्रशस्त्रादीनि सूचीलोहचुम्बकरज्जुवालवध्रीविविधसंदंशकुठारिकाकरपत्रादीनि । कटत्राणि कषायितचर्मखण्डानि । नानाविधाः शलाकाः । वैणवीभिरिति । इयं चतुष्कोणा दीर्घचालनी । तत्र दीर्घाः शलाकारितरश्चीनाश्च वंशमय्यश्चतुष्कोणकाष्ठपट्टिकाछिद्रेषु बहिर्निर्गताग्राः सूत्रबद्धाः कार्याः । एवंविधां चालनीं कुर्यात् । वंशजा सूक्ष्मवंशशलाकानिबद्धतला तद्वद्भकटकं तु चतुरङ्गुलविस्तृतया कर्णिकारायन्यतमस्य काष्ठकम्बिकया विदध्यात् । कर्णिकारो निर्गन्धिवक्ररक्तपुष्पः पांगारा इति नाम्ना महाराष्ट्रभाषायां प्रसिद्धः । हरिजातो वंशः । कुण्डलीं कुण्डलाकारां वर्तुलां तृतीयां चालनीं विदध्यात् । वाजिवाला अश्वपुच्छकेशाः । अम्बरं वस्त्रम् । तदन्यतरेणाऽऽनद्धतला बद्धतला ॥ १४ ॥

**मूलम्**—मूषाम्रुत्तुष० सदा घोरं च जापयेत् ॥ २४ ॥ **टीका**—मूषा वज्रवृन्ताकादिमूषाः । मृद इष्टिकागैरिकाद्याः पञ्चमृदः । पिष्टकं गोधूमादिपिष्टकम् । धातुभेषजं हरितालादि । जीवभेषजं भूनागादि । मूलकं भेषजं चित्रकमूलदशमूलादि । गोर्वरं शुष्कगोमयचूर्णम् । शर्करा अतिक्षुद्रपाषाणखकाः । तदपेक्षया स्थूलाः श्वेताः कणाः सितोपलाः । शर्कराशब्देन वालुकाऽपि ग्राह्या । दग्धकाष्ठकठिनखण्डानामेव शिखित्रसंज्ञा कोकिलसंज्ञा च । संप्रति तेषां सामान्यमवान्तरभेदं चाऽऽह—शिखित्रा इति । पावकेन वह्निना भुक्त्वा, उच्छिष्टाः परित्यक्ता अङ्गाराः शिखित्राः कोकिलाश्च मताः । विशेषास्त्वित्थम्—वह्निना भुक्त्वा स्वयं त्यक्ताः शिखित्रा हठात्प्रतिकूलवायुधूलिक्षेपमृत्तिकादिनिपीडनादिना यत्नेन वह्नितो

वियोजिता अङ्गाराः कोकिला मता इति चेति। ताः ( ते ) प्रज्वलिता अङ्गारा जलेन विना निर्वाणाः कृता वह्निविमुक्ताः कृताः । शुष्कच्छगणमपि तत्रोपकरणत्वेन संग्राह्यम् । अतस्तत्पर्यायसहितमाह—पिष्टकमिति । शङ्खिकाः क्षुद्रशङ्खसमयपात्राणि । क्षुरका नापितस्य शस्त्रविशेषाः । पाक्यो यवक्षारः । पालिका दर्वी । कर्णिका विळीति महाराष्ट्रभाषायाम् । सा चात्र वर्तुलाकारदन्तपङ्क्तिशिखरा ग्राह्या । शालासंमार्जनमारभ्य रसपाकसमाप्तिपर्यन्तं यत्कर्म तेजःसामर्थ्यम् । निघण्टुरायुर्वेदोक्तौषधीनां कोशविशेषः । वार्तासु लोकश्रुतवृत्तान्तेषु विषये स्मरणकुशला वार्तिकाः । तादृशा नानाविधा अपि वैद्याः संग्राह्याः। अघोरमघोरमन्त्रं प्रागुक्तं विप्रद्वारा जापयेत् ॥ २४ ॥

**मूलम्**—सोद्यमाः शुचयः० दिव्यकान्तिः सदासुखी ॥ २५ ॥ **टीका**—विशिष्टान्भृत्यांस्तथा साधकं वैद्यं चाऽऽह—सोद्यमा इति । धर्मिष्ठ इति। पद्मं कमलं तदाकाररेखा हस्ततले यस्येति तथोक्तः । तथा पताकादिरेखाचिह्नितहस्ततलः । अनाम्यधःस्थरेखाङ्कः । अनामी अनामिका । तस्या अधो रेखा यस्य हस्ततले तथोक्तः । स वैद्योऽमृतहस्तवानिति कथ्यते लोके शास्त्रे च । दग्धहस्तवैद्यमाह—अदेशिक इति । अदेशिको गुरुरहितः । अदैष्टिक इति पाठे दुर्दैवयुक्तः । संप्रति कर्तव्यविविधकर्मानुरूपां वैद्यानां योजनाव्यवस्थामाह—भूतेति । बलिसाधने देवतानां नानाविधबल्युपहारदानसहितपूजासाधने । भूतत्रासनं भयोत्पादनपूर्वकं भूतानां विद्रावणं तन्मन्त्रविद्याः । रससिद्धियोग्यान्साधकान्समासत आह—शुचीनामिति । तेषां मध्येऽपि श्रेष्ठं साधकमाह—दशाष्टक्रियया सिद्धे रस इति । तस्य साधकस्यैव लोकोत्तरं कौशलमाह—हा रसो नष्ट इत्युक्तः स वेत्ताऽन्यत्र तं रसमिति । आरब्धरसकर्मकैः साधकैः पातनजारणादिकर्माणि प्रचलिते सति प्रमादेनान्तरा यदा पारदो नष्टः स्यात्तदा शोकाकुलैः, अस्माकं रसो नष्टो व्यर्थः परिश्रमो धननाशश्चेति शोचद्भिस्त्वमत्र कारणं तल्लाभोपायं च वदेत्युक्तः प्रार्थितः सोऽन्यत्रगतं तमेव रसं वेत्ता ज्ञास्यति । कथं तत्प्रकारं वर्णयामि—अशुद्धरसोपरसलोहचूर्णैः कृतबीजजारितः पारदः पतङ्गी भवति । उक्तं च रसहृदये—' यः पुनरेतैः कुरुते कर्माशुद्धैर्भवेद्रसस्तस्याः । अव्यापकः पतङ्गी न रसे रसायने योग्यः ' इति । पतङ्गः पक्षी तत्समान आकाशगामी भवेदित्येकं कारणम् । द्वितीयं च सोमानलकच्छपपातनादियन्त्रादावसम्यग्रोधनाल्लोहकारादिभिरसम्यग्घटनाद्यन्त्रक्षयेण पारदो नश्यति । उक्तं च रसार्णवे—' गन्धकस्य क्षयो नास्ति न रसस्य क्षयो भवेत् । क्षयो यन्त्रस्य विज्ञेयो यत्र विक्रियते क्रिया । यन्त्रमेकं परं मर्म यन्त्रौषध्या महाबलम् । ओषधीरहितश्चायं हठाद्यन्त्रेण बध्यते । सर्वत्र सूतको याति मुक्त्वा भूधरलक्षणम् ' इति । किंच सारणासंस्कारप्रशंसासमये रसार्णवे चोक्तम्—वह्निलक्ष्यमविज्ञाय रसस्यार्धक्षयो भवेत् । यन्त्रक्षेपवि-

धिज्ञस्य चतुर्थांशक्षयो भवेत् । द्विमासेन द्वितीयांशं तृतीयांशं त्रिभिर्भवेत् । महाग्निं सहते ह्येष सारितो यत्र तिष्ठति ' इति । यन्त्रवैगुण्येन पारदः क्षीण इति भाति । अभ्रकसत्त्वेन पक्षच्छेदाभावोऽपि तृतीयः पारदनाशहेतुः प्रसिद्ध एव । एवमनग्निसहः पारदो बीजादिजारणायां नश्यति । अत्यग्नितोऽपि नश्यति । अस्थिरद्रव्यसत्त्वानां बिडानां च स्थैर्यकरणसंस्काररहितानां जारणादावुपयोगेन तैः सह पारदस्तदा नश्यति । अत एवैतेषां पारदस्य च जारणासंस्कारात्प्राक्स्थिरीकरण-संस्कारो रससारे पूज्यपादैः प्रकाशितः । स चात्र द्वितीयाध्याये रसकवर्णनव्याख्यायां मयाऽपि संगृहीतो द्रष्टव्यः । कुमार्यादिरसमर्दने वैगुण्येन स पारदो मलरूपेण गच्छति । सोमानलपातनढेकीयन्त्रादौ सूक्ष्मच्छिद्रेण जलयोगे क्षालनादौ च प्रमादेन स जलरूपेण गच्छति । जारणायां प्रमादेन रसकयोगे सति, आकाशे धूम-वदुगत उत्पत्य च गृहादावुपरि संलग्नो भवति । मर्दनमूर्छनादौ प्रमादेन हंसगत्या यन्त्राद्बहिरुत्प्लुत्य विकीर्णो भवति । गौरीपाषाणहरितालाद्याग्नेयद्रव्येण स्थैर्यसंस्कार-शून्येन जारणादावुपयुक्तेनोर्ध्वं गत्वा नश्यति । एवं नाशकारणानि बहूनि सन्ति । तेषां मध्ये कतमेनायं नष्ट इति ज्ञात्वा यया युक्त्याऽऽग्नेयद्रव्ययोगेना( णा )त्यग्निना च नष्टं तं विहाय कारणान्तरेण नष्टं पारदं प्रायोभावेन युक्त्या स्वस्थाने चाऽऽनेतुमपि शक्नुयात्स साधकः कुशल इति भावः । रससिद्धपुरुषस्यैश्वर्यमाह—रससिद्ध इति ॥ ३५ ॥

इति वामनात्मजचिन्तामणिविरचितायां रसरत्नसमुच्चयटीकायां सरलार्थप्रकाशिन्याख्यायां सूत्रस्थाने सप्तमोऽध्यायः ॥ ७ ॥

---

## अथाष्टमोऽध्यायः ।

**मूलम्**—अथ परिभाषा । कथ्यते सोमदेवेन० रसस्योत्तमसिद्धिदा ॥ १ ॥

**टीका**—इह रसशास्त्रे विशेषतः पारदसंस्कारोपदेशेषु द्रव्यगुणक्रियाविशेषबोधकाः सांकेतिकाः शब्दा बहवः सन्ति । तेषां चोपदेशमन्तरेणार्थः प्रायो नावबुध्येत । अतोऽत्र तद्बोधार्थं सोमदेवोक्तपरिभाषाश्लोकपाठं संगृह्णाति—कथ्यत इति । शास्त्रे रसनिगमरसार्णवादितन्त्रे या परिभाषा भाषितोक्ता तथा सिद्धैः रससिद्धैः षष्ठाध्यायोक्तैर्या चोक्ता सैव परिभाषा वक्ष्यमाणप्रकारेण सोमदेवेन कथ्यते । किमर्थं, मुग्धवैद्यानां प्रकृष्टबोधार्थम् । मुग्धवैद्या यथाश्रुतमात्रग्राहिणः । ऊहापोहकरणासमर्था इत्यर्थः । तत्राऽऽदौ शास्त्रसंमतं वैद्यदेयभागं विविधमाह—अर्धमिति । सिद्धरसस्य सुपाकस्य प्रयोगार्हस्य कामधेनुवन्यपअरादिरसायनाख्यरसस्य रोगवारणमात्रकरपञ्चामृतपर्पट्यादेश्च वैद्यादीनां साह्येन नरमता कारितस्यार्धमर्धभागो भिषजे देयः । किमर्थम् । धन्वन्तरिप्रीत्यर्थं स्वस्याऽऽरोग्यसुखलाभाय च । तथा तैलादेरष्टमो भागः ।

सम्यगुसिद्धलोहादेः सप्तमो भागः । एवं विविधो भागो रोगिभिर्दीयतेऽसौ धन्वन्तरिभागोऽश्विनीकुमारभागो वोच्यते । संप्रति रुद्रभागमानमाह—भैषज्येति । मया प्रेषितेभ्यो गदिभ्यो यावद्द्रव्यं गृहीत्वा कषायचूर्णाद्युपयोगिभेषजं विक्रीणासि तद्द्रव्यसंबन्धिभागः कश्चिन्मह्यं देयः । एवं कृते तव मम चोभयोरेव द्रव्यलाभो भविष्यतीति संकेतं कुर्वन्ति भिषजः । तद्द्रव्यभाग एकादश एव भिषग्भिर्ग्राह्यः । यदि चाल्पमूल्यं भेषजं मूल्यवर्धनेन गदिभ्यो दापयेत्, अधिकरुद्रांशं गृहीत्वा वणिग्भ्यः स वैद्यो विश्वासघातदोषास्पदं भवेत् । भैषज्यं क्रीणीतं ( क्रीतं )येन द्रव्येण तद्द्रव्यं भेषजक्रीतम् । छन्दःसाधनार्थं ह्रस्वणकारेकारोच्चारणम् (?) । अथ कज्जलीलक्षणमाह—धातुभिरिति । धातवश्च—'स्वर्णं रूप्यं च ताम्रं च रङ्गं जसदमेव च । सीसं लोहं च सप्तैते धातवो गिरिसंभवाः' इति । आद्यशब्देन हरितालमनःशिलादिसंग्रहः । चकारेणोपधातुसंग्रहः । तेषां भागो रससमो विषमो वा यथोपदेशं ग्राह्यः । सैव कज्जलीद्रवं दत्त्वा मर्दिता चेद्रसपङ्कसंज्ञां लभते । कज्जल्युपयोगश्च रससिन्दूरादिविधानार्थं बोध्यः । रसपङ्कोपयोगं त्रैलोक्यसुन्दररसादिविधानार्थं वक्ष्यति । अथ पिष्टीलक्षणमाह—अर्कांशेति । निष्कार्धतुल्यान्निष्कार्धरूपभागमितादित्यर्थः । गन्धकादर्कांशतुल्यादसतोऽर्कशब्दो द्वादशसंख्याबोधकः । तत्संख्याका येंऽशा भागा निष्कार्धात्मका भागास्तत्तुल्याद्रसात्पारदात् । निष्कार्धेत्युपलक्षणं गृहीतकिंचिन्मानस्य । तेन गन्धकस्य यो भागस्ततो द्वादशगुणितः पारदभागोऽत्र ग्राह्य इत्यर्थः । यथोक्तभागमुभयं पृथग्गृहीत्वा तीव्रेऽर्कातपे लोहे खल्वे त्रुटिश ईषन्मानेन पुनः पुनर्दत्त्वा मर्दनान्नवनीतरूपा मृदुला नवनीताख्या च पिष्टी भवति । अत्र नवनीताख्यो गन्धको भक्ष्यः पारदश्च भक्षकः । स तु नानारूपपिष्टीषु समान एव । अतो भक्ष्यनाम्ना भेदबोधकेनेयं नवनीताख्येत्यभिधीयते । अस्या नामान्तरं गन्धकपिष्टीति । "गन्धको गन्धपाषाणः शुकपिच्छः सुगन्धकः । सौगन्धिकः शुल्बरिपुः पामारिर्नवनीतकः" इति ग्रन्थान्तरवचनम् । अत्र विशिष्टभागसंख्याऽविवक्षिता । दशभागपारदस्यैकभागगन्धकस्य च मर्दनेन गन्धकपिष्टिकाया नित्यनाथेनोक्तत्वात् । एवं जारणायां यद्यद्भक्ष्यमभ्रकसत्त्वं सुवर्णादिशुद्धलोहं च पादसमभागं विषमभागं वा व्यस्तं समस्तं वा रसेन भक्षितं चूर्णरूपं भवति तत्तन्नाम्नैवाभिधीयते । यथाऽभ्रकपिष्टिः स्वर्णपिष्टी रजतपिष्टिस्ताम्रपिष्टिर्लोहपिष्टिरिति । रसार्णवे तु साधारणं पिष्टिलक्षणं निजगाद—'रसागिलीत आहारः पिष्टिकेत्यभिधीयते' इति । तत्र रसालिङ्गित इत्यपि पाठः । केचित्तु—अर्कस्ताम्रं पारदं गन्धकं च प्रत्येकं निष्कार्धमितं गृहीत्वाऽऽतपे खल्वमध्ये त्रुटिशो दत्त्वा संमर्य कृतं मृदु चूर्णं पिष्टिसंज्ञकं भवतीत्यर्थं वदन्ति । पिष्टिविषये परमतमाह—खल्व इति । अथ पातनपिष्टिलक्षणमाह—चतुर्थांशेति । चतुर्थांशं शुद्धं स्वर्णचूर्णं पारदमध्ये प्रक्षिप्य तप्तलोहखल्वेऽम्लरसेन जम्बीरादिजेन यामपर्यन्तं द्वियामपर्यन्तं वा मर्दनेन संजाता चूर्णरूपा सा हेमपिष्टिकाऽपि पातनोप·

योगेन सिद्धिकरत्वात्पातनपिष्टिरित्यभिधीयते । तादृशीं पिष्टिं कृत्वा पातनायन्त्रेऽधस्थपात्रान्तस्तल ऊर्ध्वभाजने वा लिप्त्वा प्रहरचतुष्टयपर्यन्तमग्नियोगेनोर्ध्वं पारदं पातयेत् । तदनन्तरं पारदात्पृथग्भूत्वाऽधोभागस्थतत्स्वर्णचूर्णमूर्ध्वलग्नपारदं च यन्त्राद्बहिर्निष्कास्यैकीकृत्य पुनस्तप्तलोहखल्वेऽम्लेन रसेन पूर्ववन्मर्दयित्वा पूर्ववत्पातयेत् । एवं शतधा पातनेन क्षीणो गतिरहितो निर्दोषः पारदः स्थिरोऽग्निसहो भवति । ततश्च बीजादिजारणक्रमेणाल्पायासेनैव देहलोहकरत्वरूपोत्तमसिद्धिप्रदश्च भवतीत्यर्थः । उक्तं चाऽऽचार्येणात्र द्वितीयाध्याये नागार्जुनवचनम्—' रसश्च रसकश्चोभौ येनाग्निसहनौ कृतौ । देहलोहमयी तस्य दासी सिद्धिर्न संशयः ' इति । ' वह्निपारदयोर्वैरं तयोर्मित्रेण मित्रता ' इति रसार्णवोक्तयुक्तिवचनेनैव पारदस्य वह्निसहत्वं मित्रसुवर्णयोगेन संपद्यत एवेति भावः ॥ ९ ॥

**मूलम्**—रूप्यं वा जातरूपं वा० सर्वारोग्यसमन्वितः ॥ २० ॥ **टीका**—अथ कृष्टीलक्षणमाह—रूप्यमिति । जातरूप्यं सुवर्णम् । आदिशब्देन माक्षिकहिङ्गुलादिपरिग्रहः । तैर्मारितं पुनः पुनः पञ्चमित्रसंस्कारेण प्रकृत्यवस्थापन्नं कृतम् । एवं सप्तवारं दशवारं वोत्थापितस्वर्णतारं च क्रमेण हेमकृष्टी तारकृष्टी चाभिधीयते । रसगन्धादियोगेन मलव्यपोहनादुज्ज्वलमुत्कृष्टं साररूपं स्वर्णं तारं चेत्यर्थः । तां स्वर्णकृष्टीं द्रुते हीनवर्णस्वर्णे क्षिपेत् । तेन क्षेपेण वर्णो न हीयते तत्स्वर्णं हीनवर्णं न दृश्यते । पूर्णवर्णं दृश्यत इत्यर्थः । एवमेव हीनवर्णतारे तारकृष्ट्याः क्षेपेणापि तारं पूर्णवर्णं भवतीत्यर्थोऽपि बोध्यः । कृतं कल्पितं संस्कृतमित्यर्थः । बीजं शुद्धं स्वर्णोत्पादकं लोहधात्वादिपारदस्य पीतवर्णत्वकरं भवेत् । रसहृदयेऽष्टभावबोधे पारदस्य कृष्टिमपि पूज्यपादा उदाजहरुः । यथा—' तालकदरदशिलाभिः स्नेहक्षाराम्ललवणसहिताभिः । समकद्विगुणत्रिगुणान्पुटो वहेद्वङ्गशस्त्रादीन् । रक्तस्नेहनिषेकैः शेषं कुर्याद्रसस्य कृष्टिरियम् । चारणजारणमात्रात्कुरुते रसमिन्द्रगोपनिभम् ' । तालकं वङ्गतो द्वादशांशं प्रथमपुटे दत्त्वा पुटेत् । एकादशांशतालेन द्वितीयं पुटं दशांशेन तृतीयमिति क्रमेण यावत्समभागाप्तिस्तावत्तालेन वङ्गं पुटेदित्यर्थः । तद्वद्धिङ्गुलेन तीक्ष्णं तावत्पुटेद्यावद्द्विगुणभागाप्तिः, त्रिगुणभागाप्तिपर्यन्तं शिलया नागं पुटेत् । तादृशधातुगर्भितं रसं स्नेहादिभिः शेषं कुर्यादिति भावः । अथ हेमरक्तीताररक्त्योर्लक्षणं फलं चाऽऽह—ताम्रमिति । तीक्ष्णलोहेन समभागेन संयुक्तमेकीकृतं ताम्रं बहुवारं द्रुतं कृत्वा गन्धकसहिते लकुचरसे निर्वापयेत् । तद्वल्लोहमिति ख्यातं तारस्य रञ्जनीद्रुते तस्मिन्निक्षेपणेत्यर्थः । ताररक्तीकरणार्थं तु वरलोहेन तारमेव धमनेनैकीकृत्य रक्तीकृतं कार्यं साऽपि रूप्यस्य बीजानां च रञ्जनी रक्तवर्णोत्पादिका । तत्र हेम सविस्तरं रक्त्या स्वर्णे रक्तवर्णोत्पादकं विधिं रसरत्नाकरे नित्यनाथ उदाजहार—' निष्कषोडशतुल्यं च मृतहिङ्गुलगन्धकम् ।

टङ्कणं च तथैकैकं योज्यं निष्कचतुष्ककम् । सर्वमेतद्दिनं मर्द्यं त्रिधारास्नुह्यकान्वितम् । निष्कमात्रां वटीं कृत्वा श्रेष्ठे स्वर्णे द्रुते क्षिपेत् । एकामेकां निष्कमात्रां मूषामध्ये शनैर्धमेत् । जीर्णे पुनः पुनर्देया एवं सर्वाः प्रदापयेत् । गुञ्जावर्णं भवेत्स्वर्णं ख्यातेयं हेमरक्तिका । अष्टवर्णसुवर्णस्य द्रावितस्य दशांशतः । क्षिपेत्तज्जायते सप्तत्यष्टवर्णं सुवर्णकम् ' इति । एवमेव ताररक्त्या वर्णोत्पादको विधिः सविस्तर उदाहर्तव्यः । संप्रति तारदलस्य स्वर्णदलस्य च लक्षणमाह—मृतेनेति । मृतेन भस्मीभूतेन पारदेन येन केनचिद्द्रव्येण बद्धो यः पारदस्तेन बद्धपारदेन मृतेन लोहेन वा साधितं संस्कृतमन्यलोहं विजातीयं लोहं सितत्वमुपागतं प्राप्तं श्वेतवर्णविशिष्टम् , अथवा पीतत्वमुपागतं प्राप्तं पीतवर्णविशिष्टं भवेत् । तत्क्रमेण चन्द्रदलमनलदलं स्वर्णदलं शास्त्रे प्रसिद्धम् । अनलः स्वर्णम् । कृत्रिमरजतं कृत्रिमस्वर्णं चेत्यर्थः । रवा इति नाम्ना लोके प्रसिद्धम्—तत्राऽऽदौ भस्मसूतेन साधितलोहस्यानलदलोदाहरणं यथा—' शुद्धसूतसमा राजी शुद्धपादं च गन्धकम् । मृद्भाण्डे पाचयेच्चुल्ल्यां धत्तूरद्रवसंयुतम् । वासाकाष्ठेन संमर्द्य द्रवं देयं पुनः पुनः । एवं दिनत्रयं कुर्याज्जायते भस्मसूतकम् । तन्मर्द्यं मातुलुङ्गाम्लैर्दिनमेकं च तेन वै । चतुःषष्टितमांशेन तारपत्राणि लेपयेत् । रुद्ध्वा गजपुटे पच्यादेवं वारत्रये कृते । तत्तारं जायते स्वर्णं महादेवेन भाषितम् ' इति रसरत्नाकरे । तत्रैव खोटबद्धेन पारदेन विद्धस्य तारस्यानलदलोदाहरणं यथा—' दशनिष्कं शुद्धसूतं निष्कैकं शुद्धगन्धकम् । स्तोकं स्तोकं क्षिपेत्खल्वे मर्दकेन शनैः शनैः । कुट्टनाज्जायते पिष्टी सेयं गन्धकपिष्टिका । भागत्रयं शुद्धसूतं भागैकं शुद्धहाटकम् । अम्लेन मर्दयेद्यामं ख्यातेयं स्वर्णपिष्टिका । गन्धपिष्टी स्वर्णपिष्ट्या समया वेष्टयेद्बहिः । वस्त्रेण बन्धयेद्गाढं स्तनाख्ये लोहसंपुटे । निधाय पोटलीं मध्ये समतुल्यं च गन्धकम् । क्षिप्त्वा निरोधयेत्संधिं म(मृ)ल्लोणेन च पाचयेत् । भूधराख्ये पुटे पच्याज्जीर्णे गन्धं पुनः पचेत् । षड्गुणे गन्धके जीर्णे शनैर्वस्त्रं निवारयेत् । पुनः समं समं गन्धं दत्त्वा जार्यं शनैः शनैः । निःशेषं नैव कर्तव्यं प्रमादाद्यदि सूतकम् । एवं तु षड्गुणं जार्यं यन्त्रादुद्धृत्य पिष्टिकाम् । तत्तुल्ये संपुटे हेम्नि रुद्ध्वा बाह्येऽथ वेष्टयेत् । कुमारीद्रवपिष्टेन काचेनाङ्गुलमात्रकम् तद्बहिष्टङ्कणेनैव लोणमृत्तिकयाऽपि च । वेष्टयमङ्गुलमानेन प्रतिलेपेन शोषयेत् । कोष्ठीयन्त्रकृतं धाम्यं वङ्कनालैर्दृढाग्निना । तत्खोटं जायते दिव्यं सिन्दूरारुणसंनिभम् । तेन वेधं तु तारस्य द्रुतस्य शतमांशतः । देयं तज्जायते स्वर्णं सिद्धयोग उदाहृतः ' इति । एवं मृतरसेन बद्धेन च चन्द्रदलोदाहरणमपि रसनिगमनागार्जुनादिग्रन्थेऽन्वेषणीयम् । मृतलोहेन लोहान्तरस्य सितत्वकरं चन्द्रदलोदाहरणं रसहृदये यथा—' ताराकृष्टिं वक्ष्ये मृतवङ्गं तालकेन तुल्यांशम् । लम्बितमथ निर्ध्मातं ताम्रं तारच्छविं वहति । पश्चान्नागं देयं प्रकाशमूषासु निर्मलं यावत् । तावद्ध्मातं विधिना सुनिर्मलं निस्तरङ्गं तु ' इति । निस्तरङ्गं नागोर्मिवर्जितं यावत्स्यादित्यर्थः । पश्चात्ताम्रवङ्गयोगान्तरम् । तथा

मारितताम्रनागाभ्यां निर्व्यूढतारस्य हेमदलोदाहरणं यथा—' माक्षीकनिहतं शुल्वं शिलानिहतनागतुल्यांशम् । पुटितं जम्बीररसैः सैन्धवसहितं पचेत्स्थाल्याम् । तच्चूर्णं घृतमधुटङ्कणसहितं च गुप्तमूषायाम् । तारे त्रिगुणं व्यूढं हेमाकृष्टिर्भवेद्दिव्या ' इति । स्थाल्यां मृद्भाजने । संप्रति विषयसंकोचेनैतस्यैव संज्ञाद्वयस्य विधायकमन्येषां रससिद्धानां मतमाह—आवासेति । आवासः पारदस्य नियमेन निसर्गत एव वसतिस्थानं यद्यद्द्रव्यं रसकहरितालगौरीपाषाणाभ्रकप्रमुखरसोपरसादि तेनैव कृतो बन्धो यस्य । तथोक्तेन बद्धपारदेन सहैकीकृतं संस्कृतं लोहमन्यलोहेन वा साधितं विजातीयं लोहं सितं पीतं वा भवति । तदेव क्रमेण तद्दलं चन्द्रदलमनलदलमिति च ख्यातम् । एतन्मते मृतपारदेन दिव्यौषधीशिलोदकस्त्रीपुष्पादिबद्धपारदेन वा मृतलोहेन वा संस्कृतस्य लोहस्य सितत्वं पीतत्वं वा प्राप्तस्य न चन्द्रदलसंज्ञा स्वर्णदलसंज्ञा वा, इति विषयसंकोचो बोध्यः । संप्रति शुल्वनागलक्षणमाह—माक्षिकेणेति । समभागमाक्षिकेण मारितं ताम्रं पञ्चमित्रसंस्कारेण समुत्थितं कुर्यात् । एवं दशवारं कृत्वा तद्वत्ताम्रवन्माक्षिकेणैव मारितं विशुद्धं नागं तदुभयं मिथः समं चतुष्पलमितं गृहीत्वा पुनर्नीलाञ्जनेन समभागेन मारितं पञ्चमित्रसंस्कारेण पुनरुत्थापितं कुर्यात् । एवं सप्तवारं मारणपूर्वकोत्थापनेन संशुद्धमेतद्द्रव्यद्वंद्वं रसशास्त्रे शुल्वनागमिति कीर्तितम् । तदुपयोगमाह—साधित इति । तच्चूर्णं पारदेन समभागेन शुद्धेन सहाजमूत्रेण संमर्द्य वज्रमूषायां ध्मानेन जातं खोटं शोधनगणेन सह ध्मानाच्छुद्धं कृत्वा तं खोटबद्धं पारदं मुखमध्ये यो धारयेत्तस्य मेहसमूहनाशो भवेत् ॥ २० ॥

**मूलम्**—लोहं लोहान्तरे क्षिप्तं० तत्ताडनमुदाहृतम् ॥ २१ ॥ **टीका**—पिञ्जरीलक्षणमाह—लोहमिति । यथा जसदं मूषायां ताम्रे निक्षिप्य ध्मानेनैकीभूतं पत्रजाद्यौषधीरसे पीतवर्गजरसे वा निक्षेपात्पित्तलं भवति तद्वदन्यदपि तादृग्वर्णं संकीर्णलोहं पिञ्जरीवाच्यं भवति । सा, ओषधीपत्रजा शब्दवाच्या । यस्या उत्पत्तौ कारणं बीजस्थाने पत्रमेव भवति । चीरितपत्रा ह्रस्वक्षुपविशेषरूपा चेयमुपवन उत्पद्यते । चन्द्रार्कं लक्षयति–भागा इति । आवर्तिता ध्मानेनैकीभूतरसरूपा इत्यर्थः । भास्वतस्ताम्रस्य । चन्द्रार्कस्य खोटबद्धरसेन वेधात्कनकोत्पत्तिश्च रससारेऽभिहिता । तथा च तद्ग्रन्थः—' बीजचूर्णं पलैकं तु माक्षिकस्य पलं तथा । पलैकं गन्धकं चैव पलैकं पातितं रसम् । पलैकं टङ्कणं चैव बन्धनौषधिभावितम् । धमनाज्जायते खोटो रञ्जयेद्गन्धकेन तम् । समहेम्ना च संसार्य मारयेत्पुटयोगतः । चन्द्रार्कं षष्टिवेधेन करोति कनकं शुभम् ' इति । गन्धकेन रञ्जनं तु गन्धकजारणया कार्यम् । ' ब्रह्मदण्डी त्रिदण्डी च रुदन्ती चैव वानरी । मुद्गपत्री त्रिशूली च शङ्खी वज्री तथैव च । अष्टौ चैताः प्रयोक्तव्या ओषध्यो बन्धने सदा ' इति बन्धनौषध्यः । अथ निर्वाहलक्षणमाह—साध्यलोह इति । यस्यां क्रियायां

साध्यलोहे निर्वाह्ये लोहे द्रुते सति तस्मिंस्तत्रान्यलोहं वङ्कनालतः प्रक्षिप्तं वङ्कनालजध्मानेनैव द्रुतं कृत्वा प्रक्षिप्तं भवतीत्यर्थः। वङ्कनालेत्युक्त्या भस्त्रादिजध्मानव्यावृत्तिः । निर्वाहणमेकीकरणमिति यावत् । निर्वापणं निर्वाहणं चेत्यनर्थान्तरम् । एकीकरणार्थकनिर्वापणशब्दप्रयोगस्तु संप्रति नोपलभ्यते । किंतु सर्वत्र तदर्थे निर्वाहणशब्द एव प्रयुक्तो दृश्यते । एतच्च निर्वाहणं प्रायो बीजादिसंस्कारार्थं क्रियते। यथा पारदोदरे बीजानां गर्भद्रावणयोग्यतासंपादनार्थं निर्वाहणसंस्कारं व्याजहार रसहृदये--'मृतनागं मृतवङ्गं मृतवरशुल्वं मृतं तथा तीक्ष्णम् । एकैकं हेमवरे शतनिर्व्यूढं द्रवति गर्भे च ' इति । एकगुणस्वर्णे नागाद्यन्यतमं शतगुणनिर्वाहितं कार्यमित्यर्थः । एवं संस्कृतं स्वर्णं वरबीजं भवति । अथ निर्वापणद्रव्यभागानुक्तिस्थाने तद्द्रव्यस्य कियद्भागप्रक्षेपः कार्यस्तदाह–क्षिपेदिति । क्षिपेन्निर्वाहयेदित्यर्थः । क्षेपसामान्यादनुक्तावापद्रव्यमानमप्याह–आवाप्यमिति । आवापलक्षणमस्मिन्नेवाध्याये वक्ष्यति । वापनीये लोहाद्ये द्रुते द्रव्ये । तत्र भागे दृष्ट उक्ते तु दृष्टवदुक्तभागमितमेव तन्निर्वाहणद्रव्यमावापद्रव्यं च क्षिपेत् । मृतलोहस्य बोधकानां विविधपारिभाषिकशब्दानां लक्षणान्याह--मृतमिति । तल्लोहं वारितरमुच्यते यन्मृतं सत्तोये प्रक्षिप्तं तरतीति । तल्लोहं रेखापूर्णमुच्यते यन्मृतमङ्गुष्ठतर्जनीमध्ये संमर्दितं तयोः सूक्ष्मरेखान्तरं प्रविशेदिति। अथ पूर्णमृतं तल्लोहमपुनर्भवमुच्यते। यत्प्रत्येकं समभागैर्गुडादिभिः समस्तैः सह मिश्रितं पिण्डीकृतं मूषामध्ये प्रक्षिप्य ध्मानेन प्रकृतिं पूर्वावस्थामामलोहभावं न प्राप्नुयादिति । अथोत्तमाख्यमृतलोहलक्षणमाह--यद्वा पूर्णमृतं यल्लोहं वारितरं स्वपृष्ठ उपनीतं धान्यं धारयति । धान्यभारं सहत इत्यर्थः । तत्र लोहे तद्धान्यं कथं तरति तदुपमयाऽऽह--यथा जले हंसविशेषास्तरान्ति तद्वत् । तथा धान्यभारसहं तन्मृतलोहमुत्तममिति नाम्ना शास्त्रे कीर्तितम् । अत्र बहुषु पुस्तकेषु-ऊनमं परिकीर्तितमित्यपि पाठः । तस्य स्वयमूनमूनभारं लघ्वपि यल्लोहं स्वापेक्षया गुरुद्रव्यं गुरुधान्यं वा माति सहत इति व्युत्पत्त्या क्लिष्टार्थबोधकः स पाठो नातिप्रियः । अथापुनर्भवाख्यमृतलोहस्यैव निरुत्थसंज्ञाप्रापकं लक्षणमाह—रौप्येणेति । संयुक्तं मेलापकमध्वाज्यं दत्त्वा मूषायां संयोजितं न लगेत् , न सज्जेतैकीभावं न प्राप्नुयादित्यर्थः । एकीभावश्च रौप्यमानवृद्ध्या बोध्यः । स्पष्टीकृतं चैतद्रससंकेतकलिकायाम्--' लोहमध्वाज्यगं तारं स्वप्रमाणं भवेद्यदा । ( ध्मातं चेत्पूर्वमानकमिति पाठः ) तदा लोहं निरुत्थं स्यादन्यथा साधयेत्पुनः ' ॥ इति । तारं शुद्धं तारम् । अथ जारणासंस्कारे प्रक्षेपार्हस्य बीजस्य लक्षणमाह—निर्वाहणेति । निर्वाह्यते प्रक्षेपेणैकी क्रियतेऽनेनेति व्युत्पत्त्या निर्वाहणशब्देन निर्वाहकं द्रव्यं ग्राह्यम् । प्रक्षेपेण गुणविशेषोत्पादनपूर्वकैकीभावसामान्याच्च तेन शब्देन वापनद्रव्यस्यापि संग्रहः कार्यः। एतदभिप्रायेणैव निर्वापणविशेषेणेत्यपि पाठो दृश्यते । तेन निर्वाहणेन निर्व्यूढं यद्बीजोपादानरसलोहादि तत्तद्वर्णं निर्वाहणद्रव्यस्य समानवर्णं शास्त्रनिर्दिष्टवर्णं च भवति।वापनद्रव्येण

मृदु च भवेत्तथा सत्त्वभस्मोत्पादकविधिभ्यां च प्राप्तमार्दवम् । तथा कृतो विचित्रसंस्कारो गर्भद्रावको रक्तवर्गकषाये निषेचनरूपो मेलापकद्रव्यसंयोगादिश्च यस्येत्येवंगुणाविशिष्टं रसशास्त्रे सिद्धबीजमित्यभिधीयते । बीजं द्विविधं पीतं सितं चेति भेदात् । तदपि प्रत्येकं द्विविधम् । अकृत्रिमं कृत्रिमं च । यद्धि खनिसंभूतं शुद्धं स्वर्णं रजतं वा तदकृत्रिमम् । यत्तु धातुरसोपरससंयोगक्रियाविशेषजनितस्वर्णरजतोत्पादन-योग्यतासंपन्नं पीतं स्वर्णरीत्यादि श्वेतं वङ्गादि तत्कृत्रिममित्याचक्षते । तदपि प्रत्येकं द्विविधम् । शुद्धं मिश्रं च । शुद्धमेकैकं मिश्रं मिथः संकीर्णम् । पुनरपि सर्व-मेतत्त्रिधा भवति । कल्पितं रञ्जितं पक्वं च । तत्र तत्कल्पितशब्दवाच्यं यच्छु-द्धरसोपरसशुद्धमारितं मिथः संयुक्तं मिश्रं वा लोहादिद्वंद्वीकृतमेकैकं सत्त्वकरणवि-धिना निर्वाहणेन द्वंद्वमेलापकविधिना च मिलितं शुद्धं जातमार्दवं तदेवैकीभावं व्रजति च रक्तादिवर्गेषु सेचनेन प्राप्तवर्णं रञ्जितसंज्ञकं भवति । निर्वाहणेन हेम-शेषकृतं तारशेषकृतं वा यद्बीजं भूधरयन्त्रादिषु पुटितं तत्पक्वबीजं वदन्ति । एवं चेदमुक्तलक्षणं सर्वबीजानां संग्राहकं बोध्यम् । अत्र रसोपरसानां शोधनं तु सूर्या-वर्तादिगणेन कुर्यात् । शशरक्तभावनया कान्तं शुध्यति । सौवर्णं राजतं पत्रं च लवणक्षाराम्लरविस्नुहीक्षीरैर्लिप्तं ध्मातं पश्चान्निर्गुण्डीरसे बहुवारं निषेचितं सच्छु-ध्यति । नागवङ्गघोषताम्राणि तु प्रतप्तानि निर्गुण्डीरसैकैस्तन्मूलरजःप्रवापैश्च शुध्य-न्ति । सर्वोऽपि लोहो प्रतप्तो माक्षीकदरदवापेन बहुवारं कृतेन शुध्यति । रसो-परसानां सत्त्वानि मूलोक्तविधिना पातयेत् । संप्रति बीजनिर्वाहणविधिं रसहृदयोक्तं वक्ष्यामि । प्रथमं स्वर्णमाक्षीकसत्त्वं पीतसितकार्येषु क्रमेण नागवङ्गाभ्यां निर्व्यूढं कुर्यात् । पश्चात्ताम्रेण सह द्वंद्वीकृत्य जारणार्थं पारदे देयम् । यदा तु रसाय-नार्थमपि पारदो जारितः कार्यस्तदा तु नागवङ्गोपयोगो न कार्यः । किंतु घन-सत्त्वं रविणा रसायने द्वंद्वकं योज्यम् । रक्तगणपातभावितगिरिजतुमाक्षीकगैरिकदरदैः । वक्ष्यमाणच्छागास्थिजमूषायां घनसत्त्वं शुद्धं ताम्रं च दत्त्वा ध्मानेनैकीकृत्य तत्र रक्तगणे क्षिप्त्वा भावितानि घर्मे पुटितानि शिलाजतुमाक्षीकहिङ्गुलानि तेषामसकृ-द्वापेन संयुक्तघनसत्त्वरविशेषं कुर्यादित्यर्थः । 'मृदुलताभ्रकान्तघनसत्त्वं मृतनागतीक्ष्ण-कनकं च । व्यस्तं समस्तं वा कुर्वीत बीजशेषं दरदशिलातालमाक्षिकैर्वापात् । मृत-नागं वङ्गं वा शुल्वं घनसत्त्वतारकनकं वा । ध्मातं तदेव सर्वं गिरिणाऽधिकशो-धनैर्वापात्' । गिरिणा शिलाजतुना । अधिकशोधनैः पूर्वोक्तैर्दरदशिलातालमाक्षिकैः । रक्तगणं पीतं वा माक्षीकराजावर्तमथो विमलम् । एकतमं वा । गैरिककुनटीक्षिति-गन्धकखगैर्वार्तैर्निर्व्यूढ एव रसो रागादि गृह्णाति बन्धमुपयाति । 'मृतलोहोपरसा-द्यैर्निर्व्यूढं भवति शृङ्खलाबीजम्' । मृतलोहादिभिः पूर्वोक्तरीत्या निर्व्यूढैस्तैः कृत्वा निर्व्यूढं बीजं शृङ्खलाबीजं भवति । उत्तरोत्तरं रञ्जकं भवतीत्यर्थः । रञ्जि-

तद्बीजं तत्फलं चाऽऽह—' बीजमिदं रक्तगणे निषेचितं तेन कृतवापम् । चारितजारितमात्रं सूतं रञ्जयति बध्नाति ' । पारदे शीघ्रजारणार्थं बीजपाकमाचार्यो रससारे प्रोवाच— ' हेमशेषं कृतं बीजं चूर्णयेद्रेत( च )नेन तु । मूत्राम्लक्षारकासीसं चित्रं काङ्क्षीकटुत्रयम् । जारणौषधिकाषायं तत्र लोध्रसमन्वितम् । सप्ताहं शुल्बजे पात्रे धृत्वा वस्त्रेण गालयेत् । भावयेद्बीजचूर्णं तु त्र्यहं च भूधरे पुटेत् । एवं सप्त-पुटा देया भावयित्वा पुनः पुनः । धान्याभ्रमभ्रसत्त्वं वा बीजवत्पुटयेत्सुधीः । सूतेन्द्रो जीर्यते क्षिप्रं यथाऽन्नं जठरानलः । अथवा बीजचूर्णं तु मारयित्वा त्रिग-न्धकैः । माक्षीकसंयुतं कृत्वा पचेद्द्वादशभिः पुटैः । मूत्राम्लैर्भावयित्वा तु रुद्ध्वा च भूधरे पुटेत् । इच्छया सर्वबीजानां द्रुतिं कुर्याच्च पूर्ववत् । द्रुतिं चरति सूतेन्द्रो यथाऽऽज्यं च हुताशनः ' इति । एवंविधिना कल्पितं रञ्जितं पक्वमिति भेदात्सर्वं बीजं जारणयोग्यं त्रिधा भवतीति बोध्यम् । तस्य च बीजस्य बीजो-पादानशुद्धधातुपत्रस्य रसोपरससत्त्वविशेषस्य च जारणावसरे गर्भद्रावकः संस्कारो विविधः कर्तव्यो भवति । पारदगर्भे द्रावणार्थम् । तमपि पूज्यपादोक्तं वक्ष्यामि । तत्र केवलसत्त्वं पारदः साकल्येन भक्षितुं न शक्नोति । किंतु बीजेन द्वंद्वी-कृत्य ततो द्वंद्वमेलापकविधिना निर्वाहितं चैकीकृतमेव ग्रसति । तत्र साकल्येन चारणार्थं रसोदरे द्रावणार्थं च माक्षीकसत्त्वयोगमाह—' माक्षीकसत्त्वयोगाद्घनसत्त्वं लोहखल्वके मृदितम् । चरति रसेन्द्रः काञ्जिकवेतसजम्बीरबीजपूराम्लैः ' इति । एतन्माक्षिकाभ्राख्यं बीजचारणम् । अत्र माक्षीकसत्त्वाभ्रसत्त्वयोगो मूषायां तद्रुद्ध्वा ध्मानेन कार्यः । अथ शुल्बाभ्राख्यबीजचारणगर्भद्रावणविधिरुच्यते—' घनसत्त्वशुल्ब-माक्षीकं समभागनियोजितं तथा मिलितम् । तच्छुल्बाभ्रं कथितं चरति रसो जीर्यति क्षिप्रम् । इति ताप्यशुल्बसहितं घनसत्त्वं लोहखल्वके घृष्टम् । चरति रसेन्द्रः काञ्जिकवेतसजम्बीरबीजपूराम्लैः ' इति । अथ तालकसत्त्वयोगेन संस्कृतं कान्ताभ्रसत्त्वाख्यबीजमाह—' सत्त्वं घनस्य कान्तं तालकयुक्तं सुरुन्धितं ध्मातम् । वारैस्त्रिभिरिह सत्त्वं भवति रसेन्द्रबन्धकारि परम् ' । अथ लोहाभ्रसत्त्वाख्यबीजस्य संस्कारमाह—' लोहे चाभ्रकसत्त्वं तालकसमभागसारितं चरति । अभिषवयोगाच्चाङ्-गुलिमृदितं गर्भे च तद्द्रवति ' । अत्र लोहं त्रयोदशलोहान्यतमं शुद्धं मृतं ग्राह्य-म् । अङ्गुलिमृदितम् । एकीकृत्याङ्गुलिनैव मर्दनं कार्यम् । अभिषवयोगात्तादृश-मर्दनयोगादित्यर्थः । सारितमेकीकृतं संमिलितमित्यर्थः । वङ्गाभ्राख्यबीजयोगमाह— ' वङ्गमथो घनसत्त्वं तालकसमभागसारितं चरति । अभिषवयोगाच्चरति व्रजति रसो नात्र संदेहः ' । अथ खोटभस्मना सुरञ्जितघनसत्त्वस्य चारणम्यु( मु )च्यते—' इति तीक्ष्णशुल्बनागं माक्षीकयुतं च तत्कृतं खोटम् । तद्भस्म च पुटविधिना निर्व्यूढं सत्त्वरञ्जकं भवति । चार्यं यत्नेन रसे घनसत्त्वं तद्विधं घनं तस्य । संयोज्य सर्वबीजं निर्वाह्यं द्वंद्वसंकरतः ' । घनसत्त्वं रञ्जितं तद्घनसत्त्वं चार्यम् । अथवा सर्वबीजं द्वंद्वमेलनविधिना घनसत्त्वे द्वंद्वीकृत्य तेन निर्व्यूढं घनसत्त्वं चार्यमित्यर्थः ।

इति कल्पितो विविधघनसत्त्वाख्यबीजविधिश्चारणगर्भद्रावणार्थमुदाहृतः । अथ धातुबीजं रसोदरे द्रुतं सुखेन न भवति । अतो धातुबीजसंस्कारमाह । तत्राऽऽदौ स्वर्णसंस्कार उच्यते—'सममाक्षीककृतवापं सममाक्षीकसत्त्वसंयुतं हेम । गर्भे द्रवति च जरितं बध्नाति नान्यथा सूतम्'। कृतवापं वह्नितप्ते स्वर्णे मुहुर्मुहुर्माक्षीकचूर्णपरिक्षेपः । हेम स्वर्णपत्रं बीजीकृतं स्वर्णं वा । अत्र माक्षीकसत्त्वं त्रिदिनं रक्तवर्गरसान्तःस्थापितं ग्राह्यम् । ईदृक्संस्कारेण रजतपत्रं बीजीकृतं रजतं वाऽपि रसोदरे द्रवणार्हं भवति । अथवा वक्ष्यमाणयन्त्राध्यायस्थे पत्राणां धूपयन्त्रे कज्जल्या मृतवङ्गेन च क्रमेण धूपितानि स्वर्णपत्राणि रजतपत्राणि च पारदोदरे शीघ्रद्रुतानि भवन्ति । तद्बीजजारणेष्यते च । उक्तधूपनोत्तरं लघुपुटेन मारितं बीजसंज्ञकं स्वर्णं रजतं च पारदोदरे शीघ्रं द्रवति । अथवोक्तयन्त्रे केवलगन्धकधूमेनापि धूपितं स्वर्णरजतं नागं वङ्गं च पत्रीकृतं बीजीकृतं वा रसोदरे द्रवति । अथ खर्परसत्त्वाख्यबीजस्य गर्भद्रावणार्थं संस्कार उच्यते—'रसकं बलिना युक्तं पूर्वोक्तविधानयोगेन । पक्वं चूर्णं यावद्द्रवति भृशं द्रवति गर्भे च'। अत्र बलिधूपनार्थं समभागो देयः । पूर्वोक्तविधानं धूपयन्त्रेण धूपनरूपं तच्चात्र सत्त्वस्य पाकेन चूर्णोत्पत्तिपर्यन्तं कार्यम् । अथ येन संस्कारेण संस्कृतं बीजं दत्तं विधिना पारदोदरे शीघ्रं द्रवति तं संस्कारं शतगुणनिर्वाहाख्यमाह—'व्यूढोऽथ गन्धाश्मा शतगुणसंख्यं तथोत्तमे हेम्नि । सूते च भवति पिष्टिर्द्रवति च गर्भे न विस्मयः कार्यः'। गन्धाश्मा गन्धकः । छागास्थिभस्मकृतमूषायां स्वर्णं द्रुतीकृत्य समं गन्धकं दत्त्वा गन्धकलयपर्यन्तं धमेत् । एवं शतसंख्याकावृत्तिभिः शतगुणगन्धकव्यूढं यत्स्वर्णं तद्वरबीजमुच्यते । वरबीजं श्रेष्ठं बीजम् । एवं रसोपरसान्यतमविशेषेण शतगुणानिर्वाहे तत्तत्सर्वं वरबीजसंज्ञकं भवति । अथ रसकेन कृतं वरबीजमुच्यते—'अथवा शतनिर्व्यूढं रसकवरं शुद्धहेम्नि वरबीजम् । बीजं जरति रसेन्द्रे द्रवति च गर्भे न संदेहः'। अथ तालकस्य केवलस्य मनःशिलया सहितस्य वा निर्वाहणेन वरबीजमाह—'अथवा तालकसत्त्वं शिलया वा तच्च हेम्नि निर्व्यूढम् । शतगुणमथ मूषायां जरति रसेन्द्रो द्रवति गर्भे च'। अथ नागवङ्गशुल्बतीक्ष्णानां गर्भद्रावणार्थं विधिरुच्यते—'मृतनागं मृतवङ्गं मृतवरशुल्बं मृतं तथा तीक्ष्णम् । एकैकं हेमवरे शतनिर्व्यूढं द्रवति गर्भे च'। अत्र मृतमित्यस्याग्रेऽपि योजनीयमिति शेषः । अधुना महाबीजमाह—'समगर्भे द्रुतिकरणं हेम्नो वक्ष्याम्यहं परं योगम् । भ्रामकसस्यकचूर्णं शतनिर्व्यूढं महाबीजम्'॥ यत एतच्चूर्णं व्यूढं हेमपारदोदरे ग्रासक्रमं विहाय सहसा पारदसमभागेन दत्तमपि शीघ्रं द्रवति । तस्मादेतन्महाबीजसंज्ञम् । भ्रामकं कान्तलोहभेदः । सस्यकं मयूरतुत्थम् । तत्र प्रथमं शुद्धं मारितं द्वितीयं च शुद्धं सत्त्वरूपं ग्राह्यम् । अथ बीजपिष्टीद्रावकधूपयन्त्रविशेषयोगेन( ण ) धूमं दत्त्वा रसेन्द्रबीजकृतपिष्टीद्रावणविधिमाह—'अथवा गन्धकधूमं तालकधूमं शिलाह्वरसकस्य । दत्त्वाऽ-

धोभागमुखीं दीर्घतमां खर्परस्यार्धे ॥ ऊर्ध्वं लग्ना पिष्टी सुदृढा च यथा तथा च कर्तव्या । स्तोकं स्तोकं दत्त्वा कर्षाग्नौ ध्मापयेन्मृदा लिप्ताम् ॥ दत्त्वा खर्परपृष्ठे दैत्येन्द्रं दाहयेत्तदनु । गर्भे द्रवति हि बीजं म्रियते च तथाऽधिके दाहे ॥ कर्षाग्नौ करी( षा )ग्नौ । तदनु ध्मानोत्तरं मूषामूर्ध्वमुखीं खर्परं च तन्न्युब्ज-मुखं कृत्वा तत्पृष्ठे दैत्येन्द्रं गन्धकमल्पाल्पं दाहयेत् । अथ बिडयोगेन बीजपिष्टेर्गर्भद्रावणविधिमाह—' गन्धकतालकशैलाः सौवीररसकगैरिकं दरदम् । क्षाराम्ललवणानि बिडो माक्षीकवैक्रान्तविमलसमभागैः ॥ कृत्वा सुवर्णपिष्टीं मृदितां च सुवेष्टितामनेनैव । त्रिपुटैस्तप्ते खल्वे मृदिता गर्भे तथा द्रवति ' ॥ गन्धकादि सर्वं मिथः समभागं गृहीत्वा मर्दनेन कृतो यो बिडश्चूर्णविशेषोऽनेनैव बिडेन सह सुवर्णपिष्टीं तथाऽन्यधातुबीजपिष्टीमपि सुवेष्टितां कृत्वा तप्ते खल्वे त्रिपुटपर्याप्तकरीषाग्निना संमर्दिता सती द्रवतीत्यर्थः । शैलं शिलाजतु । सौवीरं शुक्लाञ्जनम् । रसकं खर्परिकम् । क्षारो यवक्षारादिः । अम्लं जम्बीररसादि । लवणं सैन्धवादि । वैक्रान्तं वज्रभूमिजं रज इति केचित् । विन्ध्यपर्वतपादस्थश्वेतपाषाणान्तःसाररूपः कठिनश्चाकचिक्यविशिष्टः पदार्थ इत्यन्ये । तस्य पाषाणस्य गारेत्याख्या लोके प्रसिद्धा । विमलं रौप्यमाक्षीकमिति केचित् । एतद्बिडं प्रथमं रक्तगणरसे शतवारं निर्वाहितं कुर्यात् । तद्योगेन पारदोदरे पारदसममानबीजस्य जारणार्थम् । अथ शतनिर्वाहणेन केषांचिद्द्रव्याणां ग्रासक्रमं विहाय पारदसममानेन तद्गर्भे द्रावणविधिमाह—' रक्ते शतनिर्व्यूढं नेत्रहितं भस्म वैक्रान्तकं चाथ । विमलं शतनिर्व्यूढं ग्रसति समं द्रवति गर्भे च ' । रक्ते रक्तगणे । नेत्रहिता मणयः सर्वे च कृतभसिता अत्र ग्राह्याः । ' ये केचिद्बिडयोगाः क्षाराम्ललवणानि दीप्तवर्गाश्च । सर्वे शतनिर्व्यूढा द्रुतिकारकाः कथिताः ' । रक्तगणरस इति शेषः । धातुमणिरत्नादीनां गर्भद्रुतिकारका इत्यर्थः । गर्भद्रुतौ सत्यां कर्तव्यमाह—' इति गदितां गर्भद्रुतिमभिषवयोगेण चाम्लवर्गेन(ण) । स्वेदनविधिना च ज्ञात्वा मृदितां तप्ते तु खल्वतले ' । गर्भद्रुतिं ज्ञात्वा करीषाग्निना तप्ते लोहखल्वे जम्बीररसादिना मर्दनयोगेन संमर्दितां दोलायन्त्रे स्वेदयेत् । गर्भद्रुतेर्लक्षणं यथा—' समरसतां यदि यातो वस्त्राद्गलितोऽधिकश्च तुलनायाम् । ग्रासो द्रुतः स गर्भे दत्त्वाऽसौ जीर्यते क्षिप्रम् । ' समरसतामेकीभावेन पारदतुल्यरूपताम् । एवमुक्तनानाविधवरबीजस्यापि पारदे नागं दत्त्वा निर्नागकरणेन शुद्धे सति जारणार्थं ग्रासं दद्यात् । कठिनबीजस्यापि झटिति चारणेनैकीभावार्थम् । तारबीजस्य ग्रासोऽपि वङ्गं दत्त्वा निर्वङ्गकरणोत्तरमेव देयः । सुखेन कठिनबीजग्रसनद्रावणार्थम् । अतो जारणपूर्वकनिर्नागकरणविधिमाह—' वरनागं रसराजं बीजवरं सारितं तथा त्रितयम् । गन्धकशिलालसहितं निर्नागं दीपवर्तितो भवति ' । नागजारणपूर्वकं निर्नागं भवतीत्यर्थः । बीजवरं हेमबीजम् । जारणपूर्वकनिर्नागकरणविधिमाह—' बद्ध्वा सुदृढे वस्त्रे पोट-

लिकायां शिखीकृतो दीपः । तैले मग्नं कृत्वा निर्नागं जायते क्षिप्रम् ' । सारितं मिलितं कार्यम् । वरनागादिषट्कं वस्त्रपोटलिकायां बद्ध्वा तिलतैलमग्नां च तां कृत्वा तादृक्पोटलिकायामाकाशेऽवलम्बितायामधस्तात्स्थण्डिले स्थापितप्रज्वलितदीपवर्तितापयोगेन भक्षितनागः पारदो भवतीत्यर्थः । अथ भक्षितस्य नागस्य जारणविधिमाह— ' कृत्वाऽत्र दीर्घमूषां सुदृढां ध्मातं तु भस्म गर्तायाम् । क्षिप्त्वा शिलालचूर्णं पश्चात्सूतं ततः शिलाचूर्णम् । संस्थाप्य भस्मनाऽतो ध्मातं स्यात्स्वाङ्गशीतलं यावत् । आकृष्य तत्र सूतं ज्ञात्वा नागं सुभक्षितं सकलम् । ज्ञात्वा नागं त्रुटितं पुनरपि दद्याद्यथा भवेत्त्रिगुणम् । पश्चाच्छुद्धं कृत्वा बीजवरं योजयेत्तदनु ' । गोस्तनाकारमूषोदरे प्रथमं शिलालचूर्णं तदुपरि सूतं तदुपरि मनःशिलाचूर्णं दत्त्वा भस्मकृतगर्तायां तां मूषां निधाय ध्मानं कुर्यात् । ततस्तत्क्षणे भस्मनाऽऽच्छादनं च कुर्यादित्यर्थः । यावत्स्वाङ्गशीतता स्यात् । पारदं जीर्णनागं तुलया ज्ञेयम् । एवमावृत्तित्रयेण त्रिगुणनागभक्षणं कारयेत् । ततः शुद्धिकरणं नागदोषवियोगार्थम् । ताम्रेण सह पिष्टिकां कृत्वोर्ध्वपातनं कार्यम् । तेन नागदोषो नश्यतीत्यर्थः । ततः पारदे बीजवरग्रासो देयः । अथवा तारं वङ्गं संसार्य वङ्गपरिहीनं तालकयोगेन तथा निर्वङ्गं यन्त्रयोगेण दीर्घमूषायोगेन( ण ) संसार्यैकत्र मिलितं कृत्वा वङ्गमपि त्रिगुणं जारयेत् । ततो वङ्गदोषाच्छुद्धिरपि पूर्ववत्कार्या । ततो वरबीजदानम् । ' अथवा वस्त्रनिबद्धं गिरिजतुसहितं सुवेष्टितं माषैः । पक्कं तैले वटकं निर्वङ्गं जायते नूनम् ' । तारं शिलाजतु पारदं वङ्गं चात्रापि मिलितं कृत्वा वेष्टितं वटकीं कुर्यात् । तैले तिलतैले । पिष्टीविधिना द्रावणमाह—' सूतकभस्मवरेण तु बीजं कृत्वा रसेन्द्रके गर्भे । मृदिता पिष्टीविधिना ह्यभिषवयोगाद्द्रवति गर्भे च ' । रसेन्द्रगर्भे बीजं कृत्वा मर्दनेन पिष्टिर्विधेया । सा च पिष्टिः पारदभस्मना साकं तप्तखल्वे पारदमध्ये मर्दिता चेद्द्रवति । अथ बीजवराविधानमाह—' पत्राभ्रकं च सत्त्वं काङ्क्षी वा कान्तमाक्षिकं पुटितम् । निर्गुण्डीगृहकन्याचाङ्गेरीपलाशशाकैश्च । तावत्पुटितं कृत्वा यावत्सिन्दूररसप्रभं भवति । तत्पादशेषलवणं हण्डिकपाकेन पाचितं सुदृढम् । एकैकं शतनिर्व्यूढं बीजवरं जारयेद्रसेन्द्रस्य । गर्भे द्रवति क्षिप्रं ह्यभिषवयोगेण मृदितमङ्गुल्या ' । निर्गुण्ड्यादिरसेनैकैकं घर्मे पुटितं कार्यम् । ततश्चतुर्थांशेन सैन्धवं दत्त्वा मृद्भाजने पाचितं कार्यं सिन्दूरवर्णोत्पत्तिपर्यन्तम् । शतव्यूढं कनक इति शेषः । तदनामिकया संमर्दनयोगेन पारदगर्भे द्रवति । अथ नागेन बीजकरणविधिमाह—' आवर्त्याऽऽवर्त्य हेमवरे क्षेप्यमुज्ज्वलं नागम् । त्रिगुणशिलाप्रतिवापं ह्यहिबीजं तत्समुद्दिष्टम् ' । आवर्त्य प्रद्राव्यम् । किं कृत्वा । स्वर्णसमभागक्षेपं कृत्वा । ततो नागोपरि त्रिगुणशिलाप्रतीवापेन तदहिबीजं ख्यातम् । वङ्गयोगेन बीजकरणमाह—' वङ्गं तु तेन विधिना हेमवरे क्षेप्य तालवापेन । तारे वा निर्व्यूढं बीजवरं त्रुटितसंयोगात् ' । त्रुटितं

भवति तथा संयोगात्। अस्य बीजस्य पिष्टीकरणमाह—‘ एवं पक्कं विधिना बीजवरं सूतराट् तथाऽम्लेन। कर्तव्यः संस्वेधो( दो ) यावत्पिष्टी भवेच्छ्लक्ष्णा ’। रसबीजयोरेकशरीरतोत्पत्तिपर्यन्तं स्वेदविधिः कार्यः। ‘ तैलेन तेन विधिना स्विन्ना पिष्टी भवेदखिलम्। अथवा श्लक्ष्णं शिलया निघृष्टबीजं भवेत्पिष्टी ’। तेन विधिना पूर्वोक्तेन वधविधानेन। तिलतैलेन वह्नौ स्वेदिता सती पिष्टी भवति। अथवा मनःशिलया सूतेन सह निघृष्टं नागबीजं पिष्टी भवेत्। अथ माषतद्वटकपाकविधिमाह—‘ पाको वटकविधिना कर्तव्यस्तैलयोगेन। क्रामणपिण्डे क्षिप्त्वा माषैश्च स्यात्सुदृढपिण्डत्वम् ’। तैलयोगेन वह्नौ पिण्डं पचेदित्यर्थः। ‘ मृद्वग्निना सुपक्कं दग्धं यावन्न तद्भवेत्पिण्डम्। आकृष्य चाथ सूतं पिण्डे शेषं तथा पुनः पाच्यम् ’। अत्र क्रामणपिण्डो बिडपिण्डः। तच्च बिडं गन्धकतालकशैलाः सौवीरकरसकठौरिकदरदम्। क्षाराम्ललवणानि माक्षीकवैक्रान्तविमलसमभागैरिति बोध्यः। शैलं शिलाजतु। सौवीरकं शुक्लाञ्जनम्। गैरिकं धातुगैरिकम्। दग्धं न भवेत्, परंतु सुपक्कं तु भवेदेवेति युक्त्या पाकः कार्यः। शेषं पिण्डतः। अवशिष्टं निर्मलं पारदमाकृष्य पिण्डे पिण्डान्तरे स्थाप्यम्। ‘ अथवाऽप्यौषधपिण्डे दोलातप्ते खर्परे विधिना। पुनरपि पिण्डे क्षेप्यं गर्भे यावद्द्रुतिर्भवति ’। बीजग्रासमौषधपिण्डे क्रामणौषधपिण्डे दोलायन्त्र उत्तप्ते सति तत्पिण्डे प्रक्षिप्य मृत्खर्परे पूर्वोक्ततैलविधिना पाच्यमिति विध्यन्तरमेतत्। पिण्डे पिण्डान्तरे। ‘ एवं द्रुतं हि गर्भे बीजवरं जरति रसराजे। गर्भद्रुत्या रहितं बिडयोगैर्जरति गर्भे च ’ इति। उक्तबीजस्य संज्ञान्तरमाह—इदमेवेति। उत्तारणमिति। उत्तारयति पारदं गुणैरुच्छ्रितं करोति संवर्धयतीति व्युत्पत्त्या सिद्धोऽयं शब्दः। अथ ताडनसंज्ञामाह—संसृष्टेति। परिसाधनं ध्मानेनावशेषकारकं यद्वङ्कनालेन प्रध्मातं प्रकर्षेण ध्मानं क्रियते तद्रसशास्त्रे ताडनशब्देन कथितम्। यथा घोषाद्वङ्गं विनाश्य ताम्रस्यावशेषार्थं ध्मानं तच्च गाराकोष्ठ्यां कार्यम् ॥ ३१ ॥

**मूलम्**—चूर्णाभ्रं शालि० वरनागं तदुच्यते ॥ ३८ ॥ **टीका**—धान्याभ्रलक्षणमाह—चूर्णाभ्रमिति। अस्य व्याख्या द्वितीयाध्याये द्रष्टव्या। सत्त्वलक्षणमाह—क्षाराम्लेति। क्षारो यवक्षारादिः। अम्लं जम्बीररसादि। द्रावकं गुडगुग्गुलुगुञ्जादि। द्रावको गणो वक्ष्यमाणः। पञ्चाजं पञ्चगव्यादि। मत्स्यादिपिण्डीद्रव्यं च तद्युक्तं तेन पिण्डीकृतं रसोपरसादि द्रव्यम्। आकरकोष्ठक आकरो वक्ष्यमाणः। कोष्टिका वर्णनस्थानमन्थः। तत्रोक्ते योग्ये कोष्ठे कोष्ठयन्त्रेऽङ्गारकोष्ठ्यादौ च मूषायां प्रक्षिप्य यदा भस्त्रावङ्कनालादिना ध्मातं स्यात्तदा ततो द्रव्याद्द्रवरूपो यः सारः निर्गच्छति पृथगाकारेण निपतति तत्सत्त्वमुच्यते। अथ ध्मानक्रियाया मानविज्ञानार्थं कृतायाः कोलीसकसंज्ञाया लक्षणमाह—कोष्ठिकाशि-

खरेति । शिखरपर्यन्तं परिपूर्णकोकिलानां ध्मानेन मूषाकण्ठपर्यन्तं यदाऽपचयो भवति तावद्ध्मानस्यैककोलीसक इति संज्ञा । अस्या एव नालिशकेति पर्यायान्तरम् । कार्यविशेषानुरोधेन कोकिला विशिष्टकाष्ठजाः प्रयोज्या इत्याह—द्रावण इति । द्रावणे ताम्रादिधातूनां द्रावणे । तथा रसोपरसानां सत्त्वपातने च प्रयोज्याः । ये तु वंशजाः कोकिलास्ते तु निर्द्रवे खर्परादीनां केवलं तापनमात्रे प्रयोज्याः । स्वेदने कज्जलीभूतरसादीनां पाककरणे । अथ हिङ्गुलाकृष्टरसमाह—विद्याधरेति । विद्याधरयन्त्रं द्विविधं निर्जलं सजलं च । तत्र प्रथमं कनकसुन्दरप्रभृतिरसानामूर्ध्वभागे पुटनार्थमुपयुज्यते । तच्च न्युब्जोर्ध्वपात्रेण संपुटितम् । यत्तु द्वितीयमुत्तानपात्रघटितं तदत्र विद्याधरशब्देन ग्राह्यम् । आर्द्रकद्रवमर्दितादित्यस्याग्रे हिङ्गुलादिति शेषः । घोषाकृष्टस्य लक्षणमाह—स्वल्पेति । ताडितं परिध्मातम् । अत्र तालः स्वल्पशब्देन कांस्यस्य चतुर्थांशेन ग्राह्यः । रङ्गस्य ताम्रात्पृथग्भूत्वा विनाशार्थं तदुपयोगो बोध्यः । वरनागस्य लक्षणमाह—तीक्ष्णमिति । समभागनीलाञ्जनसंयुतं तीक्ष्णलोहं समभागेन टङ्कणं दत्त्वाऽन्धमूषायां दृढं ध्मातं सद्यदा नागापेक्षयाऽप्यतिमृदु कृष्णवर्णं शीघ्रद्रावं च भवेत्तदैतद्वरनागमुच्यते । अर्कापामार्गकदलीभस्मतोयेन क्षालयेत् । 'तद्वस्त्रगालितं ग्राह्यं स्वच्छतोयं तदातपे । मृदुकृष्टं द्रुतद्रावमिति' पाठे ध्मात्वा मूषातः कृष्टं बहिराकृष्टं शीतं सदपि संजातमार्दवमग्नियोगेन शीघ्रद्रावं च भवेदित्यर्थः । नागाद्वरं श्रेष्ठमेतद्वरनागमिति । उत्तरपदस्य पूर्वनिपातेन सिद्धोऽयं शब्दः । अस्योपयोगं त्वस्थिराणां खर्परादिसत्त्वानां स्थिरीकरणार्थं पूज्यपादा उदाजहरू रससारे । तत्प्रकारस्तु द्वितीयाध्यायेऽत्र रसकसत्त्वविधिव्याख्यायां प्रकाशित एव । नागं नीलाञ्जनोपेतमिति पाठस्तु प्रामादिक एव । सत्त्वानां हि स्थिरीकरणे नागस्यानुपयोगादिति बोध्यम् ॥ ३८ ॥

मूलम्—मृतस्य पुन० पतङ्गीरागसंज्ञकः ॥ ४८ ॥ टीका—उत्थापनशब्दार्थमाह—मृतस्येति । पारदरसोपरसलोहादीनामतिमूर्छितानां प्राकृतगुणक्रियासहितानां वा पुनरुद्धृतिः पुनः पूर्ववत्स्थानापन्नत्वमुत्थापनमित्यभिधीयते । ढालनसंज्ञां लक्षयति—द्रुतद्रव्यस्येति । यथा वरलोहकविधौ सतीक्ष्णताम्रस्य ध्मानेन द्रुतस्य लकुचद्रावे निक्षेपोऽत्राध्याये प्रागुक्तः स ढालनशब्देन परिभाष्यते । अथ चपलो द्विविधः । पाषाणविशेषः कृत्रिमो धातुरूपश्च । तत्र पाषाणविशेषो द्वितीयाध्याय उक्तः । यस्तु धातुविशेषजन्यस्तद्विधिं संप्रति दर्शयति—त्रिंशदिति । पुटयेद्गजपुटे पचेत् । एवं क्रियाक्रमस्तावत्कार्यो यावता तन्नागभस्म कर्षमानमेवावशिष्येत् । अवशेषयेत् । ततः परं तच्च सहस्रपुटेनापि न क्षयं व्रजेत् । एवंलक्षणयुक्तोऽयं नागजश्चपलो वार्तिकैरुदितः । एवंविधिना वङ्गजश्चपलोऽपि कार्यः । तयोरुपयोगमाह—तत्स्पृष्टेति । धौतस्य लक्षणमाह—भूभुजङ्गेति । भूभुजङ्गा भूनागाः । तेषां शकृन्मृद्विशेषरूपमेव तत्संनिपातु-

पलभ्यते । एतस्योपयोगस्तु खरसत्त्वोत्पादनार्थं पञ्चमाध्याये प्रागभिहित एव । अथ द्वंद्वानमाह—द्रव्ययोरिति । रसार्णव एतच्छब्दप्रयोगो दृश्यते । यथा—'घनं माक्षिकचूर्णेन शुल्बचूर्णेन रञ्जितम् । द्वंद्वानं ताप्यसत्त्वेन रसराजस्य रञ्जनम्' इति । भजनीलक्षणमाह—भागाद्रूप्याधिकेति । अनुवर्णसुवर्णके हीनवर्णसुवर्णे हेमकृष्टिं दत्त्वा शतांशविधिना रक्तपीतवर्णोत्कर्षार्थं यतमानेन साधकेन प्रमादात्कारणान्तरेण वा यदा रूप्यस्य यो भागः शास्त्र उक्तस्तं विहाय प्रमाणापेक्षयाऽधिकः क्षिप्यते, तादृशक्षेपं कृत्वा यदा वर्णिकाह्रासे प्रागवस्थितपीतवर्णस्यापि ह्रासः क्षयो भवति । अथवा द्रव्यैर्वैधादावनुपदिष्टद्रव्यैर्वङ्गनीलाञ्जनादिभिः संमीलनेनापि यो वर्णिकाह्रासः सा रसशास्त्रे भञ्जनीति कथ्यते । हेमकृष्टेर्लक्षणं तु—'रूप्यं वा जातरूपं वा रसगन्धादिभिर्हतम् । समुत्थितं च बहुशः सा कृष्टी हेमतारयोः' इति प्रागुक्तमेव । अत्र विधौ हेमकृष्टिः—'रसदरदताप्यगन्धकमनःशिलाराजवर्तकं विमलम् । पुटमृतशुल्बं तारे निर्व्यूढं हेमकृष्टिरियम्' इति । रसदरदादीनां पुटेन मृतं यच्छुल्बं तत्तारे निर्वाहितं कुर्यात् । शतांशविधिश्च—'अष्टानवतिर्भागास्तारस्त्वेकोऽपि कनकभागः स्यात् । सूतस्यैको भागः शतांशविधिरेष विख्यातः' इति रसहृदये । तत्र निर्व्यूढतारभागस्याधिकक्षेपेणानुवर्णसुवर्णे वर्णनाशः स्पष्ट एव । अथ चुल्लिकालक्षणमाह—पतङ्गीकल्कत इति । पतङ्गी, अशुद्धरसोपरसादिकृतबीजजीर्णः पारदस्तद्घटितो यः कल्कस्तेन जातं यल्लोहे ताम्रादौ गौरवतेजस्वित्वादिगुणसहितं तारत्वं हेमता वा किंचित्कालपर्यन्तं स्थित्वा नश्यति सा क्रिया चुल्लिकेति मता । उक्तं च रसहृदये—'यः पुनरेतैः कुरुते कर्माशुद्धैर्भवेद्रसस्तस्य । अव्यापकः पतङ्गी न रसे रसायने योज्यः' इति । एतैः रसोपरसैः । कर्म जारणादिकर्म । पतङ्गी पक्षिवदूर्ध्वगामी । पारदघटितकल्कस्तु योगतरङ्गिण्यादिग्रन्थोक्तो बोध्यः । तथा चोक्तं तरङ्गिण्याम्—'पारदष्टङ्क एकस्या द्विपलं पीतखर्परम् । मर्दयेत्सुदृढं तावद्रसो यावद्विलीयते । पुनर्जम्बीरनीरेण गुडेन च समन्वितम् । शोषयेच्चाऽऽतपे पिष्ट्वा श्लक्ष्णं कृत्वा च धार्यते । अर्कदुग्धस्य दातव्या भावनास्ता यथा तथा । अस्य कल्कस्य सिद्धस्य भाग एकश्च टङ्कणः । ताम्रं भागत्रयं दत्त्वा धाम्यतामन्धमूषया । सुवर्णं दिव्यतेजः स्यात्कुङ्कुमादतिरिच्यते' इति । एवं नागार्जुनादिग्रन्थे तारत्वोत्पादककल्कोऽपि द्रष्टव्यः । संप्रति क्रियाविशेषसिद्धस्याचिरविनाशिनो लोहस्थस्य रागस्य संज्ञामाह—रञ्जितादिति । अत्रापि पतङ्गिकल्कत इत्यनुवर्तनीयम् । तादृशकल्केन रञ्जिताल्लोहाद्ध्मानादियत्नेन विना कालान्तरे ध्मानेन सद्यो वा यो रागो विनिर्याति वियुज्य निर्गच्छति स पतङ्गी रागसंज्ञको रसशास्त्रे ख्यातः ॥ ४८ ॥

**मूलम्**—द्रुते द्रव्यान्तरक्षेपो० तद्बहिः शीतमीरितमिति ॥ ५४ ॥ **टीका**—द्रुत इति । एतदुदाहरणं यथा—'सुरदालिभस्म गलितं त्रिःसप्तकृत्वोऽथ गोजलं शुष्कम् । वापेन सलिलसदृशं करोति मूषागतं तीक्ष्णम्' इति । तथा–'सुरगो-

पक्वदेहरजः सुरदालिफलैः समांशकैर्देयः । वापो द्रुते सुवर्णे द्रुतमास्ते तद्रसप्रख्यम् ' इति । रसप्रख्यं जलसदृशमित्यर्थः । अभिषेकलक्षणमाह—द्रुत इति । शुद्धावर्तं लक्षयति—यदेति । बीजावर्तलक्षणमाह—द्राव्येति । द्राव्यद्रव्यं लोहादि ॥ ५४ ॥

**मूलम्**—क्षाराम्लैरौषधै० तन्मूर्च्छनमिति प्रोक्तं दोषत्रयविनाशनम् ॥ ५७ ॥

**टीका**—इदानीमष्टादशसंस्काराणां क्रमेण लक्षणमाह—क्षाराम्लैरिति । क्षारा यवक्षारसर्जनटङ्कणाः । अम्लं काञ्जिकादि । औषधैस्त्र्यूषणादिभिः सर्पाक्ष्यादिभिश्च । तास्तु रसरत्नाकरे परिगणिता एव स्वेदाद्युपयोगिकाञ्जिकविधौ । तथा च तद्ग्रन्थः—' नानाधान्यैर्यथाप्राप्तैस्तुषवर्ज्यैर्जलान्वितैः । मृद्भाण्डे पूरितं रक्ष( क्षे )यावदम्लत्वमाप्नुयात् ॥ तन्मध्ये भृङ्गराण्मुण्डी विष्णुक्रान्ता पुनर्नवा । मीनाक्षी चैव सर्पाक्षी सहदेवी शतावरी । त्रिफला गिरिकर्णी च हंसपादी च चित्रकम् । समूलं कण्डयित्वा तु यथालाभं निवेशयेत् ॥ पूर्वाम्लभाण्डमध्ये तु धान्याम्लकामिदं स्मृतम् । स्वेदनादिषु सर्वत्र रसराजस्य योजयेत् ' इति । स्थितस्य त्र्यूषणादिकल्कलिप्तवस्त्रावृतभूर्जपत्रपोटलिकामध्ये स्थितस्य पारदस्येत्यर्थः । त्र्यूषणादिकल्कोऽपि रसरत्नाकरेऽभिहितः—' त्र्यूषणं लवणं राजी रजनी त्रिफलाद्रवम् । महाबला नागबला मेघनादा पुनर्नवा ॥ मेषशृङ्गी चित्रकं च नवसारं समं समम् । एतत्समस्तं व्यस्तं वा पूर्वाम्लेनैव पेषयेत् ॥ तत्कल्केन लिपेद्वस्त्रं यावदङ्गुलमात्रकम् । तन्मध्ये निक्षिपेत्सूतं बद्ध्वा पच्याद्दिनत्रयम् । दोलायन्त्रेऽम्लसंयुक्ते स्वेदितो जायते रसः । प्रक्षाल्य काञ्जिकः सोष्णैस्तमादाय विमर्दयेत् ' इति । मलशैथिल्यकारकं मलाश्च द्वादश दोषाः । तच्छैथिल्यजनकम् । शिथिलानामेव हि तेषां मोचयितुं शक्यत्वात् । द्वादश दोषाश्च विषं वह्निर्मलश्चेति नैसर्गिकास्त्रयः । नागज एकः । वङ्गज एकः । तथा भूमिजो गिरिजो वार्जः । नागजौ द्वौ । वङ्गजौ च द्वौ । इति सप्त कञ्चुकाख्या इत्येवं द्वादश दोषा देवैः प्रार्थितमहेश्वरेण पारदे संयोजिता भवन्ति । उदितैरिति । वक्ष्यमाणमर्दनविध्युक्तैर्गृहधूमाद्यौषधैः सर्वाम्लैरम्लवेतसप्रमुखैरम्लवर्गोक्तैर्द्रव्यैः । तेषां रसेनेत्यर्थः । तथा काञ्जिकैरपि पारदस्य यत्पेषणं त्रिदिनपर्यन्तं कृतं तद्बहिर्मलविनाशनं भवति । बहिर्मलः स्वेदेनान्तर्विश्लिष्टो भूत्वा पारददेहाद्बहिः संश्लिष्टो रागतो नैसर्गिकदोषं विहाय नवविधो यो मलस्तद्विनाशको भवतीति । केवलं स्वेदमर्दनाभ्यां न सर्वथा भुजकञ्चुकदोषनाशनं भवति । अतो मर्दनपूर्वकमग्नियोगेन नाशं कृत्वा पारदस्य यत्पिष्टत्वोत्पादनं तन्मूर्छनसंस्कारनाम्नाऽऽह—मर्दनादिष्टेति । मर्दनार्थं वक्ष्यमाणमूर्छनसंस्कारविधौ कथितैर्गृहकन्यादिभिर्नष्टपिष्टत्वकारकं यत् कर्म मर्दनपूर्वकपाचनरूपं तन्मूर्छनमित्यभिधीयते । समासतो लक्षणं तु दत्तग्रासस्य ग्रासरहितस्य वा गालनपातनव्यक्तिरेकेण पूर्वावस्थापन्नत्वम् । तच्च मर्दनपाकाभ्यां भवतीति मर्दनोत्तरं यन्त्रपुटान्यतरेण पाकोऽप्यङ्ग-

त्वेन बोध्य इति द्वौ यौगिकौ । भूजशब्देन भूजदोषप्रभृतीत्यर्थो बोध्यः । ते च कञ्चुका आवरकाः सप्त दोषा वङ्गाहिदोषप्रमुखाः । ते च मर्दनाग्निभ्यां नश्यन्ति । वङ्गशब्देन वङ्गजदोषो ग्राह्यः । अहिशब्देन नागजदोषश्च । दोषाणां नानात्वेन विविधदृढशिथिलसंसर्गतारतम्येन तन्नाशार्थं विविधोपायप्रदर्शनमुचितमेवेति न मर्दनसंस्कारेण मूर्छनस्य गतार्थतेति शङ्क्यमिति भावः । तन्मूर्छनं हि वङ्गाहिभूजकञ्चुकनाशनमिति पाठं गृहीत्वेयं व्याख्या । दोषत्रयविनाशनमिति पाठे तु नैसर्गिकदोषनाशे सुतरां बहिर्दोषनाश इत्यभिप्रायः । अत एवायं पाठो रसहृदयटीकायां चतुर्भुजमिश्रैरादृतः । नैसर्गिकदोषेतरदोषाणां वारणाय पूर्वोक्तमर्दनसंस्कारो नैसर्गिकदोषवारणायायमिति व्यवस्थायाः सुकरत्वात् । एवं च वङ्गाहिभूजकञ्चुकनाशनमिति पाठो न मनोरम इति बोध्यम् ॥ ५७ ॥

मूलम्—स्वेदातपादियोगेन० याऽसौ सेधनमुच्यते ॥ ६१ ॥ टीका—स्वेदेति । स्वेदः काञ्जिकया क्षारामललवणैश्च दोलायन्त्रे स्वेदनम् । आतपयोगः काञ्जिकादिमर्दितरसस्य काचपात्रे सूर्यतापस्थे धारणम् । आदिशब्देन सामिकलशीमध्ये कटाहे वा पारदस्य तस्य धारणमित्यादि । तेन पारदस्य मूर्छितस्य यत्नात्स्वरूपोऽविकलदोषौ रवविशिष्टत्वरूपमात्मरूपं तत्प्रतिप्रापणं तदुत्थापनमित्युच्यते । मूर्छनलक्षणे पठितम् नष्टपिष्टत्वं यत्तस्य कोऽर्थ इत्याशङ्कायां तल्लक्षणमाह—स्वरूपस्येति । स्वरूपमात्मरूपम् । तस्य मर्दनपाकादिना यद्विनाशनं तेन पारदस्य यत्पिष्टरूपापादनं स नष्टपिष्ट इत्युच्यते । अथ पातनसंस्कारस्य लक्षणमाह—उक्तौषधैरिति । वक्ष्यमाणपातनविधौ निर्दिष्टत्रिफलादिभेषजैः सह मर्दितपारदस्य तत ऊर्ध्वपातनादियन्त्रस्थितस्य यन्त्रियोपणमूर्ध्वाधस्तिर्यक्प्रापणं तत्पातनमुच्यते । तेन वङ्गनागजा यौगिकदोषा भूजादिसप्तकञ्चुकाश्च सर्वथा नश्यन्ति । रोधनं लक्षयति—जलेति । कुम्भे वक्ष्यमाणे घटयन्त्रे । आप्यायनी पुष्टिकरी । अत्र सैन्धवमयमूषासंपुटितं कृत्वैकविंशतिदिनपर्यन्तं भूधरपुटनं सृष्ट्यम्बुजैः सह मर्दनं च कृत्वा ततः परमिति वाक्यशेषो बोध्यः ॥ ६१ ॥

मूलम्—रोधनाल्लब्धवीर्यस्य० बीजमित्यभिधीयते ॥ ६७ ॥ टीका—लब्धवीर्यस्य पारदस्येति शेषः । स्वेदः पारदगर्भितमूषां भूमिगर्ते गूढां कृत्वा भूम्युपरि करीषाग्निरित्यर्थः । अथ दीपनसंस्कारं लक्षयति—धातुपाषाणेति । धातवस्ताम्रपत्रादयः । पाषाणाः स्फटिका मयूरतुत्थकासीसादयः । मूलानि सर्पाक्ष्यादिमूलिकाः । आद्यशब्देन क्षारलवणोदकादि ग्राह्यम् । घटमध्यगो घटयन्त्रमध्यगः पारदस्त्रिदिनपर्यन्तं स्वेद्यो भवति यस्मिन्कर्मणि तद्दीपनमिति व्याहृतम् । अथ जारणायामयथाबलमयथाक्रमं च ग्रासदानेनाजीर्णदोषात्पारदे विक्रिया स्यादिति ग्रासमानविचारोऽवश्यं कार्यः । अतो ग्रासमानाख्यसंस्कारस्य लक्षणमाह—इयन्मानस्येति । इयच्छब्दोऽत्र संस्कार्यपारदस्य गृहीतमानविशेषपलादिवाचकः । तावन्मानमितपारदस्ये-

यच्चतुःषष्ट्यंशादिमिताभ्रकसत्त्वबीजाद्यात्मकं द्रव्यं भक्षणाय दत्तं चेत्सुखेन चीर्णं जीर्णं च स्यादिति निश्चिता या बीजादेर्मितिस्तद्ग्रासमानं स्यातम् । अथ जारणां लिलक्षयिषुः प्रथमं साधारणांस्तदवस्थांभेदान् सलक्षणान्समासत आह—ग्रासस्येति । श्रेष्ठै रसवार्ताकुशलैः सर्वविधा जारणा त्रिरूपा त्रिप्रकारा कथिता भवति । तत्र ग्रासस्य चारणं पारदकर्तृकग्रासभक्षणकरणम् । गर्भद्रावणं ग्रस्तबीजादेः पारदोदरे द्रुतिकरणम् । जारणं च पारद एकीभावोऽनन्तदृढसंबन्धेन । एषां लक्षणान्यनुपदं वक्ष्यति । पुनरपि जारणाया अवस्थाकृतनामान्तराणि त्रीण्याह—ग्रासः पिष्टिः परीणामश्चेति । तत्र ग्रासो ग्रसनम् । पिष्टिः स्वेदनमर्दनाग्न्यादिभिः पारदोदरे कृतग्रासस्य पारदसहितस्य शुष्कश्चूर्णः । परिणामार्थस्तु प्रागुक्त एव । पुनर्जारणा द्विविधा भवति । समुखा निर्मुखा चेति भेदेन । तत्राल्पवक्तव्यत्वात्प्रथमं निर्मुखाया एव लक्षणमाह—निर्मुखेति । चतुःषष्टिभागमितं बीजं प्रथमं यत्र पारदोदरे न दीयते किंतु केवलं शुद्धधात्वादिग्रास एव सृष्टित्रयनीरकणावासनौषधिमर्दनाद्युपायैर्जार्यते सा जारणा निर्मुखेत्युच्यते । रसोपरसादिद्रव्यजारणे तस्या उपयोगः कार्यः । मुखकरणोपयोगिबीजशब्दार्थमाह—शुद्धमिति । शुद्धमकृत्रिममुत्तमं खनिजं स्वर्णं रूप्यं वैतच्छास्त्रोक्तशुद्ध्या सुशुद्धं कृत्वाऽत्र ग्राह्यम् । एतेन कृत्रिमनिर्व्यूढमहाबीजादिव्यावृत्तिः कृता ॥ ६७ ॥

मूलम्—चतुःषष्ट्यंशतो० प्रकाराः सन्ति कोटिशः ॥ ७५ ॥ टीका—उक्तबीजस्य यथाक्रमं स्वर्णीत्पादार्थं रौप्यजननार्थं च पारदस्य चतुःषष्ट्यंशेन पारदोदरे जारणारम्भे प्रक्षेपः कार्यः । एवं कृते तस्मिन् बीजे पारदोदरे यथाविधि चीर्णे जीर्णे च सति पारदः सत्वरं ग्रासभक्षणं करोतीति शास्त्रे स रसो मुखवानित्युच्यते । तत्कृतं यत्कठिनलोहादिभक्षणं सा जारणा समुखेत्युक्ता । मृगचारिणा मृगसहितं वने चरति संसारं विहाय विरक्तेन केनचिद्रसवार्तिकेन । अथ महामुखपारदस्य लक्षणमाह—दिव्यौषधीति । सोमलतादिकाश्चतुःषष्टिदिव्यौषध्यस्तत्समार्थगिस्तद्रसेन कृतमर्दनादिना कृतसंस्कारः । तेन प्रकाशमूषास्वपि स्थितोऽग्निसहः पारदो ध्मानेन कठिनं मृदु सर्वं लोहादि यदा भुनक्ति, असौ महामुखवानित्युच्यते । पूर्वोक्तचारणादीनां लक्षणान्याह—रसस्येति । ग्रस्तस्येति । बहिरेव द्रुतीकृत्येति । अभ्रकसत्त्वद्रुतिः प्रागुक्तैव द्वितीयाध्याये । जारणा च तप्तखल्वमध्ये दीयत इति वाक्यशेषः । निर्लेपत्वमिति । औषधाध्मानेति । औषधयोगो मत्स्याक्षीपिण्डीद्रव्ययोगो भस्त्रादिभिराध्मानयोगश्च । अथ जारणालक्षणमाह—द्रुतग्रासेति । विडयन्त्रादियोगेन पारदोदरे द्रवीभूतस्य ग्रासस्य बीजादेर्यः परिणामोऽविनाशिदृढतरसंबन्धेन पारदेन सहैकीभावः सा जारणेत्युच्यते । तस्याः प्रकाराः कोटिशोऽतिबहवः सन्ति । यन्त्रादीनां बहुविधत्वात् । ते च प्रकाराः—पत्रजारणासत्त्वजारणाद्रुति-

जारणाबजिजारणामहाबजिजारणासिद्धबजिजारणासधूमजारणानिर्धूमजारणाबालजारणावृद्धजारणाबद्धजारणाभूचरीजारणाखेचरीजारणाप्रभृतयो रसार्णवादौ सविस्तरं बोध्याः । दोलायन्त्रसोमानलयन्त्रचक्रराजयन्त्रवालुकायन्त्रजलकूर्मयन्त्रस्थलकूर्मयन्त्रमूषाप्रभृतीनि जारणयन्त्रादीनि विद्यात् । तप्तखल्वे मर्दनं तु सर्वत्र प्राकार्यमेव । आदिशब्देन षड्बिन्दुकीटसहितमर्दनसूत्रित्रयादिसंग्रहः ॥ ७५ ॥

**मूलम्**—क्षारैरम्लैश्च० शब्दवेधः स कीर्तितः ॥ ८४ ॥ **टीका**—बिडयन्त्रादियोगत इत्यत्र निर्दिष्टबिडस्य वडवानलादेर्लक्षणमाह—क्षारैरिति । एषां कृतश्चूर्णो यथानिर्दिष्टद्रव्यरसैर्भावितो बिड इति कथ्यते । ते च बिडा ज्वालामुखहंसपाकादयो नानारूपाः । वडवानलाख्यबिडास्त्रिंशत्तमाध्याये वक्ष्यमाणः । स्वर्णजारणबिडस्तु—' सर्वाङ्गदग्धमूलकभस्म प्रतिगालितं सुरभिमूत्रेण । शतभाव्यं बलिवसया तत्क्षणतो जार्यते हेम ' इति बोध्यः । ' कासीसं सैन्धवं काङ्क्षी सौवीरं व्योषगन्धकः । सौवर्चलं स्वर्जिका च मालतीतीरसंभवः ॥ शिग्रुमूलरसैः सिक्तो बिडोऽयं सर्वजारणः ' इति । ' भेकमत्स्यवसा या तु कुक्कुटस्य वसाऽथवा । भाव्यमेभिः क्रमाद्गन्धं शिशुमारवसाऽपि वा । एका बलिवसा सम्यक्सूतस्य बन्धिनी परम् ' इति बलावसाख्या बोध्या । ते च बिडा रसार्णवादिग्रन्थेषु बोद्धव्याः । विस्तरभयान्नेहोच्यन्ते । अथ रञ्जकपदार्थाः सूतं रञ्जयन्ति ' अभ्रकादिजारणोत्तरमेव । उक्तं चैतद्रसार्णवे—' गिरिदोषे क्षयं नीते सूतकं रञ्जयन्ति ते । रसगर्भे प्रकाशन्ते जारणं तु भवेद्यदि ' ॥ अतोऽभ्रपत्रजारणोत्तरं रागसंस्कारं लक्षयति—सुसिद्धबीजेति । सुसिद्धं यथाविधि साधितं यद्बीजमभ्रकसत्त्वधात्वादिचूर्णं तज्जारणेन पारदस्य या बीजधात्वाद्यनुरूपा वर्णोत्पत्तिस्तद्रञ्जनम् । तत्र बीजसाधनविधिस्तु सिद्धबजिलक्षणव्याख्यायां प्रागुक्त एव । जारणाविधिस्तु त्रिंशत्तमेऽध्याये स्फुटी भविष्यति । आदिशब्दो मणिरसोपरसादिपरिग्रहः । रागद्रव्योदाहरणं विधिश्च रसहृदये । यथा—' जीर्णाभ्रको रसेन्द्रो दर्शयति घनानुरूपिणीं छायाम् । कृष्णां रक्तां पीतां सीतां तथा संकरैर्मिश्राम् । तथा—' क्रामति तीक्ष्णेन रसस्तीक्ष्णेन च जीर्यते क्षणाद्ग्रासः । हेम्नो योनिस्तीक्ष्णं रागान्गृह्णाति तीक्ष्णेन । तदपि च दरदेन हतं हत्वा वा माक्षिकेण रविसहितम् । वासितमपि वासनया घनवच्चार्यं च जार्यं च ' । वासनया वासनौषधेन वासितं भावितमित्यर्थः । तथा—' कान्तं वा तीक्ष्णं वा काञ्चीं वा वज्रसस्यकादीनाम् । एकतमं सर्वं वा रसरञ्जने संकरोऽपीष्टः ' । काञ्चीं स्वर्णमाक्षिकम् । आदिशब्देन हीरकचपलादय उपधातवश्चैकत्र मिलिता अपीष्टाः । ' कुटिले बलमधिकं रागस्तीक्ष्णे तु पन्नगे स्नेहः । रागस्नेहबलानि तु कमले शंसन्ति धातुविदः ' । रसकुष्ठिरपि पारदमिन्द्रगोपनिभं करोति । सा तु हेमकुष्टितारकुष्टिलक्षणव्याख्यायां पूर्वमुक्तैव । ' अथवा केवलममलं कमलं दरदेन वापितं कुरुते । त्रिगुणं हि

चीर्णजीर्णं लाक्षारससंनिभं सूतम्' इति । समासतो रञ्जनं बोध्यम् । कमलं ताम्रम् । सारणालक्षणमाह—सूत इति । सारणाख्यतैलेनार्धांशं संभृतं यत्सारणायन्त्रं तत्र स्थिते पारदे यत्स्वर्णादिक्षेपणं स्वर्णादिबीजनागवङ्गानां यत्क्षेपणं वेधाधिक्यसिद्ध्यर्थं क्रियते सा सारणेति रसशास्त्र उक्ता । प्रतिसारणाऽनुसारणेति च तद्भेदौ । उक्तं चैतद्रसहृदये—'सारितवर्तितसूतः समानबीजेन मिलति यः सार्यः । द्विगुणेन प्रतीसार्यः स चानुसार्यश्च त्रिगुणेन' इति । द्विगुणमपि सुवर्णमेव । वेधाधिक्यं वेधो भित्त्वाऽन्तःप्रवेशः सोऽधिको भवति । पारदस्य ताम्रदलादौ शरीरस्थधात्वादिषु च सर्वतो व्याप्तिः । सारणातैलं पञ्चमाध्यायव्याख्यायां प्रागुक्तमेव । यन्त्राध्याये सारणायन्त्रं सारणाविधिश्च स्फुटी भविष्यति । अथ क्रामणस्य द्रव्यस्य सर्वदा वेधसहोपयोगित्वेन समासतो विशेषणमुखेन क्रामणलक्षणसहितं वेधलक्षणमेकेन श्लोकेनाऽऽह—व्यवायीति । द्रव्ये शतवेधादौ यथाभागं गृहीते मूषायां द्रुते कृते प्रतप्तमात्रे वा ताम्ररजतादौ साध्यद्रव्ये क्षिप्तो रसः पारदो यस्मिन् कर्मणि स वेध इत्युच्यते । स च पारदः कीदृशः । व्यवायिभेषजोपेतः । यत् सेवितमात्रं तत्क्षण एव शरीरान्तःस्थसर्वधातुषु सहसा सबाह्याभ्यन्तरं व्याप्नोति पश्चात्पाकं प्राप्नोति तद्व्यवायि क्रामणेत्यपरपर्यायं च बोध्यम् । तादृशभेषजोपेतो योगवाही पारदोऽपि सेवितश्चेत्सहसा सर्वं देहं सान्तरं व्याप्नोति न केवलं कोष्ठ एव स्थितिं करोति । न वा धातुषु कथंचित्प्राप्तोऽपि बहिः संलग्न एव तिष्ठतीति । 'लोहान्तः प्रविशेद्येन द्रव्ययोगेन( ण ) पारदः । सद्यस्तत्क्रामणमिति कथितं रससिद्धिदम्' इति क्रामणलक्षणपार्थक्येन बोध्यम् । अथ वेधभेदानाह—लेप इति । लेपेनेति । यस्मिन्वेधे पारदो लेपेन लोहं पत्रीकृतं तीक्ष्णताम्रादि स्वर्णं करोति रजतं वा करोति स लेपवेध इत्युक्तः । अत्र लेपोत्तरं वर्णोत्कर्षार्थं यत्पुटं देयं भवति तत्पुटं सौकरं वराहपुटं कार्यम् । अस्मिन्संस्कारे जीर्णचतुर्थांशार्धांशसमादिभागैर्जीर्णबीज एव सारितो रस उपयोक्तव्यः । उक्तं चैतद्रसहृदये—पादादिजीर्णबीजो युज्यते पत्रलेपनेति । लेपवेधविधिरपि तत्र सविस्तरं सक्रमं वर्णितः । यथा—'कृत्वाऽलक्तकवस्त्रं लिप्तमनुस्नेहमुपरि चूर्णेन । अवचूर्णितं तु कृत्वा गन्धकशिलया विधानेन ॥ तदुपरि शृतं च दत्त्वा गन्धकशिलाचूर्णं च सूतवरे । पश्चाद्वर्तिः कार्या पात्रे धृत्वाऽऽयसे च समे ॥ दीपं प्रतिबोध्य ततस्तैलं दत्त्वा ततस्तोकम् । पाकं यामस्यार्धं स्वाङ्गे शीतं ततः कार्यम्' इति । आदावलक्तकभावितं वस्त्रं कृत्वा तच्च कङ्गुण्यादितैललिप्तं कार्यम् । तदुपरि वक्ष्यमाणदरदशिलाद्यौषधानां चूर्णेनावचूर्णितं कृत्वा तदुपरि गन्धकशिलाचूर्णं प्रसृतं कृत्वा तत्रस्थसूतराजोपरि पुनर्गन्धकशिलाचूर्णं दत्त्वा समविस्तृतायसपात्रे वर्तिः कार्या । ततो वर्तिं प्रज्वाल्याल्पमल्पं तैलं ज्वलनार्थं वर्त्युपरि दत्त्वाऽर्धयामं पचेत् । पश्चात्स्वाङ्गशीतं कार्य-

मित्यर्थः । 'गृह्णीयादथ सूतकृष्टिं लिप्त्वा ततस्तेन पत्रेण । क्रामणयोगैर्लिप्त्वा पुटिता सा हेम्नि निर्ध्माता' । उपरि समन्ताच्च संलग्नां सूतकृष्टिं गृहीत्वाऽऽकृष्टेन तेन सूतेन ताम्ररजतादिपत्रं लिप्त्वा तदुपरि क्रामणयोगैः कान्तविषरसकादिभिः पूर्वोक्तैर्विलिप्य तस्मिन् हीनवर्णे हेमरजतताम्राद्यन्यतमे पत्रे लिप्ता सा हेमकृष्टिर्मूषायां पुटिता शरावेणाऽऽच्छादिता सती निर्ध्माता कार्येत्यर्थः।'अथवा दरदशिलालैर्गन्धकमाक्षीकपक्वमृतनागैः। कङ्कुष्ठप्रवालसहितैः पिष्टैश्च कङ्गुणीतैले ॥ मध्ये सूतो युक्तो मृदितः खल्वे तथाऽऽयसे विधिना। संस्वेद्य वंशनलिकां दोलायन्त्रेण स्वेदितं त्रिदिनम् ॥ एतैर्लिप्ता कृष्णैः पत्रं पूर्वोक्तविधानेन । नागं दत्त्वा प्रकटं स्तोकं स्तोकं क्रमेणैव ॥ भवति हि कनकं दिव्यमक्षीणं देवयोग्यं च । एवं जारितसूते सकलाः खलु हण्डिकाः कार्याः' इति । कङ्गुणीतैलपिष्टं यत्, आयसखल्वान्तःस्थं दरदादि तदन्तर्धृतः सूतो मर्दितः कार्यः । ततो वंशनलिकामध्ये तत्कल्कसहितं तं पारदं धृत्वा संस्वेद्य दोलायन्त्रेण त्रिदिनं स्वेदयेत् । अथैतैर्दरदादिभिः कृष्णलवणैश्च स्वर्णपत्रं रजतताम्रादिपत्रं वा लिप्य मूषायां धृत्वाऽल्पमल्पं नागं च मुहुर्मुहुर्दत्त्वा धमेदित्यर्थः । सकला धात्वादयः सप्रसवाः कार्याः । यथा रजतात्ताम्राद्वा स्वर्णप्रसवस्तद्वदिति यावत् । अयं स्वर्णाकृष्टिपत्रलेपविधिः । तथा-'काञ्ची ब्राह्मी कुटिलं तालकसमभागयोजितं ध्मातम् । शुल्वं विद्धमनेन तु ताराकृष्टिर्भवेद्दिव्या' । काञ्ची स्वर्णमाक्षीकम् । कुटिलं वङ्गम् । अनेन काञ्च्यादिगणेन विद्धं शुल्वं ताराकृष्टिर्भवेत्तारवर्णं भवेदित्यर्थः । 'एवं ताराकृष्टिर्लिप्त्वा विद्धा रसेन सारितेन । तारं करोति विमलं लेपाद्वा पादजीर्णादिः' इति । आदिशब्देनार्धजीर्णबीजादिरसस्य ग्रहणं कार्यमित्यर्थः । अथ क्षेपवेधमाह--प्रक्षेपणमिति । ध्मानेन मूषायां लोहे ताम्रादौ द्रुते सति क्रामणद्रव्यकल्कसहितस्य पारदस्य यत्प्रक्षेपणं स वेधः क्षेप इति ख्यातः । अत्र पक्षान्तरमप्युक्तं रससारे--क्रामणकल्कसहितलोहे धाम्यमाने केवलं पारदं क्षिपेत्तत्रेति । तथा च तद्ग्रन्थः--'गद्याणः सिद्धकल्कस्य नागगद्याणका दश। क्रामणेन समायुक्तमेकी कृत्वा धमेत्ततः ॥ वेधं नागेन तेनैव तारं शुल्वं च वेधयेत् । अथवा धातुमावर्त्य क्षिपेत्क्रामणसंयुत्तम्' इति । अत्र नागं बीजरञ्जनावसरे रसार्णवोक्तविधिना मारितं ग्राह्यम् । तथा च तद्ग्रन्थः--'निधाय खर्परे नागं ब्रह्मबीजदलैः सह । दग्धमग्निमधो दत्त्वा वह्निवर्णं भवेद्यदा ॥ रासकेन बिभीतेन काककिंशुकशिग्रुभिः । कोरण्टकस्य पुष्पेण बकुलस्यार्जुनस्य च ॥ [illegible]रेण नागिन्या कुमार्या नागकन्यया । शिलया च त्रिगुणया कथितेनाजवारिणा ॥ भावितं खर्परस्थं च वापयित्वा पुनः पुनः । सप्तभिर्दिवसैरेवं मारितं सुरवन्दिते ॥ पुटयेद्गन्धकेना[ दा ]म्लैश्च तदनन्तरम् । इदं दलानां बीजानां रसराजस्य रञ्जने ॥ उद्घाटे क्रामणे योज्यं पिष्टीस्तम्भे विशेषतः' इति । कुन्तवेधविधिमपि तत्राध्यगीष्ट । यथा-'दत्त्वाऽऽदौ प्रतिवापं लाक्षामत्स्यादिपित्तभावनया । तार

वा शुल्बे वा रातारिष्टेऽथवाऽऽकृष्टौ ' इति । मत्स्यमाहिषमायूराजसूकरजपित्तेन राजावर्तादिरञ्जनद्रव्यं रसदरदताप्यादिनिर्वाहणद्रव्यं च भावयित्वा द्रुततारादौ प्रतीवापं निक्षेपं कुर्यादित्यर्थः । ' तदनुक्रामणमृद्विते तत्कल्केनापि पिण्डितरसेन । अतिविद्रुते च तस्मिन्वेधोऽसौ कुन्तवेधेन ' इति । ततः पित्तमर्दिते तस्मिन्नेव निर्वाहणक्रामणचूर्णे मिश्रिते सति पिण्डितपारदगर्भितेन कल्कीभूतेन तेन चूर्णेनातिविद्रुततारादौ कुन्तवेधेन वेधः कार्यः । कुन्तसमानसंदंशाग्रधृतपिण्डीभूतरसेन तारादौ द्रुते संस्पर्शमात्रं कार्यमित्यर्थः । ततः ' तत्तैलार्द्रपटेन स्थगयेत्पललेन भस्मना वाऽपि । विधिवद्वेध्यं द्रव्यं रसराजक्रामणार्थं हि ' इति । तैलं सारणाख्यां स्थगयेदाच्छादयेदित्यर्थः । मृतसूताभ्रस्य कुन्तवेधोदाहरणं रसरत्नाकर ऋद्धिखण्डे यथा—"सुशुद्धं तालकं सूतं सामुद्रलवणं समम् । द्वियामं मर्दयेत्खल्वे नवभाण्डगतं पचेत् ॥ मन्दाग्नौ चालयेत्तावद्यावत्कृष्णं भवेत्तु तत् । ततः सामुद्रलवणं तालांशं भर्जयेत्पृथक् ॥ यावच्चिटिचिटीशब्दो निवर्तेत्तत्समाहरेत् । चूर्णितं मृन्मये यन्त्रे लवणार्धमधः क्षिपेत् । तत्पृष्ठे पूर्वत्रितयं तत्पृष्ठे लवणार्धकम् । क्षिप्त्वा म(मृ)ल्लवणैः संधिं लिप्त्वा शुष्कं विपाचयेत् । यामद्वादशपर्यन्तं भाण्डपृष्ठे मृदग्निना । तत्सत्त्वं मृतसूताभ्रं मूर्ध्नि लग्नं समाहरेत् । बद्ध्वा वस्त्रेण दण्डाग्रे कुन्तवेधेन वेधयेत् ' इति । द्रुतद्रव्याहतिर्द्रुतद्रव्यं मूषास्थताम्रादि तस्याऽऽहतिः । आघातो दृढस्पर्श इत्यर्थः । धूमवेधलक्षणमाह—वह्नाविति । धूमायमाने वह्नावन्तर्मूषान्तःस्थतद्वाह्निमध्ये प्रक्षिप्तो यो रसः पारदस्तत्संबन्धिधूमस्योर्ध्वस्थापितताम्रादिपत्रे संपर्काद्यत्स्वर्णरजतापादनं स धूमवेध इत्यभिधीयते । उदारणं तु रसार्णव उदाहृतम् । यथा, आदौ रत्नजारणप्रकारं तत्रोक्त्वा तत ऊर्ध्वमुक्तम्—' बहुरत्नेषु जीर्णेषु भृङ्गराजेषु सुव्रते । रसेन्द्रो दृश्यते देवि नीलपीतारुणच्छविः ॥ शुद्धानि हेमपत्राणि शतांशेन तु लेपयेत् । पुटेन मारयेदेतदिन्द्रगोपनिभं भवेत् ॥ संस्पर्शाद्वेधयेत्सर्वमिदं हेम मृतं प्रिये ' इति स्पर्शवेधमुक्त्वा पश्चादुवाच—' त्रिभागं सूतकेन्द्रस्य तेनैव सह सारयेत् । मूषामध्यस्थिते तस्मिन्पुनस्तेनैव जारयेत् । धूमवेधी भवेद्देवि पुनः सारितजारितः ' इति । शब्दवेधं लक्षयति—मुखस्थितरसेनेति । रसगर्भितमुखेनेत्यर्थः । एतस्याप्युदाहरणं रसार्णवे निजगाद—' वज्रभस्म तु भागैकं भागाः शुद्धरसास्त्रयः । द्विपदीरजसाऽऽमर्द्य यावत्तत्कल्कगतां गतम् ॥ पादांशेन सुवर्णस्य पत्रलेपं तु कारयेत् । व्योमवल्ल्या रसं कान्तं टङ्कणं च सुचूर्णितम् ॥ अभ्रकमष्टमांशेन खल्वे कृत्वा विमर्दयेत् ' । वज्रादिकल्कसहितं कान्तादिव्योमवल्ल्या रसेन मर्दयेदित्यर्थः । अथ—' नष्टपिष्टं चतुष्कं तदङ्ध्रयित्वा पुटेत्ततः । अन्धमूषागतं ध्मातं क्रामणेन समन्वितम् ॥ खोटस्तु जायते देवि शतवेधी भवेद्रसः ' इति । ' सौवीरं टङ्कणं काचं दत्त्वा दत्त्वा विशोधयेत् । अक्षीणे मिलिते हेम्ना समावर्तस्तु जायते ॥ एकोत्तरक्रमं कृत्वा संकलैः क्रामयेत्ततः ।

एकगुणेन सूतेन एका संकलिकोच्यते ॥ त्रिगुणेन तु सूतेन द्वितीया संकली भवेत् । षड्गुणेन तु सूतेन तृतीया संकली भवेत् ॥ दशगुणेन सूतेन चतुर्थी संकली भवेत् । पञ्चदशगुणेनेशि पञ्चमी संकली भवेत् ॥ एकविंशद्(ति)गुणेनेशि षष्ठी संकलिका मता । अष्टाविंशद्(ति)गुणेनेशि सप्तमी संकली मता ॥ अष्टत्रिंशद्गुणसंबद्धा भवेत्संकलिकाऽष्टमी । पञ्चचत्वारिंशद्गुणैः संकली नवमी मता ॥ पञ्चपञ्चाशद्गुणेन दशमी संकली मता । एवं च क्रमवृद्ध्याऽस्य संकली दशबन्धनम् ॥ दशसंकलिकाबद्धः शब्दवेधी भवेद्रसः । यथा लोहे तथा देहे क्रमते नात्र संशयः ' इति ॥ ८४ ॥

**मूलम्**—सिद्धद्रव्यस्य सूतेन० न स मुह्यति कुत्रचित् ॥ ९० ॥ **टीका**—सूतेन सबाह्याभ्यन्तरव्याप्त्यैकीभूतस्य सिद्धद्रव्यस्य सुवर्णत्वादिप्राप्तस्य ताम्रादिलोहात्मकद्रव्यस्य तदेकीभूतसूतस्य च यथासंभवं यत्कालुष्यादि तन्निवारकं दशांशेन यच्चूर्णप्रक्षेपादि कर्म तदुद्धाटनमितीरितम् । कालुष्यं मलसंकीर्णत्वम् । आदिशब्देन च्छत्रित्वपतङ्गित्वदुर्द्रावित्वदुर्मेलित्वादिदोषः संग्राह्यः । तत्र प्रक्षेप्यसिद्धचूर्णपाठो रससार उदाहृतः । यथा–' गालिते नागगद्याणे सूतगद्याणकं क्षिपेत् । गन्धकं स्वर्जिकाक्षारमेतद्गद्याणकद्वयम् ॥ एतच्चतुष्टयं कृत्वा खल्वे धृत्वा विमर्दयेत् । जलेन भावनां दत्त्वा शरावसंपुटे क्षिपेत् ॥ संधिं विलिप्य दातव्यं दृढं गजपुटं मृदा । गालयेत्सिद्धवेधं तु चूर्णं तत्र विनिक्षिपेत् ॥ तच्चूर्णस्य दशांशेन उद्धाटो जायते ध्रुवम् ' इति । ' खटिका लवणं गैरी काङ्क्षी चेष्टिकचूर्णकम् । इमाः पञ्च मृदः प्रोक्ताः सुवर्णशुद्धिहेतवः ' इति च । ' लेपितं पुटितं ताभिर्दिव्यं भवति काञ्चनम् ' इति । सारणोत्तरं रसायनं कर्तुं कामयमानेन साधकेन पारदस्य कर्तव्यौ स्वेदसंन्यासाख्यसंस्कारौ लक्षयति—क्षाराम्लैरिति । ' औषधैर्भृङ्गराणमुण्डी विष्णुक्रान्ता ' इत्यादिभिः स्वेदलक्षणवर्णनावसरे प्रागुक्तैः । तैश्च सार्धं सह पारदं भाण्डमध्ये पिधानसंधिरोधनादियत्नेन रुद्ध्वा तद्भाण्डं भूमिमध्ये निखन्यते यस्मिन् कर्मणि तत्स्वेदनं संप्रकीर्तितम् । अथौषधयुक्तस्य पारदस्य मृन्मयभाण्डसंपुटितस्य मन्दवह्नियुक्तचुल्लीमध्ये क्षिप्त्वा यत्पुटनं स संन्यास इत्युच्यते । सिद्धरसभस्मकरणार्थं प्रायोभावेनास्य संस्कारस्योपयोगो बोध्यः । अत एवं वक्ष्यति- ' कामधेनुरसविध्यवसरे संन्यासाद्भस्मतां नयेत् ' इति । औषध्यस्तु–' चाण्डाली राक्षसी व्याघ्री टङ्कारी गजकर्णिका ' इत्याद्या रसमूलिकावर्णनावसरे वक्ष्यमाणास्तथा रम्भादिगणोक्ताश्चात्र ग्राह्याः । रम्भादिगणस्तु–' रम्भा वीरा स्नुही क्षीरं कञ्चुकी यवचिञ्चिका । वाराही चैव गोरम्भा मीनाक्षी काकमाचिका ॥ एभिर्मर्दितसूतस्य पुनर्जन्म न विद्यते ' इति । द्वावेताविति । एतदध्यायस्य कण्ठस्थकरणं तत्फलं द्वाभ्यां पद्याभ्यामाह–रसनिगमेति । रसनिगमाख्यो महान्ग्रन्थः पूर्वाचार्यैः प्रणीतः सोमदेवेन ततः संगृहीतमेतत्परिभाषावृन्दं यः साधकः सभायां मण्डनार्थं कुण्ठे कुर्यात्स भिषगग्र्यो भवेत्, भिषक्श्रेष्ठो भवेत् । येन रसवादिनाऽत्युपयोग्ययमध्यायः प्रत्यहं पठितपाठो भवेत्स न मुह्यति कर्तव्याकर्तव्यविषये ॥

इति रसरत्नसमुच्चयटीकायां खरेइत्युपाह्वेन वामनात्मजेन चिन्ता-
मणिना विहितायां सरलार्थप्रकाशिन्याख्यायां सूत्रस्थाने
परिभाषात्मकोऽष्टमोऽध्यायः ॥ ८ ॥

---

## अथ नवमोऽध्यायः ।

**मूलम्**—अथ यन्त्राणि वक्ष्यन्ते० पच्यन्ते यत्र स्वेदनीयन्त्रमुच्यते ॥ ५ ॥ **टीका**—स्वकृतौ प्रामाण्यमाह—अथेति । रसतन्त्राणि रससिद्धान्तशास्त्राण्यशेषाण्यालोच्य सोमदेवेन स्वग्रन्थे यानि यन्त्राणि संगृहीतानि तान्येव मया सांप्रतं वक्ष्यन्ते । एवं चात्रोक्तं साधकैः श्रद्धेयमिति भावः । अथ यन्त्रशब्दनिरुक्तिमाह—स्वेदादीति । स्वेदनपातनादि कर्म विधातुं रससंस्कारनिपुणैर्यस्मात्पारदो यन्त्र्यते नियन्त्र्यते स्थिरी कृत्वा स्थाप्यते तत्तद्यन्त्रशब्दवाच्यमित्यर्थः । पारद इत्युपलक्षणम् । ताम्रलोहादीनामपि पाकार्थं स्थालीयन्त्रादेर्ग्रहणात् । प्रायोभावेन वा पारद इत्युक्तम् । बहुविधानां यन्त्राणां तत्संस्कारोपयोगित्वादिति भावः । स्वेदस्य चात्र संस्कारेषु प्राथम्यात्तदुपयोगियन्त्रं प्रथमत आह—द्रवद्रव्येणेति । द्रवद्रव्येण काञ्जिकादिना पूरिताधोंदरस्य मृन्मयभाण्डस्य यन्मुखं मुखाधोभागः कण्ठदेशस्तस्योभयपार्श्वतो द्वारद्वयं विधाय तत्र तिर्यग्दण्डं प्रवेश्य तन्तुरज्ज्वादिना पारदपोटलीं द्रवमध्ये यथा मग्ना स्यात्तथाऽवसज्जितां बद्ध्वा तत्तन्तुसूत्रादि दण्डे बद्ध्वा पोटलीं स्वेदयेत् । एतद्यन्त्रं दोलायन्त्रं नाम स्मृतमिति । अथ पत्रपुष्पादीनामतिमृदुद्रव्याणां स्वल्पस्वेदार्थं यन्त्रान्तरमाह—साम्बुस्थालीति । स्थालीं चतुर्थांशजलेन पूरितोदरां जलेनार्धपूरितोदरां वा कृत्वा तस्या मुखमासमन्ताद्वस्त्रेण बद्धं यथा स्यात्तथा मुखाबद्धे वस्त्रे पाक्यं स्वेद्यमतिकोमलं द्रव्यं विनिक्षिप्य न्युब्जशरावादिना पिधायाऽऽच्छाद्य यत्र पच्यते तत्स्वेदनीयन्त्रमित्युच्यते । अस्यैव यन्त्रस्य कन्दुकसंज्ञां वक्ष्यति ॥ ५ ॥

**मूलम्**—अष्टाङ्गुलपरीणाह० तद्दीपिकायन्त्रम् ॥१८॥ **टीका**—अथोर्ध्वपातनायन्त्रमाह—अष्टाङ्गुलेति । अथ न्युब्जस्थाप्यस्य विशालपृष्ठस्य मृत्पात्रस्याङ्गुलादधोऽङ्गुलमितपृष्ठभागादधोभागे तोयाधारः कार्यः । कथम् । अष्टाङ्गुलपरीणाहमष्टाङ्गुलगर्भविस्तारं यथा स्यात्तथा । तथाऽऽनाहेन बन्धेन सह दशाङ्गुलं यथा स्यात्तथा बन्ध आलवालं तत्प्रदेशं संगृह्य दशाङ्गुलविस्तारमित्यर्थः । एवं च बन्धस्थौल्यमङ्गुलद्वयमितं गर्भविस्तारश्चाष्टाङ्गुलमितः कार्य इत्यवतिष्ठते । नह बन्धने । चतुरङ्गुलोच्छ्रायं यथा स्यात्तथा तोयाधारः पृष्ठे कार्य इत्यर्थः । तादृशाधारविशिष्टस्य षोडशाङ्गुलविस्तीर्णपृष्ठस्योपरिवर्तिनस्तस्य भाण्डस्यास्येऽधो भाण्डमुखं प्रवेशयेत् । ततो मुखपार्श्वयोर्महिषीक्षीरादिभिः संधिं लिप्त्वा विशोषयेत् । चूर्णः सुधा श्वेतं लेपद्रव्यमित्यर्थः । पात-

नायन्त्रमीरितम् । उर्ध्वपातनायन्त्रमुक्तमित्यर्थः । अधःपातनायन्त्रमाह—अस्योर्ध्वेति । जलाधारविहीनस्य वैपरीत्येन जले स्थापितस्यास्योक्तयन्त्रस्य संबन्धि यदूर्ध्वभाजनं तत्र लिप्तस्थापितस्य लेपं कृत्वा स्थापितस्य पारदस्य यन्त्रोपरि दीप्तैर्वनोपलैरधःपातं कुर्यात् । इत्येतदधःपातनायन्त्रमभिहितम् । अथ दीपिकायन्त्रमाह—कच्छपयन्त्रेति । जलपूर्णपात्रमध्ये घटकलशमुत्तानं निधाय तत्र कोष्ठीमकृत्वा तत्स्थाने मृन्मयपीठं कृत्वा तत्र दीपिकां निधाय दीपं प्रज्वाल्य नागस्वर्णबीजसहितं गन्धकमनःशिलाहरीतालसहितं च पारदं मर्दनेन पिष्टीकृतं पोटलिकायां बद्ध्वा कच्छपाकारन्युब्जमृत्पात्रोदरे तैलमग्नां तां पोटलीं दीपज्वालोपरि यथा स्यात्तथाऽवलम्बितां बद्ध्वा तन्न्युब्जं पात्रं न्युब्जं निधाय दीपोष्मणा नागं भक्षयित्वा पारदो जलपात्रेऽधः पतति यस्मिन् यन्त्रे तद्दीपिकायन्त्रमुक्तम् । नागजारणार्थमस्य यन्त्रस्योपयोगो बोध्यः । ततो जीर्णनागं पारदं भस्ममूषायां ध्मानेन वियुक्तं नागं कृत्वा तस्मिन्रसे साधकावरबीजं जारयन्तीति । दीपिकासंस्थो दीपिकोपरि सम्यक्स्थित इत्यर्थः ॥१०॥

**मूलम्**—भाण्डकण्ठादधश्छिद्रे० कुर्याद्गन्धकजारणम् ॥ २१ ॥ **टीका**—अथ ढेकीयन्त्रमाह—भाण्डकण्ठादिति । अधश्छिद्र उपकण्ठं कृते छिद्रे जलगर्भितं स्वादुशीतजलगर्भितम् । युक्तद्रव्यैः शुद्धियोग्यैः काञ्जिकादिभिः पातनोपयोगिद्रव्यैश्च सह संयुक्तो रसो घटे सच्छिद्रोपकण्ठे वह्निस्थिते मृन्मयघटे पूर्वं विनिक्षिप्तः कार्यः । भाजनं संपुटघटकमधोभाजनमुष्णं यावद्भवेद् घटे तावदग्निः कार्य इत्यर्थः । रससंधानं पारदस्य सम्यगाधानं स्थापनमित्यर्थः । एतद्यन्त्रसमं देगयन्त्रं रससारेऽभिहितम्—'बृहद्भाण्डं समादाय कुक्षौ च च्छिद्रसंयुतम् । भाण्डे काचघटीं क्षिप्त्वा मुखं छिद्रे नियोजयेत् ॥ तदास्ये काचनालं स्यात्तच्च नालमधोमुखम् । रुद्ध्वा तदा तयोः संधिमर्धं च नालकं दिहेत् ॥ भाण्डं वालुकयाऽऽपूर्य तस्य द्वारं निरुध्य च । वह्नेः प्रज्वालनं तावद्यावत्तन्नालकं द्रवेत् ॥ शीतं यन्त्रं समुत्तार्य घटीं प्रक्षालयेत्ततः । द्रावं क्षिप्त्वा पुनर्दद्यात्पुनः पाको विधीयते ॥ एवं रङ्गद्रुतिः प्रोक्ता देगयन्त्रेऽतिशोभना । तालो नागः शिलाचौरः शुल्बो हंसश्च गन्धकः ॥ एते रङ्गं विमुञ्चन्ति विद्रुमं गैरिकं तथा । वालुकादेगयन्त्रेण पिच्छकेशा द्रवन्ति च' इति । लोहस्य रङ्गाकृष्टिविधिमपि तत्र सविस्तरमुदाजहार—'मणैकं लोहचूर्णस्य स्वार्जिकाया मणद्वयम् । त्रिभागं चूर्णकं दत्त्वा एकस्थमतिमर्दयेत् ॥ क्षिप्त्वा चूर्णं बृहद्भाण्डे जलमूत्रेण पूरयेत् । चुल्लिकोपरि संस्थाप्य वह्निं प्रज्वालयेत्ततः । यदा फेनः समागच्छेच्छ्वेतवर्णस्तदूर्ध्वतः । अन्यपात्रे तदा स्थाप्य यावद्ध्नाति रक्तताम् ॥ पश्चात्तं रक्तफेनं च पात्रमध्ये क्षिपेत्पुनः । क्षीणे मूत्रजलं दद्याद्यावद्रक्तं च दृश्यते ॥ तावद्रक्तं च गृह्णीयात्पुनः पात्रे निधापयेत् । यदा रक्तं न दृश्येत तदा वह्निं निवारयेत् ॥ रक्तं वस्त्रेण संगाल्य मलशेषं विवर्जयेत् । श्वेतफेनेन संयुक्तं तस्यैतज्जलशोधनम् ॥ कचसारितघट्यां च तद्धार्यं तदनन्तरम्' । ततो बृहद्भाण्डं समादायेत्यादिविधिशेषः प्रागुक्त एव ।

देगयन्त्रस्थाने ढेकयन्त्रेति पाठमपि पठन्ति । अन्यपात्रे तमास्थाप्य श्वेतफेनं तस्मादुद्धृत्य पात्रान्तर आस्थाप्य यदा रक्ततां बध्नाति रक्तवर्णः फेन उत्पद्येत तदा तं रक्तफेनं काचसारितघट्यां दानार्थं पात्रान्तरे क्षिपेत् । उक्तवह्निस्थितपात्रे द्रवे क्षीणे सति तत्र गोमूत्रं दद्यात् । पुनः पात्रे निधापयेत् । स्थापितरक्तद्रवे पात्रे रक्तफेनं स्थापयेत् । काचसारितघट्यां काचविलेपितघट्यामित्यर्थः । अथ गन्धकजारणार्थं यन्त्रमाह—लोहमूषेति । द्वादशाङ्गुलदीर्घं लौहं मूषाद्वयं कार्यम् । तन्मध्य एकां मूषामन्यमूषोपकण्ठदघ्नसुप्रवेशयोग्यस्थौल्यां गन्धकोदरां सच्छिद्रतलां कुर्यात् । स्थूलमूषोदरे तु पारदो देयः । ततः कृशमूषामुत्तानस्थूलमूषोदर उत्तानामेव प्रवेश्य पारदस्याधस्तोयं विदध्यात् । यन्त्रस्याधस्तादुपरिष्टाच्च वह्निदीपनं कुर्यात् । किं कृत्वा । रसोनवसां लशुनरसं वस्त्रगालितं कृत्वा तेन पारदमूषां तथा प्रचुरं बहुलं पूरयेत् । येन पारदोदरे पतितो गन्धकः पारदश्चेत्युभावप्याप्लाव्यौ स्यातामिति विधाय स्थालीसंपुटं च कृत्वा । जलदानं वह्निदीपनं च यत्समासत उक्तं तत्सविस्तरमाह—स्थाल्यन्तर ऊर्ध्वस्थालीपृष्ठोपरि कपोतपुटं पुनः पुनर्विदध्यात् । कर्षाग्निना करीषाग्निना । यन्त्रस्य जलमग्नकण्ठाधःस्थालीकस्य चुल्ल्यधिश्रितजलपात्रस्याधस्तात्करीषाग्निं खदिरकाष्ठाग्निं वा संततं त्रिदिनं दद्यात् । ततस्तप्तचुल्ल्यां सत्यामेव तथा यन्त्रस्थजले तप्ते सत्येव यन्त्रमोचनं कार्यम् । दृढस्मरणार्थमेतदेव पुनः स्पष्टी करोति । मोचनकाञ्जिकाक्षालनादिक्रियां शीतजलकाञ्जिकाधारपात्रादियोगिनीं मोचनक्षालनधारणादिक्रियां न कुर्यात् । पारदविक्रियाभयात् । शीतत्वं हि जारणासमये विक्रियाहेतुः । तथा चोक्तं रससारे—'शीतत्वान्मर्दनाभावाल्लोहाशुद्धस्य जारणात् । अत्यग्नितो निराहारात्क्रामणारहितस्य च ॥ बिडप्रभृतदानाद्वा भुक्ते जीर्णादजीर्णगः । इत्येता विक्रिया ज्ञेया अष्टभिः षण्ढतां व्रजेत्' इति । इदं यन्त्रं निर्धूमगन्धकजारणाविषयम् । अष्टगुणगन्धकजारणार्थं यद्यन्त्रं त्रिंशत्तमेऽध्याये वक्ष्यति तत्तु सधूमगन्धकजारणाविषयमिति यन्त्रयोर्विषयभेदो बोध्यः । अत्र पारदगन्धकयोर्भागानुक्तावपि दिनत्रयात्मकपचनकालमानोक्त्या पारदेऽष्टमांशगन्धकस्य क्षेपे सर्वमते स्वीकृते द्वाविंशतिकर्षात्मको गन्धकभागश्चतुर्विंशतिकर्षाधिकद्विशतकर्षात्मकः पारदभागश्चात्र ग्राह्य इत्यनुमीयते । तारतम्यक्रमेण मन्दाग्निकरणार्थं प्रहरद्वये व्ययीकृते द्वात्रिंशतिसंख्याकप्रहरैर्हि द्वाविंशतिकर्षाणामेव जारणात् । एककर्षो गन्धको हि यामेनैकेन प्रायशो जीर्यते निर्धूमजारणायाम् । सधूमजारणायां तु द्विकर्षः । राक्षसवक्त्रपारदे विशिष्टतीव्रतराबिडादियोगे वा नियमोऽयं व्यभिचरति । अतः प्रायश इत्युक्तम् ॥ २१ ॥

**मूलम्**—जलपूर्णपात्रमध्ये० तन्त्रज्ञैः परिकीर्तितम् ॥ २६ ॥ **टीका**—कच्छपयन्त्रं द्विविधम्—जलकच्छपं स्थलकच्छपं च । तत्रेदानीं जलकच्छपमाह—जलपूर्णेति । घटखर्परं खण्डितमुखं सच्छिद्रं घटखण्डमुत्तानं दत्त्वा तदुपरि कोष्ठीं मूषां छिद्रे किं-

च्छित्प्रविष्टबुध्नां नीराविशोगिनीमुत्तानां सुदृढं निश्चलं संस्थाप्य कोष्ठीमभितः कुड्यं विदध्यात् । कोष्ठ्यां बिडं तन्मध्ये पारदं च दत्त्वा स सम्यक्स्थाप्यः । ततो लघुलोहकटोरिकया न्युब्जया तं पारदं कोष्ठ्यामाच्छाद्य मृत्कर्पटादिना संधिं रुद्ध्वा तद्घटखर्परमङ्गारैः करीषादिमिश्रैः पूर्णं कुर्यात् । पूर्णं तद्घटखर्परमङ्गारैः करीषतुषमिश्रैः । गर्भद्रवन्तीति स्थाने गर्भद्रुतिः सर्वलोहानामिति पाठः । एवं रीत्या कच्छपयन्त्रस्थः पारदः स्वेदनतो वह्नितापेन मर्दनतो बिडादिना सह पाकावसरे तत्रैव जातेन मर्दनेन द्रुतं ग्रासं त्रिदिनं जरति । एवं चैतद्यन्त्रं गर्भद्रुतिपूर्वकं जारणोपयोगीति भावः । अत्र जलपूर्णपात्रं भूमावेव निखातं कृत्वा तन्मुखे सच्छिद्रमुत्तानं शरावं दत्त्वा तत्र च्छिद्रे नीराविशोगिनीं मूषां काचविलेपितां धृत्वा तत्र पारदस्याधस्तादुपरिष्टाच्च गन्धकं दत्त्वा पिधायोपर्युपलाग्निना गन्धकं जारयन्ति केचित् । किंचैतद्घटकशरावे च्छिद्रसंस्थितां पक्वमूषां कृत्वा तस्यामष्टांशबिडावृतं पारदं धृत्वा लोहपात्र्यां संरुद्धं मुद्रितं च कृत्वा तदुपर्यष्टाङ्गुलमानां वालुकां विनिक्षिप्य हठात्तदुपरि ध्मानेन ध्मातं तद्गर्भसंभूतं रसं मायूरपित्तालिप्तं काञ्चनं ग्रासयन्तीति । स्थलकूर्ममन्त्रं तु किंचिद्गर्तायुक्ते भूतले तथैव घटखर्परं न्युब्जं निधाय संधिलेपादि कृत्वा तदुपरि सर्वतः पार्श्वभागे च पुटं दद्यादिति । तत्र गर्तायां वनसूरणादिकन्दोदरे बिडं तन्मध्ये सग्रासं पारदं दत्त्वा तत्कन्दशकलेनैवाऽऽच्छाद्य मृत्कर्पटादिनाऽऽवेष्ट्य संशोष्य धारयेत् । पृष्ठे चाग्निं संततं दिनत्रयं दद्यात् । अन्तराऽन्तरा कन्दपरिवर्तनं कार्यम् , यथा कन्दो न दह्येत । एवं स्थलकूर्मयन्त्रेण जारणं विदध्यादिति । कन्दे दग्धप्राये सति, अन्यत्रान्यत्र कन्दे पूर्ववत्तं पारदं धृत्वा पाचयेत् । विद्याधरयन्त्रमाह । तत्र प्रथमं तत्स्वरूपं समासत उक्त्वाऽनन्तरं सविस्तरमाह—यन्त्रमिति । स्थालीद्वितयसंपुटादिति । समस्थूलानामेव संपुटं भवति न तु महदल्पयोरिति । इति वक्ष्यमाणः स्थालीयन्त्रादस्याऽऽकृतिविशेषः स्फुटीकृतः । अथ विस्तरेणाऽऽह—चुल्लीं चतुर्मुखीमिति । सर्वत्र साम्येनाग्निप्रवृत्त्यर्थं चतुर्मुखीमित्युक्तम् । तत्र यन्त्रभाण्डं निवेशयेत् । निरुन्ध्यात् । न्युब्जमुखेन पात्रान्तरेण संपुटेत् । एतद्यन्त्रं विद्याधरनाम्ना शास्त्रे परिकीर्तितम् । अस्योपयोगस्तु सौम्यवीर्यद्रव्याणां मृद्वग्निना पाकार्थं बोध्यः । अत एव वक्ष्यति पञ्चदशाध्याये कनकसुन्दररसे—दत्त्वा विद्याधरे यन्त्रे पुटेद्वारण्यकोपलैरिति ॥ २६ ॥

**मूलम्**—ऊर्ध्वं वह्निरधश्चाऽऽपो० यन्त्रं तद्वार्तिकोत्तमैः ॥ ३२ ॥ **टीका**—अथ सोमानलयन्त्रं समासत आह—ऊर्ध्वं वह्निरिति । मध्य इति । अधःपात्रे जलं तदुपरि, उत्तानं शरावादि दत्त्वा तत्र लघुमूषामुत्तानां धृत्वा तन्मध्ये बिडं बिडमध्ये सग्रासं पारदं च दत्त्वा दृढं पिधानेन पिधाय तदुपरि खर्परं दत्त्वा तत्राग्निर्देयः । इति विधिना गगनसत्त्वादिकं जारयेदिति । एतदेव यन्त्रं सनाभिनालं कृत्वाऽग्निमधो दत्त्वा नाभिमध्ये पारदं सग्रासं दत्त्वा जारयेदिति प्रकारान्तरेण रससारेऽभिहितम् । तथा च तत्पाठः—'सोमानलस्य यन्त्रस्य नाभिमध्ये रसं क्षिपेत ।

दत्त्वाऽष्टांशं बिडं नाभिं किंचिदम्लेन पूरयेत् ॥ क्षाराम्लं त्र्यूषणं मूत्रं राजिका शिग्रु चित्रकम् । नालं प्रपूरयेदेभिर्नाभिश्चोपरि साधकः ।। दद्यादुपरि यन्त्रस्य सच्छिद्रं समबुध्नकम् । च्छिद्रे च दोरकं बद्ध्वा अम्लैः खर्परपूरणम् ॥ रसोपरि पतेद्विन्दुः स्तोकं स्तोकं पुनः पुनः । यन्त्राधः स्थापयेदग्निमहोरात्रत्रयं बुधः ॥ त्रिदिनैर्जीर्यते ग्रासं सूतको नात्र संशयः ' इति । सच्छिद्रं समबुध्नकमिति खर्परस्य विशेषणम् । नालं तु क्षारादिपूरितं कृत्वा खर्परच्छिद्रसंमुखमेवोच्छ्रितं कार्यमिति भावः । एतदेव यन्त्रं नाभिरहितं कृत्वा वैपरीत्येनाग्निजलस्थापनेन प्राप्ताग्नीषोमाख्यं पारदबन्धकरं भवतीत्यपि तद्ग्रन्थे एवाभिहितम्—' अथाधोऽग्निरुपर्यापो मध्ये देयो रसेश्वरः । अग्नीषोमाख्ययन्त्रेण बध्यते सप्तरात्रतः ' इति । अथ गर्भयन्त्रं प्रतिजानीते—गर्भयन्त्रमिति । यत्र सर्वं यन्त्रं भूम्युदर एवावस्थितं विदध्यात् तद्गर्भयन्त्रं नाम । तदेव स्पष्टी करोति—चतुरङ्गुलेति । चतुरङ्गुलदीर्घादिलक्षणां मूषां विधाय तन्मुखं वर्तुलं कारयेत् । सम्यक् पिधानसंधानार्थं यथोक्तभागं लोहकिट्टगुग्गुलयोर्गृहीत्वा भागत्रयं मृदो गृहीत्वैकभागात्मकं लवणं गृहीत्वा सर्वमेतज्जलेन संमर्द्य तेन मूषां सान्तर्बहिर्विलिप्य तत्र धात्वादिकृतपिष्टिकां संभृत्य सम्यक् पिधाय भूमिमध्यगां गजपुटपर्याप्तां गर्तां करीषाग्निश्रतुषैरर्धपूरितां कृत्वा तत्र मूषां धृत्वा तदुपरि गर्ताकण्ठदघ्नं करीषतुषैरेव संपूर्यावशिष्टगर्तां मृत्तिकया संपूर्यान्तर्वायुप्रवेशार्थं किंचिदङ्गुलीसमं छिद्रं विधायाग्निं दत्त्वा स्वेदयेत् । एवं निर्वाणाग्नितुषादियुक्त्या निष्कास्य पुनस्तुषादिपूरणादिसर्वमन्तराऽन्तरा कुर्यादहोरात्रपर्यन्तं त्रिरात्रपर्यंतं वेति । अत्र गोवरपुटं भूमावेव देयम् । तदुक्तं रसराजसुन्दरे—' चूर्णीकृतकरीषाग्नौ भूमावेव तु यत्पुटम् । दीयते तत्तु कृतिभिर्गोवरं समुदाहृतम् ' इति । हंसपाकयन्त्रमाह—खर्परमिति । न्यसेत् । उत्तानं निदध्यात् । पञ्चक्षारैः । पञ्चक्षारैः सह । लवणं बिडाख्यम् । ' पलाशमुष्ककक्षारौ यवक्षारः सुवर्चिका । तिलनालोद्भवः क्षारः संयुक्तं क्षारपञ्चकम् ' । अत्राग्नितप्तवालुकया क्षारादीनां पचनमिति मन्दस्वेदः कृतो भवति । युक्तमस्य यन्त्रस्य हंसपाकमिति नाम । हंसो हि मन्दगतिरिव ॥ ३२ ॥

**मूलम्**—सुरसां गूढ० नलिकायन्त्रमीरितम् ॥ ४१ ॥ **टीका**—वालुकायन्त्रं द्विविधमाह—सुरसामिति । सुरसां ग्रन्थिकोटररेखाद्यभावेन सुलक्षणाम् । गूढवक्त्रामकरालमुखामार्द्रमृत्कर्पटादिना त्रिवारं सप्तवारं वा कृतेनाङ्गुलस्थूलेन वेष्टितामातपे संशोषितां काचघटीमुदरस्य भागचतुष्टयं परिकल्प्य त्रिषु भागेषु पूरयेत् । तस्या गर्भे भागत्रयं कज्जल्यादिना भेषजेन पूरयेत् । एवं संपूरितां तां वितस्तिगम्भीरे भाण्डे मृन्मये विशालखर्परे पूरितवालुकामध्ये स्थापितां कुर्यात् । पूरणीयवालुकाया मानमप्याह—तद्भाण्डं पूरयेदिति । भाण्डोदरस्यापि भागचतुष्टयं परिकल्प्य तद्भाण्डं वालुकया त्रिभिर्भागैर्मितया त्रिभागपूरणपर्याप्तया पूरयेत्संभरेत् ।

अन्याभिरवशिष्टैकभागमिताभिर्वालुकाभिः काचकलशीमभितः प्रक्षेपेणावगुण्ठयेत् । कण्ठपर्यन्तमाच्छादितां कुर्यादित्यर्थः । भाण्डमुखं च मणिकया विशालन्युब्जमृत्पात्रेणाऽऽच्छाद्य संधिलेपादि कृत्वा चुल्ल्यां पचेत् । तत्पचनकालमानमाह—तृणस्येति । मणिकापृष्ठे प्रक्षिप्ततृणदाहपर्यन्तं पचेत् । तृणदाहेत्युपलक्षणम् । सिन्दूररसादौ रक्तवर्णोत्पत्तिपर्यन्तमपि पाकस्याऽऽवश्यकत्वात् । स च वर्णो ज्ञेयः । कूपीमुखादुद्गतरक्तवर्णबाष्पदर्शनेनेति बोध्यम् । अत्र रससिन्दूरादिपाके विधातव्ये तत्रस्थगन्धकस्य सम्यक्पाकपर्यन्तं गन्धकोद्गारेण पुनः पुनरुद्गतेन क्रियमाणस्य काचकलश्या संवृतमुखस्य विवरणार्थमन्तराऽन्तरा तप्तशलाकाप्रवेशार्थं मणिकया पिधानं न कुर्वन्ति भिषजः । किंतु गन्धकपाकोत्तरं बाष्पोद्गमस्य विरमे सत्येव तत्कुर्वन्ति । किंच भाण्डबुध्ने किंचिच्छिद्रं विधाय क्षुद्रकपालेन मृन्मयेन तदाच्छाद्य निहितकपालोपर्येव काचकशलीमुच्छ्रितां संस्थाप्य बहिर्वालुकया समन्ततः पूरयन्तीति वैद्यसंप्रदायः । रससिन्दूरादिकरणार्थं सधूमगन्धकजारणार्थं चैतद्यन्त्रं बोध्यम् । क्वचिच्छिष्टरसायनविधौ द्रव्यविशेषपाकविशेषाद्यनुरोधेनाऽऽरम्भत एव मुद्रितमुखां सभेषजां काचकलशीं यन्त्रे संस्थाप्य भेषजं कुर्वन्ति । यथा समीरपन्नागादिविधौ । तत्र घटकद्रव्याणां पाकावसर आत्मीयमुद्गमनस्वभावं मिथः प्रतिघ्नन्ति तानि द्रव्याण्येवेति न तत्र शलाकाप्रवेशाद्यपेक्षेति तद्विषये भिषगाशयो बोध्यः । एतदेव यन्त्रमन्तस्तलभागे काचकलश्या बुध्नस्य समन्तात् किंचिल्लवणं प्रसार्यावशिष्टं भाण्डं पश्चादवालुकाभिः संपूर्य यद्रसगोलकादि पच्यते तदपि वालुकायन्त्रं वदन्तीति । रसगोलः सप्तदशाध्याये त्रिविक्रमादिरसविधौ वक्ष्यमाणो बोध्यः । एवमेवं यन्त्रभाण्डादिविधाय वालुकास्थाने लवणमेव विक्षिपेत् । तेनैतद्यन्त्रं लवणयन्त्रसंज्ञां लभते । अस्य यन्त्रस्योपयोगं च वक्ष्यति सप्तदशाध्याये मेहारिरसविधौ । अथ रससारे यद्यन्त्रं किंनरयन्त्रनाम्ना पठितं तदेवात्र लवणयन्त्रनाम्ना संगृह्णातिअन्तः कृतरसालेप इति । आलेप इत्युपलक्षणम् । मृद्भाण्डे खर्परसमाने विशालमुखेऽन्तस्तले न्युब्जं स्थापनीयं यल्लघु ताम्रपात्रं तत्पारदादिमोलकोपरि न्युब्जं निधाय मृल्लवणादिना भाण्डतलताम्रपात्रमुखसंधिं विलिप्य तद्यन्त्रभाण्डं लवणक्षाराद्यन्यतमेनाऽऽपूर्य पिधानेन पिधाय प्रहरपर्यन्तं शालिस्फुटनपर्यन्तं प्रहरपर्यन्तं(?)वा पचेत् । एवंविधमपि यन्त्रं लवणयन्त्राख्यमेतद्रसकर्मणि पाकमूर्छनादिकर्मणि प्रशस्तं स्यात् । उक्तं च रससारे—'मूर्छनं रसराजस्य कर्तव्यं वादिभिः सदा । विशेषफलया पूर्वं बृहत्योपविषैस्तथा ॥ कर्कोटीक्षीरकन्दाभ्यां चित्रेण गृहकन्यया । एकेनाप्यथ संमर्द्यो याममेकं तु पारदः ॥ किंनरं यन्त्रमादाय औषध्या लेपयेत्तलम् । नवसारयुतं सूतं यन्त्रमध्यगतं न्यसेत् ॥ दद्याद्रसोपरि स्रावं संधिलेपं दृढं मृदा । लवणेन च संपूर्य द्वारं संरुध्य यत्नतः ॥ चुल्लिकोपरि संस्थाप्य वह्निमग्निं ज्वालयेत्सुधीः । यामैकेन तदुत्तार्य कर्तव्यः शीतलो रसः ॥ यन्त्रादुद्धृत्य यत्नेन

सूतमुत्थाप्य मूर्छितम् । अमूर्छितस्तदा देयः कलांशं मूर्छिते रसः ॥ सिन्धूत्थट-ङ्कणाभ्यां च मर्दयेन्मधुसंयुतम् । दोलायन्त्रे ततः स्वेद्यः क्षाराम्ललवणैः सह ॥ उत्थाप्य मूर्छयेत्पश्चाद्द्वारं वारं रसेश्वरम् । पुनरुत्थापितं कुर्यादेकविंशतिवारकम्' इति । अथ नलिकायन्त्रमाह—लोहनालेति । निरुद्धं निरुद्धमुखं मुद्रया । मागवच्चुल्यां मन्दाग्निनेत्यर्थः । अत्र यन्त्रभाण्डलवणदानादि पूर्ववद्वियात् । क्राम-णौषधैः सह मर्दितपारदस्य पत्रे लेपनात्प्रागतिमृदुस्वेदार्थमेतद्यन्त्रस्योपयोगो बोध्यः । तदुक्तं रसहृदये—'अथवा दरदशिलालैर्गन्धकमाक्षिकपक्कमृतनागैः । कङ्कुष्ठप्रवाल-सहितैः पिष्टैश्च कङ्गुणीतैले ॥ मध्ये सूतो युक्तो मृदितः खल्वे तथाऽऽयसे विधिना । संस्वेद्य वंशनलिकां दोलायन्त्रेण स्वेदितां त्रिदिनम् ॥ एतैर्लिप्त्वा कृष्णैः पत्रं पूर्वोक्तविधानेन । नागं दत्त्वा प्रकटं स्तोकं स्तोकं क्रमेणैव ॥ भवति हि कनकं दिव्यमक्षीणं देवयोग्यं च' इति । मध्य औषधान्तः सूतो युक्तः कार्य इत्यर्थः । एतैः स्वेदितौषधैस्तथा कृष्णैः कृष्णलवणैः पूर्वोक्तविधानेन दीपयोगेन यदुक्तं सूत-कृष्टीविधानं तेन पत्रलेपं कृत्वा तप्तपत्रे स्तोकं स्तोकं यथा स्यात्तथा नागं दत्त्वा तेन विधिना पत्रं ताम्रजं कनकं जायत इति संबन्धः । तथा धातुवादे विशि-ष्टग्रासचारणपूर्वकं पारदस्य भस्मकरणार्थमस्य यन्त्रस्योपयोगो बोध्यः । तदुक्तं रस-सारे—व्योमजीर्णं रसं कृत्वा सूरणेन विमर्दयेत् । यन्त्रे सोमानले रुक्मं ग्रासक्रमेण जारयेत् ॥ समजीर्णे यदा रुक्मं चतुर्थांशेऽहिफेनकम् । एकत्र मर्दयेत्खल्वे अम्लयुक्ते विशोषयेत् ॥ यन्त्रस्य नलिकामध्ये सर्वं क्षिप्त्वा तु चारयेत् । नलवाह्ये तु तद्यन्त्रं सिक्तया पूरयेत्ततः ॥ मन्दानलः प्रकर्तव्यो घटिकानां चतुष्टयम् । मधुधू-साहिफेनैश्च तद्रसमोद्धृत्य भावयेत् ॥ गद्याणचतुरशीतिर्ग्राह्यो यत्नेन पारदः । गद्याणं मृतकल्कस्य तस्य मध्ये विनिक्षिपेत् ॥ निरुध्य वज्रमूषायां करीषाग्नौ तु धामयेत् । तद्भस्मैदन्धमूषायां रसो हेम प्रजायते' इति ॥ ४९ ॥

मूलम्—वालुकागूढ० वार्तिकैरभिधीयते ॥ ५० ॥ टीका—अथ भूधरयन्त्र-माह—वालुकेति । गर्ते राजहस्तमात्रगम्भीरे गर्ते हस्तमात्रायामविस्तारे चतुरस्रे वर्तुले वा तादृशे गर्ते रसान्वितां पारदगर्भितां मल्लमूषां वालुकागूढसर्वाङ्गां निधाय गर्तकण्ठपर्यन्तं वालुकया प्रपूर्योपरि किंचित्पार्श्वे च दीप्तवन्योपलैः संवृणुयादाच्छादयेत् । सम-न्ततो वन्योपलैराच्छाद्य ज्वालयेदित्यर्थः । अत्र पारदस्य यन्त्रणमात्रं वालुकायां भूमावेव वह्निस्तूपर्येव गर्भयन्त्रे सर्वमेव भूगर्भे । भूधरपुटे तु न वालुकासंबन्धः । इति त्रयाणां यन्त्रपुटानां विशेषो बोध्यः । अत्रोपलानामर्धेभपुटपर्याप्तानां ग्रहणं तेषु दग्धेषु पुनर्वन्योपलानि तावन्त्येव दत्त्वा पुनः पुटनम् । एवं पुनः पुनः पुटदानेन पचनं कार्यम् । उपरि संततमूद्ध्वाग्नेरत्राऽऽवश्यकत्वात् । अस्य यन्त्रस्य गन्धक-जारणायां पारदस्य पाकमूर्छने मारणाद्यनेककर्मणि सुखेन सिद्ध्यर्थमुपयोगो बोध्यः ।

उक्तं च रसार्णवे—'जारणे मारणे चैव रसराजस्य रञ्जने । यन्त्रमेकं परं मर्म यत्रौषध्या महाबलम् ॥ औषधीरहितश्चायं हठाद्यन्त्रेण बध्यते । सर्वत्र सूतको याति मुक्त्वा भूधरलक्षणम् ' इति । श्वासकासकरिकेसरिरसविधावस्योपयोगं वक्ष्यति च । अथ पुटयन्त्रमाह—शरावेति । भूमितले करीषराशिं कृत्वा तत्र शरावसंपुटितं पारदं च धृत्वाऽग्निमानविद्वैद्यो घटिकाद्वयपर्यन्तं पचेत् । अत्यन्त-संनिहिताग्निसंयोगात् । अथवा चुल्ल्यां करीषाग्निं दत्त्वाऽधिश्रितखर्परे शरावसंपुटितं रसं धृत्वा खर्परमुखमाच्छाद्य यामपर्यन्तं द्वियामं वा पचेत् । दूरतराग्निसंयोगात् । एवं न्यूनाधिकः पचनकालो रसयोगिद्रव्याद्युद्गमशालित्वावयवशैथिल्यकाठिन्याद्यनुरोधेन स्वबुद्ध्यैव तर्क्य इति भावः । एतत्पुटयन्त्रं वेद्यम् । अथ कोष्ठीयन्त्रमाह—षोडशाङ्गुलेति । धातुसत्त्वेति । विशिष्टधातूनां ताप्यगैरिकविमलादीनामनुद्गमशालिनां मृदूनां च सत्त्वस्य निपातार्थमेतद्यन्त्रं विद्यात् । अस्यां कोष्ठ्यां मध्य उचितां धातुगर्भितां वृन्ताकादिमूषां संस्थाप्य कोकिलैर्मूषामुपर्युपरिभावेन पार्श्वतश्च संपूर्य यथोचितं धमेत् । लघुभस्त्रिकादिनेत्यर्थः । कोष्ठीयन्त्रे सत्त्वनिपातनार्हा धातव उदाहृताश्च रससारे—' वैक्रान्तं सस्यकं ताप्यं कान्ताभ्रे विमलं गिरिः । गौरिका तुत्थकं चैव राजावर्तो विशेषतः ॥ एषामुपरसानां च कोष्ठे सत्त्वनिपातनम् ' इति । अथ खलचरीयन्त्रमाह—यत्रेति । यन्त्रभूते लोहपात्र आभ्यन्तरोपकण्ठे पार्श्वयोरवसञ्जनार्थं वलयद्वयं कार्यम् । वलयमध्ये तु प्रवेशार्हकोष्ठकं लौहं स्वल्पपात्रमन्यद्विधाय मूर्छितरसगर्भितं तत्स्वल्पपात्रं प्रवेश्य वलययोरवसञ्जितं कृत्वा स्थूलपात्रे काञ्जिकं प्रभूतं दत्त्वा चुल्ल्यां मन्दाग्निना प्रहरपर्यन्तं स्वेदयेत् । तेन पारद उत्थाय काञ्जिकद्रवे प्रविश्य तिष्ठति । अत एवास्य यन्त्रस्य जलाहार्ययन्त्रमित्यपि नामान्तरं काञ्जिकजलेन स्वल्पपात्राद्रसस्य ह्रियमाणत्वादिति । मूर्छितो रस उत्थाय खलेऽङ्गणे चरितुं शक्नोत्यनेनेति व्युत्पत्त्या खलचरीत्यपि नाम । अत्र यत्स्वल्पं पात्रं तत्कान्तमयं कृत्वा यन्त्रे तत्पात्रमध्ये पारदो धृतश्चेदतिशयेन गुणवान्भवति । उक्तं हि रसार्णवे—'न सूतेन विना कान्तं न कान्तेन विना रसः । कान्तसूतसमायोगात्प्रयोगो देहधारकः ' इति । अथ तिर्यक्पातनयन्त्रमाह—क्षिपेद्रसमिति । नताधोनालेति । नतोपकण्ठच्छिद्रसंलग्नाधोनालसंयुते । अन्यघटः पार्श्वे निम्नदेशे स्थितः । ततो घटयोर्वदने रुद्ध्वा विधानाभ्यां पिधाय संधिलेपादि कृत्वाऽधो घटयोर्वदनयोरधःस्थितनलिकायोजितच्छिद्रयोरपि संधिलेपं कृत्वा ज्वालयेत् । घटान्तरे तापोत्पत्तिपर्यन्तं पारदशुद्ध्यर्थमेतद्यन्त्रस्योपयोगो बोध्यः ॥ ५० ॥

**मूलम्**—चषकं वर्तुलं लौहं० रसभस्मकृते हितम् ॥ ५१ ॥ **टीका**—पालिकायन्त्रमाह—चषकमिति । चषकं दर्वीसमानं पात्रम् । तच्च न तिर्यग्दण्डं किंतु विनताग्र उच्छ्रितो दण्डो यस्य तथोक्तम् । एतद्यन्त्रं सधूमगन्धक-

जारणोपयोगि तथा भैरवनाथोक्तपर्पट्यादिविधौ चोपयोक्ष्यते । घटयन्त्रमाह—चतुष्प्रस्थेति । चतुष्प्रस्थजलाधारस्तन्मानमितजलपूरणार्होदरश्चतुरङ्गुलमितमुखो घटः कुम्भो घटयन्त्रं नाम । एतद्यन्त्रं रसस्य पारदस्याऽऽप्यायनकं पुष्टिकरं स्मृतम् । वक्ष्यमाणनियमनसंस्कारेऽस्योपयोगो बोध्यः । अस्यैव यन्त्रस्य रसराजसुन्दरे कवचीनामान्तरमुक्तम् । अथेष्टिकायन्त्रं लक्षयति—निधाय वर्तुलामिति । मल्लं गम्भीरोदरं क्षुद्रं मृन्मयं पात्रं तद्गर्तामध्ये संस्थाप्य तत्रैकामिष्टिकां मध्यगर्तवर्ती च निधायेष्टिकाघटकगर्तस्य परितः समन्ततोऽङ्गुलोच्छ्रायां पालिकामालवालं विधाय तद्गर्ते पारदं क्षिप्त्वा तद्गर्तमुखे वस्त्रं प्रसार्य तच्च दृढं बद्ध्वा तदुपरि समभागं गन्धकं दत्त्वा न्युब्जमल्लेन गर्तमुखं रुद्ध्वा मल्लपालिमध्यभागं मृदा सम्यग्रुद्ध्वोपरि वन्योपलैः कपोतपुटं पुनः पुनर्देयम् । इष्टिकया पारदस्य यन्त्रणादेतद्यन्त्रमिष्टिकायन्त्रनाम्ना कथितम् । तेन निर्धूमगन्धकजारणं कुर्यात् । जीर्णे च गन्धके पारदो रक्तवर्णो भवेत् । अत्र द्रुतपारदे गन्धकजारणायां गर्तास्ये वस्त्राच्छादनं वस्त्रोपरि गन्धकं च दद्यादिति विधिक्रमः । यत्र तु बद्धस्य रसस्य गन्धकजारणा कर्तव्या स्यात्तदा तु पारदं वस्त्रेण बद्ध्वा तस्याधस्तादुपरिष्टाच्च गन्धकं दत्त्वा जारयेदित्यनुक्तोऽपि विशेषो बोध्यः । अत एव चैकोनविंशेऽध्याये कालविध्वंसनरसविधौ वक्ष्यति—'आदाय बन्धयेद्वस्त्रे इष्टिकायन्त्रगं पचेत् । जम्बीरैर्गन्धकं पिष्ट्वा अधश्चोर्ध्वं च दापयेत् ॥ तुल्यं पुनः पुनर्देयं रुद्ध्वा लघुपुटे पचेत्' इति । अथ हिङ्गुलाकृष्टिविद्याधरयन्त्रमाह—स्थालिकोपरि विन्यस्येति । अन्तस्तले निहितशुष्कहिङ्गुलाया विशालमुखाया स्थालिकाया उपर्युत्तानामेव लघुस्थालीं विन्यस्य स्थापयित्वा संधिलेपादिना रुद्ध्वोर्ध्वस्थाल्यां किंचिच्छीतजलं पुनः पुनर्दद्यात् । अधश्चुल्यां वह्निं ज्वालयेत्प्रहरत्रयपर्यन्तम् । एतद्यन्त्रं पारदस्य हिङ्गुलाद्वियुज्योर्ध्वपात्रतल आकृष्टिकरं स्यात् । एतदाकृष्टरसस्य षोडशाध्याये चण्डसंग्रहगदैककपाटविधावन्यत्र चोपयोगं वक्ष्यति । अथ डमरुयन्त्रमाह—पारदौषधगर्भितयन्त्रस्थाल्युपरि न्युब्जामेव स्थालीं निधाय निरुन्धयेत् । मृत्कर्पटादिना संधिनिरोधं कुर्यात् । यन्त्रस्याधस्तादग्निः कार्यः । एतद्यन्त्रं डमरुकाख्यमूर्ध्वतलगपारदभस्मकर्मण्युपयुज्यते ॥ ५९ ॥

**मूलम्**—मल्लमध्ये चरेद्गर्तं० स्थालीयन्त्रातिति स्मृतम् ॥ ६९ ॥ **टीका**—अथ नाभियन्त्रमाह—मल्लमध्य इति । दृढस्थूलविस्तृतमृत्पात्रमध्ये गर्तं कुर्यात् । तत्र पारदं गन्धकं च निदध्यात् । ततो गर्तस्य समन्ततोऽङ्गुलोच्छ्रायं कुड्याकारं बन्धं कुर्यात् । ततस्तं गर्तं गोस्तनाकारमूषया न्युब्जया पिदध्यात् । अत्रोच्यमानया तोयमृदाख्यया मृदा संधिं रुद्ध्वा संशोष्योपरिस्थितसर्वमल्लभागं कण्ठपर्यन्तं जलेन पूरयेत् । यन्त्रस्याधस्ताच्च चुल्ल्यां वह्निं प्रज्वालयेदित्यान्तिमश्लोकेन संबन्धो बोध्यः । अत्र जलमृच्छब्दबोधार्थं जलमृदं तत्प्रसङ्गाच्च वह्निमृदं च मध्यस्थितग्रन्थे-

नाऽऽह—लेहवदिति । अनेन बब्बूलत्वक्कषायेण पुराणं लोहकिट्टचूर्णं सूक्ष्मं कणं यथा स्यात्तथा संमर्द्य तत्र गुडचूर्णं समं दत्त्वा पुनः संमर्द्य कृतेयं मृज्जलमृदिति ख्याता । अथ खटिकाश्वेतचूर्णद्रव्यं खड्डू चास इति वाऽऽख्यातम् । पटु सैन्धवम् । लोहकिट्टं च सर्वमेतन्मिथः समं गृहीत्वा महिषीदुग्धेन संमर्द्य विहितेयं मृद्वह्निमृदाख्याता । इयं च तीक्ष्णं वह्निनितापं सहत इत्यन्वर्थाख्या । एतया रुद्धो रसस्तत्पयसा कृतस्नेहेन बद्धः पुरुष इवाप्यत्र गन्तुं न शक्नोति । अस्य यन्त्रस्य कच्छपयन्त्रमिति नामान्तरं केचिद्वदन्ति । पाषाणभेदिरसविधावस्योपयोगं वक्ष्यति । रससारे पारदबन्धनार्थमप्यस्य यन्त्रस्योपयोगमुदाजहार । अथ ग्रस्तयन्त्रमाह—मूषामिति । स्थूलमूषोदरे प्रवेशयोग्यामाद्यन्तमध्यभागेषु तत्समवर्तुलां लघुमूषां कुर्यात् । एतद्यन्त्रं ग्रस्तयन्त्रमिति ख्यातम् । अनेन हि स्वोदरे रुद्धगतिः पारदो ग्रस्तः पीडितो मारकभेषजेन मारितो वा भवति । कज्जलीकृतं भेषजान्तरेण संमर्दितं वा पारदं स्थूलमूषान्तस्तले संभृत्य तद्रोधार्थं किंचिल्लघुमूषां न्युब्जां तदुदरे प्रवेश्य दृढं यथा स्यात्तथा संधिरोधं कृत्वा गजपुटेन पारदं भस्मी कुर्वन्ति भिषजः । रन्धणं बन्धनम् । अथ स्थालीयन्त्रमाह—स्थाल्यामिति । स्थाल्यां मृन्मयपात्र्यां ताम्रलोहादि निक्षिप्य मल्लेन निरुद्धमुखं कृत्वा तद्भेषजं स्थालिकाधःस्थवह्निना पच्यत इत्येतत्स्थालीयन्त्रं प्रसिद्धम् ॥ ७९ ॥

मूलम्—विधायाष्टाङ्गुलं पात्रं० यन्त्रं तत्कन्दुयन्त्रकम् ॥ ८० ॥ टीका—अथ धूपयन्त्रमाह—विधायेति । अत्र यथोक्तमानं लौहं पात्रं विधाय तत्कण्ठाधो द्व्यङ्गुले देशे जलाधारं लघुपात्रविशेषं निहितं कुर्यात् । जडद्रव्यस्य धारणार्थमाश्रयभूतं पात्रं जलाधारशब्दवाच्यम् । तत्र लोहशलाकास्तिर्यक् निधाय तत्र स्वर्णपत्राणि विन्यसेत्स्थापयेत् । तेषामधोभागे वक्ष्यमाणं धूमद्रव्यं निक्षिपेत् । ततो यन्त्रपात्रमपरेण न्युब्जपात्रेण च्छादयेत् । मृदा संधिलेपं कृत्वा यन्त्रस्याधस्ताद्वह्निं कुर्यात् । उक्तविधानेन हतानि पत्राणि कृष्णानि भवन्ति । ततस्तानि खरसे तप्तखल्वे यथाविधि मर्दनेन पारदो भक्षयति । भक्षितानि च तानि पारदोदरे शीघ्रं द्रवन्ति । अत्र धूपद्रव्यमाह । पारदेन साकं गन्धकहरितालमनःशिलानामन्यतमस्य समस्तानां वा कृतायाः कज्जल्या धूपनं तया कज्जल्या भस्मीकृतनागेन धूपनं वा स्वर्णपत्राणां धूपनसंस्कारार्थं मुख्यं धूपनद्रव्यमुदाहृतम् । तारार्थं धूपनं तुल्यत इति शेषः । तदाह—तारपत्राण्युक्तकज्जल्या मृतेन वङ्गेन धूपयेत् । यथायोग्यैर्मारणयोग्यैरुपरसैर्हिङ्गुलरसकमाक्षिकाद्यैरपि धूपयेत् । जारणाद्रवसाधनं पत्राणां जारणोपयोगिपारदगर्भद्रवसाधनमित्यर्थः । प्रागुक्तं स्वेदनीयन्त्रमेव कन्दुकयन्त्रनाम्नाऽऽह—स्थूलस्थाल्यामिति । अन्ये मनीषिणो धीरा वक्ष्यमाणप्रकारेण प्राहुः—यद्वेति । तत्कन्दुकयन्त्रमिति । एवं च तेषां मते स्वेदनीयन्त्रमस्माद्भिन्नमेवेति भावः । पुष्पादीनामतिमृदुद्रव्याणां कल्कादेर्वा स्वेदनार्थमस्य यन्त्रस्योपयोगो बोध्यः ॥ ८० ॥

मूलम्—खल्वयोग्या शिला० भवेत्कोटिगुणो रसः ॥ ९१ ॥ टीका—अथ खल्वसंज्ञायोग्या सा शिला स्यात् । या नीला श्यामवर्णा वा स्निग्धादिगुणविशिष्टा षोडशाङ्गुलकोच्छ्राया तथा नवाङ्गुलकविस्तारा चतुर्विंशाङ्गुलैरासमन्ताद्दीर्घा च स्यात् । सा खल्वयोग्येति पूर्वत्र संबन्धः । घर्षणी तु द्वादशाङ्गुलदीर्घा स्यात् । पुनः खल्वशिलामानविकल्पमाह—विंशत्यङ्गुलेति । अथवा खल्वशिला विंशत्यङ्गुलदीर्घा । उत्सेध उच्छ्राये च दशाङ्गुला कार्येति विशेषः । नवाङ्गुलेति विस्तारमानं तु प्रागुक्तमेव ग्राह्यम् । अथ त्रिधा खल्वयन्त्रभेदानाह । तत्र द्वौ खल्वौ निरुद्गारौ ग्रन्थिरहितौ सुश्लक्ष्णौ पुत्रिकया घर्षण्या युक्तौ कार्याविति समासेनोक्तयोरेतयोर्मध्ये प्रथमो वक्ष्यमाणसविस्तरलक्षणयुक्तश्चेत्स सिद्धिखल्व उच्यते । तल्लक्षणमाह—उच्छ्राये दशाङ्गुल उत्सेधे स दशाङ्गुल इति । कलेति । षोडशाङ्गुलायामवान् । तथा विस्तारेण दशाङ्गुलः । तथा निम्नो गम्भीरः कोष्ठभागो मुनिमितैः सप्तसंख्याकैरङ्गुलैरेव स्यात् ।: तथा पाल्यां कोणे द्व्यङ्गुलविस्तारः । एवं मसृणोऽतिशयेनार्धचन्द्राकारः स्यात् । किंच घर्षः पुत्रिकाशब्दवाच्यः स द्वादशाङ्गुलः स्यात् । एवंविधः खल्वः सिद्धये भवति । अस्मिन्खल्वे पञ्चपलमेव सूतं मर्दयेत् । ततः सिद्ध्यर्थमत्र मर्दितमेनं सुखेन मर्दनार्थमनुपदमुच्यमाने खल्वे पूर्वोक्ते वा खल्वे योजयेत् । जारणार्थं वा तप्तलोहखल्वे मर्दयेत् । तत्र मर्दनेन पिष्टीभूतमेनमतिप्रभूतं गुणलाभार्थं शीघ्रगर्भद्रुत्यर्थं वा कान्तखल्वे वा योजयेत् । नेत्रभेषजविधौ वा ताम्रमये च खल्वे योजयेत् । रसरसायनयोगेषु च तत्तद्भेषजसहितमर्दनार्थमनिर्दिष्टलक्षणेष्वन्येष्वपि खल्वेषु योजयेदिति भावः । शतसहस्रपलमितपारदं शोधयितुं यतमानेन साधकेनैकैकस्मिन्सिद्धिखल्वे पञ्च पञ्च पलानि रसस्य मर्दनार्थं दद्यात् । अनेकखल्वालाभ एकस्मिन्नेव खल्वे पञ्चपलं संमर्द्य पात्रान्तरे धृत्वा द्वितीयं पञ्चपलसमूहं मर्दयेत् । परंतु खल्वमानं मर्दनीयरससमानं च सौकर्यार्थं नाधिकं विदधीत । सम्यङ्मर्दनालाभेन गुणालाभसंभवादिति पारदमानोक्त्याऽत्र सूचितम् । अन्यथा खल्वलक्षणोपदेशमध्ये पारदक्षेपमानोक्तेर्निष्प्रयोजनत्वापत्तेरिति भावः । द्वितीयखल्वलक्षणमाह—द्वादशाङ्गुलेति । मध्य उदरभागे चतुरङ्गुलनिम्नः । मर्दकस्त्वत्र द्वादशाङ्गुलदीर्घ एव कार्यः । अथ तप्तखल्वमाह—लौह इति । नवाङ्गुलदीर्घः । तत्र मर्दनविधिं फलं चाऽऽह—कृत्वेति । तस्मिन्विमर्दितेति । कान्तलोहकृतोऽयं चेत्पारदेऽत्यन्तगुणोत्कर्षप्रदो भवेत् । अथ सारणायन्त्रं द्विविधं कथयामि—'दीर्घा लोहमयी मूषा रसं तस्यां विनिक्षिपेत् । रक्ततैलवसायुक्तं मूषामध्ये विनिक्षिपेत् ॥ मूषोर्ध्वं संपुटं दत्त्वा संधिलेपं तु कारयेत् । सच्छिद्रे संपुटेनालमुन्मत्तकुसुमप्रभम् ॥ अतियत्नेन तां मूषां करीषाग्नौ निधापयेत् । हेमरक्तसमं नागं गालयित्वा विचक्षणः ॥ मूषानाले विनिक्षिप्तमित्थं सरति सूतके । सप्तवारं प्रकर्तव्यं सारणं च महारसे' इति रससारोक्तं सारणायन्त्रम् ।

रक्ततैलं कङ्गुणीतैलम् । अनेन तु पारदोपरि स्वर्णादिबीजं स्थित्वैकी भवति । बीजोपरि पारदः पतित्वैकी भवति चेदतिगुणोत्कर्षलाभो भवतीत्यभिप्रेत्य रसहृदये यन्त्रान्तरं च कथितम् । तद्यथा—'कृत्वा नलिकां दीर्घां षडङ्गुलां धूर्तकुसुमसंकाशाम् । मूषाऽप्यधोविलग्ना कर्तव्या वै मृदा लेप्या ॥ अपरा सूक्ष्मा नलिकैकमुखा कार्या सप्ताङ्गुला सुदृढा । मध्ये प्रविशति च यथा तद्वत्कार्या च दृढमुखा । तस्मिन्सूतः क्षिप्तः सारणतैलान्वितो मदनरुद्धमुखः । तदनु बृहत्तमया हेम प्रद्राव्य हेमकोष्ठिकया । तस्मिन्मध्ये क्षिप्त्वा नलिकाग्रमधोमुखी कार्या । अन्तरूर्ध्वं भाराक्रान्तां सरति रसो नात्र संदेहः ' इति । अधोविलग्ना तदधोभागे मूषा संलग्ना कार्या । मध्ये पूर्वनलिकामध्ये । पारदस्य मूषायां गमनोत्तरं मदनरुद्धमुखः सिक्थकेन रुद्धं मुखं मूषासंलग्ननलिकान्तःसंधिभागो यस्मिंस्तथोक्तः कार्यः । तस्मिन्मध्ये तद्यन्त्रान्तर्भागे स्वर्णं द्रुतं क्षिप्त्वा सप्ताङ्गुलाया नलिकाया अग्रभागं च तत्क्षणे तद्यन्त्रषडङ्गुलनलिकामध्ये क्षिप्त्वा सप्ताङ्गुलनलिकाऽधोमुखी कार्या । ततो मूषायुक्तनलिकाया भारविशिष्टत्वेन सा भाराक्रान्ता भवत्येव । तापेन मदने विलीने सति विवृतमुखेन नलिकामार्गेण सप्ताङ्गुलनलिकान्तस्तले प्राप्तसुवर्णोपरि सतैलः पारदः पतित्वा तापेनैकी भवतीति बोध्यम् । एतत्सारणायन्त्रं प्रस्तुतोपलब्धपुस्तकेषु, आदर्शीभूतेषु यद्यपि पठितं न दृश्यते तथाऽपि प्राक्काले तत्पाठ आसीदित्यनुमीयते । वक्ष्यमाणवर्धमानरसविधौ द्वाविंशाध्यायोक्ते 'ततश्च सारणायन्त्रे सूत्रस्थानसमीरिते' इत्युक्तेः । कूपीयोगेन रसोपरसादीनां स्थिरीकरणार्थं चक्रयन्त्रमभिहितम् । तत्पाठस्तु रससारे यथा—'हस्तमात्रं प्रकर्तव्यं यन्त्रं चक्राकृति शुभम् । चुल्लिकोपरि संस्थाप्य संधिलेपं तु कारयेत् ॥ मध्ये तु वर्तुलं छिद्रं कूपीं तत्र निधापयेत् । कूपिकार्धे च कर्तव्या मृत्स्नया पालिकाकृतिः ॥ लम्बमाना यथा कूपी चक्रयन्त्रे स्थिरायते । अर्धं यन्त्रादधो याति ऊर्ध्वं चैव तदर्धकम् ॥ वह्निप्रज्वलनं कुर्याद्यन्त्राधः साधकोत्तमः । निर्धूमा स्याद्यदा कूपी मुद्रां दद्यात्तदानने ॥ कर्तव्यो वर्धमानोऽग्निर्यावद्यामाष्टकं भवेत् । कूपकस्योर्ध्वभागे तु सत्त्वं गच्छति निर्मलम् ' इति । यदोर्ध्वं न गच्छति तदा स्थिरीभूतमिति विद्यात् । अथ ग्रन्थान्तरे तुलायन्त्रं पठितम् । तथा च तत्पाठः—'वृन्ता[ का ]कारमूषे द्वे तयोः कुर्यादधः खलु । प्रादेशमात्रां नलिकां मृदा लिप्त्वा सुगन्धिकाम् ॥ तत्रैकस्यां क्षिपेत्सूतमन्यस्यां गन्धचूर्णकम् । निरुध्य मूषयोर्वक्त्रे वालुकायन्त्रके क्षिपेत् ॥ गन्धाधो ज्वालयेदग्निं तुलायन्त्रमुदाहृतम् । बालगन्धाश्मसाराणां जारणार्थमुदाहृतम् ' इति । इष्टिकायन्त्रसमानमेव गौरीयन्त्रम् । अथाभ्रसत्त्वार्थं विशिष्टकोष्ठयन्त्रमुच्यते—'हस्तप्रमाणं दीर्घारमष्टसंख्याङ्गुलं तिर्यक् । समभूभागे घटितं वृत्तं मृत्कर्मसंपन्नम् ॥ वातायनद्विवृत्तं भस्त्रीमुखतुल्यमित्यधोभागे । प्रथमेत्पशुवसानालैर्भस्त्राभिर्वाऽभ्रसत्त्वार्थम् ॥ इदमेव कोष्ठयन्त्रं पूर्णं विद्याद्यथोचिताङ्गारैः ' इति । तथा—'दीर्घकण्ठ्यां काचकूप्यां गिरयेत्काचभाण्डकम् । तिर्यक्कृत्वा पचे-

च्चुल्यां बकयन्त्रमिति स्मृतम् ' । तथा—विनिधाय घटे द्रव्यं कनीयांसमधोमुखम् । घटमन्यं मुखे तस्य स्थापयित्वा द्वयोर्मुखम् । मृदुमृद्भिः समालिप्य नलिकां विनिवेशयेत् । यन्त्रकुण्डलितां भित्त्वा जलद्रोणीमहत्तमाम् । आधारभाण्डपर्यन्तं ततश्चुल्ल्यां निधापयेत् । अधस्ताज्ज्वालयेद्वह्निं यावद्वाष्पो विशेदधः । गृह्णीयादाधारगतं निर्मलं रसमुत्तमम् । नलिकायन्त्रमेतद्धि मुनिभिः परिकीर्तितम् ' इति ॥

इति रसरत्नसमुच्चयटीकायां खरेइत्युपाह्वेन वामनात्मजेन चिन्तामणिना विहितायां सरलार्थप्रकाशिन्याख्यायां सूत्रस्थाने यन्त्रात्मको नवमोऽध्यायः ॥ ९ ॥

---

## अथ दशमोऽध्यायः ।

मूलम्—मूषा हि क्रौञ्चिका प्रोक्ता० वज्रमूषां विदध्यात्खलु सत्त्वपातने ॥ ८ ॥

टीका—अथ पारदसंस्कारोपयोगिनानाविधसत्त्वपातवज्रद्रावणादिकार्यसाधनान्मूषा अपि रसोपयोगिन्य इति मूषावर्णनमारभ्यते । तत्राऽऽदौ मूषापर्यायानाह—मूषा हीति । हिः पादपूरणे । मूषाशब्दस्यान्वर्थतामाह—मुष्णातीति । मूषा येति । या लोकप्रसिद्धा मूषा सा रसोपरसधातुस्थान्दोषान्मुष्णात्यतो मूषेति निगद्यत उच्यते । तस्या उपादानकारणं समवायिकारणं मृत्तिका लोहं च । तुषशणोपलादि तु कार्यसिद्धौ मृत्तिकादीनामुपाकारकम् । न केवलं मूषा धातुस्थगुणान्रक्षति किंतु धनदानेन मानवृद्धिमेव करोतीत्याह—मूषेति । काकिनी कपर्दिका । सा चात्रात्यल्पलाभोपलक्षिका । एवं च धातुवादोक्तविधौ सहायभूतायास्तस्याः सकाशादल्पधनलाभोऽपि वरं प्रिय एव । परंतु दुर्जनपादयोः पतनेन लक्षलाभोऽपि न प्रियः किंतु निन्दित एव । मानहानिकरत्वात् । मानो हि महतां धनमिति भावः । तत्संबन्धिबन्धपर्यायामाह—मूषापिधानयोर्बन्ध इति । मूषार्थं प्रशस्तमृत्तिकाया लक्षणमाह—मृत्तिकेति । पाण्डुरा स्थूलकणा शोणमिश्रपाण्डुरकणा वा । कौलाली कुलालभाण्डोत्पादनार्थमुपादानमृत्तिका । अथ सर्वमूषोपयोगिसाधारणमृत्तिकामाह—या मृत्तिकेति । दग्धतुषेति । चतुर्थांशेन दग्धतुषयुक्ता प्रत्येकं तथा भागैः शिखित्रैः कोकिलैर्हयलद्दिनाऽश्वशकृता च युक्ता सा प्रशस्ता । मृषिकामृदि चतुर्थांशेन संयोज्यद्रव्याण्याह—श्वेताश्मान इति । गारेत्यपरपर्यायाः । ते च दग्धा एव ग्राह्याः । अथ वज्रमूषोपयोगिद्रव्याण्याह—मृद इति । रसार्णवे तु मूषाया द्वैविध्यं प्रतिपादितम्—' प्रकाशा चान्धमूषा च मूषा तु द्विविधा स्मृता । प्रकाशमूषा वेवेशि शरावाकारसंयुता ॥ द्रव्यनिर्वाहणे सा च वादिकैः सुप्रशस्यते । अन्धमूषा तु कर्तव्या गोस्तनाकारसंनिभा ॥ पिधानकसमायुक्ता किंचिदुन्नतमस्तका । पत्रलेपे तथा रङ्गे द्वंद्वमेलापके तथा ॥ सैव च्छिन्द्रान्विता मध्ये गम्भीरा सारणोचिता । तिलभस्म द्विरंशं तु इष्टिकांशसमुत्थितम् ॥ भस्ममूषा तु विज्ञेया तारसंशोधने हिता ' इति ॥ ८ ॥

**मूलम्**—दग्धाङ्गारतुषोपेता० याममग्निं सहेत सा ॥ १५ ॥ **टीका**—अथ योगमूषामाह—दग्धगारेति । दग्धा गारा वज्रप्रसवाः श्वेतपाषाणा दग्धं शालितुषं च प्रत्येकं चतुर्थांशेन तैस्तथा तत्तद्बिडचूर्णैश्च मिश्रिता या प्रशस्ता वल्मीकमृत्तिका तया विहिता घटिता मूषा योगमूषेति कीर्त्यते । इयं चाभ्रकसत्त्वादेर्जारणायां विशिष्टो यो यो बिडस्तेन विलेपिता तेनैव कार्या । अथ जारणायां सा पारदगर्भिता कोष्ठीयन्त्रे भस्त्रिकया ध्माता चेत्तया साधितो जारितताम्रसत्त्वादिः खोटादिरूपश्च पारदो गुणवत्तरो भवति । एवं चेयं योगवाहिमूषा योगमूषेत्यन्वर्थनामिकेति भावः । 'सर्जिसैन्धवकासीसकङ्कुष्ठीः पिष्ट्वाऽम्लमूत्रकैः । सप्तवारं पचेत्कूपे बिडोऽयं व्योमजारणः ' इति । 'सर्वाङ्गदग्धमूलकभस्म प्रतिगालितं सुरभिमूत्रेण । शतभाव्यं बलिवसया तत्क्षणतो जार्यते हेम ' इति हेमजारणबिडः । एवमेव ग्रन्थान्तराद्बिडान्तरमप्यवगन्तव्यम् । बलिवसा गन्धकः । तत्प्रमुखा जलौकामण्डूकादीनां वसा बलिवसा । 'भेकमत्स्यवसा या तु कुक्कुटस्य वसाऽथवा । भाव्यमेभिः क्रमान्नूनं शिशुमारवसाऽथवा । एका बलिवसा सम्यक् सूतस्य बन्धिनी परम् ' इति ग्रन्थान्तरे । अथ हीनजातीयनातिकठिनवज्रप्रमुखकठिनपाषाणसत्त्वरत्नानां द्रावणकरीं मूषामाह—गारेति । गाराः श्वेता वज्रोत्पादकाः पाषाणाः । भूनागधौतं परिभाषाध्यायोक्तं ग्राह्यम् । शणा दग्धतुषाश्चैते मिथः समाः । तैः समा समभागा प्रागुक्तलक्षणा मूषोपादानमृदेकत्र कृत्वा महिषीदुग्धेन संमर्द्य संस्कृता चेयं मृत्कौञ्चिकापक्षमूषां नानाविधमूषारूपो यो भामे यन्त्रतुल्यस्तन्निर्माणार्थं प्रशस्तत्वेन बहुषु ग्रन्थेषु कथिता । तद्भिन्नमूषायाः सत्त्वावरणादिकार्येऽग्निना चिरकालपर्यन्तं दुर्भेद्यत्वात् । भूनागोपेतत्वेन शीघ्रद्रावणोपयोगित्वाच्च । तया संस्कृतया मृदा विहिता मूषा शास्त्रे वज्रद्रावणकेति ख्याता । अथ गारमूषामाह—दग्धेति । दग्धा ये मृत्तिकापेक्षया षड्गुणा गारास्तद्द्विशिष्टास्तथा लोहकिट्टा अङ्गारा निर्धूमायसः कोकिलाः । तथा शणाः ताम इति ख्याताः । तैः च प्रत्येकं चतुर्थांशमितास्तैर्युक्ता या कृष्णवर्णा मृत्स्कृता मूषा शास्त्रे गारमूषेति परिकीर्तिता । तेषां पाषाणनामत्र साधकमध्ये ह्यधिकभागोपेतत्वादिति भावः । अथ वज्रमूषामाह—वज्रेति । वज्रो हीरकः । तदलाभे वैक्रान्तं ग्राह्यम् । अङ्कुशा हठान्मृत्तिकाधूलिप्रक्षेपेण निर्धूमाः कोकिलाः । तथा दग्धतुषाः । सर्वे च मिश्रास्तुल्यभागाः । सर्वेभ्यश्चतुर्गुणा मृत्तिका तत्तुल्या गाराः श्वेतपाषाणाः । एतन्निर्मिता मूषा वज्रमूषेति कथ्यते । वज्रस्य श्रेष्ठस्य महामूल्यस्य हीरकस्यापि घटकत्वात् ॥ १५ ॥

**मूलम्**—पाषाणसहिता रक्ता० गत्वरद्रव्यरोधिनी ॥ २८ ॥ **टीका**—अथ वर्णमूषामाह—पाषाणेति । पाषाणाः रक्तपाषाणाः । समभागैश्च तैः सहिता या रक्ता रक्तवर्णा मृत्तिका तया साधिता विहिता मूषा वर्णमूषेति प्रोक्ता । यस्मादियं नियुज्यते उपयुज्यते निर्वाहणेन धातोः पारदस्य वा रक्तवर्णोत्पादनार्थम् । उक्तं च रसहृदये—' निर्गुण्डीरसभावितपुटितं शिलया वर्तितं श्लक्ष्णम् । तावन्मृदितपुटितं

निरुत्थभावं नजेयावत् ॥ तारे तन्निर्व्यूढं यावत्पीतं भवेच्चिरम् । हेम्ना समेन मिलितं मात्रातुल्यं भवेत्कनकम् ' इति । अत्र निर्वाहणं चास्यां मूषायां कार्यम् । रक्तवर्गः श्वेतवर्गश्चाऽस्मिन्नेवाध्याये वक्ष्यमाणः । रूप्यमूषां निर्दिशति—एवमिति । अथ बिडमूषामाह—तत्राद्बिडमृद्भूतेति । अभ्रसत्त्वजारणस्वर्णजारणोपयोगीनि यानि वडवानलादिबिडानि यथोद्दिष्टरसादिभावितानि चूर्णानि तथा सर्वलोहादिजारणोपयोगिबिडात्मकश्चूर्णः परिभाषाध्याये बिडवर्णनावसरे प्रागुक्तः । तथा पूर्वोक्ता नानाविधा पाण्डुरादिमृत्तदुद्भूता तत्सिद्धा तथा तत्तद्बिडैर्ग्रासजारणसाधनैर्विशिष्टैश्चूर्णैरन्तर्विलेपिता या मूषा सा बिडमूषेत्युच्यते । इयं मूषा दृढकायकररसायनविधौ साधनत्वेन देहार्था देहोपयोगिनीत्यर्थः । तथा लोहमारणोपयोगिनी । अत एव लोहार्था । तथा अर्थो धनं तस्य सुवर्णाद्युत्पादनविधौ धातुवादे साधनत्वेनार्थार्था । तथा कासघ्नरत्नकरण्डकरसार्शोनाशकसर्वलोकाश्रयरसप्रभृतिनानाविधरोगघ्नरसविधौ साधनत्वेन योगार्था चेतीयं चतुर्विधकार्योपयोगिनी भवति । उदाहरणान्युदाहरिष्यामि——यथा ' माक्षिकं कुनटीगन्धं दरदश्च समीकृतम् । मारणौषधिभिर्भाव्यं नवसारेण संयुतम् ॥ तेनैव लिप्तमूषायां रसेन्द्रं स्थापयेत्सुधीः । हठेन धाम्यमानोऽसौ म्रियते नात्र संशयः ' इति । अत्र बिडमूषायां कृतसारणान्तसंस्कारं रसं मारणाय स्थापयेत् । एवं मारितो हि रसो सर्वशरीरान्तर्धातुषु लोहादिषु च प्रवेशी जायते । इति तन्मृतपारदघटितरसायनसेविनो दृढदेहकरीयं मूषा । किंच कृतसारणं तमेव पारदं मारणात्प्राक्, मधूच्छिष्टादिक्रामणयुक्तं कृत्वा धातुवेधार्थमस्यां मूषायां ताम्ररजतादे क्षिप्त्वा धमनेन तेषु द्रुतेषु सत्सु स पारदो दीर्घसंदंशनेन प्राक्षिप्यते । धातून् ताम्रादीन् विद्धान् दृष्ट्वा ततो मारणमपि क्रियत इत्यस्या अर्थार्थत्वं सिद्धम् । ' सारणान्ते भवेद्वेधो मारणान्ते रसायनम् ' इति क्रमात्क्रमेण चिकित्सायां ध्मानेन शङ्खपाण्डुरादिरसेषु सत्त्वाहरणार्थं केषांचिदुपरसानां सत्त्वाहरणार्थं चास्या उपयोग इति त्रिविधकार्यसाधिका चैषा भवतीति भावः । अथाव्यभिचारेण वज्रमात्रद्रावणार्थं वज्रमूषामाह—गारेति । बालाब्धेति । बाला नरकेशाः । अब्दध्वनिमूलं तन्दुलीयकमूलम् । इयं मूषा द्रवद्रवेण व्यथिता सती, अन्तःस्थतैजसद्रव्ययोगसंयोगेन बाह्याग्निसंयोगेन च संततं पीडिता सत्यप्यग्निं सहते । मूषाप्यानशब्दार्थमाह—द्रव्य इति । एतत्पद्यं कस्मिंश्चित्पुस्तके न दृश्यते । वृन्ताकमूषामाह—वृन्ताकाकारेति । द्वादशकाङ्गुलम् । द्वादशाङ्गुलं दीर्घमूर्ध्वमुत्तानमूषाया ऊर्ध्वतनमुखभागो धत्तूरपुष्पवत्क्रमेण विस्तीर्णस्तद्वच्च च संश्लेषेण त्रिचतुष्कोणयुतो ध्मानावसरे पिहितेऽपि मुखे सति तत्कोणमार्गेणान्तःस्थधूमस्य बहिर्निर्गमनार्थं कोणघटनेनैव तन्मुखं सच्छिद्रं भवति । तच्च मुखमष्टाङ्गुलविस्तृतं वर्तुलसूत्रवेष्टनेनाष्टाङ्गुलमितमित्यर्थः । अथ गोस्तनमूषामाह—मूषाया इति । शिखायुक्तेति । शिखराकारपिधानकसहितेयमेव चान्धमूषाऽभिधीयते । द्वन्द्वितबीजमेलापादिविधावस्या उपयोगो बोध्यः । यत्र तु न्युब्जया तयाऽऽच्छादनं क्रियते

तत्र पिधानरहिता ग्राह्या। यथा नाभियन्त्रे प्रागुक्तम्–'ततश्चाच्छादयेत्सम्यग्गोस्तनाकारमूषया' इति। मल्लमूषामाह—निर्दिष्टेति। मल्लं पिधानोपयोगि विस्तीर्णं किंचिद्गभीरोदरं मृन्मयं पात्रं शरावेति लोके प्रसिद्धम्। सप्तविंशतितमेऽध्यायेऽस्या उपयोगं वक्ष्यति मदनसंजीवनरसविधौ। अन्यत्रापि प्रभूतस्थले चैषोपयुज्यते। तदेवोच्यते—पर्पट्यादीति। त्रयोदशाध्यायोक्तपर्पटीप्रभृतिरसानामल्पस्वेदसाध्यानां पक्वमूषामाह—कुलालेति। वस्त्रमयपोटलीव भेषजगर्भितं भेषजमयमूषा कपर्दिकाशङ्खादि भूमौ गजपुटादिना पाचयित्नुं यत्र पात्रान्तरे ध्रियते पाकोत्तरमाच्छादनसहितं च गृह्यते। यथा राजयक्ष्माचिकित्सायां मृगाङ्कपोटलीविधौ स रसः पोटलीत्युच्यते। अथ गोलमूषामाह—निर्वक्त्रेति। गत्वरद्रव्यं पारदरसकमनःशिलाहरितालप्रभृति मध्ये दत्त्वा कुलालेन या निर्मुखैव विधीयत एतत्समा ताम्रमूषा रसहृदयेऽष्टादशावबोधेऽभिहिता। अत एव तदुदाहरणमत्र नोपयोगि। मृन्मयोदाहरणप्रयोगो नोपलभ्यते॥ २८॥

**मूलम्**—तले या कूर्पगकारा० चक्रिबद्धरसे हिता॥ ३२॥ **टीका**—अथ महामूषामाह—तल इति। अयोभ्रकेति। अत्रायःशब्देन कान्तं ग्राह्यम्। तस्यान्तःपीतरेखाविशिष्टस्य च्छागरक्तेन भावनया शुद्धस्य पिण्डीबद्धस्य कोष्ठयन्त्रोदरे मूषायां लघुभस्त्रया धमनाद्भवति सत्त्वनिपातनम्। मण्डूकमूषामाह—मण्डूकेति। तदाकारमूषाया गाम्भीर्यदैर्घ्यपरिणाहाः षडङ्गुलमिताः कार्याः। उपरि मृत्तिकया तां चरङ्गुलमितमाच्छाद्य भूमिपृष्ठोपरीत्यर्थः। मुशलमूषामाह—मूषेति। चक्रिबन्धरसो द्वाविंशाध्याये वक्ष्यमाणः॥ ३२॥

**मूलम्**—सत्त्वानां पातनार्थाय० मृद्द्रव्यविशोधनी॥ ४९॥ **टीका**—अल्पाग्निसाध्यस्य द्रव्यपाकस्य साधनाय मूषा नानाविधा उक्ताः। संप्रति प्रभूताग्निसाध्यस्य द्रव्यपाकस्य साधनार्थं विविधाः कोष्ठीर्वक्तुकामः प्रथमं तासां प्रयोजनमाह—सत्त्वानामिति। मूषामृदेव कोष्ठीर्विदध्यात्, इत्यभिप्रायेणैवात्र कोष्ठीनां मृद्विशेषो नोक्तः। रसरत्नाकरे तु मृत्तिकाद्रव्याणां प्रमाणमपि स्पष्टं कृत्वाऽभिहितम्। तथा च तद्ग्रन्थः—'गारा दग्धास्तुषा दग्धा [ दग्धा ] वल्मीकमृत्तिका। अजाश्वानां मलं दग्धं यावत्तत्कृष्णतां गतम्॥ पाषाणभेदपत्राणि कृष्णा मृच्च समं समम्। वज्रवल्ल्या द्रवैर्मर्द्य दिनं वा पेषयेद्दृढम्॥ तेन कोष्ठीर्वङ्कनाला वज्रमूषाश्च कारयेत्'। मृन्मयकोशस्य कोष्ठीति नाम प्रसिद्धम्। सा च द्विविधा। भूमिकोष्ठी चलत्कोष्ठी च। यत्कोष्ठीयन्त्रं प्रागुदितं सा चलत्कोष्ठीति निगद्यते। इदानीमुच्यमानास्तु सर्वा भूमिकोष्ठ्यः। ताश्च द्विविधाः। प्रकाशकोष्ठी सपिधानकोष्ठी चेति भेदेन। प्रथमं सपिधानकोष्ठीमाह—राजहस्तेति। सपादहस्तास्त्रिंशदङ्गुलात्मकस्तान्मित उत्सेध उच्छ्रयो यस्यास्तथोक्ता। तदर्धमात्रौ दैर्घ्यविस्तारौ यस्यास्तथोक्ता। तथा चतुरस्रा चतुष्कोणा सर्वतो दार्ढ्याय मृन्मयेन कुड्येन भित्त्या बहिर्वेष्टिता कार्या। तेन चतसृषु दिक्षु चतस्रो भित्तयः संभवन्ति। एकभित्ताविति सामान्यत उक्तमपि योग्यतया

पूर्वभित्तौ पश्चिमभित्तौ वेति विशेषार्थे पर्यवस्यति । तस्यां दिशि स्थितायां भित्तौ द्वारं वितस्त्या संमितं कार्यम् । यद्वितस्तिमितं दीर्घं सूत्रं तद्वर्तुलं निधायान्तरवकाशो यावान्संभवति तन्मितं वर्तुलं चतुरङ्गुलमितमित्यर्थः । अन्तःस्थितज्वालायाः सत्त्वनिर्गमकालबोधिकायाः परीक्षार्थं चरेत् कुर्यात । तदर्थं प्रकाश आवश्यकः । स तु प्राच्यां प्रतीच्यां वाऽऽधिक्येन लभ्यत इति प्रकाशयोग्यत्वाद्विशिष्टा दिगेवात्र गृहीता । तद्द्वारस्याधोभागो देहली द्वारदेहसंरक्षिका सा द्वित्र्यङ्गुलमिता कार्या । तादृग्देहल्या अधोभागे भूतलं संलग्नं पूर्ववदेव सार्धवितस्तिमितसूत्रेण परिच्छिन्नमर्थात् षडङ्गुलं वर्तुलं द्वारं भस्त्रायोजनाय कार्यम् । अत्र वितस्तिदीर्घा तावद्भित्तिरेव सार्धवितस्तिदीर्घा च द्वारद्वयार्थं पर्याप्ता न भवति । अत उक्तं सूत्रमितं वर्तुलं चेति । केचित्तु क्रमनिम्नभूमिनिखाततिर्यक्गर्तभागोऽपि सार्धवितस्तिमानार्थं संग्राह्य इति नोक्तसूत्रदैर्घ्यमानापेक्षा लोहकाराणां तथैव संप्रदायोऽपि संप्रति ध्मानविधौ दृश्यत इति वदन्ति । तत्तु नोचितम् । तादृशगर्तभागस्य पातालकोष्ठिकायां वक्ष्यमाणत्वात् । ऊर्ध्वभागे कोष्ठिकाया उत्तराङ्गस्योर्ध्वाङ्गस्य च कर्तव्या या भित्तिः सा चतुर्विधाऽपि प्रादेशप्रमिता दशाङ्गुलमितेवार्थाच्छिखाकारवत्संकुचिता कार्या । शिखास्थान ऊर्ध्वं द्वारं तु प्रादेशमितायामविस्तारमेव कार्यम् । ततस्तद्द्वारं चेष्टिकया रुद्ध्वा प्रागुक्तवितस्तिमितं द्वारं च कोकिलैः समापूर्य धमेत् । किं कृत्वा रुद्ध्वा धमेत्तदाह—प्रथमं शिखित्रान् कोकिलान् ध्मानार्हमभ्रकादिद्रवं चोर्ध्वद्वारेण क्रमेण निक्षिपेत् । किं तद्ध्मानद्रव्यं पिण्डीकृतं भागशः सकृदेव वा निक्षिपेदित्याकाङ्क्षायामाह—सत्त्वपातनगोलानिति । पुनः पुनः प्रतिप्रक्षेपकालावसरं संततं ध्मात्वा यदाऽङ्गाराः कार्श्यं प्राप्नुयुः श्वेतभस्मावृताश्च भवेयुस्तदा पुनः कोकिलान् दत्त्वा पुनर्धमनं कार्यम् । एवं भस्त्राद्वयेन प्रहरपर्यन्तं संततं ध्मानेन प्रायः कठिनद्रव्याणां सत्त्वनिगर्मनकालः समुपजायते । परंतु नायं कालः सत्त्वनिर्गमनज्ञापकः स्वातन्त्र्येण किंतु शुक्ला वह्निज्वालैव ज्ञायमाना । उक्तं हि परिभाषाध्याये—'यदा हुताशो दीप्तार्चिः शुक्लोत्थानसमन्वितः । शुद्धावर्तस्तदा ज्ञेयः स कालः सत्त्वनिर्गमे ' इति । तदा स्फटिपिण्डीर्बहिर्निष्कास्य किट्टं पृथक्कृत्य गुरुमार्गेण सत्त्वमात्रं ग्राह्यम् । अथ द्वितीयः सत्त्वपिण्डानां प्रक्षेपकालः प्राप्नोतीति बोध्यम् । अथ मृदुद्रव्याणां सत्त्वपातार्थमल्पध्मानापेक्षा । अतस्तदुपयोगिकोष्ठीविशेषमाह—दृढभूमाविति । तत्र द्वादशाङ्गुलं गर्तं विधाय तत्तलमध्ये चतुरङ्गुलगाम्भीर्यविस्तारमन्यं वर्तुलं गर्तं कृत्वा गर्भगर्ततलमारभ्य पृष्ठभागपर्यन्तं बाह्यगर्ताभिमुखं तत्संलग्नं किंचित्समुन्नतं तिर्यङ्नालसमन्वितं द्वारं विधाय गर्भगर्तोपरि मृच्चक्रीं पञ्चरन्ध्रविशिष्टां वायोरुर्ध्वगमनार्थं क्षिपेत् । तदुपर्यङ्गारांस्तदुपरि सत्त्वपातनगोलांश्च निक्षिप्य सर्वां कोष्ठीं कोकिलैः पूरयित्वैकभस्त्रया धमेत् । एषा पातालकोष्ठिकेत्युच्यते । अधोध्मानविशिष्टां कोष्ठीमुक्त्वोर्ध्वधमनविशिष्टां कोष्ठीमाह—

द्वादशेति । प्रादेशायामविस्तारा कोष्ठी भूतलोपरि कार्या । सा च तलभागमारभ्योपरि चतुरङ्गुलभागं विहाय तदुपरि वलयेन कटकेन समन्वितां तां कृत्वा वलयोपरि प्रभूतच्छिद्रयुक्तां चक्रीं निक्षिप्य तत्र कोकिलांश्च दत्त्वा वङ्कनालतः प्रधमेत् । मृत्तिकापेक्षयाऽधिकगारभागमिश्रितमृदुपादानेयं कोष्ठी गार कोष्ठीत्युच्यते । इयं कांस्यरीतिप्रमुखं यत्सृष्टलोहं तन्मध्ये संसर्गप्राप्तकयोर्मध्य एकस्यावशेषकरी द्वितीयं विनाशयेत्यर्थः । अथ सिद्धरसानां खोटबद्धादीनामभ्रकादिसत्त्वानां च काचटङ्कणसौवीरादिना शोधयितुं साधनभूतां कोष्ठीमाह—द्वादशाङ्गुलेति । अस्यां कोष्ठ्यां स्थापितमूषामध्ये सिद्धरसादि प्रक्षिप्य संततधमामाकसरेऽन्तराऽन्तरा मुहुः काचचूर्णादि दत्त्वा धमेत् । मृदुद्रव्यं सत्त्वादि । इयं कोष्ठी कुन्तभागमारभ्य मुखभागपर्यन्तं क्रमविस्तृता प्रादेशप्रमितवर्तुलमुखी कार्येत्यनुक्तमपि बोध्यम् । पूर्वस्यास्तथाभानमुखस्योक्तत्वात् ॥ ४९ ॥

मूलम्—रसादिद्रव्यपाकानां पुटं वाराहमुच्यते ॥ ५९ ॥ टीका—संप्रति मूषाकोष्ठ्यपेक्षयाऽधिकतराग्निजनकपुटान् वक्तुं तेषां प्रयोजनमाह—रसेति । रसलोहप्रभृतिकठोरद्रव्याणां सम्यक्पाको भेषजार्थमपेक्ष्यते । स च पाकः क्रियारूपस्तुलया परिमाणेन वा परिच्छेतुं न शक्यते । तज्ज्ञानं त्वावश्यकम् । अत आह—प्रमाणेति । सुपाकस्य प्रमाणबोधकं पुटमेवाग्निदीपकोपलतुषगोवरसंपूर्णगर्तादिविशेष एव संमतमिति । एतद्गर्तापूरितोपलाग्निनैकः सुपाकोऽभवदिति तत्पुटविशेषावृत्तिः कार्या । यावत्कगुणलाभपर्यन्तामिति भावः । न्यूनपाकेन गन्धवर्णरसस्पर्शाः सम्यङ्न जायन्ते । अधिकपाकेन तु द्रव्यं निःसारं दग्धं भवत्योदनवत् । अथ पुटस्य प्रयोजनं गुणाल्लोहस्याह—लोहादेरिति । अपुनर्भावो न मार्कलस्वरूपापादनं पञ्चमिनसंस्कारेणापि । गुणाधिक्यमामावस्थापन्ने तस्मिन् भक्षिते जाठराग्न्यपाकेन रोगनाशका गुणास्तथा पुष्ट्यादयो मार्दवादयश्चानुद्भूतास्तेषामुद्भवेनाऽऽधिक्याभासः । तेन चाप्रता श्रेष्ठताऽधिकमूल्यता । तथाऽप्सु प्रक्षिप्तस्य तस्य न मज्जनमुपरितरणम् । अङ्गुलिभ्यां पीडितस्य तस्य सूक्ष्माङ्गुलिरेखासु प्रविष्टत्वं च । अभ्रकवज्रहरितालादिरूपखनिजविशेषेषु तु लघुत्वादयो गुणाः पुटात्प्रादुर्भवन्ति । किं बहुना गुणवर्णनेन । यत्र गुणाः सर्वे संभूयोत्क[टा] निवसन्ति तस्मात्पारदादपि जीर्णरसोपरसमणिलोहरससिद्धानां लोहानां गुणा यथाविधिसेविनो नरस्य शरीरेऽधिका एव । भूस्फटकुलोऽपि सिद्धरसस्य हि क्रामणार्थं किंचित्स्फुटितयौवना कामिनी संनिहिताऽपेक्ष्यते, भाषणचुम्बनालिङ्गनार्थं तत्स्तनाभ्यामङ्गमर्दनार्थं च । तदसंनिधौ सर्वशरीरे क्रामणाभावेन न मन्मथः । सांनिध्ये तु प्रमादेन मैथुनम् । ततश्च मरणमापद्यते । किंच रससेविनो वर्षपर्यन्तं परिहारविशेषः । आदौ क्षेत्रीकरणं चाऽऽवश्यकम् । पारदसिद्धावनुभूतसर्वक्रियासाधकः प्रभूतद्रव्यादिसंपच्चापेक्ष्यते । अत एव नातिनिरपायस्य लोहस्य गुणानामाधिक्यमुपचर्यते । ननु पाषाणतोऽपि कठिणानां लोहविशेषाणां नावयवविश्लेष इति कथमुक्तलाभ इत्याशङ्क्य निदर्शनेन

पुनर्लोहगुणान् दृढी करोति—यथाऽश्मनीति । अन्तराग्निप्रवेशेन सर्वं संभवतीति भावः । संप्रति गर्ताविशेषं महापुटमाह—भूमिमध्य इष्टिकादिभिः कृते कुड्ये कुड्यमये गर्ते गाम्भीर्यविस्ताराभ्यां द्विहस्ते तथा चतुष्कोणे तादृग्गर्ते वन्यच्छगणैः सहस्रसंख्याकैः पूरिते सति शरावसंपुटितं भेषजं पिष्टिकोपरि पूरितच्छगणोपरि स्थापयेत् । तादृशमूषिकोपर्यर्धसहस्रं छगणानां पूरयेत् । ततो दीपयेत् । अथ गजपुटमाह—राजहस्तेति । राजहस्तस्त्रिंशदङ्गुलिमितः । तन्मितं निम्नं गम्भीरं तन्मितविस्तारं च गर्तं बोध्यम् । निम्नमित्यत्र विस्तारशब्दो लुप्तनिर्दिष्टः । तदुपलशाठिभिः कण्ठपर्यन्तं पूरयेत् । उपलाः कठिना महान्तो वन्यच्छगणास्ततोऽल्पदेहाः शाठ्यः । तत्र मूषां भेषजगर्भितां विन्यस्य पूर्वविन्यस्तच्छगणतोऽर्धमानानि गिरिण्डानि वन्यच्छगणानि विनिक्षिपेत् , इत्येतद्गजपुटाख्यं मतम् । एतदेवारत्निमात्रगर्ते यत्पुटं तद्वाराहपुटमुच्यते ॥ ५९ ॥

मूलम्—पुटं भूमितलं यत्तत्० वराटी छगणाभिधाः ॥ ६९ ॥ टीका—अथ कुक्कुटपुटमाह । भूमिपृष्ठभागे कुड्येन निर्मितं चतुर्विंशत्यङ्गुलोच्छ्रायं तावन्मात्रमेव। तले मुखे च विस्तृतमेतादृशं यद्गर्तं भेषजं पक्तुमुपलादिभिः पूर्यते तत्कुक्कुटपुटसंज्ञं भवति । यच्च गर्ते भूमितले मृदादिभिः कृतमष्टसंख्यैर्वनोपलैर्दीयते ज्वालया प्रज्वलितं क्रियते बद्धपारदस्य भस्मकरणार्थं तत्कपोतपुटमुच्यते । अथ गोर्वरपुटं वक्तुकामः प्रथमं गोर्वरशब्दार्थमाह—गोष्ठान्तरिति । गवां पादखुरैश्चूर्णितं शुष्कगोमयं गोर्वरेति ख्यातम् । गोर्वरैस्तुषैर्वा यत्र गजपुटगर्तायां पुटं दीयते भेषजं पक्वं क्रियते तद्गोर्वरपुटमुच्यते । अथ भाण्डपुटमाह—स्थूलभाण्ड इति । स्थूले मृन्मये भाण्डे । इदं पुटं चुल्ल्यधिश्रितभाण्डे दीयते । अथ तदेव तुषस्थाने वालुकां दत्त्वा वालुकापुटमुच्यत इत्याह—अधस्तादिति । राक्षसरसादिविधावस्या उपयोगो बोध्यः । अथ भूधरपुटमाह—वह्निमित्रामिति । वह्निमित्रा मूषा शराव इति यावत् । जयसुन्दरादिरसविधावस्या उपयोगो बोध्यः । अथ लावकपुटमाह—ऊर्ध्वमिति । शरावाकारमूषां संपुटितां भूमौ निधाय तदुपरि षोडशवन्योपलमितैस्तुषैर्गोर्वरैर्वा यत्पुटं दीयते पाकः क्रियते तल्लावकमिति ख्यातम् । षोडश एव षोडशिका । सा संख्या चात्र वन्योपलानामेव ग्राह्या । तन्मात्रैस्तद्वन्यच्छगणतुलितैरित्यर्थः । पुटानां हि प्रायो वन्यच्छगणसाध्यत्वात्तदुपस्थितिः । अथ कुम्भपुटं ग्रन्थातरोक्तं वक्ष्यामि—'मृद्घटे बहुरन्ध्राणि कृत्वाऽङ्गुलिसमानि वै । चत्वारिंशत्ततस्तस्मिन्शुष्कं तमुल्मुकचूर्णकम् ॥ अर्धमापूरयित्वा च मुखे दद्याच्छरावकम् । कर्पटेन मृदा लिप्त्वा छायाशुष्कं च कारयेत् ॥ तस्मिन्नङ्गारकान् क्षिप्त्वा चुल्ल्यां वा चेष्टिकासु च । निधाय त्रिदिनाच्छीतं गृहीत्वौषधिमाहरेत् ॥ एतत्कुम्भपुटं ज्ञेयं कथितं शास्त्रदर्शिभिः' इति । यत्र त्वेतद्द्रव्यं पुनः पचेदित्युच्यते, यथा तारपिष्टिमम्लतालेन मर्दयित्वा पुटेद्दद्यादष्टवाराणि भस्मी भवति रूप्यकमिति । तत्र तद्द्रव्यमतिकठिनं ( लोहप्रभृति )

मृदु (सुवर्ण) सुमृदु (मौक्तिकं) वा तथोद्गमशालि स्थिरं वेति वैद्यैर्विचार्य क्रमेण महापुटं गजपुटं वा कुक्कुटपुटं कपोतपुटं गोर्वरपुटमित्यादि योज्यम् । ऊहापोहविचक्षणैरिति वैद्यविशेषणम् । अल्पबलस्य सुमृदुनो द्रव्यस्य महापुटदानेन निःसारत्वस्य संभवादिति भावः । अथ यन्त्रादीनां संस्कारादीनां च संभारद्रव्याण्याह—पिष्टकमिति ॥ ६९ ॥

**मूलम्**—सुवर्णं रजतं० महिषस्य वसा तथा ॥ ७७ ॥ **टीका**—लोहाष्टकमाह—सुवर्णमिति । त्रपु वङ्गम् । लवणषट्कमाह—लवणानीति । क्षारत्रयमिति । मुष्ककः कृष्णपाठा तत्क्षारः सुवर्चिका स्वागीति लोके प्रसिद्धः । रसरत्नाकरे वृक्षक्षारोऽप्यभिहितः । तद्विधिपाठश्च—'तिलापामार्गकदलीचित्रकार्द्रकमूलकम् । शिग्रुमोक्षपलाशं च सर्वमन्तःपुटे दहेत् ॥ समालोड्य जलैर्वस्त्रैर्बद्ध्वा ग्राह्यमधोजलम् । शोषयेत्पाचयेत्सम्यङ्मृद्भाण्डेन तु तज्जलम् ॥ ग्राह्यं क्षारावशेषं तु वृक्षक्षारमिति स्मृतम्' इति । घृतमिति । तैलान्याह—कङ्गुणीति । तुम्बिनी कटुतुम्बिनी । घोषा कडुद्रोडका इति लोके प्रसिद्धः । करीरो गूढपत्रः । नेप्ती इति गुर्जरभाषायाम् । कैर इत्यपि लौकिकं नाम । लोके शक्ताद्यर्थमस्य फलान्युपयुञ्जते । श्रीबिल्वस्तत्फलोत्पन्नबीजेभ्य उत्पन्नम् । अथवा फलं मदनफलम् । करीरस्थाने करञ्ज इत्यपि पाठः । कटुस्तीक्ष्णराजिका । वार्ताकं प्रसिद्धमेव । केचित्तु कटुवार्ताकं वन्यवार्ताकमिति वदन्ति । सिद्धार्थः श्वेतसर्षपः । सोमराजी बाकुची । अतसीबीजं, अळशीति लोके प्रसिद्धम् । महाकाली कृष्णकाठिनतरसारमयो वृक्षविशेषो गृहधारणस्तम्भाद्युपयोगी सूक्ष्मबीजपङ्क्तिशिम्बीकः काळीत्येव नाम्ना लोके प्रसिद्धः । केचित् कृष्णकार्पासीति वदन्ति । देवदाली, एरण्डफलसमानाकारकण्टकिततिक्तफला सर्वतिक्ता भूमौ प्रसरणशीला वल्ली । तुम्बुरुः कण्टकिवृक्षविशेषः । चिरफलेति नाम्ना लोके प्रसिद्धः । एषां विग्रहः शरीरं भवति यस्मात्फलात् । एषां फलादिस्यर्थः । अङ्कोलो दीर्घपर्णः । कण्टकी तैलफलो वृक्षविशेषः । उन्मत्तो धत्तूरः । अनेकविधां वसामाह—जम्बूकेति । कर्कोटी कर्कोटः सर्पविशेषस्तज्जा । शिशुमारी । मगरीति लोके । कण्टकितपुच्छेयं जलचरी । सूकरो वन्यवराहः । नरोऽत्राश्वस्तज्जा । नरोद्भवा मनुष्योद्भवेत्यपि केचित् । तत्तु न युक्तम् ॥ ७७ ॥

**मूलम्**—मूत्राणि हस्तिकरभ० दुग्धवर्गो रसादिषु ॥ ९० ॥ **टीका**—मूत्राणीति । स्त्रिया अप्रसूताया युवत्याः पुष्पमार्तवम् । बीजं शुक्रं तु पुंसामेव ग्राह्यम् । पञ्चमाहिषमाह—माहिषाम्ब्विति । माहिषीमूत्रम् । अभिघारं घृतं शकुज्जो रसश्च । अम्लवर्गमाह—अम्लवेतसेति । अयं वङ्गदेशे प्रसिद्धः । जम्बीरं किंचिद्दीर्घवर्तुलाकारं स्थूलत्वचं महत्फलं निम्बुसमानगन्धवर्णरसम् । ईडनिम्बु गोधडनिम्बु, इति लोके । चाङ्गेरी चतुष्पलमम्लशाकम् । चुका इति लोके । आम्लिका चिञ्चा । कोलं बदरम् । अम्बष्ठा सूक्ष्मपत्रा चाङ्गेरी । चणकाम्लं चणकशाकम् । हेमन्ते तत्क्षुपेभ्यो वस्त्रगृहीतजलं वा । आम्ल खटाई इति वा लोके । तिन्तिडीकं वृक्षाम्लम् ।

अमसोल अथवा कोकम्ब इति लोके । नारङ्गं प्रसिद्धम् । रसपत्री आम्बाडा इति लोके । अम्लपञ्चकमाह—'कोलदाडिमवृक्षाम्लचक्रिकाशुक्तिकारसम्' इति । चक्रिका आंबटचुका इति लोके । शुक्तिकारसं चणकाम्लम् । शुक्तवदम्लरसत्वात् । पञ्च मृत्तिका आह—इष्टिकेति । लोणं लवणं सैन्धवम् । विषवर्गमाह—शृङ्गीकमिति । रसरत्नाकरोक्तशृङ्गीकमुदितम् । शृङ्गी महोरा इति हस्तिनापुरनिकटे प्रसिद्धम् । 'गोशृङ्गवद्द्विधा शृङ्गी श्वेतं स्याद्बहिरन्तरे'। इदं कपिलदेशेषु नदीवृक्षेषु जायते' इति लक्षणम् । अश्वत्थवृक्षसमानवृक्षः कालकूटवृक्षः । तस्य निर्यासः कालकूट इति गद्यते । इदं कन्दरूपमपि ग्राह्यम् । तल्लक्षणम्—'घनं सुकठिनं रूक्षं भिन्नाञ्जनसमप्रभम् । कन्दाकारं समाख्यातं कालकूटं महाविषम्' इति । एतद्घ्राणमात्रान्मृतिप्रदं च । वत्सनाभं प्रसिद्धमेव । सिन्दुवारसदृक्पत्र एतद्वृक्षः । 'यः कन्दो गोस्तनाकारो न दीर्घोऽङ्गुलपञ्चकात् । न स्थूलो गोस्तनादूर्ध्वं द्विविधो वत्सनाभकः' इति । बचनाग इति लोके । सक्तुकम् । तस्य लक्षणं तु—'चित्रमुत्पलकन्दाभं सुपेष्यं सक्तुवद्भवेत् । सक्तुकं तद्विजानीयाद्दीर्घवेगं महोत्कटम्' इति । पीतं हारिद्रं विषम् । अयं वर्गः पक्षच्छेदेन रसबन्धनार्थमप्युपयुज्यते । अयुक्त्या शोधनमात्राद्देशकालाद्यविचार्येत्यर्थः । उपविषाण्याह—लाङ्गलीति । लाङ्गली कळलावी इति नाम्ना महाराष्ट्रभाषायां प्रसिद्धा । इयं कन्दवल्ली, अग्निज्वालासदृशवर्णपुष्पा । विषमुष्टिः कुपीलुः । कुचलेति कोंकणे प्रसिद्धा । करवीरजटा प्रसिद्धैव । नीलकः कनकः कृष्णवर्णपत्रबीजो धत्तूरः । अर्कोऽपि कृष्णवर्ण एव । तत्पयोऽत्र ग्राह्यम् । दुग्धवर्गमाह—हस्त्यश्ववनितेति । उष्ट्रिका । भानुरर्कः । तिल्वको रोध्रः । दुग्धिका दुधीति लोके । स्नुक् स्नुही । तद्गणः श्वेतपीतदुग्धभेदेन त्रिकोणकाण्डादिभेदेन [ च ] तस्य विविधत्वात् । उत्तमकण्ठिका सर्वाङ्गदुग्धा कारवेल्लकसमद्वित्रफलगुच्छा वल्ली । उत्तमारणीत्यपरपर्याया ॥ ९० ॥

**मूलम्**—पारावतस्य चाषस्य० स्नैग्ध्यं स्नेहाः प्रकुर्वते ॥ १०१ ॥ **टीका**—पारावतस्य पारवा इति प्रसिद्धस्य । अयं पक्षी कृष्णबिन्दुकण्ठः । कपोतस्य कबुतर इति प्रसिद्धस्य । कलापिनो मयूरस्य । पारावतादीनां विड्रसकर्मणि ग्राह्या । अयं विड्गणो लेपनपुटाभ्यां सर्वलोहशोधकः । पारदस्य बीजानां च रञ्जनार्थं रक्तवर्गमाह—कुसुम्भमिति । करडई इति नाम्ना प्रसिद्धम् । अक्षीवो रक्तशिग्रुकः । बन्धुजीवो दुपारीति लोके प्रसिद्धा । कर्पूरगन्धिनी कापूरकचरीति कन्दविशेषः । कपूरच्छिल्लीति ब्रिजभाषायां प्रसिद्धः क्षुपो वा । अस्या मूलानि कर्पूरसमगन्धीनि । माक्षिकं स्वर्णमाक्षिकम् । पीतवर्गमाह । किंशुकः पलाशः । कर्णिकारः कण्टकिवृक्षः किंचिद्रक्तपुष्पः । पांगारा इति कोंकणे प्रसिद्धः । श्वेतवर्गमाह—तगर इति । एतन्नाम्नैव प्रसिद्धः क्षुपः पुष्पवृक्षः । जीवन्तिका हरणवल्लीति कोंकणे

प्रसिद्धया । नीलिका गुलीति नाम्ना वऱ्हाडदेशे प्रसिद्धा । नलो देवनल इति लोके प्रसिद्धः । कपिरामलकी । कासीस उपरसविशेषः । उक्तरक्तादिवर्गोपयोगमाह—रक्तेति । शोधनीगणं तदुपयोगं चाऽऽह—काचटङ्कणसौवीरैरिति । सौवीरं, अञ्जनविशेषम् । अयं गणः सूतस्य खोटबद्धादिरूपस्याभ्रकसत्त्वादीनां च यो गुणो वङ्गकापालिका नागकापालिका कालिकादिर्दोषात्मकस्तदध्वंसी । अत एवायं रसवादिभिरिष्यते । लोहकाठिन्यनाशकं वर्गमाह—महिषीमेढ्राण्डगर्भकलिङ्ग इति । महिषीमेढ्रं महिषीयोनिः । अण्डोऽण्डकोशः । माहिष एव तद्गर्भस्तदन्तस्थितः । कलिङ्ग इन्द्रयवः । धवबीजमपि तथा । शशास्थीनि चेति वर्गः । अत्र चशब्देन बकास्थिगजदन्तयोस्तथाऽश्वगोमहिषीणां खुरशृङ्गाणां च चूर्णः संग्राह्यः । रसरत्नाकरे तथोक्तेः । लोहद्रावणगणमाह—गुडेति । सारघं मधु । क्षारादीनां साधारणगुणानाह—क्षारा इति । मान्द्यं तमः शीघ्रकारित्वाभावः । स्नैग्ध्यं मार्दवम् । एतदध्यायानुषक्तं मानबोधकं श्लोकत्रयं बहुष्वादर्शपुस्तकेषु दृश्यते । तदभिप्रायश्च परिभाषाध्यायमारभ्यायं पाठसंग्रह एव तदुक्तग्रन्थादाहृत्य कृतः । तत्र मानश्लोका अपि केचिदुदिताः । अतोऽत्र तत्प्रसङ्गेन तेऽपि पठिता इति भाति । तद्व्याख्या त्वाचार्यप्रणीते वक्ष्यमाणाध्याय आरम्भे भविष्यति ॥

इति रसरत्नसमुच्चयटीकायां खरेइत्युपाह्वेन वामनात्मजेन चिंतामणिना प्रणीतायां सूत्रस्थाने दशमोऽध्यायः ॥ १० ॥

---

## अथैकादशोऽध्यायः ।

**मूलम्**—त्रुटिः स्यादणुभिः षड्भिः० दिङ्मात्रं तत्प्रदर्शितम् ॥ १० ॥ **टीका**— अथ मानेन विना साधको द्रव्याणां योगं संस्कारादौ कर्तुं न प्रभवति । अतः प्रथमं मानपरिभाषामाह—त्रुटिरिति । स्यात्कोलद्वितयमिति । बिडालपदकान्ताः सर्वे तोलपर्यायाः । अन्ये शुक्तित्रयमिति । अन्ये मगधपरिभाषाव्यवहारिणः । पात्रकाहृयमाढकं च द्रोणश्चेति । घटाद्या द्रोणान्ताः शब्दाः । चत्वारिंशत्संख्याका याः पलशतात्मिकास्तुलाः स भार इत्युच्यते । ग्रन्थान्तरे तु सर्वत्र विंशतिसंख्याकास्तुला भार इति मतभेदोऽत्र दृश्यते । तत्र व्यवस्था तु रसस्य संस्कारादिविषयेऽयं भारः । द्रव्यांन्तरकर्मणि तु विंशतितुलात्मक इति । रसार्णवादीति ॥ १० ॥

**मूलम्**—अधुना० दोषाढ्यं नागवङ्गयोः ॥ ११ ॥ **टीका**—प्रतिजानीतेऽधुनेति । तत्राष्टादशधा संस्कारकर्मोद्दिशति—स्यादिति । स्याद्रागस्तथेति । रागः सूतरञ्जनसंस्कारः । शरीर योगो रसायनवाजीकरणादिरूपेण पारदसेवनम् । एवं संस्कृतः पारदश्छिन्ने मर्माणि पीडापरिहारार्थं योज्यः । परंतु क्षारदग्धादिषु तु न योज्यः । दाहादिविवर्धनेन मरणभयादिति भावः । शोधनस्य फलान्तरमाह—शुद्ध-

इति । मूर्छितस्य तस्य फलमाह--मूर्छित इति । जारणसारणान्तसंस्कारैः संस्कृतोऽथ मारितो भस्मीकृतो रसः प्रचण्डाग्नौ स्थिर आयुरादिप्रदश्च भवति । आदौ तस्य रसस्य शोधनं दोषापनयनार्थं कार्यम् । तांश्च दोषांस्तेषां कार्यं च समासत आह । विषमिति । एते दोषा नैसर्गिकाः । तद्वियोगकरणं दोषान्तरापेक्षयाऽतिदुर्घटमिति स्वाभाविका इत्युपचर्यन्ते । वस्तुतस्तु देवप्रार्थितमहादेवेन तेषां संबन्धः पारदे योजित इति भावः । योगिकौ दोषावाह—यौगिकाविति । निकटवर्तिनागवङ्गखनियोगेन मिश्रणाज्जातो नागाख्य एको दोषो वङ्गाख्य एकश्चेति तो द्वौ जाड्यमाध्मानं कुष्ठं च कुरुतः । उपाधिना संनिहितवस्तुसंबन्धमात्रेण वस्तुनि बहिरेव व्याप्य तिष्ठन्ति किंचित्कालावस्थायिनश्च ये दोषास्त औपाधिकाः । ते च सप्तविधाः । कञ्चुकाख्यया शास्त्र उदिताः । तेषां मध्ये भूमिजा एकप्रकाराः । तेषामवान्तरभेदेन शास्त्रेऽनुपयोगान्नामतोऽनादृतेन बहुवचनम् । गिरिजा एकविधाः । वार्जा जलजाश्चान्यविधाः । तथा नागेन वणिजादिभिर्मिश्रीकृतेन जातौ दोषौ द्वौ । वङ्गजावपि द्वौ । इत्येवं सप्त कञ्चुकाः पूर्वोक्ताश्च पञ्च दोषाः । इत्थं पारदे द्वादश दोषा रसज्ञैः प्रोक्ताः । उक्तसप्तकञ्चुकानां क्रमेण नामान्तराण्याह—पर्पटीति । रसोपरि पर्पटी पर्पटाकारा भवति । सा पर्पटीत्युच्यते । पाटनी त्वचोविदारणकरी । भेदी त्वाचि रन्ध्रकरी । द्रावी लोहादिद्रवकरी । मलकरी वातादिदोषकरी । अन्धकारी कृष्णत्वकरी । ध्वाङ्क्षी कालिमा । कञ्चुकानां पृथक्कार्याण्याह—भूमिजाः कुर्वत इति । जाड्यमङ्गजाड्यम् । दोषाढ्यं शरीरं कुर्वते नागवङ्गयोर्दोषाः ॥ १९ ॥

**मूलम्**—तस्मात् सूत० रसशोधनमाचरेत् ॥ २२ ॥ **टीका**— उपसंहरति—तस्मादिति । सर्वोपस्करं सर्वसंभारम् । संस्कारार्थं सूतकमानमाह—द्वे सहस्रे इति । पलादूनस्य कर्तव्य इति । संस्कारः सूतकस्य नेति । श्रमाननुरूपफललाभादिति भावः ॥ २२ ॥

**मूलम्**—त्र्यूषणं लवणा० पूतिदोषनिवृत्तये ॥ ३० ॥ **टीका**—अथ यथोद्देशं दीपनान्तान् संस्कारान् विधत्ते—त्र्यूषणमिति । आसुरी राजिका । मूलकं कन्दशाकविशेषः । प्रत्येकं द्रव्यं पारदापेक्षा( क्षया ) षोडशभागं गृहीत्वा प्रक्षिप्य तल्लेपेन भूर्जपत्रोपनिबद्धे वस्त्रेऽङ्गुलस्थूलं लिप्त्वा पारदं च तत्र निक्षिप्य पोटलिकां बद्ध्वा काञ्जिकेन सह पचेदिति । अपक्वधान्यकृतं संधानं धान्याम्लम् । पक्वधान्यकृतं संधानं काञ्जिकम् । रसरत्नाकरे त्वत्र प्रक्षेप्यौषधीनां परिगणनाऽपि कृता । 'तन्मध्ये भृङ्गराजमुण्डी विष्णुक्रान्ता पुनर्नवा । मीनाक्षी चैव सर्पाक्षी सहदेवी शतावरी ॥ त्रिफला गिरिकर्णी च हंसपादी च चित्रकम् । समूलं कण्डयित्वा तु यथालाभं निवेशयेत् । पूर्वाम्लभाण्डमध्ये तु धान्याम्लकमिदं भवेत् । स्वेदनादिषु सर्वत्र रसराजस्य योजयेत्' इति । अथ मर्दनम्—गृहधूमेति । इन्धनज्वलनावसरे यो धूम ऊर्ध्वं गत्वा गृहं प्रति संलग्नो भवति स

गृहधूम इत्युच्यते । अत्र संस्कारे संस्कारान्तरे च संस्कारकद्रव्याणां भागानुक्तौ पारदस्य षोडशांशेन द्रव्यभागो ग्राह्यः । असति बाधक इति परिभाषालभ्यभागमाह— षोडशांशमिति । प्रतिसंस्कारं पारदस्य स्वेदनं मर्दनं काञ्जिकेन क्षालनं च कार्य-मिति साधारणसंकेतेन प्राप्तं जीर्णाभ्रकस्य सूतस्य जीर्णबीजस्य वा सूतस्य यन्मर्दनं नैर्मल्यार्थं क्रियते तस्य फलान्तरमप्याह—गृह्णातीति । सूतगुणकृत्तस्य मलनाशरागप्रकाशनरूपगुणकृदिति । अथ मूर्छनम् । अथाऽऽरनालकथितानि मर्द-नसंस्कारोक्तानि भेषजानि गृहकन्याविभेषजानि च तैः सर्वैः समुदितैश्च सह मिश्रितं तीव्रं संमर्दितं च पारदं भूधरपुटेन वालुकायन्त्रे पचनेन वा निश्चेष्टं कुर्यात् । न तु केवलं मर्दनमात्रेण निश्चेष्टं कुर्यात् । मूर्छितलक्षणस्यासंभवात् । उक्तं हि ग्रन्थान्तरे मूर्छितत्वलक्षणम्—गालनपातनव्यतिरेकेण पूर्वावस्थानापन्नत्वमिति । अत्र तु मार्दितस्य पारदस्याऽऽतपे धारणेनापि पूर्वावस्थापन्नत्वस्य संप्राप्तेः । तस्मादुक्तोऽर्थोऽभ्युपे-तव्यः । गृहकन्या कुमारी । अत्र मूर्छनाङ्गभूतत्रिदिनमर्दनोत्तरं प्रक्षाल्य काञ्जिकेनैव तमादाय विमूर्छयेत् । 'मेषशृङ्गी कृष्णधूर्तो बला श्वेताऽपराजिता । कन्याऽग्निस्त्रिफला चैव सर्पाक्षी सूरणं वचा । गोजिह्वा चाङ्गुली नीली लाङ्गली क्षीरकन्दकम् । राजिका काकमाची च रविक्षीरं च काञ्चनम् । व्यस्तानां वा समस्तानां द्रवैरेषां विमर्दयेत् । यामैकं रसराजं च मूषायां संनिरोधयेत् ॥ पुटैकेन भवेत्तत्तु भूधरे चाथ मर्दयेत् । पूर्व-द्रावैर्यथापूर्वं रुद्ध्वा रुद्ध्वा विपाचयेत् ॥ इत्येवं सप्तधा कुर्याज्जायते मूर्छितो रसः ' इति । अथोत्थापनसंस्कारः । स्विन्नो हि दोषो स्थानाद्विश्लिष्टः सन् मर्दनेन मूर्छनेन च पारददेहाद्बहिर्निःसरति । अतोऽयं संस्कारो विरेकस्थानापन्नः । तेन च संशुद्धो रसः कथितकाञ्जिके क्षिप्त्वाऽऽलोड्य तस्मात् काञ्जिकक्का-थादुद्धृत उत्थितः कार्यः । अनेन पूतीलोहजदोषा नश्यन्तीति । विशेषश्चात्र रससारे— यन्त्रादुद्धृत्य यत्नेन सूतमुत्थाप्य मूर्छितम् । अमूर्छितस्तदा देयः कलांशं मूर्छि-ते रसे । सिन्धूत्थटङ्कणाभ्यां च मर्दयेन्मधुसंयुतम् । दोलायन्त्रे ततः स्वेद्यः क्षाराम्ल-लवणैः सह । उत्थाप्य मूर्छयेत्पश्चाद्वारं वारं रसेश्वरम् । पुनरुत्थापितं कुर्यादेक-विंशतिवारतः, इति ॥ ३० ॥

**मूलम्**—ताम्रेण पिष्टिकां० मन्दः शान्तो भवेद्रसः ॥ ४० ॥ **टीका**— उक्तसर्वदोषाणां यः किंचिदवशेषः पारदस्यस्तद्वारणाय पातनसंस्कारमाह—ताम्रेणेति । समभागेन शुद्धताम्रचूर्णेन सह पारदं संमर्द्य पिष्टीं कृत्वोर्ध्वपातनायन्त्रघटकाधः-स्थाल्या अन्तस्तले तां लिप्त्वा यन्त्रस्याधस्तान्मन्दाग्निं दत्त्वा पारदमूर्ध्वभाजने पातयेत् । तेन नागवङ्गाख्यौ दोषौ यौगिककञ्चुकभेदेन भिन्नौ सर्वथा परित्यज्य पारदः शुद्धो भवति । एवं त्रिवारमूर्ध्वं पातयेत् । सप्तवारमधश्च ततोऽधःपातनयन्त्रेण पूर्व-वत्पिष्टीरूपं पारदमधः पातयेत् । किं कृत्वा । पारदस्य षोडशांशेन प्रत्येकं द्रव्यं

त्रिफलादि गृहीत्वा नष्टपिष्टं पारदं तेन सह संमर्द्य यन्त्रघटकोर्ध्वभाजनेऽन्तर्विलिप्य संशोष्य ततः परमूर्ध्वभाजनोपरि दीप्तैश्छगणैः पारदस्याधः पातं कुर्यात् । एवं सप्तवारमधःपातनं कार्यम् । हरिद्रादिद्रव्यं सर्पाक्ष्यादि वक्ष्यमाणं वा द्रव्यं देव्यादि वा ग्राह्यम् । शिखी चित्रकः । अङ्कोलो दीर्घकण्टको दीर्घपत्रो वृक्षविशेषः । वर्षाभूः पुर्ननवा । देवी सहदेवी । व्रणघ्नी कन्दगुडूची । यक्षलोचनः कुबेराक्षः । एवं पातितो रसो द्रव्यविशेषतो जीर्णाभ्रसत्त्वबीजद्रव्यविशेषयोगेन (ण) रसायनयोग्यो भवति । पुनरप्यधःपातनं यन्त्रविशेषेण वैकल्पिकमाह—अथवा दीपकयन्त्र इति । उक्तौषधैः सह संमर्दितं पारदकल्कं कच्छपाकारन्युब्जोर्ध्वपिठरोदरे संलिप्योर्ध्वगामिना दीपिकायन्त्रोष्मणा पारदाधो जलकुण्डिकायां पातितः सर्वदोषमुक्तो भवति । पातनं तु त्रिधोर्ध्वं सप्तधा त्वध इति सर्वत्र योज्यम् । अथवाऽखण्डवस्त्रेण प्रसारितेन कल्कीकृतं पारदं वर्तीकृत्य दीपिकामध्ये निहितां तां ज्वालयेत् । तेनाप्यूर्ध्वं गत्वा पारदोऽधः पतति । अथ तिर्यक्पातनं विधत्ते—तिर्यगिति । तद्विधिनाऽपि द्विविधपातनोत्तरं कृतेन पारदः शुद्धो भवति । अथ चाञ्चल्यं विहायाग्निसहत्वजनकं कर्तव्यतिर्यक्पातनसंस्कारविधिविशेषमाह—श्लक्ष्णीकृतमिति । धान्याभ्रीकृतं दलं समभागसूतमेकीकृत्य नष्टपिष्टत्वापादनपर्यन्तं काञ्जिकेन सह मर्दयेत् । ततस्तयन्त्रे निधाय क्रमेण मृदुमध्यतीक्ष्णाग्निं कुर्यात् । एवं तिर्यक्पातनविधिना स्वेदनपूर्वकं मुहुः पात्यः । पातनक्रमेणोर्ध्वपातनमधःपातनमिति पुनः स्वेदनं पुनर्मर्दनं पुनःपातनमित्यावृत्तिक्रमो वेद्यः । कियत्कालपर्यन्तं न पतति । अग्ना( ग्नौ )दृढश्च भवेत् ॥ ४० ॥

**मूलम्**—सृष्ट्यम्बुजै० मूलिकानां रसेषु च ॥ ४५ ॥ **टीका**—‘ इत्थं कदर्थितः सूतो दोषशून्यः प्रजायते ’ । इत्थं पूर्वोक्तमूर्छनमर्दनादिक्रियया कुत्सितक्रूरकर्मणा योगं प्रत्यर्थितो याचितः शुद्धो भवति । परंतु षण्ढभावं प्राप्नोति निर्बलो भवति । तदर्थं रोधनसंस्कारविधिमाह—सृष्ट्यम्बुजैरिति । स्त्रिया मूत्रशुक्रशोणितं सृष्टिः । अम्बुजं सैधवम् । तैः सह पारदस्य सैन्धवमूषासंपुटे निरोधात् । कूपिकायां वा निरोधात् । अनन्तरं तथारुद्धं पारदं भूगर्भे त्रिदिनं स्थापयेदिति जातबलः पारदो मुखवान्भवति । रसावतारे तु ‘ स्त्रीपुंसो:(सयोः) योः शुक्रयुगुलमप्रसूतारजस्तथा । सृष्टित्रयं समाख्यातं गुह्यमेतद्वरानने ’ । विशेषश्चात्र शक्त्यवतारे रक्तसैन्धवखोटेन मूषाद्वंद्वं प्रकल्पयेत् । तत्संपुटे रसं क्षिप्त्वा नवसारं सनिम्बुकम् ॥ संपुटस्य प्रयत्नेन लेपयेत्संधिमुत्तमम् । वज्रमृत्स्नां समादाय वेष्टयेत्तत्प्रयत्नतः ॥ छायाशुष्कं च तत्कृत्वा भूगर्ते स्थापयेत्ततः । अष्टाङ्गुलप्रमाणेन मूषोर्ध्वं तत्र पूरणम् ॥ त्रिसप्तदिनपर्यन्तं करीषाग्निं च दापयेत् । दिने दिने प्रकर्तव्या मूषा सैन्धवनूतना ॥ स्वेदयेत्तत्प्रयत्नेन भूगर्भे स्थापयेत्ततः । अथवा कूपिकामध्ये सूतं सैन्धवसंयुतम् ॥ भूगर्भे च ततः स्थाप्यमेकविंशद्दिनावधि । अयं

निरोधको नाम्ना महामुखकरो रसः ' इति । स्वेदनादिवशादितिपदेन रोधं कृत्वोपरि स्वेदनमुक्तप्रकारेण कार्यम् । आदिशब्देन काञ्जिकया क्षालनं बोध्यम् । नियमनं विधत्ते—नियम्य इति । कर्कोटी वन्ध्या कर्कोटकी । फणिनेत्रा नागिनी तस्या अपि कन्दो ग्राह्यः । वृश्चिका विंच्विइति नाम्ना हिमागमे प्रसिद्धा । यस्याः स्पर्शमात्रेण शरीरे वेदना वृश्चिकदंशवद्भवन्ति । पुनर्नवा इति कश्चिद्वदति । अम्बुजं सैधवम् । सर्वमेतदारनालेन काञ्जिकेन सह काचघटे प्रक्षिप्य मुद्रां दत्त्वा वज्रमृत्तिकया संलिप्य भूगर्भे धृत्वोपरि वालुकया संपूर्योपरि त्रिदिनमेकविंशतिदिनं वा संततं करीषाग्निना स्वेदस्तापो देयः । अयमुक्तो विशेषो ग्रन्थान्तरादवगन्तव्यः । अथ दीपनसंस्कारं विधत्ते—मरिचैरिति । भूस्तुवरी । खगः कासीसम् । एतत्सर्वं प्रत्येकं पारदस्य षोडशांशेन गृहीत्वा तद्युक्तकाञ्जिके दोलायन्त्रघटे प्रक्षिप्य पारदं पोटलिकाबद्धं तत्रावलम्बितं निधाय त्रिदिनं स्वेदयेदिति । अत्रापि ग्रन्थान्तरे पोटलिकास्थानबीजपूरं गृहीत्वा तत्र पारदं निधाय वस्त्रेण बीजपूरं संवेष्ट्य दोलायां स्वेदयेत् । स्वेदोऽयं त्र्यहं सप्तदिनमेकविंशतिदिनं वा कार्य इति विशेषः । आसवाम्लेनापि स्वेदं वक्ष्यति । तत्र प्रथममासवाम्लमाह—त्रिक्षारेति । शिखी मयूरतुत्थम् । राजी सर्षपः । तीक्ष्णं मरिचम् । अम्लवेतसः । एतत्प्रमुखैर्यथालाभं नानाविधैर्लवणैरुषणैरम्लैश्च कल्कीकृत्य प्रक्षिप्तैः कृतवासनेन जातरसं यदारनालं नेपालाख्यताम्रस्य दले तद्दलपात्रे पर्युषितं तेन च परिवासनेन किंचित्संशोषितं सत्, नाम्नाऽऽसवाल्ममुदितं कथितम् । तप्ततप्तानि ताम्रदलानि मुहुर्निर्वाप्य तेन शोषितमित्यर्थमपि केचित् । अनेनापि दोलायां स्वेदयेत् । तथा मूलिकानां रसेष्वपि यथोपयोगं स्वेद्यः । यासां यत्र कार्य उपयोगो विहितस्तत्तत्कार्ये तासां तासां रसेषु स्वेद्यः । यथा नियमने नियामकौषधिभिः शिवलिङ्गीप्रभृतिभिर्बन्धने बन्धकौषधिभी रुद्रवन्तीप्रभृतिभिः । मारणे वन्ध्याकर्कोटकीप्रभृतिभिरिति बोध्यम् ॥ ४५ ॥

**मूलम्**—सर्पाक्षी० नोक्ता द्रव्योपयोगिनः ॥ ५३ ॥ **टीका**—ता एव मूलिका आह—सर्पाक्षीति । रसस्य कर्मणि सर्पाक्ष्यादीनां पञ्चस्वङ्गेषु मध्ये प्रायो मूलिकानामेवोपयोगादेता रसमूलिका इति प्रोक्ताः । सर्पाक्षी नाईकन्द इति मालवे प्रसिद्धा । क्षीरिणी दुधीति लोके । वन्ध्या, इयं निसर्गतो निष्फलाऽपि स्त्रीणां वन्ध्यात्वहरा यथाविधि सेविता । मत्स्याक्षी हुनगुन्दा इति कर्नाटकेप्रसिद्धा । बडोदाख्यनजनगरनिकटवर्तितडागेषु केषुचित्सजलोपकण्ठदेशे भूमौ प्रसरणशीलाऽतिक्षुद्रक्षुपरूपा । ह्रस्वसूक्ष्मकाण्डा मत्स्यनेत्रसमदीर्घतिक्तदला मत्स्याक्षी नाम्ना प्रसिद्धा । शालिंचेति नाम्ना प्रसिद्धा रसेन्द्रचिन्तामणौ । मालवे तु ह्रस्वकृष्णवर्तुलपत्रा रक्तसूक्ष्म ह्रस्वदण्डा विशिष्टा दुग्धिकैव तन्नाम्ना प्रसिद्धा । शङ्खपुष्पिका श्वेतपुष्पा लोम-

शपत्रा लोके प्रसिद्धा। इयमेव कृष्णपुष्पा चेद्विष्णुक्रान्तेति केचित्। काकजङ्घा कृष्ण-हरितवर्णश्लक्ष्णत्रिचतुष्कोणकाण्डाऽपामार्गपत्रसमानाकारश्लक्ष्णहरितपत्रा स्वनाम्नैव प्रसिद्धा। अपामार्गवन एव प्रायश उत्पद्यते। शिखिशिखा मयूरशिखा तच्छिखा-समानमञ्जरीविशिष्टा। ब्रह्मदण्डी सक्षीरा गन्धवती लता चाणोद्ग्रामनिकटनर्मदातीरे प्रसिद्धा। आखुपर्णिका—आखुकर्णीयं वल्ली भूमावेव प्रसरति तन्तुभिस्त्रिदला च। उन्दीरकानीति महाराष्ट्रभाषायाम्। वर्षाभूः पुनर्नवा। कम्बुकी शङ्खिनी यवतिक्ता चेति पर्यायद्वयविशिष्टा। इयं वल्ली शिवलिङ्गीसमाना पत्रदण्डफलेषु। फलं तु रेखारहितं शङ्खा-कारबीजगर्भमतिकटु च। कञ्चुकीत्यपि पाठः। कञ्चुकी कन्दवल्लीविशेषः। मूर्वा तीक्ष्णचाकचक्यविशिष्टत्रिदलपत्रा वल्ली। मोरवेल इति नाम्ना प्रसिद्धा। सैर्यकः कोरण्टकः। उत्पला काचिद्दिव्यौषधी। उक्तं हि भैरवेण—'नीलोत्पलाऽपि सा ज्ञेया नीलोत्पलसमच्छदा' इति। इयं संप्रति लोके नोपलभ्यते। शिम्बिका शेंब इति नाम्ना दिल्लीप्रान्ते प्र०। रानघेवडा इति लोके प्र०। त्रिदलेयम्। अत्र चिंञ्चिकेत्यपि पाठः। चिञ्चिका यवचिञ्चिका इत्युत्तरापथे प्र०। जैत इति नाम्ना प्र० वाराणसीनिकटे। आमलकीसमकिंचिद्दीर्घपत्रा। वृक्षोऽपि तद्वृक्षतुल्यः। श्वेतं पुष्पम्। पत्रकल्कस्तु, अण्डवृद्धिजलशोषी। शतावरी नारायणी। वज्रलता हडजोडीति प्र०। इयं वृक्षोपर्येव जायते। त्रिचतुष्कोणकाण्डा संकुचितपर्वा च। वज्रकन्दा पांजणकांदा इति कोंकणे। देशे तु वनसूरण इति वदन्ति। उभयत्र द्रव्यभेदोऽपि दृश्यते। अभिज्ञास्तु—'वज्राख्या महौषधी। वज्रनाम्ना तु सक्षीरा तत्पत्रं कण्टकैर्युतम्। कटुतिक्तं च सस्वादु साऽपि बध्नाति पारदम्' इति। अग्निपर्णिका। अग्निशब्दस्त्रित्वसंख्यावाचकः। त्रीणि पर्णानि यस्या इति व्युत्पत्त्या वल्लीपलाश इति नाम्ना मालवे प्रसिद्धा वल्ली। केचित्तु तद्वा-च्या काचित्कन्दवल्लीति वदन्ति। मृगदूर्वा गण्डदूर्वा। रसाङ्कुशाया लक्षणं लौकिकं नाम च नोपलभ्यते। रसाङ्कुशास्थाने हरीतकीति पाठो रसरत्नाकरे। रम्भा कदली। रक्तेति तस्या विशेषणम्। अथवा रक्ता रक्तस्नुही। अभ्रनिर्गुण्डी कृष्णपुष्पा निर्गुण्डी। लज्जालुः प्रसिद्धैव। सुरदालिका देवदाली। एरण्डफलसमतिक्तफला मण्डूकपर्णी रक्तदण्डा ब्राह्मीति केचित्। पाताली पातालगरुडी मृदुलोमशपत्रा। तानीचा वेल इति कोंकणे। इयं सर्वविषघ्नी। चित्रकः प्रसिद्धः। स च कृष्णपुष्पमूलोऽतीव प्रशस्तः। नाशिकक्षेत्रसंनिहितवणीग्रामनिकटे प्र०। ग्रीष्म-सुन्दरा कस्तूरीमोगरा। अथवा बटमोगरा इति लोके। काकमाची मकोय इत्युत्तरा-पथे प्र०। कावळीति दक्षिणे प्र०। कश्टकांगोणीति कोंकणे प्र०। इयं रक्त-पीतपाकफला श्वेतकुसुमा। महाराष्ट्री ग्रन्थिलगन्धवद्दण्डा। मराठीति नाम्ना प्र०। तिलपर्णिका क्षुपविशेषस्तीक्ष्णगन्धः। श्वेतपीतान्यतरगुच्छपुष्पः। तिळवण इति लोके। तन्मनीति गुर्जरभाषायाम्। जाती जाई इति लोके प्र०। जयन्ती अरणिका।

श्रीर्बिल्ववृक्षः । देवी सहदेवी । भूकदम्बो मुण्डी सा श्वेताऽतिप्रशस्ता । कावेरी-तीरे प्र० । कुसुम्भकः कर्डई इति प्रसिद्धा । कोशातकी तिक्तधामार्गवः । कडुदोडका नीरकणा जलपिप्पली । वल्लीयं द्विहस्तमात्रदीर्घा जलतीरप्रदेशे भूमिपृष्ठ एव विसर्पति । अस्याः पत्राणि जलब्राह्मी(बांव)समानाकाराणि । पिप्पल्यस्तु पीतवर्णार्धाङ्गुलदीर्घा अत्यन्त-कटुतीक्ष्णाः स्फोटविशिष्टा वर्षाकाले प्रादुर्भवन्ति । वह्लाडाख्यदेशे विद्यमानस्य खाम-गांव इत्याख्यातस्य ग्रामस्य स्नानपानाद्यर्थमानीतं नलिकोदकं यस्मात्तडागात्तस्य दक्षि-णतट इयमुत्पद्यते । तथा पुण्यपत्तनसंनिहितजुन्नरग्रामे । तथा गुर्जरदेशे मही-काठा एजन्सीमध्यवर्तिनि अम्लियाराख्यग्रामे चेति । लाङ्गली कळलावीति प्रसिद्धा कन्द-वल्ली । इयमुपविषात्मिका । कटुतुम्बी इक्ष्वाकुः । अमृताकन्दः कन्दगुडूची । सूर्यावर्ताऽऽदित्यभक्ता । सूर्यसंमुखं परिवर्तते । सूर्यफुलवल्लीति महाराष्ट्रभाषायां प्रसिद्धा । इषुपुङ्खिका शरपुङ्खा । बडोदाख्यनगरीनिकटेऽतिप्रसिद्धा । वाराही सूकरी । लोमशदीर्घकन्दा । डुकरकन्द इति प्रसिद्धा । हस्तिशुण्डासमानाकारफला सातपुडा-विन्ध्याद्रौ प्रसिद्धा । रसार्णवाद्याकरग्रन्थेष्वन्या अपि चतुःषष्टिमूलिकाद्या बहुविधा अत्रानुक्ताः सन्ति । रसार्णवस्थतत्पाठं वक्ष्यामि—' सर्पाक्षी वन्ध्यकर्कोटी कञ्चकी जलबिन्दुका । शतावरी भृङ्गराजः शरपुङ्खा पुनर्नवा ॥ मण्डूकपर्णी मत्सा(त्स्या)क्षी ब्रह्मदण्डी शिखण्डिनी । अनन्ता काकजङ्घा च काकमाची कपोतिका ॥ विष्णु-कान्ता सहचरा सहदेवी महाबला । बला नागबला कृष्णा चक्रमर्दः कंकिङ्किणी ( कुरङ्गिणी ) । पाठा चाऽऽमलकी नीली ज्वालिनी पद्मचारिणी । फणित्रि-जिह्वा गोजिह्वा कोकिलाक्षो घनध्वनिः । आखुपर्णी त्रिपर्णी च द्विपर्णी चैकपर्णिका । एता नियामकौषध्यः पुष्पमूलदलान्विताः । दोलास्वेदः प्रकर्तव्यो मूलेनानेन सुव्रते ॥ चाण्डाली राक्षसी व्याघ्री षट्कारा ( खड्गारी ) गजकर्णिका । शङ्खपुष्प्य(ष्प्य) ग्रिथमनी लाङ्गली बालमोचिका ॥ रक्तस्नुही रक्तशृङ्गी रक्तिका नीलचित्रकः । शृगालजिह्वा बृहती वज्री चक्री च राजिका ॥ एकवीरा नरकसा रुदन्ती ब्रह्मचा-रिणी । उच्चटा मानिनी कन्दा कुमारी रक्तचित्रकः ॥ लक्ष्मी शाखोटकश्चक्री ( वज्रिणी ) कञ्चुकी मेषशृङ्गिका । हिमावती सोमलता मोदा व्याघ्रनखी शर्मी । काञ्चनी वनराजी च काकमाची च केशिनी ॥ अजा(ज)मारी कोटराक्षी हनू-मत्यङ्गनायिका । नरजीह्वा (वा) हेमपुष्पी काकमुण्डी च कालिका । तोरवल्ली गजारी च हंसाङ्घ्री कुहकम्बिका ( च कुहं ) । ताम्बूली सूर्य ( सर्प ) भक्ता च रसनिर्जीवकारिका । कटुतुम्बी च गोसन्धी देवदालीन्द्रवारुणी । बाकुची ब्रह्मबी-जानी कार्पासी कृष्णजीरकम् । कङ्गुणी कृष्णकनकं श्वेतार्की च पिपील-( लु ) जम् । दन्तिनी यवचिञ्चा च कर्कोटी कारवेल्लिका गोजिह्वा काकजङ्घा च महाकाली च शम्बरी । श्वेतगुञ्जा सिताङ्कोल्ला पटोली बिल्वमेव च । एकैकमौ-षधीबीजं मारयेद्रसभैरवम् । रक्तस्नुही सोमलता रुदन्ती रक्तचित्रकः । शाखोटकी

दुग्धरुहा मोदिनी वृन्दुदारुकः ॥ त्रिशूली कृष्णमार्जारी (मञ्जारी) चक्रिका क्षीर-कुक्कुटी । देवदाली शङ्खपुष्पी काकमाची हनूमती ॥ नील(लता)ज्योतिस्तृणज्योतिरुर्वरा ( त्कटा )हेमवल्लिका ( ल्लरी ) । त्रिदण्डी ब्रह्मदण्डी च चक्राङ्गी स्थलपद्मिनी ॥ नागजिह्वा नागकर्णी वीरा वर्तुलपर्णिका । अर्कपत्री वंशपत्री ताम्रपर्णी तथेश्वरी ॥ इन्दुरी देवदेवेशि रसबन्धकराः प्रिये । तीव्रगन्धरसस्पर्शैर्द्रव्यैः स्थावरजङ्गमैः ॥ म्रियते बध्यते चैव रसः स्वेदनमर्दनात् । काकमाची घनरवः कासमर्दः कृताञ्जलिः ॥ वराहकर्णी ( शम्भरी ) सटिरी हंसपादी शतावरी । ताम्बूली नागिनी ब्राह्मी हंसपादी च लक्ष्मणा ॥ अर्जुनी क्षीरनाली च कारवेल्लाऽर्कपत्रिका । व्याघ्री ( भीरुणी रिक्ता ) चवी करबका कामिकाः सुरवन्दिते ॥ ब्रह्मदण्डः सुदण्डश्च लोहदण्डस्तृतीयकः । एते रसायने योग्या ब्रह्मविष्णुशिवात्मकाः ॥ भूपाटली च कौ( गो )मारी सिंह(ब्रह्म)वल्ली च शूकरी । हे( म )पर्णी पटोली च नागवल्ली च भृङ्गराट् ॥ इत्यष्ट मूलिकाः प्रोक्ताः पञ्चरत्नं शृणु प्रिये । मन्त्रसिंहासना देवी तथा कङ्कालखेचरी ॥ इन्दिरा च क्षमापाली पञ्चमी तु निशाकरी । पञ्चरत्नमिदं देवि रसशोधनजारणे ॥ रसस्य बन्धने शस्तमेकैकं सुरवन्दिते । रसाङ्कुशेन गृह्णीयात्पञ्च रत्नानि सुव्रते ॥ ददाति खेचरीं सिद्धिं रसभैरवसंगमे' इति । व्याघ्री सिंही तथा वज्री कुमारी चैव लाङ्गली । मोचा चैवाग्निदमनी हंसपादी तथैव च ॥ महौषध्यः प्रयोक्तव्या अष्टावेताश्च जारणे । ब्रह्मदण्डी त्रिदण्डी च रुन्दती चैव वानरी ॥ मुद्गपत्री त्रिशूली च शङ्खी वज्री तथैव च । अष्टावेताः प्रयोक्तव्या औषध्यो बन्धने सदा ॥ कर्कोटी कञ्चुकी चैव काकमाची च कालिका । काकाह्वा काकतुण्डी च कटुतुम्बी तथैव च ॥ कालाञ्जनी च विख्याता अष्टावेताश्च मारणे' इति । गणत्रयं रससार उक्तम् । अन्या अपि चतुःषष्टिवासनौषध्यो रससारोक्ताश्च महौषध्यस्तत एवावधार्याः । विस्तरभयान्नेहोच्यन्ते । अथोद्देशक्रमप्राप्ताञ्जारणादिसंस्कारान्विहाय बन्धान्वक्ष्यति । अष्टौ संस्कारास्तु पारदस्य कञ्चुकादिदोषवारणेन सुशुद्ध्यर्थं पर्याप्ताः । तच्छुद्धं पारदं त्रैलोक्यडम्बररसादिषु दत्त्वा रोगचिकित्सा कर्तुं शक्या । चिकित्सार्थं जारणादिसंस्कारास्तु नाऽऽवश्यकाः । यदा तेषामावश्यकता द्रव्योत्पादने धातुवादे रसायने वा तदा तेऽवश्यं वर्णयितुमुचिताः । तथाऽपि विषयसंकोचार्थमेवैतद्ग्रन्थारम्भ इति रसायनयोग्यतासंपादनमात्रपर्याप्तो यो रससंस्कारो जारणरूपस्तमेव वर्णयिष्यामः। अवशिष्टास्तु ग्रन्थेऽस्मिन्नुक्ता न भविष्यन्ति । तेषां द्रव्यमात्रोपयोगित्वात् । रसरसायनद्रव्येषु ये साधारण्येनाऽऽवश्यकास्ते प्रथममेवाभिहिताः । रसायनशब्दोऽत्र श्लोके नानाविधरसवाचकोऽपि रसायनोपयोगित्वेन तेषां रागसारणसंक्रामणवेधानां वर्णव्यापित्वधात्वन्तःप्रवेशित्वस-

हसाव्याप्तित्वरूपपृथक्फलानां द्रव्योपयोगित्वोक्तिस्त्वभिमानेन । अथवाऽव्यभिचरितधात्वन्तःप्रवेशित्वं तत्संस्काराधीनं व्यभिचारेण धात्वन्तःप्रवेशित्वं तु जारणान्तसंस्कारैरित्याशय आचार्यस्य बोध्यः ॥ ५२ ॥

**मूलम्**—पञ्चविंशतिसंख्याका० सर्वजिबन्धो विपुलप्रभावः ॥ ७२ ॥ **टीका**—अथ प्रथमाध्याये ' मूर्छित्वा हरति रुजम् ' इतिपद्योक्ता विषयास्त्रय एवात्र ग्रन्थे वक्तव्याः । मूर्छनं बन्धनं मारणं च । तत्र मूर्छनं तु मर्दनपूर्वकं पुटेन प्रागुक्तमेव । यन्त्रमूर्छनं त्वस्मिन्नध्याये देहोपयोगिसर्वबन्धोत्तरं वक्ष्यामि । द्वितीयोविषयोऽत्र बन्धरूपो वर्ण्यते । पञ्चविंशतीति । ननु ग्रन्थान्तरे पाटखोटजलूकाभस्मेति बन्धश्चतुर्विध एवाऽऽख्यातः । अत्र तु पञ्चविंशतिसंख्याक इति प्रतिजानाति । एतद्विरुद्धमिव भातीत्याशङ्क्य चाञ्चल्यदुर्ग्रहत्वाभावरूपसामान्यस्य सर्वबन्धेषु सत्त्वेऽपि बन्धजनककारणभेदानुरोधेन बन्धभेदोऽपि वार्तिकैरादृत इत्याह—येन येनेति । तान्बन्धानुद्दिशति—हठारोटाविति । तथाऽपरः । तथा तादृक्संज्ञको मूर्तिबन्धसंज्ञक एवापरः । महाबन्धाख्यबन्धस्यैव सुसंस्कृतकृत इत्यपरा संज्ञा । अथैषां लक्षणान्याह--हठ इति । पारदमापणादानीय निम्बूरसेन संमर्द्य गालयित्वा मयूरतुत्थादिसमभागं चतुर्थांशं वा तत्र दत्त्वा मर्दनेन बद्धो रसः क्रियते । स सेविश्चेतन्मृत्युं कुर्याद्व्याधिं वा । आरोट[ल]क्षणमाह—सुशोधित इति । त्रिविधपातनेन शुद्धं पश्चाच्छुद्धं चूर्णीकृतमभ्रकदलं समभागं दत्त्वा काञ्जिकेन मर्दनपूर्वकं पारदं नष्टपिष्टं कृत्वोर्ध्वाधस्तिर्यक्पातनेनासकृत्कृतेनाग्निसहः पारद आरोट इति निगद्यते । तं च माक्षीकशिलाजतुलोहचूर्णपथ्याक्षविडङ्गघृतमधुभिः संयुतं कृत्वा क्षेत्रीकरणाय युञ्जीतेति रसहृदये । माक्षीकसहितो नष्टपिष्टिरूपः पातनेनाग्निस्थाय्यपि पारदोऽपि, आरोट इति कथ्यते । आभासलक्षणमाह—यः पारदो धातुभिर्मनःशिलागन्धकादिभिस्तथा मूलिकाद्यैः सर्पाक्ष्यादिमूलिकाभिः पत्रपुष्पादिभिश्च सह भावितो द्रवं दत्त्वा मर्दितस्ततो भूधरयन्त्रे पुटेन पुटितो भस्मीकृतः स्वभावतः स्वभावं चाञ्चल्यदुर्ग्रहत्वादि मुक्त्वा धात्वादियोगं याति तत्तद्रोगनाशकयोगगुणं च याति गुणप्रदो भवति । अल्पकालपर्यन्तं ततः पथ्यसेविनोऽपि नरस्य गुणवैकृते सति गुणविक्रियायां सत्यां स बद्धपारद आभास इति कीर्तितः । गुणाभासकरत्वात् । विकृतिरेव वैकृतम् । क्रियाहीनाख्यं लक्षयति—असंशोधितेति । उक्तं च रससारे विकृतिकारणम्—' शीतत्वान्मर्दनाभावाल्लोहाशुद्धस्य जारणात् ' इति । साधितो जारितः । पिष्टिकाबन्धमाह—अर्कातप इति । अस्य पद्यस्य पूर्वार्धोऽपि परिभाषाध्याये जगाद । द्वादशांशं पारदमेकांशं गन्धकं च गृहीत्वा त्रुटिशो मुहुः खल्वे दत्त्वा तीव्रातपे मर्दनान्नवनीतसमो मृदुः पिष्टिकाबन्धो भवतीत्यर्थः । शङ्खशुक्तीति । भस्मीकृतानां शङ्खशुक्त्यादीनां वृक्षक्षारादीनां च मूषां कृत्वा

तत्संपुटे पारदं प्रक्षिप्य संपुटितः पारदो लघुपुटदानेन भस्मी भवतीति क्षारबन्धोऽ- सावग्निदीप्त्यादिकृद्भवेत् । अथ खोटबन्धमाह—बन्ध इति । खोटकरणप्रकारस्तु रससार उवाच—'बन्धने याश्च विख्याता अष्टावेव महौषधीः । ताभिष्टङ्कणयुक्ताभिर्भावयेच्च रसेश्वरम् । ताभिर्विलिप्तमूषायां धमनात्खोटतां व्रजेत्' इति । स एवातिध्मानात्क्षयं गच्छति । स च खोटबन्धो बोध्यः । अत्र पारदो जीर्णषड्गुणगन्धो ग्राह्यः । अभ्रकदानेन पिष्टीकृतो वा ग्राह्यः । 'सोमवल्लीरसे पिष्ट्वा दापयेच्च पुटत्रयम् । सोमवल्लीरसेनैव सप्तवारांश्च भावयेत् ॥ तदभ्रं मृद्भाण्डे दध्याद्रसेन सह संयुतम् । मूलं तु शरपुङ्खाया गव्यक्षीरेण घर्षयेत् ॥ कल्केन मेलयेत्सूतं गगनं च तदधो(दो)र्ध्वगम् । स्थापयेद्रविताषे तु निर्मुखो ग्रसते क्षणात् ॥ जायते पिष्टिका शीघ्रं नात्र कार्या विचारणा' इति । पिष्टीबन्धस्तु खोटक इति वर्णनादत्र पिष्टिकारूपमुच्यते । खोटलक्षणं ग्रन्थान्तरे तु—'ध्मातो द्रुतो भवेत्खोट आहतश्चूर्णतां व्रजेत् । पुनर्ध्मातो द्रुतः खोट इति खोटस्य लक्षणम्'। घनसत्त्वपादजीर्णः कान्तपादजीर्णः समतीक्ष्णजीर्णश्चेद्वाऽयं क्षेत्रीकरणार्थमपि प्रशस्तः । पाटबन्धं लक्षयति—द्रुतेति । अधोऽग्निना कटाहे तापेन द्रुता जातद्रवा या कज्जली सा तत्क्षणे कदलीदले प्रक्षिप्य तद्दलेनाऽऽच्छाद्य पीडनेन चिपिटीकृता पाटबन्धः पर्पटिकाबन्धश्चेति ख्याता बालवृद्धादीनामनुपानभेदेन सर्वरोगघ्नी । कल्कबन्धमाह--स्वेदाद्यैरिति । साधितः संमर्द्य पाचितः पङ्कवद्घनो भवति स कल्कबन्ध इतीरितः । अत्र स्वेदो विशिष्टौषधीनां रसेन देयः । यथा चुल्लीस्थे लौहे कटाहे मयूरतुत्थकृतालवालके गङ्गापत्रीस्वरसं पारदं च प्रक्षिप्य यथा पारदो रसमग्नः स्यात्तथा रसमन्तराऽन्तरा दत्त्वा मन्दाग्निना चतुष्प्रहरपर्यन्तं पाचयेत् । ततो निम्बूरसेन क्षालयेत् । एवं स्वेदेन पारदः पङ्कवद्भवति । द्रोणपुष्पीशिवलिङ्गीप्रभृतीनां रसेन । अयमेव बन्धनविधिर्बोध्यः । आद्यशब्देन मर्दनभावनापुटादिपरिग्रहः । बन्धनौषधिभिरपि पूर्वोक्ताभिः पङ्कवद्भवति । कज्जलीबन्धं लक्षयति । तत्तद्योगेन रोगवारकविशिष्टौषधीमिश्रणमर्दनयोगेन युक्ता सती कज्जलीबन्ध उच्यते । अत्र तत्तद्योगेन संयुक्तेति न लक्षणघटकम् । तेन विना कज्जल्याः सिद्धत्वात् । किंतु योगवाहित्वेनेयं सर्वरोगनाशिकेति बोधनाय तदुक्तिः । अथ सजीवबद्धमाह—भस्मीकृतेति । ताम्बूलीदलरसमर्दितः पश्चाद्वन्ध्याकर्कोटकीकन्दमध्ये प्रक्षिप्य संपुटितो बहिर्मृद्वस्त्राभ्यां संपुटितो भूमौ गजपुटेन पुटितो भस्मी भवति । एवं प्रकारान्तरेणापि भस्मीकृतः पारदोऽग्नौ पात्रे धृतश्चेदाकाशे गच्छति । पक्षच्छेदाभावात् । भस्मकार्यं जरामरणाभावरूपं स तु न करोति । व्याधिनाशमपि न । अथ निर्जीवबन्धमाह—जीर्णाभ्रक इति । चतुर्थांशेन जीर्णवज्राभ्रकसत्त्वः । अथवा जीर्णषड्गुणगन्धः पारद उक्तप्रकारेण भस्मीकृतोऽखिलसुवर्णादिलोहेषु श्रेष्ठत्वं प्राप्तः सर्वलोहगुणवृन्दाश्रयत्वात् । स तु सर्वरोगघ्नः । निर्बीजबन्धं लक्षयति—

रसस्त्विति । अत्र सुवर्णं न तु बीजीकृतं किंतु शुद्धं जारणायन्त्रे संस्कृतं पत्ररूपं ग्राह्यम् । पिष्टीकृतो द्वादशांशे पारद एकांशं गन्धकं त्रुटिशो मुहुर्दत्त्वाऽम्लेन संमर्दितस्ततस्तुल्यांशगन्धैः क्रमेण पुटितः प्रथमं गन्धकं चतुर्थांशं दत्त्वा भूधरयन्त्रे पुटितस्ततोऽर्धांशं गन्धकं दत्त्वा तथा पुटितस्ततः पादोनं गन्धकं दत्त्वा पुटितस्तदूर्ध्वं समभागमितं दत्त्वा पुटित इति क्रमशब्दार्थः । गन्धैरिति बहुवचनमतन्त्रम् । अथ बीजबद्धमाह—बीजीकृतैरिति । बीजविधिस्तु परिभाषाध्याये प्रागुक्त एव । एतैर्व्यस्तैः समस्तैर्वा प्रत्येकं समभागमितैर्द्वद्वमेलापकयोगेन मिथो मिलितैर्ग्रासक्रमेण दत्तैः परिजारितस्ततः षड्गुणगन्धकेनोक्तक्रमेण हतो भूधरयन्त्रे पुटितो मारितो बीजबद्धो निगद्यते ॥ ७३ ॥

**मूलम्**—वज्रादिनिहतः० महाबन्धाभिधानो रसः ॥ ८४ ॥ **टीका**—वज्रेण भस्मीकृतेन चूर्णीकृतेन वा निहतो मारितो यः सूतस्तन्मध्ये मारितमन्यं सूतकमपि निक्षिपेत् । सोऽपि रसो बद्धः खोटरूपः शृङ्खलाबद्ध इत्युच्यते । एतन्मारणप्रकारस्तु रसार्णव उक्तः । अत्र च त्रिंशत्तमेऽध्याये वज्रपञ्जररसविधौ च स्फुटी भविष्यति । रसार्णवे तु 'वज्रचूर्णसमं सूतं हंसपाद्या विमर्दयेत् । पुटित्वा मारयेत्तत्र तुल्यमन्यं रसं क्षिपेत् ॥ ध्मातः खोटो भवत्याशु शोधितः काचटङ्कणैः । यावच्छ (च्छु)क्रोदयप्रख्यो जायते स रसः प्रिये ' इति । वज्रपञ्जरविधौ तु पुटानले पाचनमुक्तम् , न तु मूषायां ध्मानेन खोटकरणमिति त्वन्यदेतत् । अत्र वज्रबद्धरसस्य संयोगात्क्षिप्तोऽन्योऽपि रसो वज्रबद्धो भवति । एवं तृतीयोऽपि रसस्तदुत्तरं क्षिप्तश्चेत्सोऽपि बद्धः स्यात् । बद्धस्य हि संयोगादित्यप्यूह्यम् । अत एव शृङ्खलाबद्धेत्यन्वर्थं नाम । अस्य बद्धरसस्य धात्वन्तःप्रवेशसहिता पुरुषशरीरे व्याप्तिर्निश्चितमव्यभिचारेण भवति । चित्रप्रभावेति विशेषणं व्याप्तेः सारणाक्रामणवेधसंस्काराकरणेऽपीति तदर्थः । प्रभावविषये तु कथमेतदिति नियोगपर्यनुयोगानर्हत्वादिति भावः । 'चित्रप्रभावां वेगेन व्याप्तिं जानाति शंकरः ' इत्यपि पाठः । अथ द्रुतिबद्धमाह—युक्तोऽपीति । बीजानां जारणेन यदि रसो महाप्रभावो भवतीति तन्न चित्रम् । रसोपरसधातूनां या बहिर्द्रुतयस्ताभिर्युक्तोऽपि ताभिर्जारितोऽपि पारदो बद्धमात्रो बन्धोत्तरं भस्मीकृतो वा द्रुतिबद्धनामा सर्षपचतुर्थांशमात्रया सेवितश्चेद्दुःसाध्यरोगान्निहन्ति । अथ द्रुतिमेलापकसंस्कारो द्रुतिजारणविधिश्च रससारेऽभिहितः— 'व्योममाक्षीकशुल्वानां द्रुतिं दत्त्वा विमर्दयेत् । औषधीलेपिता मूषा रसस्तत्र निधाप्यते ॥ अन्धमूषागतं ध्मातं द्रुतिमेलापकं भवेत् । स्फुटं निर्वापयेत्सूतं द्रुतिजारणमुत्तमम् ॥ अमुनैव प्रकर्तव्यं सर्वेषां द्रुतिजारणम् । नागं हेमद्रुतियुतं सर्वेषां द्रुतिमेलनम् ॥ अयस्कान्तस्य तैलेन गन्धपाषाणकस्य वा । मिलन्ति सर्वरत्नानि द्रवन्ति सलिलं यथा ' इति । बालाख्यबद्धं लक्षयति—समेति । अभ्रं कृष्णवज्राभ्रसत्त्वम् । शिवजः पारदः । समाभ्रजीर्णश्चतुःषष्टिद्वात्रिंशत्षोडशादिभागक्रमेण । अस्यो-

पयोगः पत्रलेपेऽपि बोध्यः । कुमारबन्धं लक्षयति—हरोद्भव इति । पापाद्योगो येषां ते पापयोगाः कुष्ठादयः । तरुणाख्यं बन्धं वर्णयति—चतुर्गुणेति । व्योम उक्तमभ्रकसत्त्वम् । वृद्धसंज्ञकमाह—यस्येति । लोहे सुवर्णाद्युत्पत्तौ वेधार्थम् । मूर्तिबद्धं लक्षयति—य इति । दिव्यमूलिकाश्चतुःषष्टिमूलिकाः प्रागुक्तास्ताभिस्तद्रसेन मर्दनस्वेदनादिना पक्षच्छेदात् । अभ्रजारणादिनाऽप्यत्यग्निसहो बद्धः कृतो द्रव्यान्तरानभिव्याप्त्या केवलं देहेनैव बद्धो मूर्तिबद्ध इत्युच्यते । तथा वैक्रान्तवज्रसंस्पर्शात् । तेन चर्णीकृतेन सह मर्दनादपि रसो बद्धो भवतीति सोऽपि मूर्तिबद्ध इत्युच्यते । एवं च मूर्तिबन्धो द्विविधः संभवति । जलबन्धं लक्षयति । शिलातोयमुखैः शिलातोयचन्द्रतोयप्रमुखैर्जलैः सह मर्दनादिना बद्धः पारदो जलबद्ध इति कीर्तितः । कल्पोक्तेति । पारदकल्पोक्तफलेत्यर्थः । एतस्य जलस्य विस्तरो रसार्णवे स्पष्टीकृतः । क्षिप्तं जले भवेत्काष्ठं शिलाभूतं च दृश्यते । बहिरन्तश्च देवेशि वेधकं तत्प्रकीर्तितम् ॥ हिङ्गुलं हरितालं च गन्धकं च मनःशिला । एषां गन्धापहारं यत्कुरुते तच्च वेधकम् ॥ गन्धकं तालकं चैव तोयपूर्णे घटे क्षिपेत् । यदा तद्बुद्बुदाकारं तदा शैलोदकं वदेत् ॥ अन्यथा वेधकं देवि तद्ग्राह्यं निरर्थकम् । श्रीशैले श्रीवनप्रान्ते पर्य(ङ्का)काख्ये शिलातले ॥ तत्रस्थं क्षणवेधि स्यान्नदीभगवतीतटे । एकाहे वेधकं तत्र गोकर्णे तु दिनत्रयम् ॥ भद्राङ्गे दिनवेधि स्यात्त्रिस्थलान्ते त्रिवासरम् । धारेश्वरे पाक्षिकं स्याद्वर्षापुर्यां दिनैकतः ॥ ब्रह्मेश्वरे मासिकं स्याद्ब्रह्मपुर्यां तु वासरम् ' । इङ्गुदीफलान्तस्थं तज्जलसहितं पारदं कालान्तरेण गुटिकारूपं कृत्वा तत्फलं सविस्तरं वर्णितम् । तानि चन्द्रजलानि पूर्णिमायां पूर्णं चन्द्रं दृष्ट्वा महीं भित्त्वा निर्गच्छन्ति । 'कानिचिन्मूर्तिवर्णानि ल(र)ऽसेन लवणानि च । कानिचिच्चन्द्रवर्णानि व्योमभासानि कानिचित् ॥ चन्द्रवृद्ध्याऽभिवृद्ध्येरन्क्षीयेरन्तत्क्षयेण तु' इति । एतदुदकं क्षणात्पारदं बध्नातीति । खानदेशे पाचोराख्यतालुकाविभागे क्वचिद्वापी प्रक्षिप्तं काष्ठं शिलामयं करोतीति किल श्रूयते । अथाग्निबद्धं पारदमाह—केवल इति । आदौ षड्गुणेनाभ्रकजारणेनाग्निसहः पारदो मणिजीर्णो पातनायन्त्रेणोत्थापितः स द्रुतो भवति । स च केवलस्तीक्ष्णलोहयुक्तो वा ध्मातः सन्गुटिकाकृतिश्चाग्रावक्षयश्च भवति । अत एवायमग्निबद्ध इत्युच्यते । अयं मुखे धृतश्चेत्पुरुषस्याऽऽकाशगामित्वशस्त्राग्न्यभेद्यत्वसायुज्यसारूप्यादिमुक्तिकरो भवेत् । मणिविशेषजारितं पारदं रससार उवाच—' रवीन्दुतारसंज्ञाश्च मणयस्त्रिविधाः स्मृताः । कोरयित्वाऽर्ककान्तौ च कार्यं मूषापुटद्वयम् । अष्टांशं कनकं दत्त्वा रसपिष्टिं च कारयेत् । जारयेद्गन्धकं सूते सूर्यकान्तस्य संपुटे ॥ ग्रीष्मे लघुपुटो देयो मध्याह्ने सूर्यरश्मिभिः । तापत्रयेण संतप्तो बद्धो भवति पारदः । प्रत्यहं जारयेद्गन्धं मासं तापत्रयेण च । शतादिकोटिपर्यन्तं जारयेच्च रसेश्वरम् ॥ रसायनप्रयोगेषु वर्जयेत्तं रसेश्वरम् । सोमकान्तमणेः कर्म कर्तव्यं चन्द्ररश्मिभिः ॥ त्रयं पुटः प्रदा-

तव्यो बद्धो हेम्नाऽक्षयो भवेत् । तं गोलं धारयेद्वक्त्रे अमरः खेचरो भवेत् '। एवं दिव्यौषधीस्पर्शादिकिंचित्संस्कारेण पक्षच्छेदं विना केवलाग्निबद्धत्वं पारदेऽसंभावीति प्रतर्क्येदृशः संस्कारोऽभिहितः । वह्निपाकयोर्वैरस्यं हि रसार्णवे चोक्तत्वात्— ' कठिनं मौक्तिकं लोके तारकान्तश्च कथ्यते ' । अथवाऽत्र रत्नपारदो रसरत्नाकरोक्तो ग्राह्यः । तं च बन्धकौषधीविलिप्तवज्रमूषायां प्रक्षिप्य ध्मानाद्गुटिकाकरो भवेत् । खेचरत्वादिगुणकृच्च रत्नपारदविधिस्तु ' स्तम्भिता गन्धपिष्टी या गन्धजारणवर्जिता । तस्याः षोडशभागा वै भागैकं मृतवज्रकम् ॥ देवदाल्याः शङ्खपुष्प्या द्रवैर्मर्द्यं दिनत्रयम् । पचेत्कच्छपयन्त्रस्थं पुटैकेन समुद्धरेत् ॥ यामैकं पूर्वजैर्द्रवैर्मर्द्यं तत्पूर्ववत्पुटेत् । एवं शतपुटैः पक्वो यामं मर्द्यं च तद्द्रवैः ॥ दिनैकं पातनायन्त्रे पाचयेल्लघुनाऽग्निना । पुनर्मर्द्यं पुनः पाच्यं यावदूर्ध्वं न गच्छति ॥ अधोयन्त्रे यदा तिष्ठेत्तदा स्याद्रत्नपारदः । दशनिष्कं शुद्धसूतं निष्कैकं शुद्धगन्धकम् ॥ स्तोकं स्तोकं क्षिपेत्खल्वे मर्दकेन शनैः शनैः । कुट्टनाज्जायते पिष्टी सेयं गन्धकपिष्टिका ' । तत्स्तम्भनविधिश्च—' तिक्तकोशातकीबीजं चाण्डालीकन्दमेव वा । नारीस्तन्येन संपेष्य लेपयेद्गन्धपिष्टिकाम् । निक्षिपेत्सौरणे कन्दे क्षीरकन्दोदरेऽथवा । वन्ध्याकर्कोटकीवज्रकन्दे वाऽऽपूर्य तन्मुखम् । कन्दस्य मज्जया रुद्ध्वा तत्कन्दं च मृदा लिपेत् । पुटयेद्भूधरे यन्त्रे करीषाग्नौ दिनावधि । रुद्ध्वाऽर्धपरिवर्तेन यथा कन्दो न दह्यते । तप्तपिष्टिं समुद्धृत्य स्तम्भिता जायते खलु ' इति । महाबन्धमाह—हेम्ना वेति । अत्र हेम चतुर्थांशमर्धांशं वा ग्राह्यम् । रजतमपि तथैव । बन्धौषधिलिप्तवज्रमूषामध्ये तयोरन्यतरेण युक्तो ध्मातोऽग्निबद्ध एव पारदो वक्ष्यमाणलक्षणविशिष्टः सुसंस्कृतकृतसंज्ञां महाबन्धसंज्ञां च लभते । तान्येव लक्षणान्याह—ध्मातो व्रजत्येकतामित्यादिना । पटुवत् । सैन्धवतुल्यं चूर्णत्वं याति । निहतः सन्नद्रवति । अग्नियोगादिति शेषः ॥ ८४ ॥

**मूलम्**—विष्णुक्रान्ताशशि० कामयेत्कामिनी स्वयम् ॥ ९५ ॥ **टीका**—अत्रामूर्छितानां मूर्छितानां च जारणया बद्धानां च रसानां संग्रह उदितः । जलूकाबन्धं विना सर्व एव देहोपयोगिनो न स्युः । पिष्टिकाकज्जलिकादिबन्धानां केषांचित्पाकमूर्छां विनैव संभवात् । जारितग्रासस्य केवलं द्रव्यान्तरमिश्रितस्य वा रसस्य गालनपातनव्यतिरेकेण पूर्वावस्थानापन्नत्वं हि मूर्छितत्वस्य लक्षणम् । तच्च पिष्टिकादिषु न संभवति । आतपे धारणेनापि तत्र पूर्वावस्थापन्नत्वं रसस्य प्राप्नोति । मूर्छित एव रसो रुजं हरति । अतस्तेषां रोगनाशकत्वयोग्यतासंपादनार्थमत्र यन्त्रे पाकेन मूर्छना विधीयते । किंच चिकित्सायां यत्र पारदो निर्दिष्टः काष्ठौषध्यो मृतलोहान्यपि च निर्दिष्टानि पाकस्तु तेषां नोपदिष्टः । यथा षोडशाध्यायेऽमृतवल्ल्यां तत्रापि पारदः पाकमूर्छित एव ग्राह्य इत्यभिप्रायप्रदर्शनार्थं चिकित्सोपयोगिबन्धानामन्त एव मूर्छनोपदेशारम्भः । एवं च मणिधातुरसोपरसा इव पारदोऽपि

शुद्धपक्क एव चिकित्साविषय इति भावः । विष्णुक्रान्तेति । विष्णुक्रान्तादीनां रसेष्वप्रसूतगवां मूत्रे च पिष्टं पारदं वालुकके वालुकायन्त्रे काचकूप्यां निधाय प्रहरपर्यन्तं यथाविधि पचेत् । एवं पक्वं तं ततो मृतलोहैः सह मर्दितं कृत्वा पुनर्विपचेत्तत्त्यो-गोपदिष्टयन्त्रपुटमूषासु । यदि तु पाको नोक्त एव, तत्र पुनः पाकापेक्षा नास्त्ये-वेति भावः । विष्णुक्रान्ता कृष्णगोकर्णी कृष्णपुष्पा शङ्खपुष्पी वा । शशिलता सोमवल्ली । कुम्भी कट्फलम् । कनको धतूरः कृष्णपुष्पबीजः । कूलकं तिक्तं पटोलफलम् । विशाला इन्द्रवारुणी । नागिनी नागदन्ती नागदवणीति ख्याता । कन्दो वनसूरणः । व्याघ्रपादी कण्टकारी । कुतुम्बको द्रोणपुष्पी । वृश्चिकाली मेषशृङ्गी । इभशुण्डी हस्तिशुण्डी । हंसपादी लज्जालुः । सहा कुमारी । सुरो देवदारुः । यन्त्रेषु मूर्छासूतानां मूर्छाविषयकसूतानां मूर्छितसूतानां करणेऽयं कल्पो विधिः समासेन प्रदर्शितः । अथ जलूकाबन्धविधिमाह—सूत इति । तप्तखल्वे क्षिप्तपारदगर्भेऽर्धभागं कनकं चतुर्थांशेन नागं वा त्रुटिशो त्रुटिशो नि-क्षिप्य मर्दनेन चारणोत्तरं पञ्चाङ्गुष्ठकादिबीजैश्चूर्णीकृतैः प्रत्येकं पारदसमभागमितै-स्तथा तेजिन्यादिभिः प्रत्येकं समभागमितैः कृतं चूर्णं तिलचूर्णं तमालपत्रचूर्णं च पृथक्पृथगुक्तभागमितं तत्र निक्षिप्य मर्दनेन जाता जलूका दीर्घवर्तुला गुटिका श्रेष्ठा भवेत् । इयं कपिकच्छुचूर्णप्रतीवापयुक्ते बाकुचीतैले तथा चन्द्रयुक्ते टङ्क-णादिजले च स्विन्ना पक्वा सती उत्तेजिनी स्यात् । सामान्यखल्वे विमर्दनं विहाय किमर्थं तप्तखल्वे मर्दनमुपदिष्टं तदाह—तप्तेति । विमर्दनविधेर्विमर्दन-विधिं कृत्वेत्यर्थः । जलूकाविधौ यत्र मर्दनशब्द आगमिष्यति तत्र तत्तप्तखल्व एव कार्यमिति भावः । पञ्चाङ्गुष्ठ एरण्डः । कृतमवा धातकी । तेजिनी तेजो-वती । कोलकं कङ्कोलकं तन्नामकं यत्फलं कङ्कोलफलमित्यर्थः । चन्द्रः कर्पूरः । कामपिप्पली मदनबीजम् । जलूकां योनिमध्ये धृत्वा लिङ्गप्रवेशः कार्यः । कामिनीवयोऽनुसृत्य तत्प्रमाणमाह—बाल्य इति । प्रगल्भा त्रिंशोद्वर्षोत्तरवयस्का । द्वितीयां जलूकामाह—धृत्वेति । सूक्ष्ममुखे पात्रे पारदं धृत्वा तत्र मर्षीक्षीरं दत्त्वा तीव आतपे धारयेत् । प्रत्यहं रात्रौ पिधानेन पिहितं कार्यमित्यनुक्तमप्यवगम्यते । एक-विंशतिदिनोत्तरं स्वयं बद्धः पारदो जलूकारूपः कार्यः । अथ तृतीयामाह— मुनिपत्रेति । अत्रोक्तं तोयं चूर्णं च प्रत्येकं पारदसमं गृहीत्वा तत्सहितं पारदं तप्तखल्वे संमर्द्य कृता जलूका रमणीप्रिया भवेत् । कोकिलाक्ष इक्षुरः ॥ ९५ ॥

**मूलम्**—त्रिफलाभृङ्ग वनितानां० द्रावणं कुरुते ॥ १०८ ॥ **टीका**—त्रिफ-लेति । त्रिफलाकषाये भृङ्गराजरसे शुण्ठीक्वाथे प्रत्येकं नागं तप्ततप्तं सप्तवार निषेचयेत् । ततः साम्येन तज्जरितं रसं जलूकाकारं कुर्यात् । फलं तु पूर्ववद्-बोध्यम् । पञ्चमीमाह—भान्विति । तत्र पारदसंबन्धिदीनारास्तेषां संख्यामानं किय-

दुर्ग्राह्यं तद्विकल्पेनाऽऽह । भानुसंख्याप्रमाणम् । स्वरसंख्याप्रमाणं दिनसंख्याप्रमाणं वा यत्सूतगृहीतदीनारमिति तत्पुरुषः । तस्य पृथगङ्कोलादिरसेषु शोधनं कुर्यात् । दोलायन्त्रे तत्तद्रसेन स्वेदनं मर्दनं काञ्जिकया क्षालनं च कुर्यादित्यर्थः । ततस्तं पारदं शशिरेखादीनां चूर्णैः पृथक्स्वसमभागमितैः सह तप्तखल्वे हरिद्रायाः कषाय-मिश्रं काञ्जिकं तथा यूषं धान्यक्वाथं वा मुहुर्दत्त्वैकविंशतिदिनपर्यन्तं प्रत्यहं सूर्योदयमारभ्य सूर्यास्तपर्यन्तं मर्दयेत् । ततो रतिसमये तां योनौ प्रवेशयेत् । भानुसंख्याकदीनारमितपारदकृतां जलूकां बालायां योज्या । स्वरसंख्याकदीनारमित-पारदकृतां मध्यमायां योजयेत् । दिनसंख्याकदीनारमितपारदकृतां तु वृद्धायामिति क्रमो वेद्यः । भानुशब्दो द्वादशसंख्याबोधकः । स्वरः सप्तसंख्याबोधकः । दिनशब्दे-नात्र तिथयो विवक्षिताः । अतोऽत्र स शब्दः पञ्चदशसंख्याबोधकः । तिथीनां पञ्चदशत्वात् । दीनाराख्यो मानशब्दो द्वात्रिंशत्संख्याकगुञ्जासु पारिभाषितः । शशि-रेखा बाकुची । वरवर्णिनी हरिद्रा । कनकः कृष्णबीजधत्तूरस्तद्बीजं माह्यम् । षष्ठी-माह—रसभागेति । सुरसा तुलसी । सप्तमीमाह—कर्पूरेति । सूरणः सूरणशाकम् । सुभृङ्गः कृष्णभृङ्गराजः । सुमेघनादस्तन्दुलीयकम् । तैः कृतरसे तप्ततप्तं नागं सप्तधा निषिच्य तन्नागं समभागमितेन पारदेन सह तप्तखल्वे तेषां रसेन सहैव मर्दनेन वलयेत् । वलयाकारां जलूकां कुर्यादित्यर्थः । तया योजितया सत्या स्वामी नितम्बिनीनां जीवनहेतुः प्राणवत्प्रियो भवतीत्यर्थः । अष्टमीमाह—टङ्क-णेति । कामी कामवृक्षः । बाण्डगुळ बिन्दुकली इति वा ख्यातः । रसः पारदः । सर्वचूर्णानि पारदसमानि पृथग्गृहीत्वा पिप्पल्यादीनामेव रसेन सह मर्दनेन पारदं कृत्वा कल्कीकृत्य तेन स्वाङ्गं स्वलिङ्गं विलिप्य स्वामी रतिसमये स्त्रीणां योनिं विद्रावयेत् । अथ वलयाकारं जलूकाबन्धमाह—अग्न्यावर्तितेति । चुल्लिसमधिश्रिते तप्ते लौहे कटाहेऽग्नितापेन द्रुते नागे पारदं द्विगुणं निक्षिप्य तन्मध्ये मुन्यादि-रसमल्पाल्पं क्रमेण युक्त्या सिञ्चेत् । ततः तक्रगणेन मर्दयित्वा कृतं मदनवलयं स्त्रीणां सत्त्वरं द्रावयेदिति । मुनिरगस्त्यवृक्षः । कनकः कृष्णपुष्पबीजो धत्तूरः । नागो नागवल्लीरसः । नागवल्ली ताम्बूलवल्ली । सर्पः सर्पाक्षीरसः । अथान्यं तथैव जलूकाबन्धमाह—व्याघ्रीति । व्याघ्री कण्टकारी । बृहती वन्यवृन्ताकम् । तयोः फलानां रसं सूरणकन्दं चशब्देन पारदं चणकपत्राम्लं कपिकच्छ्वादीनां चूर्णं तथा पूर्ववद्द्रुतं नागं नवसारं च सर्वं समं गृहीत्वा तप्तखल्वे चन्दनादिभिर्हिमवीर्यद्रव्य-रसैः सह मर्दयेत् । ततः कृतं स्मरवलयं स्त्रीणां विद्रावणं भवेत् । वज्रवल्ली त्रिचतुष्कोणकाण्डा ह्रस्वपर्वा वृक्षोपर्येवोत्पद्यते । हडजोडीति ख्याता । कामः कामवृक्षः ॥ १०८ ॥

**मूलम्**—पलाशबीजकं रक्तरम्भीरा० भस्मी भवति तद्रसः ॥ ११८ ॥

**टीका**—अथ मृतः पारदोऽमरीं करोति । तद्भस्म च द्विविधं सजीवभस्म निर्जीवभस्म च । जारणासंस्कारं विना केवलं मर्दनादिसंस्कारैः शुद्धमात्रस्याच्छिन्न-

पक्षस्यानग्निसहस्य यद्भस्म क्रियते तत्सजीवभस्म। तच्चाग्नौ न तिष्ठति । किंचिदेव व्याधिविनाशकं भवेत् । परंतु रसायनानुपयोगि । छिन्नपक्षस्याग्निसहस्य जारणया बद्धस्य तस्य यद्भस्म तदेव रसायनयोग्यम् । वक्ष्यमाणभस्मकरणाविधिस्तूभयोः समान एव । अथ पारदभस्मविधिमाह—पलाशबीजमिति । पलाशबीजचूर्णं सजीवममूर्छितमपि पारदं च खल्वे रक्तवर्णजम्बीररसेन सह त्रिदिनं संमर्द्य शरावसंपुटितो भूधरयन्त्रे पुटेन पाचितो निश्चयेन म्रियते । तथा खरमञ्जरीबीजचूर्णं पुष्करबीजचूर्णं चैकीकृत्यापामार्गरसेनैव कल्कं कृत्वा मूषामध्ये कल्कं धृत्वा तन्मध्ये स्थितं पारदं कल्केनैवाऽऽच्छाद्य मूषां पिहितां कृत्वा संधिलेपं कृत्वा ततो गजपुटदानेन रसो भस्मी भवति । खरमञ्जरी अपामार्गः । विध्यन्तरमाह—काकोदुम्बरिकेति । तद्दुग्धेन त्रिदिनं भावितो(तं) हिङ्गु संमर्द्य तद्दुग्धेनैव पारदं च संमर्द्य तं पारदं तद्धिङ्गुकल्कमध्ये धृत्वा भूधरयन्त्रे पुटेन रसो म्रियते । काकोदुम्बरिका मलयूः । कोंकणे खरोतीति ख्याता । पुनराह—देवदालीमिति । हरिक्रान्ता विष्णुक्रान्ता । तद्द्रवैर्निष्पीडिततद्द्रव्यरसैः साकं मर्दितं मूर्छितं च पारदं चुल्ल्यधिश्रिते मृत्पात्रे धृत्वा तदुपरि तद्रसं मुहुर्मुहुर्दत्त्वैकदिनपर्यन्तं पचेत् । तद्भस्म लवणोपमं भवेत् । विध्यन्तरमाह—अपामार्गेति । अपामार्गैरण्डबीजानां चूर्णं मूषामध्ये पारदस्याधरोत्तरं दत्त्वा पिधाय संधिं रुद्ध्वा लघुपुटे पचेत् । एवं चतुर्भिः पुटै रसो म्रियते । अथवा कटुतुम्बीकन्देन नारीपयःप्लुतगर्भे पारदं मल्लमूषायां निधाय भूम्युपरि गोमयाग्निना स्वेदयेत्पुटेदित्यर्थः । एवं सप्तधा करणेन रसो मृतो भवति । अथवा—अङ्कोलमूलवारिणा खल्वे गन्धतुल्यं पारदं विमर्दयेत्तावद्यावत्पिष्टं चूर्णरूपं स्यात् । ततो निरुद्ध्य सायं भूधरयन्त्रे पुटयेद्दिनान्ते । प्रभाते स म्रियते । विध्यन्तरमाह—वटक्षीरेणेति । पाचयेत् । लौहे कटाह आलोड्य पाचयेत् । तेनापि रसो म्रियते ॥ ११८ ॥

**मूलम्**—अथाऽऽतुरो० सकृत्साधारणो विधिः ॥ १३२ ॥ **टीका**—अथेति । वेण्वादीत्यत्राऽऽदिशब्देन काचपत्रादिपरिग्रहः । पर्णखण्डे ताम्बूलखण्डे धृतम् । अलम्बुषा मुण्डीशाकम् । ताम्रचूडः कुक्कुटः । कण्टारी कण्टकारी तत्फलम् । कमठः कूर्मः । कतकं निवळीबीज इति ख्यातम् । कीरी पत्रशाकविशेषः । काजळीति प्रसिद्धा । इयमार्द्रभूमिप्रसरणशीला । देवीशास्त्रेति । देवीशास्त्रं देवी पार्वती तत्प्रोक्तं रसतन्त्रम् । कङ्गुस्तृणधान्यविशेषः । यज्जाततण्डुलभक्तः पीतवर्णो भवति । कन्दुकः पूगीफलवृक्षः । कोलं बदरम् । कलः कलविङ्कश्चटकविशेषः । क्रोडो वराहः । कटुतैलं राजिकातैलम् । कृष्णगलको मयूरः । कणा पिप्पली । कर्कारुः खरबूज इति लोके प्रसिद्धम् । कटिल्लकं रक्तपुनर्नवा । कर्कोटं कर्टोली । काली काजळीति प्र० । अन्यतोऽनुक्तनिषेधतद्गणे रसान्तरे तत्तद्रसशक्तिह्रासकरण उचितोऽयं गण इति विचार्य निषेध्यो रसप्रयोगावसर उत्प-

यमानोपद्रवचिकित्सामाह--उद्गार इति। शीतोपचारं चन्दनलेपादि । त्यागविधौ तु वर्ज्यद्रव्यविधौ तु प्रमादेन सकृदेकवारं बृहतीफलं बिल्वफलं च भक्षितं चेन्न दोषायेति भावः । साधारण इति । विशिष्टरसप्रयोगावसरे तु तत्रोक्तपथ्यवर्जादि चरेदिति ॥ १३२ ॥

इति रसरत्नसमुच्चयटीकायां खरेइत्युपाह्वेन वामनात्मजेन चिन्ता-
मणिना प्रणतायां सरलार्थप्रकाशिन्याख्यायां सूत्रस्थान
एकादशोऽध्यायः ॥ ११ ॥

---

## अथ द्वादशोऽध्यायः ।

**मूलम्**—ज्वरस्य रक्तपित्तस्य० त्रिषु भवेच्च तत् ॥ १२ ॥ **टीका**--अथ चिकित्सास्थानम् । तत्र वक्ष्यमाणचिकित्साविषयरोगाणामुद्देशक्रममाह—ज्वरस्येति । मद्योद्भवो मदात्ययः । नभस्वान्वातव्याधिः । आवृतानां दोषधात्वावृतवातानां बीजपोषणं वाजीकरणम् । यथागमं यथाशास्त्रम् । रोगपरीक्षोत्तरं तच्चिकित्सा विधीयते । अतस्तत्तद्रोगाणां चिकित्साकथनावसरे प्रायः प्रथमं समासतो लक्षणं वक्ष्यति । तत्र प्रायः सर्वरोगेषु ज्वरस्य व्याप्तेः प्रथमं तच्चिकत्सामेव वक्तुकाम एकैकदोषजस्य द्विदोषजानां सन्निपातजस्य च तस्य ज्वरस्य लक्षणमाह—रोमाञ्चेति । वदनेऽमधुरत्वं वैरस्यं कषायरसत्वं वा । तोददाहौ क्रमेण शीतादिज्वरे । प्रस्वेदः प्रयत्नेन स्वेदो न तु ज्वरस्वभावात् । द्विदोषजेषु त्रिदोषजे चैतान्येव लक्षणानि मिश्रितानि भवन्तीति ॥ १२ ॥

**मूलम्**--विमर्दिताभ्यां० तन्त्रज्ञैः परिकीर्तितः ॥ २५ ॥ **टीका**—अत्र त्रैलोक्यसुन्दरापरपर्यायं पर्पटीरसमाह—विमर्दिताभ्यामिति । भाण्डे मृद्भाण्डे विद्याधरयन्त्रघटके ताम्रपात्रं न्युब्जं निधाय विनिरुध्य मृदादिना संधिरोधं कृत्वा पिधानेन पिधाय चुल्ल्यां सार्धमुहूर्तं पाचयेत् । दीप्तकृशानुना दीप्ताग्निना । सिन्धूद्भवं सैन्धवम् । आर्द्रमार्द्रकं धान्याकं वा । सैन्धवादिभिः प्रहरपर्यन्तं वा प्रथमं रसनां जिह्वां तालु च विलिप्य तत एनां पर्पटीं भक्षयित्वा घर्मोत्पत्तिपर्यन्तं पटेन शरीरमवगुण्ठयेदिति । तदा ज्वरस्य भवोत्किं शङ्काऽपि न भवेदित्यर्थः । अत्र त्रैलोक्यडम्बररस उच्यते—सूतेति । सूतादित्रिवृदन्तं विषतिन्दुकजं च सर्वं समांशं गृहीत्वा स्नुहिदुग्धेन भावयित्वा त्रिवल्लमात्रः सहमनाभक्षितो नवज्वरघ्नो भवेत् । सूतो वालुकायन्त्रे मूर्छितः पारदः । अर्कस्ताम्रभस्म । गन्धो गन्धकः । चपला पिप्पली । जयपालो दन्तीबीजम् । तिक्ता कटुकी । पथ्या हरीतकी । त्रिवृन्निशोत्तर इति ख्यातः । विषतिन्दुकजं कुपीलुबीजम् । मेघनादरसमाह—पादांशेति । रसस्य चतुर्थांशेन कांस्यारवीन्समांशं गन्धकं च गृहीत्वाऽऽदौ पारदगन्धकौ कज्जलीकृत्य तत्र कांस्यादिभस्मत्रयं यथोक्तभागं दत्वा ग्रन्थान्तरोक्तवातादिदोषवारककषायपिष्टो विद्याधरयन्त्रे प्रथमरस-

वत्प्रहरपर्यन्तं पाचितो ज्वरनाशार्थं मेघनाद इति ख्यातः । आरं: रीतिभस्म । 'वातज्वरोपशमनाय पिबेद्गुडूची दुःस्पर्शनागरघनक्वथितं कषायम् । पित्तोद्भवे नलदपर्पटकाब्दशुण्ठीश्रीखण्डनिक्वथितमे[ त ]दुशन्ति वैद्याः ॥ शुण्ठीयवासकवृषाब्दकृतः कषायः श्लेष्मोद्भवे ' इति ॥ २५ ॥

**मूलम्**—पारदं रसकं तालं० शीतज्वरनिवारणः ॥ ३७ ॥ **टीका**—ज्वरगजहरिरसमाह—दरदेति । दरदादिगन्धकान्तं मिथः समभागं गृहीत्वा गन्धरसौ कज्जलीकृत्य पश्चाच्च सर्वमेकीकृत्याऽऽर्द्रकरसेनैवैकदिनं संमर्द्य गुटिकाकृत उक्तसंज्ञो भवेत् । जलदो मेघः । कृष्णाभ्रभस्मेत्यर्थः । प्रथमेत्यादि ज्वरविशेषणम् । दीपिकारसमाह—संतप्तेति । लौहे चुल्लीस्थे कटाहे क्षिप्ते नागे तप्ते सति पारदं तत्र यथाविधि मेलयेत् । मारणार्थं पञ्चमाध्यायोक्तनानाक्षारदानादिविधिना मेलयेन्मारयेदिति यावत् । ततो गन्धकं प्रक्षिप्य मर्दनेनैवैकी कुर्यात् । ततः पिप्पलीचूर्णं च दत्त्वा भूमावतार्य मर्दनेन च सर्वं समभागमेकीकृतं सर्वं जम्बीरादिरसैः पृथक्पृथक्त्रिदिनं भावयेत् । ततो यद्द्रव्यं ज्वरनाशयोग्यं तेन तेनापि भावयेत् । ततः सर्वं समं सैन्धवादि प्रत्येकं दत्त्वा जम्बीराद्युक्तरसैरेव क्रमेणैकदिनं संमर्द्य कृतोऽयं रसो विश्वज्वरनाशकः । शीतभञ्जिरसमाह—पारदमिति । लेपोत्तरं तत्पात्रं न्युब्जं पिधाय संधिलेपादि कृत्वाऽवशिष्टं भाण्डोदरं वालुकया प्रपूर्य पिधानेन पिधायोपरि प्रक्षिप्तव्रीहिस्फुटनपर्यन्तं चुल्ल्यामग्निं दद्यादिति । मृतजीवनरसमाह—कूष्माण्डेति । कूष्माण्डरसे सुधाजले तिलतैले च सुशुद्धो यो हरितालस्तं हिङ्गुलाकृष्टपारदतुल्यभागं वीरवलीपत्ररसेन संमर्द्य गोलं विधाय वालुकायन्त्रघटके खण्डितमुखे वर्तुलमृत्पात्रे निधाय न्युब्जेन ताम्रपात्रेण च तं पिधाय गुडादिभिः संधिं रुद्ध्वा मृत्पात्रोदरं वालुकया प्रपूर्य मृद्वग्निना पचेच्छालिस्फुटनपर्यन्तम् । सुरसा तुलसी । अथ रोगशान्तौ सत्यां तं रसं मृतजीवनाख्यं वदन्ति । शीतभञ्जिरसं द्वितीयमाह—सूतेति । सूतादित्रयं संमर्द्य कज्जलीकृतं पश्चाच्च मर्कटीरसेन सह मर्दयित्वा कल्कीकृतं ताम्रपात्रोदरे लिप्त्वा मृत्पात्रमध्ये न्युब्जं निधाय पूर्ववत्पचेदिति । मर्कटी कपिकच्छुः ॥ ३७ ॥

**मूलम्**—रसहिङ्गुल० दत्ते चेद्दोषदायकम् ॥ ५० ॥ **टीका**—हिङ्गुलेश्वरेत्यपरपर्यायं वृद्धज्वराङ्कुशमाह—रसहिङ्गुलेति । वृद्ध्यैकैकभागवृद्ध्या गृहीतैरित्यर्थः । महाज्वराङ्कुशमाह—शुद्धमिति । रसविषगन्धकाञ्शुद्धान्मिथः समान्गृहीत्वा तत्समुदायसमं धूर्तबीजम् । भृङ्गी भृङ्गराजः । कासहरी कासमर्दः कण्टकारी वा । तच्चतुष्टयसमं व्योषं चैकीकृत्य चूर्णीकृतोऽयं रसो दन्तमयभाण्डे धार्यः शृङ्गमये वा । द्वंद्वजे वा सर्वविधे द्वंद्वजे वा । दोषक्रमेण वातजमेकदिनेन हन्यात् । पित्तजं द्वाभ्यां दिनाभ्यां कफजं त्रिदिनेनेरित्यर्थः । मृत्युंजयमाह—तालमिति । तालभस्मादि प्रत्येकं दीनारमितम् । टङ्कणादि प्रत्येकमर्ध-

दीनारम् । वत्सनाभं द्विदीनारम् । सर्वं चित्रकस्य रसैः पिष्ट्वा वालुकायन्त्रपाचितो रसश्चिन्तामणिरसवत्सर्वविधज्वरघ्नः । सर्वज्वरान्तकरसमाह—तालमिति । तालादिभस्मानि चपलाचूर्णसहितानि पुनर्नवामूलचूर्णं च मिथः समं गृहीत्वा भृङ्गराजादिरसैः सह पृथक्संमर्द्य कृतः कल्को वालुकायन्त्रपाचितोऽयं रसः सिध्यति । गगनमभ्रकम् । दीनारो द्वात्रिंशद्गुञ्जामानम् । चन्द्रसूर्यरसमाह—तुत्थेनेति । तुत्थभस्म पारदगन्धकानां मिथः समानां कृतां कज्जलीं जम्बीरनीरेण त्रिदिनं संमर्द्य तत्तुल्यं त्रिकटु मेलयित्वा वल्लमात्रया गुटीकृतोऽयं रसस्ताम्बूलवल्ल्यास्त्रिदलेन सह वल्लमितो देयो विषमज्वरं जेतुम् । शीतज्वरेषु तक्रं पथ्यम् । अनन्तरोक्तं पथ्यं घृतौदनरूपम् । रोधंवरा समुद्रमर्यादावल्ली युग्मदला । तद्रसेनायं शूलं हन्ति । जम्बीरजलेन वा । एतद्भेषजं योजयेत्त्रिफलाजलेनापस्मृतौ । तत्राभ्यङ्गस्तु निम्बभवेन निम्बबीजस्नेहेन पयोभवेन क्षीरोद्भवघृतेन । अस्य रसस्यासह्यवेगोपद्रवशान्त्यर्थं सामान्यतः ससितं पयो देयम् । प्रायोऽसह्यवेगो विषेण भवत्यतो वयोविशेषे तद्दानसंकोचमाह—अशीतिरिति ॥ ५० ॥

**मूलम्**—मेघपारद० वीर्यं भवेच्छीतलैः ॥ ७० ॥ **टीका**—उमाप्रसादनरसमाह—मेघेति । मेघोऽभ्रकभस्म । विगन्धः शुद्ध्या गन्धरहितो गन्धकः स एव वैगन्धः । त्रिरात्रं तृतीयस्यां रात्रावागच्छति स त्रिरात्रस्तृतीयकः । अथ सर्वज्वराङ्कुशरसमाह—टङ्कणमिति । नेपालं ताम्रभस्म । तुल्यमिति । शङ्खभस्मादित्रयसमुदायं कृत्वोक्तमर्दितसमुदायस्य तुल्यं न तु पार्थक्येन सैन्धवं मरिचं च प्रत्येकं समुदायसममित्यर्थः । ऐकाहिकम् । अन्येद्युष्कं द्व्याहिकं सततकं चशब्देन संततपरिग्रहः । सर्वाङ्गसुन्दरचिन्तामणिरसमाह—अभ्रकेति । विषतित्तिडीफलभागौ गृहीत्वा तोलयित्वाऽन्यत्र स्थापयेत् । यच्च समं मिथः समभागमभ्रकभस्मादित्रयं खल्वमध्ये कृत्वा संमर्दयेत् । सर्वादिगणपठितः समशब्द एकार्थवाचकः । परिणाहो गाम्भीर्यविशिष्टो गर्तावन्धः । तत्र विस्तारे च षडङ्गुला गर्ता । तामधो ताम्बूलीदलानि दत्त्वा प्रक्षिप्य तत्पर्णवेष्टितं कल्कं च स्थापयेत् । पुटं लघुपुटम् । अमृतं पूर्वमन्यत्र स्थापितभागं विषं तिन्तिणीफलं च तत्र दापयेत् । ततः खल्वितं मर्दितं गुञ्जामात्रगुटिकीकृतं योजयेत् । ढालयेत् । कल्के द्विगुणं त्रिगुणं वा मधुरशीतजलं दत्त्वा मर्दनेन शोषयेदित्यर्थः । अत्र केचिद्विषाद्यप्यभ्रकभस्मादिभिः सहैव मर्दयन्ति । पाकोत्तरं पुनर्विषादिभागं क्षिप्त्वा कल्कीं कुर्वन्तीति । अथ लोकनाथगुटिकामाह—सूतेन्द्रमिति । सैन्धवादिभिः पारदं परिमर्द्य तद्गोलकं हिङ्ग्वादिपिण्डमध्ये धृत्वा वस्त्रपोटलिकां बद्ध्वा धानिकाकषाये दोलायां स्वेदयेत् । तथा पृथङ्निर्गुण्ड्यादिकषायैश्च मर्दयेत् । ततस्तं दंष्ट्रीप्रभृतीनां पित्तैर्मिथः समैः पृथक्पृथग्भावयेत् । सहजैः सद्य उद्धृतैः सहितमनुपानं हितं

यस्माच्छीतलद्रव्यभक्षणेनास्या वीर्यं भवेत् । महौषधं शुण्ठी । आसुरी राजिका । अम्बु पर्पटः । हुताशश्चित्रकः । मन्थोऽग्निमन्थः । उन्मत्तो धत्तूरः । कामाता काकमाची । अम्लकदलाऽम्लपर्णी । दंष्ट्री वराहः । लुलायो महिषः । शिखी मयूरः ॥ ७० ॥

**मूलम्**—वज्रवैक्रान्तयो० संनिपातहरः परम् ॥ ९२ ॥ **टीका**—सूचिकाभरणरसमाह—वज्रेति । शृङ्गीविषं शृङ्गी महोरा इति हस्तिनापुरनिकटे प्रसिद्धम् । चूलिकापटु चूलिकालवणम् । अग्निजारः साधारणरसविशेषस्तृतीयाध्याये प्रागुक्त एव । सर्वं समं जारितबद्धपारदस्य भस्म । सर्वं त्रिदिनं संमर्दयेत् । भूगतस्य भूमिस्थशय्यायां शयानस्य प्रच्छयित्वा तत्रत्यत्वचं किंचिच्छित्वा भेषजस्य रक्तसंमेलनार्थं तोयाभिन्नया तोयक्लिन्नाग्रया सूच्या गृहीतं रसं विनिक्षिपेत् । अन्यथा मूत्रपुरीषोत्सर्गादिलक्षणादर्शनेनान्यथा मृतं जानीयात् । उत्कथितमङ्गोष्मणा । पिष्ट्या कषायरसाधिष्ठितलोध्रादिचूर्णेनाभ्यङ्गमङ्गसंलग्नतैलम् । पोताश्रयः कर्पूरविशेषः । तच्चूर्णं वस्त्रखण्डपोटलिकाबद्धं मुहुर्मुहुर्धारयेत् । त्रिचतुर्गुणीकृतं वस्त्रखण्डं शीतजलार्द्रीकृतं पोताश्रयमिति केचित् । दर्दुरीमूलजं दर्दुरी मण्डूकपर्णी ब्राह्मी । रक्तदण्डा ब्राह्मीति केचित् । रसवेगेऽवतारितेऽपि पुनर्मूर्छोपेतं जीवनलक्षणैर्हस्तपादचालनशिरामन्याधमनीचलनादिरूपैर्मुक्तं परित्यक्तं केवलं श्वासादिरूपजीवनलक्षणयुतम् । पूर्ववत्ससितपयोदानादि । कल्पविभावना कृतकल्पमर्यादा । शार्ङ्गेष्टा कण्टकितवल्लीकरञ्जः । करीरः सूक्ष्मकिंचिद्दलस्तैलबीजो गुर्जरे प्रसिद्धः । तिलपर्णी तीक्ष्णगन्धा क्षुपविशेषः । स्वर्णः कृष्णबीजो धत्तूरः ॥ ९२ ॥

**मूलम्**—सूतं गन्धक० हन्यादेष महारसः ॥ १०५ ॥ **टीका**—सूचीमुखरसमाह—सूतमिति । लवं लवङ्गम् । मधुफलो मधूकवृक्षस्तत्सारमत्र ग्राह्यम् । जेपालवमधुफलान् विहायेतरेषां कज्जलीं कृत्वा जेपालाद्यपि तत्रैकीकृत्य सर्वं कृष्णसर्पस्य पित्तैर्भावयित्वा संमर्द्य संशोष्य सीसककृतकूपिकायां क्षिप्त्वा रक्षेत् । शिरसि तालुस्थाने क्षुरेण वृश्चयित्वोद्गतं रक्तलेशं दृष्ट्वा तत्र भेषजं राजिकामितं दत्त्वाऽङ्गुल्या किंचिन्मर्दयेत् । एतेन वैद्यो वक्ष्यमाणरोगाञ्जयेत् । संपुटबद्धेति तन्द्रिकादिविशेषणम् । संपुटक इव दृढसंवृतदन्तपङ्क्तिमुखः । संनिपातगजाङ्कुशमाह—रसेति । वन्ध्या वन्ध्याकर्कोटकी । सुगन्धा रास्ना । क्ष्वेडो गरलम् । तदलाभे वत्सनाभं ग्राह्यम् । धत्तूरतन्दुला निस्तुषं कृष्णधत्तूरबीजम् । शृङ्गी शृङ्गीविषम् । चातुर्थिकहररसं सांकेतिकशब्दैः समस्तत आह—ससारेति । सारशब्देन पारदगन्धकौ ग्राह्यौ । रसोपरसादिषु गन्धकस्यापि साररूपत्वात् । ताभ्यां सह वर्तत इति व्युत्पत्त्या भागांशेऽप्राधान्यत्वं प्रतिपादितम् । शिवपार्वत्यंशयोर्मध्येऽपि शिवांशस्य प्राधान्यात्तद्भागो गन्धकभागापेक्षया द्विगुण आर्थिकः सिद्धः । ससारेति विशेषणमेव वैष्णवीविनाया इति तस्याः प्राधान्यात्तद्भागः सारभागापेक्षया द्विगुणः । वैष्ण-

पीसेना हरितालः । कणा कणरूपा लेशरूपाऽल्पभागा । अचला मनःशिला । कादिकं कारवेल्लम् । तद्दलरसेन मर्दनम् । रागो रक्तवर्णं ताम्रपात्रम् । रुद्रोपमाभिः प्रतप्तवालुकाभिरुपेता यावन्मस्तकशालिनी प्रक्षिप्तशालिस्फुटनेन शोभमाना स्यात् । अहिवल्ली तावत्प्रौढा परिपक्वा कार्या । तप्तवालुकाताम्रपात्रकारवल्लीकथनेन यद्यपि वालुकायन्त्रपाचनाद्यर्थोऽभिधाशक्त्या न बुध्यते तथाऽपि शास्त्रोक्तक्रिया-कुशलेन वैद्येन व्यञ्जनशक्त्याऽवगन्तुं शक्यत इति भावः । तमेवार्थं स्फुटी करोति—त्रिभागमिति । चातुर्थिकगजाङ्कुशमाह—स्यादिति । समायुक्तः कज्जलीकृतः । हियावल्लीकन्दः कज्जल्यपेक्षया त्रिगुणितः । हियावल्ली सर्पाक्षी । सर्वं निर्गुण्डीरसेन सप्तवारं संमर्दनादयं रसः सिध्यति । मृत्युंजयरसमाह—ताप्येति ॥ १०५ ॥

**मूलम्**—शुद्धं सूतं० वैद्यनाथोऽभ्यधत्त ॥ ११७ ॥ **टीका**—पञ्चवक्त्र-रसमाह—शुद्धं सूतमिति । धूर्तो धत्तूरः । जलयोगं शीतजलपूरितकटाहे आकण्ठं मज्जितो भूत्वा तत्रैवोपविशेत् । मस्तकोपरि मुहुर्मुहुरभिप्रेचयेच्च सति शरीरदाह इति । उन्मत्तरसमाह—रसगन्धेति । संनिपाताञ्जनरसमाह—निस्त्वग्जेपालजमिति । दशनिष्कशुद्धं जेपालबीजं मरिचादित्रयं प्रत्येकं निष्कमितं चूर्णीकृतं सर्वं मर्द-नेन मिश्रयित्वा सप्ताहं जम्बीररसेन भावयेत् । प्रत्यहं स्वरसदानं सायंकालपर्यन्त-मर्दनेन तद्रसशोषणं चेति प्रयत्नशब्दार्थः । अत्र पारदो वालुकायन्त्रमूर्छितो ग्राह्यः । अथ भक्षणार्थं योगान्तरमाह—मदनफलमिति । मदनफलं राठफलं गेळ-फळ मेढफळ इति ख्यातम् । तत्फलादिटङ्कणान्तं मिथः समं चूर्णीकृतं त्रैफलो-दकेन सह मात्रया मासपर्यन्तं पानात्कुष्ठादिघ्नं भवेत् । नस्य इति । नस्यात्संनि-पातज्वरघ्नं भवेत् । अथ प्रतापलङ्केश्वरमाह—प्रत्येकं रसगन्धकयोरिति । मर्षीं कज्जलीं कृत्वा तस्यां म्लेच्छादिचतुष्टयं प्रत्येकं त्रिपलं दत्त्वा पथ्याचूर्णं त्रिकोलं त्रिकटुचूर्णं शाणषट्कमितं वचाधर्मिण्यादि मधूकसारान्तं चूर्णितं प्रत्येकं कर्षोन्मितं न्यस्य क्षिप्त्वाऽर्धकर्षं करञ्जबीजचूर्णं तथैवामृतं च क्षिप्त्वा सर्वं प्रकर्षेणोन्मर्द्याग-स्त्यादिमार्कवान्तैः कृतेन पृथक्पृथक्कषायेण सप्त सप्त भावनाः कुर्यात् । अथ पञ्च-पित्तैः पृथक्पञ्चभावना दत्त्वा पात्रलिप्ते तस्मिन्भेषजे करञ्जपत्रनिम्बपत्राणां पृथग्धूपनं दत्त्वा शुष्कं तच्चूर्णं पात्रोदरान्निष्कास्याऽऽर्द्रकरसेन कल्कीकृत्य तन्दुलमिता गुटिकाः कुर्यात् । प्रतिहतविषय इन्द्रियज्ञानरहिते । संनिपातादिष्वार्द्रकरसानुपानम् । इयं गुटिका गुल्मेऽजमोदाजलेन सह दद्यात् । वातविकारे त्रिकटुकषायेण । ग्रहण्यां जीर-केण सह । करुणानिधिर्वैद्यनाथः कश्चिद्धन्वन्तरिवैतद्भेषजमत्रोक्तपारदमानसममानं रस-कभस्मकज्जलीकरणावसरेऽत्र प्रक्षिप्तं चेत्तेन विधिना कृतं न केवलं रोगवारेण मनुष्यरक्षणाय भवेत् , किंतु द्विपतुरगनराणामपि प्राणरक्षणार्थं भवेदित्यवोचदिति । म्लेच्छं लशुनम् । लुलायलोचनो महिषाक्षगुग्गुलुः । मनो मनःशिला । धान्याम-लकी । वचा धर्मिणी वेखण्ड इति महाराष्ट्रभाषायाम् । अम्भोधरो मुस्ता । पत्रकं

तमालपत्रम् । द्विरदो गजपिप्पली । किंजल्कं काश्मीरजन्म केशर इति लोके । अमृतं निम्बः । विजया हरीतकी । सरित्पतिफलं समुद्रफलम् । ज्वालामुखी सूक्ष्मफला वन्यजम्बु । 'नागाश्वशिखिगोमत्स्यपित्तैः स्यात्पञ्चपित्तकम्' इति ॥ ११७ ॥

**मूलम्**—गन्धकाभ्रसमः० संनिपातापनुत्तये ॥ १३१ ॥ **टीका**—अथ प्राणेश्वररसमाह—गन्धकाभ्रसम इति । पाचितः प्रहरद्वयपर्यन्तं ततस्त्रिफलादिचूर्णैः प्रत्येकं पारदसमैर्युतो मिश्रयित्वा मर्दितो मात्रया गुटीकृतोऽभिन्यासादिजित् । अथ मृतसंजीवनरसमाह—रसेति । मिथः समानां पारदादीनामर्धभागेन शुद्धगन्धकं गृहीत्वा पारदकङ्कुष्ठादिभिः समाक्षीकभस्मभिः सह कज्जलीकृत्य पश्चाल्लोहभस्मादींश्चूर्णीकृतान्यथोक्तभागान्मेलयित्वा त्रिदिनमार्द्रकरसेन पिष्ट्वा खर्परयन्त्रे वालुकोष्मणा चतुर्दशदिनपर्यन्तं पचेन्मुहुर्मुहुर्जयादिरसं क्षिप्त्वेत्यर्थः । अत्र द्वितीयखर्परस्थानेऽर्धभागभेषजसंभृता काचकूप्येव वालुकोपर्युत्ताना धार्या । अयो लोहभस्म । कुम्भी कट्फलम् । मारिषं तन्दुलीयसमपत्रो रक्तदण्डः कण्टकितः क्षुपः शाकविशेषः । हस्तिशुण्डी, अर्बुदाचले प्रसिद्धा । जयाऽरणिका । अथ द्वितीयो मृतसंजीवनरसः । अयं पूर्वेण समानः प्रायशस्तुल्यक्रियाद्रव्यत्वात् । ताम्रकमुक्तो मारिषः ॥ १३१ ॥

**मूलम्**—वङ्गं नागं च सूतं च० मात्रया भिषगुत्तमः ॥ १४५ ॥ **टीका**—संनिपातकुठारमाह—वङ्गं नागमिति । सूतं मूर्छितं सूतम् । नवज्वरारिरसमाह—गन्धकमिति । गोलं कुर्वीत । जलेन विद्याधरयन्त्रघटकनवभाण्डे दृढं निरुध्य । साधारणः सर्वज्वरसाधारणोऽपि । जलमञ्जरीरसमाह—टङ्कणमिति । शर्करायुक्तं समभागशर्करायुक्तम् । कान्तरसमाह—कान्तलोहस्येति । ततः संपेष्य प्रताप्य त्रिफलाक्काथे मुहुर्मुहुः क्षेपणमुलूखले लोहपारया कुट्टनं ततो गजपुटे पाचनमित्यादिकान्तमारणप्रकारेण भस्मीकृत्येति संपेषणशब्दार्थः । ततः समभागेन पारदेन सहितं जलं दत्त्वा कल्कीकृतं त्रिदिनं मर्दयेत् । ततः पूर्वदत्तपारदतुल्यभागेन कल्कीकृतैतद्रसतुल्यभागेन वा मत्स्यपित्तेन मर्दयित्वा शोषयेत् । ततः सिद्धो रस आर्द्रकरसानुपानेन सह मात्रया योज्यस्तेन भिषजा । यो हि उत्तमो मात्राज्ञानकुशलोऽस्तीति ॥ १४५ ॥

**मूलम्**—रसगन्धौ तथा० हन्ति नवान्हठात ॥ १५६ ॥ **टीका**—चन्द्रोदयरसमाह—रसगन्धाविति । मेलयित्वेति । मेलनविधिप्रकारमाह—वङ्गेनेति । आदौ वङ्गेन भस्मीकृतेन समभागं पारदं मर्दयेत् पिष्टीं कुर्यात् । तेन मिथो मित्रयोरुभयोरपि शक्त्युत्कर्षो भवति । गन्धकेन सह पारदं कज्जलीकृत्य पश्चाद्योगश्चेद्वङ्गस्य स्यात्तदा तु मारकगन्धकसंगेन मित्रबलालाभेन च वङ्गशक्त्यपचयो भवेदिति तथा मेलनं नोपदिष्टम् । ततो दिव्यंशभूतत्वेन मिथः प्रियौ गन्धकाभ्रौ बलिष्ठपारदप्रियौ चोक्तपिष्ट्यामेकीकृत्य जम्बीरवारिणा सर्वं पेष्यम् । तेन च सर्वेषां

बलवृद्धिरिति भावः । एवं संयोजनविधौ रसचूर्णगुटिकादिषु सर्वत्र घटकद्रव्याणां बलाबलविपर्ययकरो भवति । अतोऽवहितेन वैद्येनैकैकशो द्रव्यगुणान् दृष्ट्वा मिथः समगुणद्रव्याणां वर्गीकृत्य तद्विरुद्धगुणद्रव्याणां च वर्गान्तरं कृत्वा तत्र तत्रोक्तगुणलाभार्थमनुरूपवर्गद्रव्यैः संयोजना कार्येति बोध्यम् । ततः सामान्यं साधारणं लघुपुटं सप्तधा दत्त्वा पाचितं तं रसं कुमार्यादिरसेन पृथक्सप्तधा भावयित्वा सिद्धमेनं जीरकगुडसहितं जीर्णज्वरे दद्यात्। कुमार्या रसेन कासादौ । त्रिफलाक्काथेनोन्मादं जयेत् । जीर्णज्वरारिरसमाह—नागं वङ्गमिति । भाण्डमध्ये विद्याधरयन्त्रभाण्डमध्ये तं गोलकं ताम्रपात्र्या न्युब्जया पिधाय वालुकया भाण्डं प्रपूर्य प्रक्षिप्तशालिस्फुटनपर्यन्तं दीपाकारमृद्वग्निना पाचयेत् । अथ नवज्वरमुरारिरसमाह—हरश्चेति । हरः पारदो वालुकायन्त्रमूर्च्छितो ग्राह्यः । कुनटी मनःशिला ॥

इति रसरत्नसमुच्चयटीकायां खरेइत्युपाह्वेन वामनात्मजेन चिन्तामणिना
कृतायां सरलार्थप्रकाशिन्यां चिकित्सास्थाने
द्वादशोऽध्यायः ॥ १२ ॥

---

## अथ त्रयोदशोऽध्यायः ।

मूलम्—कट्वम्लतीक्ष्ण० नाशयेन्नात्र संशयः ॥ १६ ॥ टीका—कट्वम्लेति । कट्वम्लादिभिर्दुष्टं पित्तं रक्तं दूषयित्वा यदा तिष्ठति तदाऽमुनैवांशेन पित्तेन मिश्रितं रक्तं स्वस्थानाद्यकृत्प्लि( प्लीहा )तः स्रस्तमूर्ध्वाधोमार्गवर्ति भूत्वा ताभ्यां मार्गाभ्यां बहिर्निर्याति । तत्र चिकित्सा—पलमितं लोहभस्म जारणासंस्कारेण समभागं गिलितवन्तं पारदं लोहारिवर्गम( ण ) पञ्चमाध्यायटीकायां प्रागुक्तेन कषायीकृतेन संमर्द्य माषया कृतगुलिकं भक्षयेत् । तदेतत्परं रक्तपित्तहरं रसेन्द्रगुञ्जा गुञ्जामितं पारदभस्म । रक्तपित्ताङ्कुशरसमाह—पारदमिति । मिथः समं पारदं हिङ्गुलं चैकीकृत्य जम्बीररसेन संमर्द्य पातनायन्त्रमध्येऽधो विलिप्य संशोष्योर्ध्वभाण्डोदरे पातनेन मेलयेत् संसक्तं कुर्यात् । तत आकृष्टं तं रसमेकभागं कुक्कुटाण्डरसादि च प्रत्येकमेकभागं घृते मर्दनेन संशोषणात्सिद्धमेनं रसं माषमितं जीरककषायेण पा[य]येत् । रक्तपित्तविनाशनमित्यस्याग्रे रक्तपित्ताङ्कुशो नाम रसोऽयं मृडभाषित इति पाठः । चन्द्रकलारसमाह—प्रत्येकमिति । दिनानि त्रीण्येकीकृत्य जलेन सह मर्दनेन कृतां गुटिकां वह्न्युपरि कटाहे धृत्वा तापेन शोषयेत् । ततस्तत्समं गन्धकं दत्त्वा तेन सह समस्तानां त्रयाणां कज्जलीं कृत्वा प्रत्येकमुस्तादिरसमेकैकदिनपर्यन्तं तां भावयेत् । ततस्तत्र तिक्तगुडूचीसत्त्वादि प्रत्येकं कज्जलीसमानभागं सूक्ष्मचूर्णितं दत्त्वा द्राक्षादिकषायेण सप्तवारं भावयित्वा ततः पोताश्रयं किंचित्कर्पूरं क्षिप्त्वा वट्यः कार्याः । केतकीस्तनः केतकीपुष्पमुकुलः । रामशीतलीका सुगन्धपत्रः । मृदुलमञ्जरी विशिष्टः क्षुपः । पाच इति महाराष्ट्रभाषायाम् ॥ १६ ॥

मूलम्—सपटोलकहिङ्गुलः० स्वस्थोचितो वेगवान् ॥ २९ ॥ टीका—सपटोलेति । पटोलक्वाथसहितं हिङ्गुलभस्म रक्तपित्तजित् । नवनीतेति । द्राक्षादिकषायः शर्कराप्लावितो रक्तपित्तजित् । दोषा इति । ततः कासोत्पत्त्यनन्तरं विविधवर्णकफरक्तष्ठीवनादि । ततः कालान्तरेण स एव कासः पार्श्वार्त्यादिलक्षणविशिष्टः सन्नन्यथाऽपि क्षयरूपेणापि प्रादुर्भवति । क्षतजकासलक्षणमिदम् । आबालवृद्धानामितरकासबोधस्योपदेशं विनाऽपि संभवादिति भावः । सार्केति । अर्कादिभस्मभिः पिष्टीकृतः पारदोऽगस्त्यादिरसैः पृथङ्मर्दितः कासघ्नः । तारेति । पिष्टे चूर्णीकृते रजतभस्मनि समं हरितालभस्म ततश्चतुर्गुणां भस्मीकृतां मनःशिलां च क्षिप्त्वा वासादिरसाभ्यां पृथक्प्रहरद्वयं संमर्द्य वालुकायन्त्रपाचितस्त्रिकट्वादियुतः कासघ्नः । रत्नकरण्डकरसमाह—भूनागेति । कोष्ठीप्रकरण उक्तायामन्तिमायां कोष्ठ्यां स्थितमूषोदर एतद्भेषजं पिधानेन पिधाय सूर्यास्तमारभ्यारुणोदयपर्यन्तं धमेदित्येकः पक्षः । शते वाऽस्मिन्धमेदेवमिति । घटीद्वयपर्यन्तं संततं धमनेन यदाऽङ्गारा भेषजं च श्वेतभस्मोत्पत्तिविशिष्टं भवेत्तदैकं धमनं संजायते । अस्मिन् धमने शते शतसंख्याविशिष्टे सति वा इति द्वितीयः पक्षः । ततोऽम्लवेतसैर्मर्दयित्वा संशोष्य चूर्णितेऽस्मिन्मुक्ताभस्मादि दत्त्वा मर्दयित्वा करण्डे स्थापयेदिति ॥ २९ ॥

मूलम्—शुद्धसूतस्य भागैकं० ऊर्ध्वश्वासप्रशान्तये ॥ ४४ ॥ टीका—भूताङ्कुशरसमाह—शुद्धसूतस्येति । भूताङ्कुशस्य हरितालभस्मनः । अत्र कासे वक्ष्यमाणः स्वयमग्निरसोऽपि देयः । बोलबद्धरसमाह—रसभस्मेति । बोलो हिराबोळ इति लोके प्रसिद्धः । बाह्लीकं हिङ्गु । निशा हरिद्रा । अग्निरसमाह—रसगन्धकेति । षडुत्तरगुणम् । एकैकगुणस्योत्तरोत्तरं वृद्ध्या षड् द्रव्याणि यस्मिन्नित्यर्थः । पारद एकभागः । गन्धको द्विभागः । पिप्पली त्रिभागेत्युत्तरोत्तरा गुणवृद्धिर्बोध्या । साधारणयोगानाह—भृङ्गराजेति । स्वयमग्निरसमाह—त्रिकट्विति । समः सर्वेषां समस्तुल्यभागः पूर्वरस उक्तोऽग्निरसस्तत्र देयः । अन्यान्योगानाह—इन्द्रेति ॥ ४४ ॥

मूलम्—श्लेष्मोपरुद्धगममः० नीलकण्ठाभिधानः ॥ ५८ ॥ टीका—पवनो वायुर्जलान्नवहनाडीर्दूषयन् प्रथममामाशयमारभ्योर्ध्वगमनं यस्य तथोक्तं श्वासं कुर्यात्तदा, यदा स एवोदानवायुर्मुखेन बहिर्गमनकर्ता सन् । शरीरभाजां नराणाम् । सूर्यावर्तरसमाह—सूतार्धमिति । ताम्रपत्रं कण्टकवेध्यं ताम्रपत्रं लेपयेत् । ततः स्थालीयन्त्रे निधाय पक्वं चूर्णयित्वा ताम्रपत्रीसहितमेव चूर्णयेत् । सामान्ययोगाञ्श्वासघ्नानाह—गन्धकमिति । शिलेति । शिला मनःशिला । सूतादिरसमाह—सूत इति । दिनकरस्ताम्रम् । बलिर्गन्धकः । सिन्धुः सैन्धवम् । कटाहे जम्बीररसेनाऽऽलोड्य चुल्ल्यां तप्तमेतत्समुद्रितं सुमुद्रितं पक्वं भवेत् । अमुं रसं लिहन् कासादीन् नाशयेत् । पारदमिति । समामृतवटीमाह—रसभाग इति । नीलकण्ठरसमाह—सूतं शुल्बमिति । अमृतं विषं

त्सनाभाख्यम् । त्रित्रिकम्—त्रिफलात्रिकटुचित्रकमुस्तविडङ्गम् । रेणुका रेणुकबीजम् । अब्दं मुस्ता । केसरं नागकेशरम् । काश्मीरजन्म वा । गण्डीरस्तिक्तसूरणः । अग्नि-भल्लातकः । अत्र तृतीयत्रिकमेलाजातीफललवङ्गमिति केचित् ॥ ५८ ॥

**मूलम्**—तारताम्ररसपिष्टिका० सश्वासकासापहः ॥ ९० ॥ **टीका**—श्वासकासकरिकेसरिरसमाह—तारेति । तारं रजतभस्म । तदादिकं तालभस्मान्तं मिथः समं पृथग्गृहीत्वा तत्र तारताम्रपारदानां मर्दनेन पिष्टिकां कृत्वा शिलादिद्रव्याणि तत्र मेलयित्वाऽटरूषादिरसैर्मर्दयेत् । भूधरे यन्त्रे पचेत् । ततस्तद्गन्धकेन समं तुल्यभागं कृत्वा वासारसेन भावयित्वा सिद्धोऽयं रसः श्वासादिजित् । सूर्यरसमाह—रसगन्धकेति । पारदादित्र्यूषणान्तं मिथः समभागम् । तेषां मध्य एकैकद्रव्यस्य यो भागो गृहीतस्तद्भागमितं भूतं विषमपि तथाभागं सर्वमेकीकृत्य मर्दनेन चूर्णरूपः सिद्धोऽयं रसः कासादिजित् । भूतमुत्तरपदलोपतन्त्रयुक्त्या सिद्धोऽयं शब्दो भूताङ्कुशवाचकः । भूताङ्कुशो हरितालम् । विषं वत्सनाभम् । हिक्कादिनाशकं रसमाह—रसगन्धेति । धान्याभ्रं धान्याभ्रभसितं ताप्योपलं तद्भस्म स्वर्णमाक्षिकभस्मेत्यर्थः । पारद एकभागो गन्धो द्विभाग इति क्रमेण भागवृद्धम् । सर्वसमं वचादिचूर्णं चैकीकृत्य भृङ्गराजरसेन भाव(वि)तं सिध्यति । विषमातिविषम् । सामान्योपायमाह—पक्वेति । बलिना गन्धकेन मारितताम्रे समभागेन मर्दनात्पिष्टीकृतः पारदो हि(सि)ध्मिनां हितः । शिलापूतरसमाह । पाठादिचूर्णं मृत्पात्रान्तस्तले दत्त्वा तत्पृष्ठे कुनटीं मनःशिलां प्रसार्य तत्पृष्ठे पारदं मनःशिलासमभागं दत्त्वोपरि कुनटीचूर्णं तु पारदार्धभागं दत्त्वा तदर्धं पाठादिचूर्णं दत्त्वा तत्पात्रं पिधानेन पिधाय संधिलेपं कृत्वा पचेत् । शिखी चित्रकः । पर्पटीरसमाह—रसं द्विगुणेति । सभृङ्गकं भृङ्गराजरसेन मर्दयित्वा तप्तं द्रावितं तद्गोमयोपरिस्थे कदले स्निग्धया लोहदर्व्या प्रक्षिप्य तदुपरि कदलीदले न्युब्जे गोमयं दत्त्वा करतलादिना निपीड्य पर्पटाकारं कुर्यात् । कदलीदलस्थाने स्निग्धे लोहपत्रे विनिक्षिप्ता चेल्लोहपर्पटिका भवेत् । अथवा ताम्रपत्रे स्निग्धे विनिक्षिप्ता ताम्रपर्पटिका भवेत् । रसोपरि तु कदलीदलाद्येव देयम् । सा विषसाध्यामयेषु दातुमिष्यते चेत्तस्यां वत्सनाभं पादांशेन देयम् । ततस्तं पर्पटीरसं सुरसादीनां पृथग्रसेन भावयेत् । तत आर्द्रकरसेन सप्तधा भावयेत् । ततस्तां पर्पटीं पलिकायन्त्रे धृत्वा वदराङ्गारैरीषत्स्वेदयेत् । ततस्तामष्टगुञ्जामितां ताम्बूलीरसेन सह पाययेत् । ततो दशपिप्पलीक्वाथं निर्गुण्डीपत्रक्वाथं वाऽनुपाययेत् । एतद्भक्षणप्रयोगावसरे प्रत्यहं रात्रौ पक्त्वा पेयं दुग्धमाह—त्रिकण्टकेति । यावत्क्षीरं क्षीरावशेषपर्यन्तम् । भोजने तु तत्क्षीरं सकणं पिप्पलीसहितम् । संसर्गं स्त्रीसंसर्गम् । पञ्चनिम्बकं निम्बपञ्चाङ्गम् । पित्तार्जीर्णे रसजा(?)जनितोपद्रवरूपे । मन्थानभैरवरसमाह—मृतसूतमिति । कटुकं मरिचम् । भस्मीकृतसूतादित्रिकटुकान्तं मिथः समं चूर्णयेत् । ततो देवदाल्यादीनां पृथग्रसैस्तच्चूर्णमेकैकदिनं मर्दयेत् । कफनाशार्थं सामान्योपाय-

माह--कर्षैकमिति । विश्वादिवटिकामाह—विश्वादीति । विश्वादित्रिकं त्रिकटु । निर्गतद्रवं वंशरोचना । कीरप्रियं दाडिमफलं तत्तुल्यं दलं तत्फलत्वक् । नीलग्रीवगलालयं विषं वत्सनाभम् । सुरपतेः शिवस्य तृतीयनेत्राभिधमग्निश्चित्रक इत्यर्थः । विद्वत्पुञ्जवती वचा । विद्वत्पूज्यवतीतिपाठेऽपि स एवार्थः । अथवा ब्राह्मी । कृमिप्रतिभटं विडङ्गम् ॥

इति रसरत्नसमुच्चयटीकायां वामनात्मजचिन्तामणिना विरचितायां
सरलार्थप्रकाशिन्यां चिकित्सास्थाने त्रयो
दशोऽध्यायः ॥ १३ ॥

---

## अथ चतुर्दशोऽध्यायः ।

**मूलम्**—अग्निमान्द्यं ज्वरः शैत्यं० रोगराजप्रशान्तये ॥ १८ ॥ **टीका**—**अग्निमान्द्यमिति** । क्षतजक्षयराजयक्ष्मणोः क्षयशब्देन बोध्यत्वादुभयसाधारणमेतल्लक्षणं समासत उक्तम् । सत्त्वहानिर्मनोदौर्बल्यम् । केवलं दौर्बल्यं शारीरशक्तिह्रासः । अथ कनकसुन्दरं रसं वक्तुं प्रथमतरतद्घटकद्रव्याणां शुद्धिविशेषमाह—रसस्येति । पारदभस्मनि समभागं हेमभस्म योजयेत् । जयन्ती अरणिका । पूर्ववत्पचेत् । श्वासकासकरिकेसरिरसवद्गोलकं वस्त्रेण विवेष्ट्य मृतरनया परिलिप्य लघुमूषासंपुटितं कृत्वा भूगर्तायां मृत्तिकाप्रच्छन्नायां भृत्वा यामयुग्मं भूधरयन्त्रे पचेदित्यर्थः । आदृत आदरयुतोऽवहितो वैद्य इत्यर्थः । कादिवर्ज्यं ककारादिगणवर्ज्यम् । राजमृगाङ्करसमाह—रसभस्मेति । शुद्धशिलादिप्रत्येकं भागद्वयम् । रसभस्मादिना वराटान् प्रपूर्य मुखं वराटानां मुखं मृद्भाण्डे मृद्भाण्डमूषायां निरोधयेत् । पिधानेनापिधाय संधिलेपं कुर्यादित्यर्थः । शुष्कं तल्लेपादि कृत्वा ॥ १८ ॥

**मूलम्**—शङ्खस्य वलयान्निष्कं० लोकनाथं च संस्मरन् ॥ ४९ ॥ **टीका**—शङ्खेश्वररसमाह—शङ्खस्येति । मृततुल्यं मृतरसतुल्यं सर्वमेकत्र जले संमर्द्य गोलकं विधाय वस्त्रेणाऽऽवेष्ट्य मृदा बहिर्विलिप्य मृद्भाण्डे मृद्भाण्डमूषायां निरुध्य गजपुटे पचेदिति । मृगाङ्कपोटलीरसमाह—शङ्खनाभिमिति । तद्बद्ध्वा गोलकं कृत्वेत्यर्थः । सामान्योपायानाह—मातुलुङ्गस्येति । सुगन्धा रास्ना । द्वितीयं मृगाङ्कपोटलीरसमाह—द्विनिष्कमिति । उक्तः स्वयमग्निरसोऽप्यत्र प्रशस्तः । पञ्चामृतरसमाह—भस्मसूतेति । सूतस्थाने सूतभस्मालाभ इत्यर्थः । एकीकृत्य मर्दितं तत्सर्वं द्विगुञ्जामितं भक्षयेत् । पूर्ववदनुपानं दशपिप्पलिकाक्षौद्रैर्मरिचैकोनविंशतिः । सघृतैरिति । अजगन्धा वन्यतुलसी । जयन्ती अरणिका । लोकनाथरसमाह--तुल्यमिति । ताभ्यां समुदायद्वयेनेत्यर्थः । क्रमाद्गुञ्जाद्वयक्रमवृद्ध्या यावन्निष्कमितं भवेत् । तत ऊर्ध्वं प्रत्यहं निष्कमितमेव सेव्यम् । अथ लोकेश्वररसमाह--रसस्य

भस्मनेति । चराचरास्ये मराटास्ये मृगाङ्कवन्मृगाङ्कसंनिहितोक्तकनकसुन्दररसवत्पथ्यं कादिवर्ज्यं स्निग्धं बल्यं च देयमित्यर्थः । एतस्य भक्षणप्रयोगावसर उत्पत्स्यमानोपद्रवचिकित्सामाह--वमन इति । वातघ्न एरण्डः । जया भङ्गा ॥ ४९ ॥

**मूलम्**—शङ्खस्य वलयं० क्षयपर्वतनाशनः ॥ ७० ॥ **टीका**—वैद्यनाथरसमाह—शङ्खस्येति । नीलकण्ठकमिन्द्रनीलं तुत्थतुल्यभागमर्धनिष्कांशं च पारदं गृहीत्वा सर्वमेतद्वराटप्रमुखं चूर्णं चूर्णीकृतं जलेन गोलकीकृत्य वस्त्रेणाऽऽवेष्ट्य मृत्तिकास्थान आर्द्रमण्डूरकल्कं गृहीत्वा तेन गोलकस्याऽऽलेपने सति पूर्ववद्भाण्डमूषायां धृत्वा निरुध्यारत्निमात्रगर्तायां पाचयेत् । नाडीमार्गे निर्गते कण्ठनाडीमार्गे कोष्ठपर्यन्तं विसृते तत्र भेषजे निर्गतेऽधोऽवतीर्णे सति एतद्भेषजं प्रहरे प्रहरे सेव्यमामण्डलसमाप्तिपर्यतं द्विचत्वारिंशद्दिनपर्यन्तमित्यर्थः । लोकनाथरसमाह—अर्धार्धनिष्काविति । रसादीनां यथोक्तभागान् नूतनस्थूलवराटमध्ये धृत्वा वराटेनैव न्युब्जेनाऽऽच्छाद्याऽऽजपयोमिश्रखटिकादिचूर्णेन संधिलेपं कृत्वा । एवं द्वित्रसंपुटसंभृतसर्वभागान्कृत्वा, कुलालभाण्डमूषामध्ये तान् धृत्वा पिधानेन निरुध्य गजपुटे पचेत् । ततस्तानेव भागान् समुदितानर्कपत्ररसेन भावयित्वा गोलकीकृत्य पूर्ववन्मूषामध्ये निरुध्य करीषार्धभारेण गजपुटे पचेत् । पूर्ववत्पथ्यं लोकनाथरसवत् । साज्यं सदधि भोजनमश्नीयात् । प्राणनाथरसमाह—अयोरज इति । विंशतिनिष्कमितं लोहभस्म तत्समभागं माक्षीकभस्म चैकीकृत्य भृङ्गराजादिरसैः पृथग्भावयित्वा शरावसंपुटितं कृत्वा गजपुटे पचेत् । ततस्तत्रैकैकनिष्कौ पारदतुत्थौ द्विनिष्कं गन्धकं च दद्यात् । ततश्चतुरो वराटान् पुटाग्नौ लघुपुटे पक्त्वा तद्वराटभस्म तत्समं लोहभस्म च प्रागुक्तद्रव्याणि चैकीकृत्य भृङ्गराजादिरसेन पुनर्भावयित्वा गोलकीकृत्य शरावसंपुटितं कृत्वा गजपुटे पचेत् । ततश्चूर्णीकृतेऽस्मिन् रसे सप्तसंख्याकं मरीचं दशदशनिष्कौ तुत्थभस्मटङ्कणौ मिश्रयित्वा मर्दितः सिद्धो रसो भवति । अस्य सिद्धरसस्यार्धचतुर्थांश एव प्रत्यहं द्विगुञ्जादिमात्रया क्रमेण भक्ष्यः । यदाऽर्धचतुर्थांशो भक्षणार्थं व्ययीकृतो भवेत्तावतैव राजयक्ष्मा सोपद्रवः शाम्यति । वज्ररसमाह--कर्षमिति । कोष्ठीयन्त्रे धृतायां प्रकाशमूषायां धृतं सुवर्णं धमिताङ्गारतापेन यदा द्रुतं स्यात्तत्क्षण एवाल्पाल्पं खर्परसत्त्वं दत्त्वा निर्वाहयेत् । ध्मानेनैकी कुर्यादित्यर्थः । एवं क्रमेण तत्सत्त्वं हेम्नि निर्व्यूढं कुर्यात् । तथैव छिन्नपक्षमल्पाग्निसहं पारदमुक्तमूषायां स्थिरीकृते विद्रुते गन्धके पारदं त्रुटिशो दत्त्वा धमन्या मृदुध्मानेन निर्व्यूढं कुर्यात् । एवं निर्व्यूढं गन्धकं चैकीकृत्य मर्दनेन पिष्टीं कुर्यात् । ततस्तत्र हेमसमभागं प्रवालचूर्णं मौक्तिकचूर्णं च दत्त्वा यथोक्तभागं लोहादिभस्म दत्त्वा सर्वमेतच्चाङ्गेरीरसेन संमर्द्य शोषितं चूर्णीकृत्य तत्र नीलकण्टकादिभ्यो भस्मीकृतेभ्यः पृथग्द्विनिष्कं दत्त्वाऽङ्कोलादिभ्यः पृथक् चतुरो निष्कान् टङ्कणक्षारमष्टनिष्कं विंशतिसंख्याकवराटानां भस्म च दत्त्वा तत्सर्वं जम्बीररसेन पेषयेत्संशोष्य च तच्छरावसंपुटे संस्थाप्य

लेपेन संधिरोधं कृत्वा तद्बहिः शरावद्वितीयसंपुटं संधिरोधं च कृत्वा तद्बहिस्तथैव तृतीयं चतुर्थमिति क्रमेणाष्टशरावसंपुटितं कृत्वा खारीमिततुषे भारमिते करीषसमूहे च पृथक्पचेत् । अथ तन्माषद्वयमितमेतावद्भागमेव गन्धकं स्वरसभावितमरिचचूर्णा-त्पादं माषमितं च ताम्बूलीपत्रे लिप्त्वा संचूर्ण्य मधुनाऽऽलोड्य लिह्यादामण्ड-लाद्द्विचत्वारिंशद्दिनपर्यन्तम् । त्याज्यान्येकादशाध्यायोक्तानि त्यजेत् । नीलकटकमि-न्द्रनीलमणिभस्म । कान्तं कान्तलोहम् ॥ ७० ॥

**मूलम्**—द्वौ निष्कौ तुत्थभागस्य० हन्ति सर्वान्मदात्ययान् ॥ १०० ॥

**टीका**—महावीररसमाह—द्वौ निष्काविति । गन्धमौक्तिकाद्गन्धकान्मौक्तिकाच्च पृथ-क्कर्षांशम् । एतत्सर्वमग्निपर्ण्यादिरसैः संमर्द्य लाङ्गलीकन्दोदरमध्ये धृत्वा तत्कन्दं शरावसंपुटे कृत्वा गजपुटे पचेत् । अस्याः पोटल्या गोलकीकृतपक्वभेषजस्य चतु-र्थांशार्धेन विषं वत्सनाभं कपर्दिकाद्वयभस्म पोटलीसमं मरीचचूर्णं चैकीकृत्याग्नि-पर्ण्याद्यन्यतमरसेन पिष्ट्वा गुञ्जामितगुटिकाकृतोऽयं मधुना लेह्यः । विरुद्धोपक्रमत्वतः क्षीरमांसरसाः क्षयहराः, परंतु कफवृद्धिकराः कफपूयवृद्ध्या क्षयवृद्धिरिति विरुद्ध-क्रियोदयात्तान्न सेवेतेति भावः । अग्निपर्णी आग्या इति गुर्जरे ख्यातस्तृणविशेषः । यद्भक्षणाद्गोमहिष्यादयो म्रियन्त इति । हरिलता इन्द्रवारुणी । अथ भैरवनाथोक्त-पञ्चामृतपर्पटीमाह—सुवर्णमिति । एकशाणं सुवर्णं द्विशाणं रजतं त्रिशाणं ताम्रमिति क्रमवृद्धं सुशुद्धस्वर्णादि गृहीत्वा पृथक्शाणमितौ सुशुद्धौ च गृहीत्वा मूषामध्ये धृत्वा खदिराङ्गारैर्ध्मानेन च द्रुतं कृत्वा स्वाङ्गशीतं गोलकीभूतं तं कानसाख्य-तीक्ष्णलोहमयशस्त्रेण रेतयित्वा घर्षणेन कणशः कुर्यात् । ततो गन्धकादि पृथक्प-लामितं तत्र प्रक्षिप्य सूत्रस्थानोक्ताम्लवर्गेण मर्दयेत् । पुनस्ताप्याद्यष्टमांशेन प्रति-पुटं दत्त्वा विंशतिवारं गजपुटे पचेत् । ततो हेमादिपूर्वोक्तलोहानां यावान्भावो द्रुती-कृतस्ततो द्विगुणं सूतं ततो द्विगुणं गन्धकं चेति द्वयं कज्जलीकृतं लोहकटाहे प्रक्षिपेत् । तापेन तस्यां द्रुतायां पूर्वभस्मीकृतशुद्धपूतिलोहानां तद्भस्म तत्र क्षिप्त्वा विलोडयेत् । द्वयोरपि पूतिलोहत्वेन समानधर्मेण परिगणनादेकत्वाभ्युपगमः । तुल्या-लकेति । तुल्यं मिथस्तुल्यम् । विषभावितं विषोदकेन भावितम् । वटिकातुल्यं चिपिटीकृतं पर्पटीतुल्यभागं पूर्ववद्धेमादिभस्मवत्क्षिपेत् । अथवा पर्पटीभागोऽपि किंचिन्न्यूनं तदपि न सकृत्किंतु मुहुर्मुहुस्तालादिजरणोत्तरं वस्त्रगालितं तत्पूतीकर-ञ्जादिक्वाथेन कटाहे संस्वेद्य दोलायन्त्रेण वा सप्तधा संस्वेद्य शोषयेत् । ततो विषातिन्दुफलादिरसैर्भावयित्वा पलिकायन्त्रे किंचित्स्वेदयेत् । तृष्णादौ योगानाह—युक्तमिति । गन्धकपिष्टी रसबन्धोक्ता नवनीतपिष्टी । तया सह मर्दितं लोहादि गोलकीकृत्य शरावसंपुटितं कृत्वा भूधरयन्त्रे पुटेत् । राजावर्तभस्म ताम्रभस्म मधुकं च सर्वं घृतभर्जितं मध्वादिना सह मदात्ययान् हन्ति । सूतगर्भे नियोजितं जारितं पिष्टीभूतं मधु यष्टीरसेन सह मर्दितं कल्कीकृतं घृते पक्वं मदात्ययादिघ्नम् । गन्धमाक्षिकं स्वर्णमाक्षिकम् ॥ १०० ॥

इति रसरत्नसमुच्चयटीकायां सरैइत्युपाह्वेन वामनात्मजेन चिन्तामणिना विरचितायां सरलार्थप्रकाशिन्यां चिकित्सास्थाने चतुर्दशोऽध्यायः ॥ १४ ॥

---

## अथ पञ्चदशोऽध्यायः ।

**मूलम्**—गुदस्य बाहिरन्तर्वा० दीपनं तत्क्षणेन ॥ २१ ॥ **टीका**—संप्रत्यर्शोरोगस्य स्वरूपं तत्तद्दोषजं लक्षणं च समासत आह—गुदस्येति । रुधिरेति । उदावर्तं मलावरोधपूर्वकमपानस्योर्ध्वं प्रतिलोमगमनम् । अर्शःकुठारमाह—शुद्धसूतमिति । तक्रेण वातार्शःसु । दाडिमाम्भोभिः पित्तार्शःसु । कफार्शःसु पक्वपलाण्डुना सह खादेत् । पृथग्दोषजार्शःसु क्रमेण योगानाह—वचेति । मृतसूतेति । मृतं लोहमिति । अर्शसां कफजार्शसां जयेत् । आनन्दभैरवं षोडशाध्याये वक्ष्यमाणम् । तं च मृतताम्रेण सह दद्यात् । सर्वलोकाश्रयरसमाह—शुद्धं सूतमिति । ताप्यकं माक्षीकभस्म । अमृतं विषम् । अर्कपत्रेण ताम्रपत्रेण । तां काचकलशीम् । दीपनं कुर्यादिति शेषः ॥ २१ ॥

**मूलम्**—अर्शोघ्नं सूरणं वक्ष्ये० दुष्टग्रहण्यामयम् ॥ ४९ ॥ **टीका**—सूरणवटकमाह—अर्शोघ्नमिति । रक्तपुष्पी जपा । पञ्चरुद्रः । लोणत्रयं सैन्धवादिकं लवणत्रयम् । अथ गन्धकादिवटीमाह—गन्धकमिति । पञ्चमांशतः पिष्टिकायाः पञ्चमांशेन । सूतकस्य वालुकायन्त्रमूर्छितस्य सूतकस्य । अथ मूलकुठारमाह—वरनागमिति । विद्राव्य मूषायां तापेन द्रुतं कृत्वा तत्रालं हरितालं मुहुर्मुहुरल्पाल्पं दद्यात् । तेन प्रकारेण तद्धरितालं तावच्चारयेद् यावद्वरनागादिसमुदायापेक्षया त्रिगुणं जीर्णं स्यात् । ततः पक्केन तेन नागादिचूर्णेन सह समभागं पारदं दत्त्वा मर्दनेन पिष्टीं कुर्यात् । मूलस्थाने मूलमध्ये कृतगर्तायामित्यर्थः । खनेत्पूरयित्वा मूलचूर्णेनैव गर्तामुखमाच्छाद्य खटिकामृदादिभिर्बहिर्लिम्पेत् । स्निग्धे घृताक्ते । अतियत्नतः । यथा तैलं ज्वालाग्राहि न स्यात्तथाऽतिमन्दाग्निनेत्यर्थः । पुटित्वा गन्धकगोलकमध्ये पिष्टिकां गूढां कृत्वा भूधरयन्त्रे पुटनात्सा भस्मरूपा भवेत् । महाराष्ट्री तीक्ष्णगन्धगुच्छपर्वविशिष्टदण्डा सकर्दमपल्वलस्थान उत्पद्यते क्षुपरूपा । इभकर्णी गजकर्णीति कोंकणे प्रसिद्धा । वज्रवल्ली त्रिचतुर्धाराविशिष्टा संकुचितप्रभूतपर्वा वल्ली वृक्षोपर्येवोत्पद्य तिष्ठति । इयं वल्ली हडजोडीति नाम्ना लोके प्रसिद्धा । शिखी चित्रकः । दीप्यो यवानी । अग्निश्चित्रकः । वेल्लं विडङ्गम् । उत्तमा त्रिफला । महोदयप्रत्ययसारमाह—रसग्रस्तेति । जारणायन्त्रे भूधरयन्त्रे वा पारदेन ग्रस्तश्चीर्णः पश्चादूर्ध्वपातनायन्त्रेऽधःस्थितेन पारदेन तापयोगेनोर्ध्वगमनावसरे स एवोद्गीर्यते । तादृशगन्धकस्य पलत्रयम् । चूर्णोदकं सुधोदकम् । क्रौञ्च्यां वज्रमूषायाम् । गजपुटं भूधरयन्त्रे मूषासंपुटं भृत्वोपरि गजपुटं दद्यात् । द्रवैर्भावयित्वेति शेषः ॥ ४९ ॥

**मूलम्**—स्याद्रसं धौतमाक्षीकं० ज्वलति दहनतश्चूर्णमर्शः कुठारः ॥ ६५ ॥ **टीका**—कनकसुन्दररसमाह—स्याद्रसमिति । धौतमाक्षीकं स्वर्णमाक्षीकम् । रसादिसर्वं मिथः समं पृथ्वीभिट्टेन राजावर्तेन तुल्यभागं ग्राह्यम् । पुटेन्मन्दाग्निना यामद्वयपर्यन्तं पचेत् । यथायुक्त्यनुपानतो यस्मिन्रोगे यद्द्रव्यमनुपानार्हं तत्र तद्द्रव्यानुपानेनेत्यर्थः । नागबोधिना केनचितासिद्धेन । अथ नागादिगुटिकामाह—नागमिति । नागादित्रयं प्रत्येकमेकपलम् । ततस्त्रिलवणं पञ्चपलप्रमाणमिति क्रमाद्गृहीत्वा दिनसत्रयं मर्दयेत् । तदनु जलेन गोलकीकृतं शरावसंपुटितं गजपुटे पचेत् । ततस्तत्त्रिफलादिपञ्चद्रव्यरसैरेतत्क्रमेण हरीतकीरसेन पञ्च भावनाः । तत आमलकीरसेन पञ्च । ततो विभीतकरसेन पञ्च, इत्युद्देशक्रमेण प्रतिद्रव्यरसं पञ्च भावना इति भावनाः पञ्चाधिका विंशतिर्भवन्ति । अर्केशः सूर्यः । तत्ताप इत्यर्थः । इति तु सर्वमते वर्ज्यम् । वासुदेवमुनिस्त्वधिकमप्यवदत् । किं तत् । कूष्माण्डीति । तीक्ष्णमुखरसमाह—रसेन्द्रेति । कडारं मुण्डलोहविशेषः । गोलं बोलरसः । सुरायसं कान्तम् । पक्वः पुटे गजपुटे पक्वः । तीक्ष्णमुखोऽर्शसां तीक्ष्णमुखशस्त्रवच्छेत्ता । अर्शःकुठारमाह—श्रेष्ठेति । श्रेष्ठा त्रिफला । अग्नियुग्मं चित्रको भल्लातकश्च । हलिना लाङ्गली । कुम्भस्त्रिवृत् । सर्वमेतद्गोमू[ त्र ]स्नुहीदुग्धाभ्यां कटाहे पृथग्विपाच्य ततस्तत्र रसादीनां यथोक्तभागान् दत्त्वा पुनः स्थाल्यामुक्तद्रव्याभ्यां विपचेद्घनीभावपर्यन्तम् । तदेतच्छुष्कं चूर्णमर्शःकुठाराख्यम् । आदहनतो दाहेनैवार्शांसि ज्वलति भस्मी करोतीत्यर्थः । रजो धूलिलवणम् ॥ ६५ ॥

**मूलम्**—वज्रकृष्णाभ्रकं सत्त्वं० लेपनं हितमर्शसाम् ॥ ८७ ॥ **टीका**—त्रैलोक्यतिलकरसमाह—वज्रकृष्णेति । कोष्ठीमध्ये मूषां धृत्वा तत्र सत्त्वं निधाय ध्मानावसरेऽन्तराऽन्तरा काचचूर्णं टङ्कणं च क्षिपेत् । एवंरीत्या शोधितं निर्मलीकृतं खोटरूपं संजातं कानसाख्यशस्त्रेण रेतयित्वा कणशः कृत्वा भर्जयेत्कटाहे लौहे गोघृतेन । सस्यकं मयूरतुत्थम् । अष्टांशेन सत्त्वे दत्त्वा गजपुटे त्रिवारं पचेत् । ततो राजावर्तभस्म तत्र दत्त्वा मातुलुङ्गरसेन प्रतिपुटं भावयित्वा त्रिवारं गजपुटे पचेत् । ततो वर्षाभ्वादिरसेन चतुर्वारं पूर्ववत्पुटेत् । वर्षाभूः पुनर्नवा । ततो गुग्गुल्वादिभिर्भावयित्वा पुटेत् । मिथस्तुल्यांशरसगन्धककज्जलीं तत्र प्रतिपुटं दत्त्वा संमर्द्य पञ्चाशद्वारान् पुटेत । ततस्तत्राभ्रकसत्त्ववच्छोधितं कणशः कृतं कान्तसत्त्वं घृतमर्दितं प्रतिपुटमष्टमांशेन दरदं दत्त्वा लकुचरसेन संमर्द्य दशवारं पुटेत् । ततः शुद्धतारं प्रतिपुटमष्टमांशेन मनोह्वां दत्त्वा लकुचरसेन संमर्द्य दशवारं गजपुटे पचेत् । ततो गन्धकमष्टमांशेनैव तत्र प्रतिपुटं दत्त्वा मत्स्याक्षीरसेन संमर्द्य विंशतिवारं पुटेत् । ततो गोघृतपक्वं माक्षीकभस्माष्टमांशं प्रतिपुटं दत्त्वा घृतेनैव संमर्द्य दशवारं तारं पुटेत् । एवं पक्वं तारं तथा कान्तसत्त्वं चेत्युभयं प्रत्येकमुक्ताभ्रकसत्त्वसमभागमेकीकृत्य निर्गुण्डीरसेन संमर्द्य सकृद्गजपुटे पचेत् । ततः

समभागकज्जलीं प्रतिपुटं दत्त्वा संमर्द्य दशवारं पुटेत् । पर्पटीं त्रयोदशाध्यायोक्तां पर्पटीं तत्र क्षिपेत् । भूकदम्बो मुण्डी । गङ्गाकिनीकन्दो गृञ्जनक इति भाति । लोहलत्वमस्फुटवाक्त्वम् । कुसुम्भेति । सामान्योपायानाह—देवदाल्या इति । मूलरोगोऽर्शः । अर्शःकुठारावलेहमाह—काञ्चनीति । शौचं गुदक्षालनम् । 'कान्तं शुद्धं पुरा कृत्वा छागरक्तेन भावयेत् । पिण्डीं बद्ध्वा प्रयत्नेन कोष्ठे सत्त्वनिपातनम । ऊर्णाटङ्कणगुडपुरलाक्षासर्जरसैः सर्वधातुभिः पिष्टैः । छागीक्षीरेण कृता पिण्डी शस्ता हि सत्त्वविधौ' इति ॥

इति रसरत्नसमुच्चयटीकायां वामनात्मजेन खरेइत्युपाह्वेन चिन्तामणिना विरचितायां सरलार्थप्रकाशिन्यां पञ्चदशोऽध्यायः ॥ १५ ॥

---

## अथ षोडशोऽध्यायः ।

**मूलम्**—रूक्षैः कोद्रवजीर्ण० स्वेदनीयन्त्रमुच्यते ॥ २५ ॥ **टीका**—अर्शसामुपद्रव उदावर्तः । अतस्तदुत्तरमुदावर्तस्य कारणं संप्राप्तिं चाऽऽह—रूक्षैरिति । जूर्णः 'जोंधळा' इति ख्यातः । अधो वहन्नपानाख्यः । वर्त्म गुदमार्गम् । स वायुर्विण्मूत्रसङ्गादिज्वरान्तं कृत्वोर्ध्वं गच्छन्नुदावर्तं सशब्दं महान्तमुद्गारं कुर्यात् । तत्र घृतमाह—कङ्कुष्ठमिति । स्नुक्क्षीरमात्रया युक्तं कृत्वा । अतीसारकारणं संप्राप्तिं चाऽऽह—अत्यब्विति । विरूढमङ्कुरितं धान्यम् । तोयधातूनरसरक्तादीन् । सुश्लक्ष्णेति । घृष्ट्वा रसपङ्कं कृत्वा । दुर्दररसमाह—पिष्ट इति । तीक्ष्णं तीक्ष्णलोहभस्म । तेन समभागेनैकीकृतः पारदः काञ्चनाररसेन संमर्द्य गोलकं कृत्वा कोमलवटपत्रेण वेष्टयित्वाऽङ्गुलस्थूलं मृदाऽऽर्द्रया लिप्त्वा छाणैः पचेदग्निवर्णगोलकपर्यन्तम् । आनन्दभैरवरसमाह—हिङ्गुलमिति । सामान्योपायमाह—कुटजस्येति । विजया भङ्गा । सुधासाराख्यं रसमाह—पृथगिति । कज्जलीं लोहपात्रे धृत्वाऽग्नितापेन प्रद्राव्याभ्रकचूर्णं तत्र दत्त्वा कुटजपत्रे क्षिप्त्वा पर्पटीं कुर्यात् । ततः संचूर्ण्य बालतिन्दुफलादीनां रसैः पृथग्भावयेत् । तिन्दुः 'टेंभुरणी' इति ख्यातो वृक्षः । क्षीरिका राजादनः । अरलुश्शुण्टुकः । दुग्धिनी दुग्धिका । पुटपक्वं यद्दाडिमं तद्रसः । कृष्णा पिप्पली । काम्बोजिका माषपर्णी । तद्रसैर्भाविते चूर्णे कुटजवल्कलचूर्णं यत्नेन तुल्यं विश्वगान्धारीचूर्णं द्विपलं क्षिपेत् । वत्सकः कुटजः । विश्वा शुण्ठी । गान्धारी यासः । दीप्यो यवानी । अग्निश्चित्रकः । मोचसारो मोचरसः । भक्षणेनायं रसः पुरुषशरीरेऽमृतरसपानेनेव दीप्तिकरो भवति । प्रतिबध्नाति । किमिव तदाह—मान्येति । मान्यः पूज्यः । तन्मानातिक्रमोऽपमान इत्यर्थः । पुण्यफलोदयं प्रतिबध्नाति । उक्तरसेऽनुपानविशेषमाह—पिष्टेति । अब्दो मुस्ता । चक्रिकां वटीं कृत्वा । धान्यकतुल्यमानम् । गुर्वीफलं पूगीफलम् । त्रिवारदामेनाऽऽमरसे पक्के सति, अयं सद्योऽतीसारादीन् हन्ति ॥ २५ ॥

**मूलम्**—द्वौ भागौ गन्धकस्याष्टौ० भ्रंशं तथा बिम्बिशीम् ॥ ४१ ॥ **टीका**—द्वौ भागाविति । क्षारं यवक्षारम् । अनेन रसेन सहैकीकृत्य । भाण्डे पक्व-मृषायामेतद्रुद्ध्वा । पुटं गजपुटम् । एषो लोकेश्वररसः । लोकनाथरसमाह—मृतेति । भाण्डे पक्वमूषायां रुद्ध्वा गजपुटे पचेत् । षण्णिष्कतैलमाह—षण्णिष्कमिति । पूर्ववल्लोकेश्वररसवत् । नागसुन्दररसमाह—नागभस्मेति । व्योमाभ्रकभस्म । भृष्टय-क्षाक्षं भृष्टं किंचित्प्रतप्तं कुबेराक्षबीजम् । सिन्धूत्थं सैन्धवम् । विजया भङ्गा । दीप्यं यवानी । महानिम्बो वर्तुलफलोऽतितिक्तो बकाणानिम्बेति ख्यातः । काम्बोजी माष-पर्णी । नागबला पीतपुष्पा मुद्रेति ख्याता । बिम्बिशीं संततसशूलजलसदृगामा-तिसरणीम् ॥ ४१ ॥

**मूलम्**—मलं संगृह्य संगृह्य० सद्यः प्रत्ययकारकः ॥ ६४ ॥ **टीका**—अथ ग्रहणीलक्षणं समासत आह—मलमिति । वज्रकपाटरसमाह—मृतेति । जया हरीतकी । जयन्ती अरणिका । विजया भङ्गा । सामान्योपायानाह—वह्नीति । दुग्धा-मिति । शुद्धसूतं मूर्छितं सूतम् । कनकसुन्दररसमाह—हिङ्गुलमिति । कनको धत्तूरः । रसादिगुटीमाह—रसाभ्रेति । जयारसेनारणिकारसेन । रसादित्रयमुक्तरसेन संमर्द्य गुटिकाः कुर्यात् । तत्सेवनावसरे प्राकृते ग्रहण्युपद्रवे वा विविधां चिकित्सामाह—सौवर्चलमिति । कणा पिप्पली । कपित्थसारं कपित्थरसः । मधुखण्डयुक्तं सौव-र्चलादिचूर्णं ददीत । कृशानुश्चित्रकः । वातादिप्रधाने तं कषायमुष्णं दद्यात् । कृशान्वादियुतं वा कटुत्रयेण युतमपि तं कषायं शीतं कृत्वा दद्यात् । चाङ्गेर्यादि इन्द्वन्तं तेषां शाकं चाङ्गेर्यादि दध्ना पक्वं दद्यात् । इन्दुः प्रसारणी । गद्याणमष्टाचत्वारिंशद्गुञ्जामानम् । चण्डसंग्रहगदैककपाटमाह—हिङ्गुलोत्थितेति । यन्त्रेण हिङ्गुलाकृष्टपारदस्य समभागं गन्धकादि प्रत्येकं गृहीत्वा कोकिलाक्षबीजमपि पारदसमं गृहीत्वा सर्वमेतद्धूमहीन( ज्वलितप्राय )साङ्गाराग्न्युपरि स्थिते तप्तायसखल्वे प्रक्षिप्य तत्रैकदैव घृतेन तन्मग्नं कृत्वा द्रवशोषणपर्यन्तं मर्दयेदित्यर्थः । एष मर्दनविधिः । ततो वल्लमात्रगुटीकृतो रसो जीरकोदकेन देयः । अतिसृतिरतीसारः । लघुसिद्धाभ्रक-रसमाह—समांशमिति । प्रगे प्रभाते ॥ ६४ ॥

**मूलम्**—रसं पलमितं तुल्यं० चलमलशङ्कासु हिक्कासु ॥ ९४ ॥ **टीका**—सर्वारोग्यवटीमाह—रसमिति । द्रावयित्वा क्षितौ निक्षिपेत् । क्षितितले पात्रान्तरे सतैले युक्त्या निक्षिपेत् । द्रावणं तु चुल्ल्यधिश्रिते केवले तप्तेऽयःपात्र एव । ततो विद्रुते पात्रान्तरस्थे गन्धके तद्विनिक्षिप्य दर्व्यादिनाऽऽलोडयेत् । पुनस्तत्सर्वं विलोडितमायसपात्रे क्षिप्त्वा प्रद्राव्य तत्र तत्तुल्यं चूर्णितं हरितालं निक्षिपेज्जा-रयेच्च । ततः सर्वतुल्यां मनःशिलां क्षिप्त्वा जारयेच्च । ततः सर्वतुल्यं नाग-भस्म क्षिप्त्वा तावदेव ताप्यभस्म । अन्यद्वक्ष्यमाणं शिलाजत्वन्तं पृथक्सर्वसमं क्षिप्त्वा षट्कोलाद्युन्मत्तबीजान्तं पृथक्कर्षमितं क्षिप्त्वा लाङ्गलीचूर्णं द्विपलं सप्तानां

द्वादशांशेन भूरिसितमत्यन्तश्वेतपुष्पवन्तं वत्सनाभं च निक्षिप्य त्रिफलाया दशमूलस्य च कषायेण जयन्त्यादिरसैश्च भावयेत् । हिक्कां च नाशयेदिति शेषः । अत्र पथ्यं तु स्वादु शीतलं भोज्यम् । षट्कोलं समरिचं पञ्चकोलम् । रेणुका रेणुकबीजम् । तुम्बुरु चिरफलेति कोंकणे प्रसिद्धम् । चोरपुष्पकं यवानीविशेषः । रिङ्गणी कण्टकारी । चिरतिक्तं किराततिक्तः । उन्मत्तो धत्तूरः । जयन्ती अरणिका । ग्रहणीगजकेसरिणमाह–रसगन्धकयोरिति । चराचरः कपर्दिका । तद्भस्मादिगन्धपाषाणान्तं पृथक्पारदं तुल्यं क्षिपेत् । गन्धपाषाणो गन्धकः । सर्वं समांशकं कृत्वा समांशेन दत्त्वा सिद्धरसे पर्पटीरसे चूर्णीकृते । विषाऽतिविषा । गान्धारी यासः । महाराष्ट्री मराठी इति लोके प्रसिद्धम् । गञ्जाकिनी गृञ्जनकः । विग्रहं कलहम् । शीघ्रप्रभावरसमाह—पारदमिति । ग्रन्थिकं पिप्पलीमूलम् । विषं वत्सनाभम् । पूर्ववत्पूर्वोक्तरसवत् । मोचसारं शाल्मलीनिर्यासम् । अरलुत्वक् टुण्टुकत्वक् । घनो मुस्ता ॥ ९४ ॥

**मूलम्**—कपर्दतुल्यं० स्निग्धा मन्दाग्नौ नितरां हिताः ॥ १३२ ॥ **टीका**—कपर्दपोटलीरसमाह—कपर्दतुल्यमिति । रसगन्धकल्कं रसगन्धपङ्कं तत्कपर्दतुल्यं तेषां त्रयाणां तुल्यं लोहभस्म टङ्कणं च । जया अरणिका । पुनः संपेष्य कृतेन चूर्णेन गोलकं कृत्वा पक्वमूषायां गजपुटे पचेत् । वह्निज्वालावटीमाह—नष्टपिष्टे इति । रसगन्धकयोः प्रत्येकं चतुर्माषभागं गृहीत्वा मर्दनेन नष्टपिष्टे अदृश्यपारदांशे कृते चूर्णे मातुलुङ्गरसेन सप्तधा मर्दनाच्छोधितमभ्रकभस्म माषमानं तत्र प्रक्षिप्य त्रिकटुचूर्णं द्विमाषं त्रिशूलीप्रभृत्यार्द्रकान्तान् प्रत्येकं द्विमाषान्प्रक्षिप्य द्विपलिकैर्धत्तूरादीनां पृथग्रसैः संमर्द्य कृता माषमिता वटी ग्रहण्यादीन्हन्ति । त्रिशूली देवकाण्डर इति नाम्ना शरयूपरीणदेशे वाराणसीनिकटे प्रसिद्धा । चाङ्गेरी अम्लरसः चुका इति पत्रशाकम् । तीक्ष्णपर्णी मूर्वा त्रिदला । कन्या कुमारी । मत्स्याक्षी द्वितीयाध्यायटीकायां वर्णितलक्षणा । श्वेताऽपराजिता श्वेतगिरिकर्णी । ग्रीष्मसुन्दरा कुसरीति नाम्ना प्रसिद्धः पुष्पक्षुपः । करिणी गजपिप्पली । कर्णमोटी कर्णस्फोटा । कानफोडीति कोंकणे प्रसिद्धा । रुदन्ती चणकसमपत्रा । वन्यचणकः क्षुपः । वज्रधररसमाह—रसगन्धेति । क्षारत्रयं यवसर्जकटङ्कणं पुटे पचेद्गजपुटं पचेत् । ग्रहणीकपाटमाह—रसेन्द्रेति । जया भङ्गा । क्षीरिणी शुष्कं राजादनफलम् । मणिमन्थं सैन्धवम् । तीक्ष्णं मरिचम् । क्षीरिण्यादि भुक्त्वा पश्चाद्दध्योदनं भुञ्जीत । अजीर्णलक्षणमाह—विरेक इति । हस्तादिशिरासंकोचः । अजीर्णकण्टकरसमाह—शुद्धसूतमिति । तिलपर्णी तिलवणः । तीक्ष्णगन्धबहुलोऽयं क्षुपः । विध्वंसनामानं रसमाह—विमर्द्येति । गन्धकं समेन टङ्कणेन सह विमर्द्य जातीफलोदकेन सप्तवारं भावयेत् । रसादिगुटिमाह—रसगन्धेति । भसितं वन्यच्छगणभस्म । अग्निकुमाररसमाह—हंसपादीति । वत्सनाभचूर्णकोलं शाण-

द्वयमितम् । वडवाग्निरसमाह—टङ्कणमिति । सुन्दरं कान्तलोहभस्म । अयोमलं मुण्डलोहमलम् । तन्मध्ये यत्कान्तं भस्मरूपं तत्त्रिफलारसे संमर्द्य गजपुटपक्वं भार्गीरसे घृष्टं संमर्दितं कुर्यात् । अयोमलभस्म तु मार्कवरसे घृष्टं कुर्यात् । एतानि टङ्कणादीनि । तस्यौषधस्य पानं तु, अन्नमर्धं भुक्त्वा तदुत्तरं कुर्यात् । ततः स्वल्पं पथ्यमद्यात् । पीतवर्णा पीतवर्णविशिष्टा । अमला स्वच्छा । निष्कला समला । वैश्वानरपोटलीरसमाह—शुद्धाविति । मूषोदरे पक्वमूषोदरे रुद्ध्वा कुम्भिपुटे गजपुटे सिध्यति । उपदंश आर्द्रकमूलकशाकादि शुक्तादि च ॥ १३२ ॥

**मूलम्**—शुल्बायोधनभस्म० शक्तो भवति पावकः ॥ १६५ ॥ **टीका**—वडवामुखीं गुटीमाह—शुल्बेति । घनभस्माभ्रकभस्म । हलिनी लाङ्गली । अम्बु वालकम् । शुभ्रामृतं श्वेतपुष्पं वत्सनाभम् । तदन्तानां द्रव्याणां मिथः समानां समूहं भृङ्गराजादिरसैः सह संमर्द्य कृता गुटी ताराख्यया कयाचित्सिद्धयाऽभिहिता । विधूननी विनाशकरी । कसनं कासः । मूलार्तिरर्शोरोगः । तस्य समूलमुच्छेत्री । क्रव्यादरसमाह—द्विपलमिति । द्विपले द्रुते गन्धके यथोक्तभागं पारदादि निक्षिप्यैकीभूतं तदेरण्डदले क्षिप्त्वा संजातां पर्पटीं संचूर्ण्याऽऽयसभाजने क्षिपेत् । पात्रमाढकम् । क्षोणिपालस्य ग्रा… समासाद्य प्राप्य । राजशेखरवटीमाह—भाग इति । स्वर्णधत्तूरः कृष्णपुष्पबीजधत्तूरः । अग्निकुमाररसमाह—शुद्धं सूतमिति । द्विक्षारं यवसर्जकाख्यम् । घृते भर्जिता नूतनाऽभङ्गा भाण्डे पचेत्, भाण्डपुटे पचेत् । अमृतवटीमाह—कुष्ठेति । राक्षसनामानं रसमाह—ताम्रमिति । तीक्ष्णं मरिचम् । वालुकाकुम्भे वालुकापुटे पचेत् । रक्तशाकिनी रक्तमारिषः । च्यवनाय ददाविति शेषः । तेन मुनिना तं रसमादाय भुक्त्वा सूर्यमण्डलान्तःस्थशिवाय नमश्चक्रे । जीवननामानं रसमाह—रसगन्धकेति । सिन्धु सैन्धवम् । हियावली हृद्धात्री । आग्या इति नाशिकक्षेत्रनिकटे प्रसिद्धः क्षुपः । पूती करञ्जश्छिन्ना गुडूची । भावनया भावितोऽयं रसः षोडशांशविषमिश्रितो माषमितवटीकोऽजीर्णादीन् हन्ति । वडवानलरसमाह—शुल्बमिति । जलनिधेः फेनः समुद्रफेनः । अग्निनकजरागुरमर इति लोके । कान्तायः कान्तलोहभस्म । पविर्वज्रभस्म । वज्री वज्रवल्ली । गरलं विषम् । अग्निमन्थवटीमाह—शुद्धसूतमिति । विषमुष्टिः कुपीलुः । अग्निकरं चूर्णमाह—मृतामिति । अनु अनुपानं भवेत् ॥ १६५ ॥

इति रसरत्नसमुच्चयटीकायां खरेइत्युपाह्वेन वामनात्मजेन
चिन्तामणिना कृतायां चिकित्सास्थाने
षोडशोऽध्यायः ॥ १६ ॥

# अथ सप्तदशोऽध्यायः ।

**मूलम्**—कटौ कुक्षिप्रदेशे च० रहस्यं हि शिवोदितम् ॥ २६ ॥ **टीका**—अश्मरीलक्षणमाह—कटाविति । वसुः पाषाणभेदः । पुनर्नवा श्वेताश्वेतपुष्पा । मूषासंपुटितं भाण्डपुटे पक्त्वा । अग्नीषोमाख्ययन्त्रेण स्वेदयेदित्यर्थः । अग्नीषोमयन्त्रमधोऽग्निरुपर्यापो मध्ये तु रससंग्रहः । गोपालकर्कटी श्वेतराजिमती क्षुद्रा वनकर्कटी । सामान्योपायानाह—गोक्षुरस्येति । पाण्डूरफलिकामूलं पाडलीमूलम् । पेटकारी पेटारी इति लोके प्रसिद्धा । शुक्त्या शुक्तिभस्मना सह पिण्डकपिच्छलीचूर्णमुष्णजलेन पिबेत् । पिण्डो हिराबोल इति लोके प्रसिद्धः । कपिच्छली आम्रातवृक्षत्वक् । कटुतैलेन सर्षपतैलेन । पाषाणभिद्रसमाह—शतावरीति । पचेच्च । मूषायां मल्लमूषासंपुटितं कृत्वा भाण्डपुटे पचेत् । पातालकर्कटी भूमावेव प्रसरणशीला लघुकर्कटी । सदाभद्रा बला । त्रिविक्रमरसमाह—मृतेति । शुष्के गतद्रवे सुशुष्के सति । अन्धयेन्मल्लमूषासंपुटितं कृत्वा संधिरोधं कुर्यादित्यर्थः । आनन्दभैरववटीमाह—तिलेति । पाण्डुरी फलिका पाडळीति लोके । लघुलोकेश्वररसमाह—मृतसूतस्येति । पिष्ट्वा तेन कज्जलीभूतेन वराटान् संपूर्य सूतचतुर्थांशेन टङ्कणेन क्षीरपिष्टेन वराटमुखं रुद्ध्वा भाण्डमूषायां धृत्वा गजपुटे पचेत् । यष्टी मधुयष्टिः । कचेरुर्मुस्तासदृशो लोमशस्तडागकन्दः ॥ २६ ॥

**मूलम्**—शोषस्तापो० महाविद्या प्रमेहजित् ॥ ४७ ॥ **टीका**—मूत्रमेहलक्षणं समासत आह—शोष इति । मेहविशेषोपायानाह—रसस्येति । तिलपिण्डी तक्रेण पक्त्वा देया । अर्धहिङ्गुकघृतेन संस्कृता । मार्कण्डी सोनामुखीति प्रसिद्धा । तुर्यभागेन चतुर्थांशेन । सप्तकद्वयं चतुर्दशदिनपर्यन्तम् । मालार्जुनकोऽर्जुनवृक्षविशेषः । अर्जुनो नर्मदातीरादौ कहुवा इति नाम्ना प्रसिद्धः । बोलबद्धरसस्त्रयोदशाध्याये प्रागुक्तः । शाल्मलीद्रुतिं शाल्मलीकषायम् । बीजकोऽसनः । चन्द्रप्रभागुटिकामाह—बोलमिति । मधूकयुगलं स्थलमधूको जलमधूकश्च । बहुसुता शतावरी । घोण्टा सौवीरं बदरं पूगीवृक्षपुष्पं वा । अम्लसारोऽम्लवेतसः । स्थिरा शालिपर्णी । भवबीजं रुद्राक्षः । सहा माषपर्णी । लाङ्गली नारीकेलवृक्षमूलम् । तुम्बी मधुरतुम्बी । अथ प्रमेहगजसिंहमाह—चाण्डालीति । चाण्डाली चण्डालकन्दवल्ली । राक्षसी काचिद्दिव्यौषधी संप्रति नोपलभ्यते । तदलाभे तुलसीमूलं ग्राह्यम् । तयोः स्वरसो मधु घृतं टङ्कणं च सर्वं मिथः समं सर्वसमभागं पारदं पारदसमं स्वर्णभस्म पारदसमं शुद्धगन्धकादि सर्वोपरससमूहं चैकीकृत्य संमर्द्य स्वर्णस्थाने पूतीलोहं वा पारदसाम्येनैवैकीकृतं संमर्दितं मल्लमूषासंपुटितं चुल्लीस्थमृदुमध्यतीक्ष्णादिक्रमेण वालुकापुटे त्रिप्रहरपर्यन्तं पचेदित्यर्थः । महाविद्या-

गुटिकामाह—मर्दितमिति । कान्तभस्मादि मिथः समभागं पलाशरसेन संम-र्द्याऽऽकुलीकषायैर्दोलायन्त्रे लौहे कटाहे वासास्विन्नं कृत्वा वालुकायन्त्रे काचकूप्यां प्रहरपर्यन्तं पाचितं कृत्वा राजावर्तभस्मादिभिः पृथक्तस्य समैस्तमेकीकृत्याऽऽधार्या-दिरसैर्मर्दयेत् । शिलाधातुः शिलाजतु । ताप्यं माक्षिकभस्म । माक्षिकं स्वर्णमा-क्षीकभस्म । आधारी गुडूची । कृष्णमूला कृष्णोत्पला सारिवा । हिमं चन्द-नम् ॥ ४७ ॥

**मूलम्**—वीर्यं पुरारेः० वर्ज्यं सर्वं विवर्जयेत् ॥ ७५ ॥ **टीका**— मेहनाशरसमाह—वीर्यमिति । पुरारिवीर्यं पारदः । पारदगन्धकाभ्रं जम्बीरनीरेण संमर्द्य समुदितस्यार्ध-भागं ताम्रभस्म दत्त्वा गोदुग्धादिना पृथग्भावयेत् । ततोऽयं रसो मेहजित् । मत्स्यण्डिका किंचिन्निष्कासितमला शर्करा । सत्त्वेन तद्‌द्रवेण । मांसी जटामांसी । शिवा हरीतकी । कर्कटं कर्कटशृङ्गी । रुच्यं कपित्थम् । मेहध्वान्तविवस्वद्रस-माह—रसाभ्रकाविति । मूषाकुहरे मूषोदरे निवेश्य संपुटितं कृत्वा गजपुटे सप्त-वारं पचेत् । प्रतिपुटं मर्दनं कार्यम् । बीजाह्वो बीजकोऽसनः । मुष्ककः कृष्ण-पाटला । अक्षयुग्मं बिभीतको रुद्राक्षश्च । प्रतिस्वं प्रत्येकं रसेन त्रिवारं भावयेत् । यस्य पञ्चाधिका विंशतिर्दयोमानं तेन प्रमेहिणाऽस्य रसस्य भक्षणं वरा-मधुभ्यां सह कार्यम् । एतद्रसभक्षणप्रयोगावसरे यस्य नरस्य ग्रीष्मोष्मप्लुष्टा-ङ्गानि भवेयुः खानि च कर्णाक्षिनासिकादीनि प्रत्ययं रसः स्फुटनं ददीत त्वग्व्रणादिस्फोटं यदि कुर्यात्तदा तद्वारणार्थं चिञ्चागुडोदकमिश्रं द्राक्षादिवर्गनीरेण मिश्रितं सदन्नं दद्यात् । एवं दिनत्रयं कृत्वा तल्लघुभोजनजं शरीरशोषं द्राक्षासितादानेन विना-शयेत् । वासुदेवेन जगत्त्रातुं कृपया निर्मिते गौरीहरवीर्यरूपेऽस्मिन् मेहध्वान्तवि-वस्वति रस उक्तरीत्याऽवस्थानुरोधेन पथ्यं देयम् । नागपारदयोगमाह—नागमिति । अग्निं चुल्ल्यां दत्त्वा चिञ्चात्वक्क्षारमन्तराऽन्तरा स्वल्पं स्वल्पं नागोपरि दत्त्वा दर्व्या समन्तत आलोडयेत् । उपरिस्थं दग्धभस्मीभूतं क्षारं कुन्तलैरपसार्य निष्कासयेत् । एवं क्षारदानादि मुहुः कृत्वा शोधयेत् । ततः पारदं नागसमभागं तत्र कटाहे दत्त्वा दर्व्या विघट्टयन् भस्मीकृतं कुर्यात् । ततोऽवतार्य स्वल्वे धृत्वा विचूर्णितं कुर्यात् । श्रेष्ठमधुना सहाल्पाल्पं तरवटबीजचूर्णं तत्र दत्त्वा संमिश्रितं तिलमानमारभ्य क्रमेण वर्धितमात्रमेतद्भेषजं मेहगणघ्नम् । तरवटबीजं प्रपुन्नाटबीजम् । चर्मकाराम-लकीबीजं वा । कान्तादिगुटिकामाह—कान्तेति । कान्तं पञ्चभागमभ्रकं षड्भागं मण्डूरं पञ्चभागं हरीतकी दशभागा त्रिफला चत्वारिंशद्भागा तलपोटकबीजचूर्णं समु-दायस्य द्विगुणम् । एवं भागं सर्वं संमर्द्य गुलिकां विधायैतद्भेषजं तक्रेण पीतं येन स मेही मेहाञ्जयेत् । कासीसादिमोदकमाह—कासीसमिति । कृष्णनागमुत्तमं सीसकम् । क्षितिभृद्रुधिरं शिलाजतु । नीलमभ्रं कृष्णवज्राभ्रम् । सुकान्तमुत्तमका-

न्तस्य भस्म । हेमाङ्गं स्वर्णमाक्षिकभस्म । भूमिसारं तीक्ष्णलोहभस्म । सलिलरिपुदलं रक्तागस्त्यदलम् । मेघपुष्पं जलं तस्यारिरगस्त्य एव तद्बीजम् । गोरेखा भूदारो वाराहीकन्दो नारिकेरमूलं वा । अरिमेदो विट्खदिरः । क्षितिरुहा श्वेतदूर्वा श्वेतगुञ्जावल्लीमूलं सुशुद्धीकृतं तद्बीजं च । कापित्थासृक् कपित्थफलरसः । क्षितिफलो हरितमुद्गः । रोहिणी हरीतकीविशेषः । अक्षो बिभीतकः । करिविजयभूरटरूषः । तत्कृतरसे सर्वमेतत् संपिष्य कर्षमितमोदकीकृतोऽयं रसः सतक्रं पीतः सन्मूत्ररोगादीन् हन्ति । कल्पनाशं सामर्थ्यनाशम् । वल्पूं सामर्थ्ये । भीमपराक्रमरसमाह—तुल्याभ्यामिति । निक्षिपर्पटीं विधाय तदनन्तरं परिचूर्ण्य तत्र कान्तसत्त्वादि प्रक्षिप्य गोमूत्रपाकेन शुद्धं शिलाजतु च निधाय खल्वे प्रक्षिप्य मिथः समयोर्गुञ्जाकुलीबीजयोः कृतकल्काद्द्रवेण निष्पीडिताद्रसेन कतकमूलकषायादिना संमर्दयेत् । भृष्टौ घृतभर्जितौ मिथः समौ । एतेन रसेन तुल्यौ कृत्वा सह मर्दनसिद्धो रसः सर्वमेहघ्नः । आकुली चर्मकारामलकी । आहुल्यमिति निघण्टे प्रसिद्धम् । आवलो इति गुर्जरभाषायाम् । इयं पीतपुष्पा नर्मदातीरे उत्पद्यते ॥ ७१ ॥

**मूलम्**—पलमात्ररसं शुद्धं० सर्वरोगघ्नो योगसंयुतः ॥ ९८ ॥ **टीका**—संजीवनरसमाह—पलमात्रमिति । मेहमर्दनरसमाह—शुद्धेति । व्योम्नि अभ्रकसत्त्वे । निर्व्यूढं मूषायां द्रुते सत्त्वे प्रक्षिप्य प्रतपनेनैकीकृतम् । गोमूत्रकशिलाधातुः गोमूत्रगन्धिप्रशस्तं शिलाधातुस्तस्य द्रवेण । रामबाणरसमाह—त्रपुणेति । राढ्वर्तो राजावर्तः । मोघत्वं निरर्थकत्वम् । बबूरो बब्बूलः कण्टकदीर्घः पीतपुष्पः बाभूळ इति लोके । राजमृगाङ्करसमाह—सुवर्णमिति । संस्वेदयेच्छनैः । भूमिपृष्ठे लघुपुटपर्याप्तैर्वन्यच्छगणैस्तुषैर्वा गर्भे तां मूषामाच्छाद्य ज्वालयेदित्यर्थः । चुल्ल्यां महत्यामकठोराङ्गारपूरितायां गर्भे तां मूषां धृत्वा वा धमनेन स्वेदयेदिति वा । मृगचारी विरक्त इत्यर्थः । तन्नामक इति वा । योगसंयुतः । तत्तद्रोगनाशकयोगयुतश्चेत् । मेहहररसमाह—राजावर्तस्येति । तत्तन्मारणकैः सूतमारकभेषजैः सह सत्त्वतुल्येनाभ्रकसत्त्वं यावद्भागमितं प्राग्दत्तं तावद्भागमितेनेत्यर्थः । मूषायां मल्लमूषायाम् । उदयभास्कररसमाह—पारदमिति । रसकं खर्परं पञ्च पञ्चभागिकम् । शिलाधातु शिलाजतु । जम्बीररसेन दिनचतुष्टयपर्यन्तं मर्दनोत्तरं जटामांसीगोक्षुरक्काथं प्रत्यहं दत्त्वैकविंशतिदिनानि संमर्द्य मल्लमूषाभ्यन्तरं कल्कीभूतं तं विलिप्य कुक्कुटपुटे पचेत् । ततः कुमार्यादिरसैः पृथगेकैकदिनं भावयित्वा संमर्द्य शोषयेत् । हियावली हिमावली । अङ्गारकुट्टकः । रसादिपिण्डीमाह—पिष्ट्वेति । कार्पासबीजं कल्कीकृतं दुग्धमध्ये दत्त्वाऽम्लयोगेन संजातदध्नः कृतं तक्रं कार्पासतक्रम् । रसस्य पारदस्य यद्धरणात्मकं मानं पलदशमो भागस्तादृशा गृहीततन्मानेनेत्यर्थः । निहितं

शतसंख्याकं जलारातिबीजं रक्तागस्त्यबीजचूर्णं यत्र । हिमांशुवटकमाह—रसस्येति । वसन्तकुसुमाकररसमाह—द्वौ भागौ हेमभूतेरिति । गगनमभ्रकभस्म । मोचाकन्दः कदलीकन्दः । शतपत्री शेवन्ती । मृगमदा कस्तूरिकया ॥ ९८ ॥

**मूलम्**—राजावर्तस्य० असाध्यं नाशयेत्क्षणात् ॥ १४० ॥ **टीका**—पारदादिरसमाह—पारदभस्मेति । ताप्यं स्वर्णमाक्षीकभस्म । रजतोपलो रौप्यमाक्षीकभस्म । कपित्थात्खपुरः कपित्थनिर्यासः । दिवसादौ प्रभाते प्रत्यहमेतद्भेषजं विंशतिवारं लीढम् । मेहारिरसमाह—सूतमिति । बाहुमितं द्विसंख्याकभागमितम् । गन्धकमेकभागम् । कृष्णहिरण्यः कृष्णपुष्पबीजो धत्तूरः । अभ्रककालिकां वार्षिकनीलमेघसदृशीं कज्जलीम् । काचकूप्यां सुपिहितां कृत्वा सिद्धं तद्भेषजं द्विलवमेकगुञ्जमभ्रकभस्मलवमर्धगुञ्जं तथैव लोहं संमर्द्य सिद्धमात्रोऽस्य वल्लो सितायनुपानेन वा क्षौद्रायनुपानेन वा सर्वमेहजित् । मेहबद्धरसमाह—भस्मसूतमिति । शिला मनःशिला । भाङ्गिणा भृङ्गराजरसेन । सामान्योपायमाह—महानिम्बस्येति । महानिम्बो वर्तुलतिक्तबीजोऽत्यन्ततिक्तपत्रो नात्युच्चो भवति । हरिशंकररसमाह—मृतमिति । पूर्वयोगो निम्बबीजादिः ॥

इति रसरत्नसमुच्चय[टी]कायां खेरेइत्युपाह्वेन वामनात्मजेन चिन्तामणिना विरचितायां चि[कि]त्सास्थाने सप्तदशोऽध्यायः ॥ १७ ॥

---

## अथ सप्तदशाध्यायपूरणिका—

भस्मीकृतैः संमर्द्यैकरूपं कृत्वा तेन समुदायेन पृथक्समाधार्यादिहिमान्तं चूर्णीभूतं मिश्रयित्वा सर्वं नारिकेलमूलादीनां पृथक्रसैर्भावयेत् । ताप्यं रौप्यम् । माक्षीकं स्वर्णमाक्षीकम् । आधारी गुडूची । कृष्णमूला कृष्णोत्पला सारिवा । श्रावणी मुण्डी । हिमं चन्दनम् । काकजम्बूर्भूमिजम्बूः । आकुली आकुली इत्यनुमीयते । चांझार आंवली इत्यपि तर्कः । परं तु कोशादिप्रमाणं न दृश्यते । तद्बीजचूर्णं ग्राह्यम् । पुरारिवीर्यरसमाह—वीर्यमिति । पारदं गन्धकं मिलित्वा कृतकज्जलीमभ्रकभस्म च समभागं जम्बीरनीरेण विमर्द्य यथोक्तताम्रभस्मदानोत्तरं सर्वं गोः पयसा खर्जूरादीनां च पृथक्रसेन च भावयित्वाऽयं रसः सिध्यति । शिवा हरीतकी । कर्कटं कांकडावृक्ष इति महाराष्ट्रभाषायाम् । रुच्यं कपित्थं जम्बीरं वा । दन्तीबीजं जयपालाख्यम् । मेहध्वान्तविवस्वद्रसमाह—रसाभ्रकाविति । प्रतिपुटं जम्बीरनीरेण विमर्दनम् । बीजाह्वोऽसनकः । मुस्ता मुस्तकम् । अक्षयुगं रुद्राक्षो बिभीतकश्च । ककुभादिजातिदलान्तानां प्रतिस्वीयस्वीयपृथग्रसैस्त्रिवारं भावयित्वा रसोऽयं सिध्यति । सिता शर्करा । अथास्य रसस्याऽऽतुरशरीरावस्थानुरोधेनानुपानपथ्यविशेषं प्रकल्प्य प्रमेहविशेष उपयोगमाह—वल्लेति । नीरणेति । नीरण जलेन साकं बब्बूलनवपल्लवान् संमर्द्य

तेन सह दत्तः प्रमेहान् विनिहन्ति । अथवा तैः प्रवालैः सशर्करैः सह त्रिदिनपर्यन्तं दत्तोऽयं रसो विंशतिवत्सरस्य नरस्य मेहान् हन्ति । अत्रास्मिन् रसप्रयोगशीलनावसरे । यस्य मेहिनो वयसः पञ्चाधिका वत्सरविंशतिः स्यात्स स्वीयप्रमेहवारणाय त्रिफलामधुसहितस्यास्य रसस्य योग्यो भवति । हैयंगवीनं ह्योगोदोहोद्भवं घृतम् । त्रिगुणानि सप्तसंख्याकदिनानि । एकविंशतिदिनानीत्यर्थः । कार्यं तेन मेहिना । वयसा त्रिंशदब्दस्य मेहिनः । यथोक्तानुपानान्नसहितः शीलितोऽयं रसो न केवलं मेहं हन्ति किंतु ग्रीष्मकालायूष्मसंघेन म्लानानि अङ्गानि खानि म्लानानि इन्द्रियाणि च सम्यक्स्फुटनं ददीत सोत्साहानि स्वस्वकार्यक्षमाणि कुर्यादित्यर्थः । अस्मिन्नङ्गग्लानिवारणाय प्रयुक्तेऽस्मिन् रसे सति तदान्नं चिञ्चागुडाभ्यां युतं देयम् । तथा लङ्घनजशोषवारणार्थं वासुदेवाख्यरससिद्धेन जगद्रक्षणाय निर्मित उमाशम्भ्वाख्यापरपर्यायेऽस्मिन्मेहध्वान्तविवस्वति रसे प्रयुक्ते सति गोस्तनिकासिताभ्यां युक्तं पथ्यमन्नं देयमिति । गोस्तनिका गोस्तनसमा महती द्राक्षा । अङ्गुरेति लोके प्रसिद्धा ।

अथ मेहगणघ्नं रसमाह । तत्र शुद्धनागदानार्थमादौ नागशुद्धिमाह— नागमिति । कपालमध्ये खण्डितमुखे विशालमृत्पात्रमध्ये लोहकटाहे वा नागं क्षिप्त्वाऽधश्चुल्ल्यामग्निं दत्त्वा द्रुतनागमध्ये चिञ्चाफलत्वक्क्षारं क्षणे क्षणेऽल्पाल्पं विकीर्य दग्धं तत्क्षारं कुन्तलेन तत्समेन नारिकेलफलत्वग्गततन्तुसमूहेन वा क्रमशो विशोधयेत् । अपसार्य निष्कासयेदित्यर्थः । एवं शुद्धं सीसं पारदं च समभागं घृष्ट्वैकीकृतं ततः खल्वमध्ये तिलमानं तिलशो मुहुरत्यल्पं क्षिप्त्वा श्वेतमधुना सह सम्यङ्मर्दयेत् । ततस्तरवटबीजचूर्णं मिश्रितं कृत्वा सिद्धरसोऽयं मेहादिघ्नः । तरवटबीजं चक्रमर्दबीजम् । कान्तादिरसमाह—कान्तेति । क्रमशः क्रमविवर्धितानां समूहः । शरांशं पञ्चभागम् । यथा कान्तभस्मैककर्षभागमभ्रकभस्म द्विकर्षंनागं मण्डूरं त्रिकर्षं हरीतकी चतुष्कर्षम् । एवं मिलितानां समूहः पञ्चभागात्मको ग्राह्यः । रसेन पारदेन कृतं पारदसंबधीत्यर्थः । भूतांशं पञ्चभागात्मकमथो दशांशं पञ्चदशभागानित्यर्थः । उत्तमा त्रिफला चत्वारिंशद्भागा । सर्वेषां तेषां द्विगुणं तक्रभावितं तलपोटकबीजं तरवटबीजचूर्णं प्रक्षिप्य श्लक्ष्णं सूक्ष्मं संमर्द्य कृता गुलिका मेहाञ्जयेत् । कासीसादिमोदकमाह—कासीसेति । कासीसाद्यक्षान्तं सर्वं समभागं गृहीत्वा करिविजयभुवा ( रक्तशिग्रुः ) अटरूषेण कृते जले स्वरसे कषाये वा संपिष्याक्षमात्रान् मोदकान् कुर्यात् । कल्पनाशं सामर्थ्यनाशम् । कृष्णनागमुत्तमं नागं तद्भसितम् । क्षितिधररुधिरं गैरिकम् । नीलमभ्रं कृष्णवज्राभ्रम् । सुकान्तं कान्तलोहम् । हेमाङ्गं स्वर्णमाक्षीकम् । भूमिसारं तीक्ष्णलोहं वराहिकन्दसलिलरिपुदलं रक्तागस्त्यदलं मेघपुष्पमेदो विटखदिरः शेण्याखेर इति कोंकणेप्रसिद्धक्षितिरुहः । आकुली आवले इति गुर्जरभाषायाम् । आहुल्यं हलसल्यं शाकवृक्षः साग इति ख्यातः । हरिन्मुद्गः । श्वेतगुञ्जामूलं तद्बीजं च । कापित्थासृक् कपित्थफलरसः । क्षितिफलं हिवामूग इति लोके प्रसिद्धः । रोहिणी कटुरोहिणी । अक्षं बिभीतकम् ।

अथ भीमपराक्रमरसमाह—तुल्याभ्यामिति । सगोमूत्रं परिसिद्धं गोमूत्रे क्वथनेन शुद्धं शिलाजतु । तुल्येति । मिथस्तुल्यं गुञ्जाकुल्योर्बीजं तत्कल्कान्निष्पीडितरसेन समौ मिथः समभागौ रससमावुक्तभावितरसेन समौ तुल्यभागौ कृत्वा । अथ संजीवनरसमाह—फलमात्रमिति । पातयेदूर्ध्वं पातयेत् । तथा कृत्वा मृतं पारदं यन्त्राद्गृहीत्वा राजावर्तभस्म तत्र रसे समभागं दद्यात् । अथ मेहमर्दननामानं रसमाह—शुद्धसीसोद्भवं भस्मेति । निर्व्यूढमिति । महामूषामध्येऽभ्रकसत्त्वं निधाय ध्मानेन द्रुते सति तत्र समभागं सीसकभस्माऽऽवपेत् । ततो मूषामुखमाच्छाद्य पुनर्ध्मानेनैकी कुर्यात् । एवं सीसभस्म दत्त्वा दत्त्वा सप्तधा ध्मानेन निर्वाहयेत् । एकं निर्व्यूढमैक्यं प्राप्तं सीसभस्मगोलं विचूर्ण्य । गोमूत्रकशिलाधातुद्रवेण गोमूत्रगन्धिशिलाजतुद्रवकेन । अथ रामबाणरसमाह—त्रपुणेति । राङ्भस्म राजावर्तभस्म । ताप्यभस्मादि प्रत्येकं सर्वसमं क्षिपेत् । अस्य रसस्याव्यभिचारेण मेहनाशन उपमात्रयमाह—मोहध्वान्त इति । बाणः स्वकार्यं साधयत्येव । सज्जनस्य भाषितं यथा सफलं भवति तद्वदयेनायं रसः सेव्यते स पुरुषो भाविमेहित्वमपि कदाचिदपि न प्राप्नोतीति भावः । अथ राजमृगाङ्करसमाह—सुवर्णमिति । प्रद्राव्य मृत्पात्रे लोहकटाहे वा प्रद्राव्य समाहरेत् । समाहृत्य गोमयोपरि कदलीदले निक्षिपेदित्यर्थः । संस्वेदयेच्छनैरिति । तुषपुटेन पचेदित्यर्थः । मेहहररसमाह—राजावर्तस्येति । गन्धकसाधितं समभागेन गन्धकेन साधितं मारितम् । राजावर्तभस्मनाऽपि समभागेन मारितमभ्रकभस्म तथा कान्तलोहस्य च भस्म कुर्यात् । घनसत्त्वभस्मना कान्तभस्मना च पारदमारणकैरेकादशाध्यायोक्तैः पलाशबीजरसादिभिः सह सूतं पारदं निहतं कुर्यात् । भस्मकरणार्थमभ्रकसत्त्वस्य यावान्भागो गृहीतस्तावद्भागमितेन पारदेन । मूषायां मल्लमूषायां निरुध्य । मेहहरैर्गुडूचीखदिरार्जुनादिभिः । उदयभास्कररसमाह—पारदं भागमिति । पारदादिरसकान्तं प्रत्येकमेकैकभागिकं ग्राह्यम् । आदौ पारदगन्धककज्जलीं विधाय वङ्गभस्मना सह रसकभस्म यथोक्तभागं गृहीत्वा गोजाविनरनारीणां पृथङ्मूत्रेण त्रिदिनं मर्दयेत् । मूषिकालेपनं तस्या लेपनयोग्यं घनं यावता मर्दनेन स्यात्तावन्मर्दयेदित्यर्थः । मांसीगोक्षुरसंयुतं तत्कषायेण संयुक्तं कृत्वा मर्दयेच्च । ततः पुटित्वा क्रमेण गृहकन्यादिरसैस्तद्भावयेत् । एकैकभावनोत्तरं शोषयेच्च । श्वासकासस्य क्षीरशर्कराऽनुपानम् । अथ मेहघ्नं रसादिपिण्डमाह—पिष्ट्वेति । रसधरणदशा ज्ञानविषयरसधरणमानेनेत्यर्थः । तुल्यं नागभस्म गृहीत्वा कज्जलीं कृत्वा ततस्तत्र कपित्थनिर्यासं पञ्चशाणं दत्त्वा जलारातेर्बीजशतं दत्त्वा सर्वं कार्पासीबीजमज्जायुते तक्रे पिष्ट्वा माषमिताः पिण्डा गुलिकाः कार्याः । निर्यासः ' गोंद ' इति लोकभाषायाम् । जलाराती रक्तोऽगस्त्यः । अथ हिमांशुरसमाह—रसस्येति । रसतुल्यं पारदतुल्यम् ।

अस्य रसस्य हिमांशुः कर्पूरस्तद्विशिष्टत्वात् । मूलेऽनुक्ताऽपि हिमांशुरससंज्ञा प्राचीनोक्ता बोध्या । हरेणुः कलायः । सोमरोगः स्त्रीणां जलस्रावः । पिटिकाः प्रमेहोपद्रवपिटिकाः । वसन्तकुसुमाकररसमाह—द्वौ भागौ हेमरजताविति । वासाऽटरूषस्तत्पुष्परसः । मोचाकन्दः शाल्मलीकन्दः । शतपत्रं शेवन्तीपुष्पम् । मालतीकुसुमं जातिपुष्पम् । जाईफूल इति लोके । उशीरं कृष्णश्वेतभेदेन द्विविधम् । एकैकरसेन सप्त सप्त भावना देयाः । मृगमदा कस्तुरी । तदुदकेन भाव्यं सप्तवारम् । अथ सर्वमेहघ्नरसमाह—पारदेति । लोहमलो मण्डूरः । आकुली चाह्मारआंवळी इति तर्कः । ताप्यं स्वर्णमाक्षीकम् । निशा हरिद्रा । रजतोपलो रौप्यमाक्षीकम् । कपित्थात्सपुरः कपित्थनिर्यासः । सर्वमिदं मिथः समांशं गृहीत्वा भृङ्गराजरसेन सप्तवारं भावितं सिद्धरसममुं प्रतिदिनं प्रभातेऽल्पाल्पमात्रं विंशतिवारं भुक्तं चेत्, विंशतिमेहघ्नं भवतीति । मेहारिरसमाह—सूतं बाहुमितमिति । द्विभागं पारदमेकभागं गन्धकमेकीकृत्य कज्जलीं विधाय कृष्णपुष्पाचित्रककषायेणैकदिनं संमर्द्य ततस्तेन कज्जलीरूपेण साकं समभागकृष्णवज्राभ्रभस्मनः संयोगं कृत्वा मर्दनेन कृतां कालिकां कज्जलीं विधाय काचकूप्यां यथाविधि संपूर्येष्टिकाखण्डमुद्रया पिहितां कृत्वा सप्तमृत्कर्पटैः सप्तवारं तां च संवेष्ट्य पश्चाद्धकलवणपूर्णे मृद्भाण्डे यथाविधि धृत्वा यामचतुष्टयं दग्ध्वा पक्त्वा स्वाङ्गशीतां कूपिकां भित्त्वा निष्कास्य सिद्धं तं सूतं द्विलवांशद्वयमितं (लवशब्दोंऽशवाचकः) अभ्रकभस्म लोहभस्म च लवमितं संमर्द्यैकी कुर्यात् । नो चेदथवा । तरसा वेगेन । रोगाधीश्वरो राजयक्ष्मा । अथ मेहबद्धरसमाह— भस्मसूतमिति । ताप्यं माक्षीकभस्म । शुद्धा शिला शिलाजतु । रजनी हरिद्रा । भृङ्गिणा भृङ्गराजरसेन । एतत्सर्वं त्रिंशद्वारं भावयित्वा निष्कमात्रं शाणमितम् । अनुपानान्तरमाह—महानिम्बस्येति । अनु मेहबद्धरसं भक्षयित्वा पश्चात् । अथ हरिशंकररसमाह—मृतं सूताभ्रकमिति । निजद्रवैः स्वरसैः । पूर्वयोगो महानिम्बयोगः ॥

इति रसरत्नसमुच्चयटीकायां सप्तदशाध्यायपूर्णिका ॥

---

## अथाष्टादशोऽध्यायः ।

**मूलम्**—अन्नैरध्युषितोष्णै० सर्वानामयान् विनियच्छति ॥ १८ ॥ **टीका**—अन्नैरिति । अध्युषितैः पूर्वेद्युः पक्त्वा द्वितीयदिने उपयुक्तैः । पलं मांसम् । सर्वेश्वरपर्पटीरसमाह—रसोपरसेति । रसा अभ्रकादयः । निक्षिपेत, गोमयोपरि कदलीदले निक्षिप्याऽऽच्छाद्य दलेन चिपिटां कुर्यात् । पुनस्तप्ते लोहे कटाहे तां पर्पटीं प्रद्राव्य तत्र पूर्वोक्तभस्मचूर्णानि निक्षिप्य मेलयेत् । चूर्णं शुद्धगैरिकादीनाम् ।

अरुणं विषम् । मारितं महाविषम् । आवर्तकेषु दोषधात्वावृतवायुषु । यदसात्म्यं तत्सात्म्यं भवतीत्येतदसंभावितमिवेत्याशङ्क्याऽऽह—पीतमिति । पर्वताग्रमरकतखनिमये मरकतशिखरे यः श्रेष्ठभागस्तस्मादुद्धृतं यत्तोयं तद्धालाहलपानोत्तरं पीतं चेत्तद्योगेनापहततीक्ष्णगुणं हालाहलं सात्मी भवति । यथा च सलिले हालाहलं मिश्रितं चेद्धालाहलतुल्यभागं तिलतैलं तत्र दत्त्वा कंचित्कालमवस्थापयेत् । पश्चात्तत्तैलं युक्त्या स्रावयेत् । तदा तैले संसक्तं विषं निर्गच्छति । तज्जलं च निर्विषं भवति । यथा गन्धकजं विषं घृते संसक्तं तुषाकारमुक्तं सूत्रस्थाने तद्वत् । सामान्योपायानाह—वरुणेति । वरुणो वायवर्णा इति ख्यातः । क्वाथमिति । हरिद्रेति । हरिद्राकन्दाद्येकैकं चार्धपलमितं रोगशान्त्यै पिबेत् । महाभेर्याः । इन्द्रवारुणिका वर्षाशब्देन तदुत्पत्तेः । शङ्खपाण्डूररसमाह—तुत्थं चेति । नालान्धमूषायां सपिधानायां महामूषायामित्यर्थः । एतत्सत्त्वं सर्वेषु क्षाररूपेषु रसेषु शक्त्युत्कर्षार्थं मेलनाय प्रशस्तम् । पोटलीरसेषु तु न प्रथमं तन्मेलनं किंतु पोटलीपाकोत्तरम् । घृतेन सह गोस्तनमूषायां किंचिद्घृतेन सह तस्मिन्सत्त्व आवर्तिते द्रवीकृते तत्तप्तखल्वे निधाय तत्र पारदमेकनिष्कं जम्बीररसेन सह संमर्द्य प्रवेशितं सत्त्वग्रसनेनैकीकृतं अष्टानां तप्तानां वालानां मध्ये शरावसंपुटितं भूधरयन्त्रे स्थितमुपरि तुषाग्निना पक्वम् । सुरभं कान्तभस्म । उक्तलक्षणाः षोडशवराटा एतानि अम्लरसेन पिष्टानि जम्बीरमूलकल्केन सह पात्रयोरन्तर्लिप्तानि कुर्यात । ततोऽत्र संपुटितं तं रसं पचेत् । अनुपक्वो हीनपक्वः । उक्तपुटचूर्णविधिनाऽयं सिध्यति ॥ २८ ॥

मूलम्—चूर्णं दारुहरिद्राया० सहस्रायुर्भवेत्परम् ॥ ५१ ॥ टीका—वृद्धौ सामान्योपायानाह—चूर्णमिति । दलद्वयमेरण्डदलद्वयं च । वातारिसंज्ञं रसं वातव्याधिचिकित्सिते वक्ष्यमाणम् । कर्षकमिति । गोमूत्रेति । आरनालम् । गुल्मलक्षणमाह—उद्गारेति । गन्धकादिपोटलीरसमाह—गन्धकमिति । शिलाह्वं मनःशिला । सर्वं मिथः समं गृहीत्वा पिप्पलीकषायादिषु भावयित्वा वस्त्रेण गोलकीकृत्य मृदा विलिप्य योगमूषासंपुटितं पुटयन्त्रे भूमितले पचेत् । पञ्चकोलं पलमितं भुञ्जता नरेण । पञ्चकोशलमिश्रमांसाशिना वा रोगवारणार्थमेतत्सेवयेत् । गुल्मनाशकचूर्णमाह—वर्षाभूरिति । कारवी यवानी । शौण्डी पिप्पली । सूचीचव्यवचासनमिति पाठान्तरम् । सूची दर्भमूलम् । असनं बीजकः । तिलः प्रसिद्धः । अक्षो बिभीतकः । तद्युक्तमासमन्ताद्धाणादिविशिष्टम् । बाणो नीलसहचरः । सूकरी वराहीकन्दः । इन्दुरेखा बाकुची । अब्दो मुस्ता । नीलज्योतिर्दिव्यं तृणविशेषं तदलाभे रौहिषं तृणं ग्राह्यम् । तन्नाम्नी लता तु बुन्दीकोटानिकटे प्रागुक्तैव । बहुवेल्लरी माहिषवल्ली । कृष्णकाम्बोजी कृष्णगुञ्जा तत्फलम् । गवाक्षी इन्द्रवारुणी । वेल्लं विडङ्गम् । कठिल्लकं पुनर्नवा । प्रत्येकं मानिकांशं चूर्णीकृतम् । भः स्फाटिकी । उक्तमानपोटलीरजोविशिष्टमेतत् प्रत्यहं खादेत । हैयंगवीनाद्यन्नं च भु-

श्नाति । एव वर्षत्रयं कुर्यात् । तत्रासमर्थस्तु द्विचत्वारिंशद्दिनपर्यन्तं पथ्यभुगेतत्खादेत् । हयंगवीनं ह्यस्तनगोदोहादुत्पन्नं घृतम् ॥ ५१ ॥

**मूलम्**—भस्मसूतं वङ्गभस्म० कठिनं रेचयेदनु ॥ ७६ ॥ **टीका**—वङ्गेश्वररसमाह—भस्मसूतमिति । भूधरे भूधरयन्त्रे । शिवाम्बुना हरीतकीजलेन । काञ्चनी स्वर्णक्षीरी । शिखिवाडवरसमाह—मारितमिति । दीप्तामररसमाह—शुद्धं सूतमिति । विद्याधररसमाह—गन्धकामिति । कथितं रेचनमारग्वधादिपुटीरूपम् ॥ ७६ ॥

**मूलम्**—विष्णुक्रान्ता च० मन्दाग्निं चाऽऽशु नाशयेत् ॥ १०१ ॥ **टीका**—वैश्वानररसमाह—विष्णुक्रान्ता मञ्जरीविशिष्टः क्षुपः । यवर्चिचा वाराणसीनिकटे प्रसिद्धा । अग्निकुमाररसमाह जेपालमिति । विगन्धः शुद्धगन्धकः । विगन्ध एव वैगन्धः । एकत्र कार्ये रेचने प्रयुक्ता द्वयं साधयति । सर्वाङ्गसुन्दरप्राणेश्वररसमाह—शुद्धमभ्रमिति । तालमूली मुशली । कूपिकामध्ये खर्परिकातुत्थमयकूपीमध्ये । कूप्यां च भूगतायां च पुटयेत् । भूधरपुटे पचेत् । पुरो गुग्गुलुः । गुञ्जाकिनी गुञ्जनकः । उत्तमजातीयः स्थूलो लशुनकन्दः । सूतेन कूपिकान्तस्थेन पक्वसूतेन । योजयेद्भक्षणावसरे । गुल्मारिरसमाह—गन्धकामिति । वराटशङ्खयोर्भस्म । वह्निश्चित्रकः । पुटत्रयं भावनात्रयम् ॥ १०१ ॥

**मूलम्**—मृतसूताभ्रकं ताम्रं० वल्लं दद्यीतास्य च वातशूले ॥ १३२ ॥ **टीका**—अग्निमुखरसमाह—मृतसूतेति । विषमुष्ट्यादिकषाये पृथक्कृतेन भावयित्वैकैकदिनं मर्दयेत् । विषमुष्टिः कुपीलुः । जया अरणिका । विजया हरीतकी । रक्तशाकिनी रक्तमारीषः । महाराष्ट्री ग्रन्थिलखगन्धपर्वा क्षुपः । त्रिनेत्ररसमाह—हरीतकीति । कलिङ्गेन्द्रयवास्तिक्तातिक्तभेदन द्विविधाः । पुटे गजपुटे । सामान्योपायानाह—सैन्धवमिति । चिन्तामणिरसमाह—सूतं सगन्धमिति । रविसंपुटस्थं ताम्रपात्रसंपुटस्थम् । कृशानुश्चित्रकः । वातारितैलेनैरण्डतैलेन । शूलकेसरिरसमाह—शुद्धं सूतमिति । सामान्योपायमाह—वन्ध्येति । मृतोत्थापनरसमाह—अभ्रं ताम्रमिति । तत्स्वरसंख्यके पलसप्तसंख्यके । सुपूतं सुगालितम् । ताम्रयोगमाह—रसेनेति । [ रस ]न सह ताम्रदलं संमर्द्य घनीभूतेन तत्पारदेन दलानि लिप्त्वा ततो गन्धकेन लिप्त्वा । समुद्रजेन सैन्धवेन । शरावसंपुटितं कृत्वा गजपुटे पचेत् ॥ १३२ ॥

**मूलम्**—भस्मसूतस्य खस्यापि० श्वासं च कासं ज्वरम् ॥ १६१ ॥ **टीका**—शूलान्तकरसमाह—भस्मसूतस्येति । हलिनीकन्दं लाङ्गलीकन्दम् । अग्निमुखरसमाह—पारदमिति । मणिमन्थं सैन्धवम् । अग्निश्चित्रकः । शाकन्धुः । अन्धुः कूपः । तत्पाषाणसंधावतिक्षुद्रः क्षुपः । शाकवृक्षसमानखरपत्र उग्रगन्धपत्रश्च शरद्युत्पद्यते । लोके तु कुकरोधा इति वदन्ति । जया हरीतकी । जयन्ती अरणिका । त्रिषति-

न्दुकः कुपीलुः । गन्धकत्रयं रक्तपीतश्वेतभेदेन । पुटपक्कानां कुक्कुटपुटपक्कानाम् । उदयभास्कररसमाह—तोलतुल्यमिति । मूषामध्ये मल्लमूषामध्ये । शूलगजकेसरिसमाह—पलप्रमाणेति । आक्षिपेत् संपुटस्याधस्तादुपरिष्टाच्च पटुचूर्णम् । सिन्धुमध्ये काचकूप्यामित्यर्थः । क्षारताम्रमाह—पलमितेति । ताम्राष्टकमाह—हिङ्गिवति । रुचकं सौवर्चलम् । अरुणमधुरं महाविषम् । जयन्ती अरणिका ॥ १६१ ॥

**मूलम्**—रसगन्धकयोः कृत्वा० यद्वा नारायणः प्रभुः ॥ २०३ ॥ **टीका**—अग्निकुमाररसमाह—सूतगन्धकयोरिति। तुल्यांशं सर्वसमांशममृतं विषं तोलयित्वा खल्वमध्ये दत्त्वाऽऽर्द्रकरसैः पृथक् संमर्थ स्थालिकान्तार्लिप्त्वा चुल्ल्यां स्थालीमुत्तानां स्थापयेत् । वालुकायन्त्रपक्कममृतमुक्तरसं पलार्धमार्द्रकरसेन कल्कीकृत्यान्यस्थालीमन्तार्लिम्पेत् । भूदारो वराहकन्दः । क्षारवटीमाह—अमृतमिति । सुभास्करं सुताम्रम् । मेघभस्माभ्रकभस्म । अमृतार्णवरसमाह—रसभस्मेति । पूर्णचन्द्ररसमाह—मृतसूताभ्रलोहमिति । वडवाग्निमुखरसमाह—शुद्धसूतमिति । तुन्दमुदरस्थौल्यम् । आर्द्रकेति । अग्निकुमाररसमाह—गन्धकेनेति । शुल्वे ताम्रे चक्रिकारूपे नाडीं कूपीगलनालिकामुखं पिधाय। ताम्रेण पिधानभूतेन । अर्धपर्णमर्धताम्बूलदलम् । मलयजं गन्धसारं चन्दनम् । धनसारः कर्पूरः । अमृतबन्धुको गुडूचीक्काथः ॥ २०३ ॥

**मूलम्**—अम्लोद्गारवमी० दाहं मूर्छाज्वरं जयेत् ॥ २२८ ॥ **टीका**—पित्तलक्षणमाह—अम्लोद्गारेति । तत्र सामान्यचिकित्सामुक्त्वा लीलाविलासरसमाह—शुद्धसूतमिति । विपाचयेत्कटाहे । कूष्माण्डखण्डमाह—कूष्माण्डस्येति । अमृतं गुडूचीसत्त्वम् । ताम्रद्रुतिमाह—पलमिति । एतां द्रुतिं गोलकीकृत्य मल्लमूषासंपुटीकृत्य भूतले वन्यच्छगणैश्चुल्ल्यां वा पुटयन्त्रे पाचयेदिति वदन्ति । पित्तान्तकरसमाह—मृतसूतेति । जलमण्डपिका द्राक्षा। क्षीरविदारी सौराष्ट्रदेश उत्पद्यते ॥ २२८ ॥

इति रसरत्नसमुच्चयटीकायां वामनात्मजचिन्तामणिना विरचितायां सरलार्थप्रकाशिन्यां चिकित्सास्थानेऽष्टादशोऽध्यायः ॥ १८ ॥

---

## अथाष्टादशाध्यायपूरणिका—

अथ विद्रध्यादिचिकित्सां वक्तुकाम आदौ विद्रधेर्निदानसंप्राप्तिस्वरूपाणि कथयति—अन्नैरिति । अध्युषितैः पर्युषितैरन्नैरन्तः कोष्ठे । बहिरुत्थित उत्पन्नो बाह्यविद्रधिस्तस्य तद्बहिः स्थानमाह—मेदस्त्वक्पलेति । पलं पललं मांसम् । कण्डरा महास्नायवः । अथ सर्वेश्वरपोटली( पर्पटी )रसमाह—रसोपरसेति । रसा महारसा अभ्रकादयः । उपरसा गन्धकादयः । लोहानि सुवर्णादीनि । कठिनाः पाषाणा माक्षिकादयः । धनसत्त्वमभ्रकसत्त्वम् । ताभ्यां पारदगन्धाभ्यां कज्जलीं कृत्वा । रक्तियुतं रक्तिकाशब्देन युक्तं तच्छब्दवाच्यं यन्मानं गुञ्जात्मकं तन्मिता पर्पटीयम् । आवर्तका वाता-

थावरणानि । सात्म्यमायातीति । तत्रोपमां दर्शयति—पीतमिति । पर्वतस्याग्रभागे समीपभागे । परैः शत्रुभिरुद्धृतं प्रक्षिप्तं गर्तांक्षुद्रकूपादिषु तत्प्रमादेन पीतं चेत्तुल्यतैलपानेन तद्विषरूपं जलममृतसमं भवति तद्वदित्यर्थः । अरुणं विषं महाविषम् । विद्रधीनाशकयोगावाह—वरुणेति । वरुणा वायवर्णा इति लोके प्रसिद्धः । क्वाथमिति । शिग्रुत्वचाक्वाथं हिङ्ग्वादिचूर्णयुक्तं पाययेदिति । शिग्रुः कटुशिग्रुः । शङ्खपाण्डुररसमाह—हरिद्रेति । अङ्कोलतण्डुलमङ्कोलबीजम् । महाभेरीहरिद्रकान्दादि प्रत्येकं चूर्णीकृतमर्धपलमितं गृहीत्वा पञ्चपलं तुत्थं च सर्वमेतत्स्त्रीस्तन्येन पिष्ट्वा प्रशस्तनालघटितसपिधानमूषासु वृन्ताकमूषासु । अथवा कस्मिंश्चित्तत्तुल्यमूषान्तरेऽपीत्यभिप्रायेण बहुवचनम् । तास्वन्तर्लिप्तं कृत्वा कोकिलपूर्णासु सतीषु ध्मानेन सत्त्वं निष्कासयेत् । पोटल्या वक्ष्यमाणगन्धकादिपोटलीरसेन । कोष्ठाश्रितं गुल्मस्यान्तर्विद्रधेर्वा पचनात्परिपाकात्पश्चात्पक्वस्य तस्य तस्य भेदेन बहिर्निःसारणार्थं भक्षणाय दास्यमानेषु वक्ष्यमाणक्षारवटीप्रभृतिनानाविधेषु क्षाररसेषु मिश्रणार्थमेतत्सत्त्वं प्रशस्तम् । द्विनिष्कमितं तत्सत्त्वं लौहे कटाहे धृत्वा तत्र घृतं दत्त्वा मन्दाग्निना तस्मिन्नावर्तिते द्रुते सति तत्र शाणमितं पारदं निम्बुरसेन प्रवेशितं मर्दनेनाग्नियोगेन च सत्त्वलीनं कृत्वा शरावसंपुटितं रसं भ्राष्टानां संतप्तानां वालुकानामाढके स्थितं कृत्वा वालुकापुटं दत्त्वेत्यर्थः । तथा खारीपरिमिततुषेण च पुटं दत्त्वा पक्वं स्वाङ्गशीतं च संमर्द्य तत्र जसदभस्म तत्त्वनिर्वृत्तिकां वाऽष्टनिष्कमितां दत्त्वा निष्कचतुष्कं सुन्दरं कान्तभस्म प्रक्षिप्योत्तमवराटभस्म षोडशनिष्कमितं प्रक्षिप्य सर्वमेतदम्लस्य जम्बीरस्य रसेन सार्धप्रस्थमितेन संमर्दितेनैतेन रसेन जम्बरीमूलकल्कालिप्तयोः शरावाख्ययोर्मृत्पात्रयोरन्तर्लेपं कृत्वा तयोः पात्रयोः संपुटं कृत्वा तं सूतकं करीषार्धभारेण पुटे पचेत् । यदि रसोऽयं हीनपक्वः स्यात्तदा कृष्णवर्णः स्यात् । सुपक्वस्तु शङ्खसमपाण्डुरः स्यादिति । अन्त्रवृद्धिहरं योगमाह—चूर्णमिति । रस इति । क्षीरपलद्वयमिति । अयं रसोऽत्र पठितुं न युक्तः । एकविंशाध्याये वक्ष्यमाणत्वात् । योऽयं पाठो दृश्यते स लेखकदोषादिति बोध्यम् । अन्त्रवृद्धिनाशकान् योगानाह—कर्षैकमिति । गोमूत्रेति । दध्यारनालेति । आरनालं काञ्जिकम् । ताम्रचूडः कुक्कुटः । अन्त्रवृद्धिहरमिति । वार्ताकमिति । कुक्कुटं कुक्कुटमांसं जले षोडशांशे पक्त्वा । गुल्मपूर्वरूपमाह—उद्गारेति । आसन्नगुल्मस्य भाविगुल्मस्य । गन्धकादिपोटलीरसमाह—गन्धकमिति । शिलाह्वं मनःशिला । मिथः सममेतत्सर्वं कषायादिषु सप्तवारं पृथग्भावयित्वा गोलकं विधाय वस्त्रेणाऽऽवेष्ट्य मल्लमूषायामवरुध्य भूधरपुटे पचेदित्यर्थः पोटलिकाशब्देन सूचितः । ज्वालाग्राहिगन्धकादिघटकत्वादस्य रसस्य भूधरपुटेन पाकोऽत्र निर्दिष्टः । एतद्रसशीलनावसरे प्रत्यहं रोगिणा पलमितपञ्चकोलचूर्णमिश्रान्नभक्षणशीलेन भाव्यम् । अथ विशिष्टचूर्णान्नयोग्यस्यैव रसस्य प्रयोगान्तरमाह—वर्षा-

भ्विति । वर्षाभूर्दीर्घपत्रा पुनर्नवा । कारवी अजमोदा । शौण्डी पिप्पली । सूचीच- व्यवचासनामिति पाठान्तरम् । सूची यवो गोक्षुरं वा । चव्यं चविका । असनो बीजकम् । तिलः कृष्णातिलः । अक्षिरक्षिभेषजं लोध्रः । बिभीतकस्तत्सहितम् । आबाणा बाणविशिष्टा निशा । कर्कन्धूः सूकरी । बाणो नीलसहचरः । निशा हरिद्रा । ककन्धूः क्षुद्रबदरम् । सूकरी कपिकच्छूः । इन्दुरेखा बाकुची । अब्दो मुस्ता । नीलज्योतिर्दिव्यौषधी रात्रौ प्रकाशमाना तृणरूपा । अयो लोहभस्म । अमृता गुडूची । बहुवल्लरी बहुमञ्जरी तुलसी । कृष्णकाम्बोजिका कृष्णगुञ्जावल्ली । गवाक्षी इन्द्रवारुणी । रजनी हरिद्रा । कृष्णा पिप्पली । वेल्लं विडङ्गम् । कटिल्लकं वर्तुलपत्ररक्तपुनर्नवा । सर्वं पृथङ्मानिकांश(?)मर्धप्रस्थं गृहीत्वा सर्वतुल्यभूशर्क- रया युतं कृत्वा प्रत्यहं कर्षमितमेतद्भक्षणावसरे पादांशेन पादार्धमात्रं वा गन्ध- कादिपोटलीचूर्णयुतं कृत्वा त्रिवारक्रमेण घृतगुडमधुभिः सह भक्षयेत् । ईदृशं भेषजं दातुं योग्यं भवेत् । कस्य नरस्य रोगिणस्तदाह–हैयंगवीनादिवर्तिनः । हैयंगवीनं ह्यस्तनदुग्धजं घृतम् । शाल्यन्नं कृष्णवर्णगवां क्षीरं तद्वर्तिनस्तन्मात्राहारवत इत्यर्थः । मण्डलमेकचत्वारिंशद्दिनपर्यन्तं पथ्यमेतद्भेषजमन्नं च प्रत्यहं खादेत् । त्रिफलाबी- जा( नि )नां संकुट्य कल्कं कृत्वा तस्माच्चतुर्गुणं तिलतैलं प्रक्षिप्य तैलापेक्षया चतु- र्गुणं जलं दत्त्वा तैलशेषं पचेदिति त्रिफलाबीजतैलं ग्राह्यम् । अथ वङ्गेश्वररस- माह—भस्मसूतमिति । रजनी हरिद्रा । अथ प्लीहानाशकयोगानाह—पञ्चाङ्ग- मिति । देवदाली जीमूतः । एरण्डफलसमानफला भूमौ प्रसरणशीला वल्ली देव- डङ्गरी इति महाराष्ट्रभाषायाम् । शिवा हरीतकी । लवणमिति । राजी सर्षपः । समूलपत्रमिति । शरपुङ्खेति । वज्रक्षारमिति । वज्रक्षार एकोनविंशाध्याये वक्ष्यमाणः । काञ्चनीति । काञ्चनी हरिद्रा । प्लीहिनामिति । अर्कक्षीरमिति । अथ शिखिबाडवरसमाह– मारितमिति । समं मिथः समभागम् । नागवल्ली ताम्बूलवल्ली । सुवर्चलं क्षारवि- शेषः । अथ दीप्तामररसमाह—शुद्धं सूतमिति । शाकवृक्षो विशालपत्रो रक्तरसः साग इति लोके प्रसिद्धः । सर्पाक्षी तिक्तरसा । श्वेतसर्पशरीरसमानवर्ण- कन्दा कन्दवल्ली । नाइकन्देति मालवदेशे प्रसिद्धा । विद्याधररसमाह—गन्धक- मिति । रसगन्धककज्जलीं विधाय पश्चाद्द्रव्यान्तरमेलनं कार्यमिति संप्रदायः । स्नुग्भवेन स्नुहीजेन । अथ रक्तगुल्मजलोदरनाशयोगानाह—तिलक्वाथ इति । नष्ट- पुष्प आर्तवनाशे । देवदार्विति । कणा पिप्पली । पारदमिति । वज्री स्नुही । तद्दुग्धमनुपानार्थं गृह्णीयादित्यर्थः । सैष वटी । अथ वैश्वानररसमाह—विष्णु- क्रान्तेति । विष्णुक्रान्ता वर्षाद्भवो नीलपुष्पः क्षुद्रक्षुपविशेषः । जेपालं दन्तीबीजम् । लाङ्गली कलिकारी । उपविषगणिता कन्दवल्ली कळलावीति महाराष्ट्रभाषायाम् । धवचिञ्चा चिञ्चासमानपत्रा । इयं वाराणसीदेशे प्रसिद्धा वृद्धिरोगस्थजलशोष- णीति श्रूयते । तासां सारेण रसेन । सूतगन्धककज्जलीं विष्णुक्रान्तादि च सर्वं-

मेतत्पञ्चदश दिनानि भावयेत् स्वेदयेन्मृदुनाऽग्निना । मूषासंपुटितं कृत्वा तुषाग्निना यामद्वयपर्यन्तं गजपुटं देयम् । अग्निकुमाररसमाह—जेपालेति । वैगन्धो विशिष्टो गन्धो यस्य स विगन्धः । विगन्ध एव वैगन्धः । गन्धक इत्यर्थः । रसः पारदः । एतेऽग्निमानास्त्रिसंख्यामाना येषु भागेषु तथोक्तान्प्रत्येकं त्रिसंख्याविशिष्टानित्यर्थः । तथाविधान्भागान्गृहीत्वा फलत्रयस्य त्रिफलायास्तथा कटुत्रयस्यापि नव भागान्गृहीत्वा षोडशभागं गवां मूत्रे संमर्द्य वटीं बद्ध्वा सेयमुष्णजलानुपानेनैकत्र युक्ता मिलिता पश्चाद्भक्षिता सती, आदौ मलसमूहं विरिच्योज्ज्वालितो दीपोऽन्धकारमिव सहसाऽकस्माद्गुल्मादीन्निहन्यादिति । कटुत्रयं शुण्ठीमरिचपिप्पलीरूपम् । अथ सर्वाङ्गसुन्दरापरपर्यायं प्राणेश्वररसमाह—शुद्धमभ्रमिति । समभागयो रसगन्धकयोः कज्जलीं कृत्वा ततो रससममभ्रकभस्म तत्र मेलयित्वा तत्र मुशलीरसं दत्त्वा कृतं कल्कं विशिष्टमृन्मयकूपिकामध्ये कृत्वा खटिन्या कूपिकावक्त्रं रोधयेत् । खर्परं रसकं महारसपठितं तज्जमृदा तच्चूर्णेनेत्यर्थः । कृतामिति शेषः । भूगतायां सपादहस्तमितायां करीषपूरितायां गर्तायामिति शेषः । कूपिकां मर्दयेदिति । अन्तर्गतं सिद्धरसं निष्कास्य कूपिकामात्रं मर्दयेदित्यर्थः । तच्चूर्णं खटिनीसहितकूपिकाचूर्णं तत्समभागानि क्षारादीनि यवानिकान्तानि मिथः समानि संचूर्णितानि एकीकृत्य । त्रयः क्षारा यवसर्जकटङ्कणाख्याः । पञ्च लवणानि सामुद्रप्रभृतीनि । ततः सिद्धसूतेन तच्चूर्णं संयोजयेत् । तच्चूर्णेन सह मिलितस्यास्य सिद्धसूतस्य माषमानं भक्षयेदिति । अयं रसः सर्वाङ्गसुन्दराख्यः । तृडभावेऽपि । अपिशब्देन तृट्संभवे तु कामं देयमित्यर्थः सूचितः । तैलाभ्यङ्गाब्रह्मचर्यमिति पाठः साधुतरो भवेत् । स तु नोपलभ्यते । अथवा लेखकदोषादत्र दृश्यमानपाठोऽसाधुरेवेति बोध्यम् । गुल्मादिषु ब्रह्मचर्यस्यैव पथ्यत्वात् । पुरो गुग्गुलुः । गुञ्जाकिनी गृञ्जनकन्द इति भाति । अथ गुल्मारिरसमाह—गन्धकमिति । तुत्थकं मयूरतुत्थभस्म । वराटं शङ्खं च भस्मीकृतं ग्राह्यं सर्वत्रापि । वह्निश्चित्रकः । चिरिबिल्वः करञ्जः । तस्य त्वग्रसेन । अथाग्निमुखं रसं शूलचिकित्सार्थमाह—मृतसूताभ्रकमिति । मृतसूतादिफलत्रयान्तं सर्वं तुल्यभागं गृहीत्वैकदिनपर्यन्तं संमर्द्य ततो विषमुष्ट्यादीनां जम्ब्वन्तानां पृथग्रसेन च भावयित्वा सर्वसमभागं पञ्चलवणं दत्त्वाऽऽर्द्रकरसेनैकदिनपर्यन्तं पेषयेत् । विषं वत्सनाभम् । फलत्रयं त्रिफला । विषमुष्टिः कुपीलुः । जयाऽगणिका । वासाऽटरूषः । विजया हरीतकी । रक्तशाकिनी रक्तदण्डपत्रं मारीषशाकम् । महाराष्ट्री—अकारकरभसदृशजिह्वासंवेदनरसा ग्रन्थिदण्डा मराठी इति लोके प्रसिद्धा (?) । पुष्करमूलं पद्मपत्रकः । वातशूलनाशकयोगावाह—हरीतकीति । कलिङ्गेन्द्रयवा इति । कलिङ्गा कर्कटशृङ्गी । कर्षैकमन्नपानमिति । चिञ्चाक्षारमिति । त्रिनेत्राख्यं रसमाह—खण्डितमिति । शुल्वं ताम्रभस्म । तथा पारदभस्म पुटे पचेत् । गजपुटे पचेदित्यर्थः । शूलशान्तिमवाप्नु-

यादित्यनुवृत्तिरत्र कार्या । शूलनाशकयागावाह—सैन्धवमिति । टङ्कणमिति । मूर्छितं रसं रससिन्दूरादिकम् । जम्बूमांसाज्ययोर्यूषमिति । चिन्तामणिरसमाह—सूतेन गन्धमिति । गोलं कृत्वा तं च रविसंपुटस्थमर्कपत्रैः संपुटितं कृत्वा मृदाऽऽर्द्रमृदाऽङ्गुलस्थूलं लिप्त्वा शुष्कं तं लवणयन्त्रेण पचेदित्यर्थः । शीते तस्मिन् पादांशेन गन्धकं वत्सनाभं च दत्त्वा लोहकटाहमध्ये तच्चित्रकरसेनाल्पकालं पचेदिति । वाताग्नितैलमेरण्डतैलम् । रसोऽयं महाध्मानगुल्मादीन् हन्तीति । अथ शूलकेसरिरसमाह—शुद्धसूतमिति । शुद्धं ताम्रं गृहीत्वा गृहीतताम्रमय एव संपुटे तत्कज्जलीरूपं भेषजं निरोधयेत् । तत्संपुटं मृद्भाण्डे पूरितलवणमध्ये धृत्वा मृद्भाण्डमुखं पिधाय संधिलेपं कृत्वा गजपुटे पचेदिति । पिबेत्, अनुपिबेत् । वन्ध्येति । वांझ कर्टोलीति ख्याता लोके । अथाभ्रकादिरसमाह—अभ्रमिति । संस्कृतं शुद्धं भस्मीकृतम् । समाहृत्यैकीकृत्य । स्वरसंख्यके सप्तपलसंख्यके । घनतन्तुना वस्त्रेण सुपूतं गालितं प्रत्येकं पलोन्मितविडङ्गादीनां चूर्णमष्टौ मापानेकैकमाषाधिकवर्धनक्रमेणैवाष्टमाषमात्रापर्यन्तम् । वातशूलास्त्ररसमाह—रसेनेति । रससमेन पारदेन ताम्रापेक्षया द्विगुणगन्धेन च मिथो मिलित्वाऽऽतपे मर्दयित्वा पङ्कीभूतेन तेन कण्टकवेध्यताम्रदलानि लिप्त्वा वस्त्रेण बद्ध्वा सामुद्राख्यलवणेन यवसर्जकटङ्कणक्षारैश्च तद्वेष्टयित्वाऽऽर्द्रमृदाऽङ्गुष्ठस्थूलं संलिप्य गजपुटं दद्यात् । ततो निष्कास्य तेषां ताम्रदलानां चूर्णं कुर्यात् । तत्समभागेन प्रत्येकं धत्तूरादीनां चूर्णेन शाणमितविषचूर्णेन च मिलित्वा त्रिदिनं मर्दयेत् । आर्द्रमार्द्रकम् । अथ शूलान्तकरसमाह—भस्मसूतस्येति । खस्याभ्रकभस्मनः । हलिनीकन्दं लाङ्गलीकन्दम् । त्रिवृतान्तं सर्वं समभागं विचूर्ण्य तामलकीरसेनैव सप्तधा भावयेत् । अग्निमुखरसमाह—पारदमिति । मणिमन्थं सैधवम् । विषमतिविषम् । अग्निश्चित्रकः । शाकन्धः काञ्चनो मृदुकिंचित्पीतश्वेतपुष्पो युग्मपत्रः कचनारेति ब्रिजभाषायाम् । रक्तमारीषस्ताम्रपत्रदण्डस्तण्डुलीयकसमगुणः शाकविशेषः । लालमाठ इति लोके । जया हरीतकी । जयन्ती अरणिका । पारदाद्यटरूषकान्तं विषातिन्दुकं च सर्वं मिथः समं चूर्णीकृत्य जयाजयन्तीकषायैः मर्दयित्वा शुष्कं तत् कुक्कुटपुटे पचेत् । विषतिन्दुकं कुचला इति लोके । सौवर्चलं रुचकम् । संचलखार इति लोके । त्रिनेत्ररसमाह—रसेति । पारदानीनां पूर्वपूर्वापेक्षयोत्तरोत्तरं त्रित्रिगुणैर्वर्धितभागानां कज्जलीं जम्बीररसेन संमर्द्य गजपुटं दत्त्वा कृतं भस्म गुञ्जामितमार्द्रकादिचूर्णयुतमेरण्डतैलमधुयुतम् । अथवा सैन्धवंहिङ्ग्वादियुतं शूलं शमयति । अस्य रसस्य साधारणं सर्वशूलनाशकत्वमुक्त्वा योगवाही रसोऽयमिति युक्त्या पृथक्शूलांस्त्रिविधानपि शमयतीत्याह—तत्तद्रसेति । जयाजयन्त्यादिरसैर्भावितश्चेदयं रसो धत्तूरचित्रार्द्रकत्रयोपचूर्णोपेतो वाऽऽर्द्रकरसोष्णजलाद्यनुपानोपेतो वाऽनिलशूलार्तिहरः । तथा विडङ्गत्रिफलावह्नित्रिकटूनामुपचूर्णेन युतोऽयं रसो भृधात्रीरसरसानुपानेन दन्तीरसानुपानेन

र्वो कफशूलहरो भवति। पक्त्याख्यपित्तशूलं तु शमयत्येव। रसोऽयं यदि हरिणशृङ्ग-भस्माद्युपचूर्णयुतो घृतमध्वाद्यनुपानोपेतश्चेदिति । अथोदयभास्कररसमाह—तोलतुल्य-मिति। यथोक्तभागरसगन्धकयोः कज्जलीं निम्बुनीरेण संमर्द्य कल्कं विधाय तेन कण्टकवेध्यद्वितोलमितताम्रपत्राणि संलिप्तानि कृत्वा खल्वे तानि निम्बुरसेनाऽऽप्लाव्य तीव्रातपे स्थापयेत्। ततो नवनीतसममृदुभूतानां तेषां पिण्डं विधाय मूषामध्ये निरुध्य चुल्ल्यां वनोपलपूरितायां कुक्कुटपुटत्रयेण पचेत्। पर्णखण्डिकया ताम्बूलीदलखण्डेन सह। शूलगजकेसरिरसमाह—पलप्रमाणसूतेनेति। सूतादीनां यथोक्तभागमितानां कज्जलीं पलमितताम्रस्य कृतसंपुटमध्ये निदध्यात्। तत्र संपुटघटकं न्युब्जमूर्ध्वपात्रं विस्तीर्णमुखं-कार्यम्। तन्मुखेन संग्रस्तं तन्मुखान्तःप्रवेशयोग्यमुत्तानतलपात्रमुखं कार्यमित्यर्थः। पिधा-नेति। एतत्संपुटविशेषणम्। आक्षिपेदिति। आकण्ठामिति। राजहस्तमितगर्ताकण्ठपर्या-प्तलवणपूरणयोग्योदरं विशालमृन्मयपात्रं चुल्ल्यामुपरि निधाय तन्मध्ये लवणेनार्धभागं संपूर्य संपुटं निधाय पटुचूर्णं लवणचूर्णं तत्पात्रकण्ठपर्यन्तमापूरयेदित्यर्थः। तां पात्रकोष्ठिकां पिधानेन पिधाय निरुध्य मृदादिना संधिरोधं कृत्वा संशोष्य भाण्डाख्यगजपुटेन पचेदित्यर्थः। अथवा तामिति कज्जलीविशेषणम्। तन्निधानमुक्तमेव। तदुत्तरं किं कार्यं वक्तुमवशिष्टं तदाह—निरुध्येति। पुटसंधिरोधविशोषणं कार्यमित्यर्थः कार्यः। प्रहरद्वयपर्यन्तं चुल्ल्यां तीक्ष्णाग्निं दत्त्वा पिधानं निष्कास्याग्निवर्णलवण-दर्शनेन पाकः सम्यक्समभूदिति बोध्यम्। पटचूर्णं कज्जलीसहितसंपुटस्य मर्दनेन वस्त्रगालितं चूर्णं कृत्वेत्यर्थः। सिन्धुमध्ये काचकूपीमध्ये। क्षारताम्रमाह—पलमितेति। वसु-मितोऽष्टसंख्यामितः। ताम्राष्टकमाह—हिङ्ग्विति। व्योषं शुण्ठीमरिचपिप्पलीरूपम्। तिन्तिणी-क्षारं चिञ्चाक्षारम्। वाडवानलगुटिकामाह—तालादिसूतान्तं मिथस्तुल्यं गृहीत्वा तत्सर्वं समं पृथगरुणादित्रयं दीप्यकान्तैः सर्वैः समं त्रिकटु गृहीत्वा सूतान्तानां कज्जलीं पृथक्कृत्वा सर्वमेतद्राहिङ्गूदकेन सप्तदिनैः सप्तवारं भावयेत्। ताप्यं माक्षिकभस्म। गगनमभ्रक-भस्म। कुनटी मनःशिला। अरुणं रक्तापामार्गः। मधुरं यष्टीमधु। दीप्यको यवा-नी। जयन्ती अरणिका। काकमाची पीतपाकफलः श्वेतपुष्पः क्षुपः। मकाय इति ख्यातः। अग्निकुमाररसमाह—रसगन्धकयोरिति। अमृतं विषम्। निरुध्येति। काचकूप्यां निरुध्य मुखमुद्रां दत्त्वा। मन्थानभैरवे तत्प्रणीतग्रन्थ इत्यर्थः। दिष्टः कथितः। शूलघ्नयोगानाह—शम्बूकमिति। शम्बूकं जलशुक्ति-भस्म। इन्द्रवारुणिकेति। इन्द्रवारुणिका गवाक्षी। कडूवृन्दावन इति ख्याता लोके। वराहकन्दो भूदारः। आरनालं काञ्जिकम्। घृतेनेति। सुवर्चलं लवणं सौवर्चलाख्यम्। क्षारवटीमाह—अमृतमिति। अमृतं विषम्। मेघभस्म अभ्रकभस्म। सुभास्करं सुष्ठु ताम्रभस्म। अथामृतार्णवरसमाह—रसभस्मेति। पूर्णचन्द्ररसमाह—मृत-सूतेति। मृतसूतादिताप्यभस्मान्तं मिथः समभागं सर्वतुल्यं क्षौद्रं घृतं चैकीकृत्य

सर्वं विमर्दयेत् । अथ वडवाग्निमुखरसमाह—शुद्धसूतमिति । तत्राऽऽदौ स्थौल्यचिकित्सायां प्रथमं तावत्पञ्च कर्माणि वमनादीनि लङ्घनाद्यैः सहोपाचरेत् । उपवासपेयाविलेप्यादिलघुभोजनाल्पमात्रभोजनैः क्रमेणोपाचरेदित्यर्थः । तथाऽऽर्द्रकाद्यपि सेवेत् । अथाग्निकुमाररसमाह—गन्धकेनेति । कर्षमात्रं कर्षमितम् । तत्सकृदेव दत्त्वा कज्जल्या सह तन्मर्दयित्वा हंसपादीरसेन पुनर्मर्दयेत् । अथवा तदेव विषं वत्सनाभाख्यं त्रुटिशो मुहुर्मुहुर्दत्त्वा कुडवार्धमितैस्तैर्हंसपादीरसैर्मर्दयेत् । शुल्वेति । तृतीयार्थे सप्तमी । शुल्वेन ताम्रमय्या चक्रिकया काचकूप्या मुखनलिकां पिधाय । देवीशास्त्रे तु कर्षमितविषचूर्णं काचकूप्यां मध्ये गोलकानां तेषामूर्ध्वाधः कृत्वा विनिक्षिपेत् । कज्जलीमयान्गोलकांस्तु मध्ये निक्षिपेत् । एवं कृते सति पाकेन सिद्धं तद्भेषजं श्रेष्ठगुणं भवतीति प्रोक्तम् । ताम्रेण सह ताम्रचक्रिकया सह मर्दयेत् । देवीशास्त्रे चण्डिकाकृतग्रन्थे । जूर्तिं ज्वरम् । रतितुल्यो रक्तिकामितः । अर्धपर्णान्वितस्ताम्बूलपत्रखण्डेन चूर्णितेन मिश्रितः। जलकूर्मेति । जलगदो जलोदरम् । कूर्मगदो यकृत्प्लीहात्मकः । मलयजः सुगन्धबहुलश्चन्दनः । घनसारः कर्पूरः । सौभाग्यं टङ्कणम् । मेघनादाङ्घ्रि तन्दुलीयकमूलम् । वैकृते विकृतौ । कुमारीगिरिलेपो गृहकन्यात्वगन्तर्मांसलेपः । अमृतबन्धुकः क्वाथो गुडूचीक्वाथ इत्यर्थः । अथाम्लपित्तलक्षणम् । तत्र भेदानुरोधेन साधारचिकित्सां चाऽऽह—अम्लोद्गारेति । वमनमिति । अरिष्टो निम्बः । अथ लीलाविलासरसमाह—शुद्धसूतमिति । लघुपुटेऽर्धेभपुटे । पूर्वसूतं पक्वमेनं सूतं तावता पञ्चविंशतिवारेणेत्यर्थः । कूष्माण्डखण्डमाह—कूष्माण्डस्येति । अमृतं लघुपुटे पचेत् । मृद्वग्नि मृदुपाकं पचेदित्यर्थः । तथाऽन्यत्तद्वदध ऊर्ध्वगामि रक्तपित्तादिकम् । अथ ताम्रद्रुतिमाह—पलमिति । दन्तशठस्य जम्बीरस्य । पर्णानि ताम्रमयानि दलानि । नान्यथैतत्सत्यमित्यर्थः । क्षयं धातुक्षयम् । शोषं राजयक्ष्माणम् । अथ पित्तान्तकरसमाह—मृतसूतेति । अमृता गुडूची । जलमण्डपिका शैवालम् । वासा अटरूषकः । दशसारचूर्णमाह—मधूकपुष्पमिति ॥

इत्यष्टादशाध्यायपूरणिका ।

---

## अथैकोनविंशोऽध्यायः ।

**मूलम्**—उदरं सजलं यस्य० शोफशूलेषु योजयेत् ॥ २१ ॥ **टीका**—उदरस्य समासतो लक्षणमाह—उदरमिति । जीमूतेति । जीमूतोऽभ्रकम् । विषमतिविषम् । दीप्यो यवानी । विनोदविद्यारसमाह—रसेन्द्रेति । उदरघ्नरसमाह—अष्टाविति । रसं पारदम् । मृत्युंजयरसमाह—द्विक्षारमिति । शतपुष्पा मिशिः । त्रैलोक्यसुन्दररसमाह—शुद्धसूतमिति । द्विगोमूत्रैर्द्विगुणगोमूत्रैः । महावह्निरसमाह—चतुःसूतस्येति । जयन्ती अरणिका । स्नुकपयः स्नुहीपयः । वह्निश्चित्रकः । वातारितैलमेरण्डतैलम् । अर्कपत्रं ताम्रपत्रम् । अन्तःपुटे स्थालीयन्त्रमध्ये पचेत् । क्षारार्धमेतत्सर्वं चेति पाठः ॥ २१ ॥

**मूलम्**—खदिरं देवदारुं च० गदी पथ्यं गदापहम् ॥ ६७ ॥ **टीका**—वैश्वानररसमाह—रसगन्धेति । सूर्यप्रभागुटीमाह—भाङ्गींति । जयायुगमरणिका हरीतकी च । कदली कदलीक्षारः । केसरी अटरूषः । विषद्वंद्वं वत्सनाभ मरुणं महाविषम् । शल्वफलमामं मदनफलम् । लताबीजं लताकस्तूरीबीजम् । विरूढकमङ्कुरितं तद्बीजमेव । उदयमार्तण्डरसमाह—पलोन्मितस्येति । सिद्धं पुटयन्त्रे पाचितम् । पाण्डुरोगे चिह्नमुक्त्वा हंसमण्डूरमाह—मण्डूरमिति । ग्रन्थिकं पिप्पलीमूलम् । पाकान्ते कटाहे गोमूत्रकृतपाकान्ते । कालविध्वंसनरसमाह । पिष्टं पिष्टिकां कुर्यात् । दोलायन्त्रादाकृष्य पिष्टीभूतं बन्धयेत्कौशेयवस्त्रे । पुनः पुनः प्रतिलघुपुटोत्तरम् । बृहती वन्यवृन्ताकम् । पञ्चाननरसमाह—मृतं कान्तमिति । मूषामध्ये शरावसंपुटमध्ये । पुटेत् तुषाग्निना गजपुटे पचेत् ॥ ६७ ॥

**मूलम्**—एकैकपलगन्धाश्म० हन्ति पाण्डुं सकामलाम् ॥ ११५ ॥ **टीका**—आरोग्यसागररसमाह—एकैकपलेति । ताम्रपत्रेण गलपर्यन्तमन्तः प्रवेशिना गलपर्यन्तं रुद्धमुखान्तर्भागां मूषां वस्त्रमृद्भिः परिरोधयेत । ताम्रभस्मेति । पाण्डुहरीतकीमाह—कोरण्ट इति । प्रपूरयेत्षष्ट्यधिकशतत्रयसंख्याम् । पित्तपाण्डवरिगुटिकामाह—रसस्येति । अनेकभागा वह्न्यादीनां क्रमेण त्रिचतुरादिभागाः कुटजस्याष्टौ भागा ग्राह्याः । त्रैलोक्यसुन्दररसमाह—रसगन्धकेति । सूकरः कन्दः । विजयागुटिकामाह—पलत्रयमिति । जयपालरसमाह—रसगन्धमिति । आज्यसंयुक्तमाज्यपक्वम् । कामलालक्षणं समासत आह—दग्धमांसेति । अपामार्गेति । त्रियोनिरसमाह—ताम्रस्येति । उत्प्लुत्य खल्वमधे रसं ताम्रं च निधाय मर्दकेन पारदं ताम्रे मुहुर्मुहुरुत्पात्य मेलयेत् । मुस्तादिचूर्णमाह—मुस्तेति । कामेश्वररसमाह—पलं सूतमिति । प्रतिसार्धं प्रत्येकं द्रव्यं सार्धं पलम् । कांस्येनेति । कांस्यभस्मना तुल्यभागः पिष्टीकृतशिलया सह मारितो रसो मृततीक्ष्णादिनैकीकृतो हलीमकं हन्ति । सिन्दूरभूषणमाह—शुद्धसूतमिति । सिन्दूरं पाषाणमध्य उत्पन्नमेव ग्राह्यम् । हिङ्गुलाकृष्टं वालुकायन्त्रणाचितं वेति केचित् । सचक्रिकां सवर्तुलाम् । पूर्णोक्तां ताम्रमयीम् । प्रपुटेद्र भूधरपुटे । मूषारूपं रसं च चूर्णीकृत्य ॥ ११५ ॥

इति रसरत्नसमुच्चयटीकायां खरेइत्युपाह्वेन वामनात्मजेन चिन्तामणिना कृतायां सरलार्थप्रकाशिन्यां चिकित्सास्थाने एकोनविंशोऽध्यायः ॥ १९ ॥

———

## अथैकोनविंशाध्यायपूरणिका—

उदरा( दि )चिकित्सां वक्तुकामः सर्वोदराणामन्ते जलविशिष्टत्वात्तत ऊर्ध्वमसाध्यत्वाच्च प्रथमं जलोदरलक्षणं समासत आह—उदरं सजलमिति । सदोषं वातादिदोषलक्षणविशिष्टम् ।

शोषो मुखशोषः । वातोदरलक्षणमाह—उदरं वातसंपूर्णमिति । सकलोदरघ्नीं गुटिकामाह—जीमूतेति । जीमूतमभ्रकभस्म । अलं हरितालम् । अग्निश्चित्रकः । कुष्ठमुपलेट इति गुर्जरभाषायाम् । कोष्ठेति महाराष्ट्रभाषायाम् । विषं वत्सनाभम् । दीप्यं यवानी । लुलितं मर्दितम् । विनोदविद्याधररसमाह—रसेन्द्रेति । दन्त्यादिचूर्णमाह—अष्टाविति । अपि चेत्, यद्यष्टभागेन गृहीतं स्यात्तदेत्यर्थः । रसं पारदम् । अथ मृत्युंजयरसमाह—द्विक्षारमिति । द्विक्षारं यवसर्जकाख्यम् । त्र्यूषणं त्रिकटु । पञ्चलवणं सामुद्रसैन्धवविडसौवर्चलटङ्कणाख्यम् । शतपुष्पा शोफ इति लोके । पीततोयं पीततोयानुपानम् । सर्वोदराणामादावस्य रसस्य दानात्प्राक् । उक्तं विरेचनं विनोदविद्याधराख्यम् । शुद्धे निर्दोषकाये सति । अथ त्रैलोक्यसुन्दररसमाह—शुद्धसूतमिति । तदुत्तरं पानार्थं पक्वं घृतमाह—पलमेकमिति । चित्रमूलं चित्रमूलचूर्णं द्विवारं गोमूत्रैश्चतुर्वारं जलैश्च तावत्पाच्यं यावत्कल्कं घनरूपं भवेत् । घृतं कल्कापेक्षया चतुर्गुणं ग्राह्यम् । पक्त्वा घृतचतुर्गुणेन जलेन पक्त्वा । अथ महावह्निरसमाह—चतुः सूतस्येति । त्र्यूषं त्र्यूषणम् । जयन्ती अरणिका । भृङ्गः भृङ्गराजः । वह्निश्चित्रकः । वातारितैलमेरण्डतैलम् । एतद्वानोतरं जलोदरे तदितरसर्वोदरे च कर्तव्यमाह—नाभ्युत्तर इति । गुडेति । अथ वज्रक्षारमाह—सामुद्रमिति । काचं बांगडखार इति प्रसिद्धम् । सुवर्चलं सौवर्चलं रुचकेत्यपरपर्यायम् । संचल इति लोके प्रसिद्धम् । अर्कपत्रं कण्टकवेध्यं ताम्रपत्रं तच्चानुक्तभागमपि भावितसामुद्रादिक्षारापेक्षयाऽर्धभागमेव ग्राह्यम् । अष्टादशाध्यायोक्तवातशूलास्त्रे तथैव ग्रहणात् । ताम्रपाकतुल्यन्यायेनात्रापि तस्य ग्रहणं तावद्भागमेवोचितमिति भावः । तच्च तेन क्षारेण लिप्त्वा तद्गोलकं शुष्कं विधाय शरावसंपुटमध्ये रुद्ध्वा गजपुटे पचेदिति । ततस्त्र्यूषणादिचूर्णं मिथः समं क्षारापेक्षयाऽर्धभागेन गृहीत्वा गृहीतमेतच्चूर्णं क्षारं चैकी कुर्यात् । उदरादिनाशकयोगावाह—क्षार इति । क्षारो यवक्षारः । सुरदेवदारु तैलदेवदारुकाष्ठम् । दिनैकमिति । वैश्वानररसमाह—रसगन्धकेति । एकविंशतिप्रकारेणैकविंशतिवारमित्यर्थः । अथ सूर्यप्रभागुटिकामाह—भाङ्गीति । वह्निर्भल्लातकः । जयायुग्मं हरीतक्यरणिकाद्वयम् । अभ्रकदली वन्यकदलीफलम् । इयं मेघानां गर्जनाशब्देनापि वर्षणात्प्रागेवाङ्कुरिता भवति । इयं कोंकणे प्रसि[redacted] । चव्यं चविका । पत्रकं तमा[redacted]पत्रम् । क्षारद्वयं यवसर्जकाख्यम् । हरबीजं पारदभस्म । केसरी रक्तशिग्रु । विषद्वयमतिविषा वत्सनाभं च । कणा पिप्पली । शल्यफलमेरण्डफलम् । ब्रह्मबीजं पलाशबीजम् । लताबीजं कङ्गुणीबीजम् । विरूढकमङ्कुरितमेतदुक्तबीजद्वयविशेषणम् । जात्यादिकुसुमाष्टकम् । एकादशाध्यायोक्तरसमूलिकासु मध्ये ' जाती जयन्ती श्रीर्देवी भूकदम्बः कुसुम्भकः । कोशातकी नीरकणेति ' तासामष्टानां कुसुमं ग्राह्यम् । वातारितैलेनैरण्डतैलेन । उदयमार्तण्डरसमाह—पलोन्मितस्येति । अथ पाण्डुचिकित्सार्थं पाण्डुलक्षणं समासत आह—विवर्णतेति । हंसमण्डूररसमाह—मण्डूरमिति । पाकान्ते गोमूत्रे मण्डूरपाकान्ते । नो चित्रमेतन्नाऽऽ-

श्चर्यमित्यर्थः । अव्यभिचारेणास्यानुभूतफलत्वादिति भावः । यन्त्रं दोलायन्त्रम् । पूर्यं पूरणीयम् । बन्धयेद्वस्त्र इति । कौशेयवस्त्रे पोटलिकां बद्ध्वा यन्त्रघटकेष्टिकान्तगर्तमध्ये क्षिपेत् । ततः पोटलीतुल्यभागं गन्धकं जम्बीररसेन संमर्द्य पोटल्या अध ऊर्ध्वं च दापयेत् । एवं तुल्यगन्धकं प्रतिपुटे पुनः पुनर्देयम् । लघुपुटे पचेत् । उपरि पिधानेन पिधाय तदुपरि लघुपुटमेव देयं न तु कपोतपुटम् । तेन ताम्रस्य भस्मीकृतस्य सम्यक्पाकासंभवात् । केवलरसगन्धकपाके तु कठिनद्रव्यस्य तदेव पुटं पर्याप्तं भवतीति भावः । पूर्वजैर्द्रवैः कण्टकारीद्रवैरेव । बृहती वन्यवृन्ताकी । अर्को रूषिका । नक्तमालः करञ्जः । पुटेत् । कपोतपुटे पचेदित्यर्थः । पञ्चाननरसमाह—मृतं कान्तमिति । मूषिकामध्ये शरावमध्य इत्यर्थः । यत्नेन निरुध्य । खटिकागुडादिना प्रथमं संधिलेपं च कृत्वा परिशोष्य पुनः संधिलेपं तेनैव कृत्वा तेनैव च संपुटेद् बाह्यभागं सर्वं लिम्पेदित्यर्थः । रसकज्जलीं गजपुटपाचितस्वाङ्गशीतपूर्वरसतुल्याम् । क्रोडपुटं वराहपुटम् । तालककज्जल्या गन्ध[क]-स्थाने तालकं रससमभागं दत्वा पारदेन सह मर्दनेन कृतया कज्जल्या मातुलुङ्गरसमर्दितकज्जलीसमानभागमातुलुङ्गरसेनैव दशवारं भावयित्वा पचेदिति । ततो [मातु]लुङ्गरसैरेव षोडशभागमितवैक्रान्तभस्मना मिश्रितमेनं रसं दशवारं मर्दयेत् । धनादिलिप्सया सत्कृतं कृतात्मसत्कारं पुरुषं हिनस्तीत्यर्थः । अथाऽऽरोग्यसागररसमाह—एकैकेति । गन्धाश्मा गन्धकः । सुखस्पर्शष्टङ्कणः । सर्वं तत्पक्वमूषाख्यमूषामध्ये निक्षिप्य तां मूषां यथोक्तताम्रपत्रचक्रिकया पिनद्धान्तर्गलां कृत्वा । खोटीभूतं पाषाणवत्कठिनमित्यर्थः । खल्वचूर्णकं खल्वे कृतचूर्णकं तं रसम् । गोलकं विधाय कठिनगोलकमात्राकरणं यदीष्यते तदा शरावे गन्धकपूरितकण्ठे कौशेयवस्त्रबद्धां सिद्धैतद्रसपोटलिकां गन्धकमग्नां धृत्वा तद्बद्धसूत्रं दोलायन्त्रवद्बद्ध्वाऽधःकृततुषाग्निनाऽल्पकालं विपाचयेत् । तेन कठिनगुलिकारूपो रसो भवतीति । अथ ताम्रादिरसमाह—ताम्रभस्मेति । वह्नितोयं चित्रकरसस्तेन परिमर्द्य चुल्ल्यधिश्रिते लोहकटाहे क्षिप्त्वा घटिकाद्वयपर्यन्तं पचेदित्यर्थः । अथ पाण्डुहारिहरीतकीमाह—कोरण्ट इति । शनैर्हृत्वा पात्रात्सकाशाच्छनैर्बहिर्निष्कास्य ताः शोषयेत् । ततो बीजेभ्यस्त्वचं संगृह्य संशोष्य चूर्णयेत् । ततो वक्ष्यमाणद्रव्याणि यथाविधि तत्र मेलयित्वा संमर्द्य कृताभिर्गुटिकाभिः षष्ट्यधिकशतत्रयसंख्यां पूरयेत् । तान्येव द्रव्याणि तद्विधिं चाऽऽह—रसस्येति । किरेत् कुर्यात् । शुष्कपाण्डुर्वातपाण्डुः । पित्तपाण्डुवरिगुटिकामाह—रसस्येति । यथोक्तभागयो रसलोहयोः कज्जलीं विधाय वह्न्यादिचूर्णानां प्रत्येकं भागा अनेकसंख्याका ग्राह्याः । अनेकशब्द एकसंख्यां विहायावशिष्टसंख्याबोधकः । द्विभागो नात्र गृह्यते । तेन त्र्यक्षरात्मकमहच्छब्देनोच्चारितेन । किंतु त्रयो भागा एवाऽऽचार्यस्य विवक्षितास्तेन शब्देन । एवं च त्रिभागमिता एव वह्न्यादयो ग्राह्याः । वह्निश्चित्रकः । अथ त्रैलोक्यसुन्दररसमाह—रसगन्धकेति । सूकरो वराहकन्दः । अत्र रोगे मुखशोषतृष्णाधिक्यं चेत्तदा घृतादिमिश्रितस्त्रिनेत्ररसस्तोयानुपानसहितो देयः । तित्तिरिर्लोके तुत्तुरेति प्रसि-

द्र्धः पक्षिविशेषः। तन्मांसं ग्राह्यम्। त्रिनेत्ररसः पूर्वमष्टादशाध्याये पठितः। अथ विजयागुटिकामाह—पलत्रयमिति। एलादीनां मिलितानां भागोऽर्धपलात्मकः। रेणुकं रेणुकबीजम्। महागन्धः श्रेष्ठगन्धक आमलसाराख्यः। हिमस्पर्शे यदा गुडोऽयं हिमस्पर्शो भवति तदा तं गुडं गृह्णीयाद् गुटिकाकरणार्थम्। विषशान्तये, अत्रस्थवत्सनाभवेगशान्त्यर्थम्। मेघनादस्तन्दुलीयकम्। शोफपाण्डुघ्नं रसमाह—रसं गन्धमिति। रसगन्धकयोः कज्जलीं विधाय तत्र ताम्रभस्म दत्त्वा पुनर्मर्दयित्वा जयपालादि योज्यम्। मितां कलायमितामेव। पाण्डुगदघ्नं योगमाह—देवदाल्या इति। अथ कामलाचिकित्सार्थं तल्लक्षणं तदुपद्रवरोगं च समासत आह—दग्धेति। दग्धमाहारादिविशेषेण विकृतं मांसं रुधिरं च यदा स्यात्तदा तेन कारणेन रक्तपित्तरोगोत्पत्तितो वा भ्रमादिसहिता कामला भवति। तत्र योगमाह—अपामार्गेति। अथ कामलारिरसमाह—तीक्ष्णेति। वालुकायन्त्रेति। वालुकायन्त्रमध्ये काचकूप्यां क्षिप्त्वा मुखमुद्रादानं विना प्रहरचतुष्टयपर्यन्तं क्रमविवर्धिताग्निना पाकेन मूर्छितामित्यर्थः। तं रसं स्वसमभागानां गुडूच्यादीनां चूर्णमिश्रं यष्टीमधुकषायेण पिष्ट्वा सक्षौद्राद्यनुपानः कामलानुद् भवतीति। उत्पलं नीलोत्पलं कह्लारं सौगन्धिकं कमलम्। तयोः कन्दः। त्रियोनिरसमाह—ताम्रस्येति। खल्वे कण्टकवेध्यं ताम्रपत्रं प्रक्षिप्य तत्संनिहितप्रक्षिप्तश्चतुर्थांशमितो रसो मर्दनजातवेगेन ताम्रपत्रोपरि उत्प्लुत्योड्डीय कणशः समंततः पतित्वा ताम्रलेपी भवति। एवं मर्दनेन मर्दनेन ताम्रपत्र उत्प्लवपूर्वकं तेन रसेन लेपं कारयेत्। लिप्तरसं ताम्रपत्रं निम्बुरसेन संयोज्य सूर्यतापे स्थापयेत्। यदा तद्द्रुतं स्यात्तदा तदुद्धृत्य चुल्ल्युपरि मृच्छरावं निधाय तत्र तस्य ताम्रद्रावस्याधोर्ध्वाधो गन्धकं शरावार्धमितं दत्त्वोपरि पार्श्वयोश्चाभितो मत्स्याक्षीखण्डसमूहं प्रसार्य ततोऽङ्गुलिस्थूलमृल्लेपेनाऽऽच्छाद्याधस्थतुषाग्निना यामद्वयपर्यन्तं यावतोष्मणा गन्धको ज्वालावलीढो न स्यात्, तथाऽन्तराऽन्तरा मिततुषदानेनोपरि धूमोद्गमदर्शनेन ज्वालोत्पत्तिपूर्वकालं ज्ञात्वा क्षणं ततोऽवतार्य पुनरधिश्रयणेन च पाचयेदित्यतियत्नपूर्वकपाचनशब्दार्थः। मत्स्याक्षी ह्रस्वदुग्धिका समभूमिसंनिहितप्रसरणशीलस्तत्समतिक्तरसपत्रोऽतिक्षुद्रक्षुपः सकर्दमे जलाशयतीरे जायते। बाम्ब इति महाराष्ट्रगुर्जरभाषायां प्रसिद्धा। हुनगुंदा इति कर्नाटदेशे। मुस्तादिचूर्णयोगमाह—मुस्तेति। यथोत्तरमेकैकभागवर्धितैर्मुस्तादिभिः कृतं चूर्णं शोफपाण्डुघ्नं भवतीति। अमृता गुडूची। अयोरजसा मण्डूरभस्मना सर्व( ह )तुल्येन। समाक्षिकं समधु। कामेश्वररसमाह—पलं सूतमिति। वज्री स्नुही। पथ्या हरीतकी। एतदुभयं त्रयं त्रयं त्रित्रिपलम्। प्रतिसार्धपलं प्रत्येकं सार्धपलम्। विषं वत्सनाभम्। रेणुका रेणुकबीजम्। स्वयं स्वयमेव। अनुपानरहितोऽपीत्यर्थः। हलीमकघ्नरसमाह—कांसेनेति। कंसेन पिष्ट इति पाठः प्रामादिक एव। रोगवारणार्थं पक्तुं गृहीतस्य पारदस्य कंसादिमहामानमितस्य क्वाप्यदर्शनादिति बोध्यम्। समभागकांस्यभस्मना सहितः पारदः

पिष्टो मर्दनेन कज्जलीकृतः । अनन्तरं पारदसमभागमनःशिलां दत्त्वा पुनः संमर्द्य वालुकायन्त्रमध्ये काचकूप्यामसंवृतमुखायां सधूमजारणया पाचितो रसः समभागेन तीक्ष्णलोहभस्मना ताम्रभस्मना च युक्तो हलीमकं हन्ति। अत्र द्रव्यमानकथनं तु न कृतम् । कथितमानाधीनो हि द्रव्यपाककालनिर्णयः। अतः सोऽपि ज्ञातुं न शक्यतेऽल्पमतिभिः। तस्मात्तेषां परिज्ञानार्थमत्र किंचिन्मानं गृहीत्वोदाहरिष्यामि । यदा कांस्यभस्म द्वादशकर्षमितं तत्तुल्यश्च पारदो गृह्यते मनःशिलाऽपि पारदसमा तदा क्रमवर्धितमृदुमध्यतीक्ष्णाग्निना सार्धप्रहरमात्रं प्रहरद्वयपर्यन्तं वा पाकः कार्यः । तावन्मात्रकालेनैव तावती मनःशिला जीर्णा भवति । यावता कालेन हि यावान्गन्धको मृदुमध्यतीक्ष्णाग्निक्रमेण जीर्णो भवति तावतैव कालेन गन्धकमानापेक्षया द्विगुणमानमिता मनःशिला हरितालो वा जीर्णो भवति । सधूमजारणायामिति साधारणो नियमः । प्रहरमात्रः कालः पलमितगन्धकस्य सधूमजारणे पर्याप्तो भवति मृदुमध्यतीक्ष्णाग्निक्रमेण । अत उक्तमत्रोदाहरणे सार्धप्रहरमिति । अनया दिशाऽन्यत्राप्यूह्यं यत्र पाककालस्यानिर्णय इति । नाभियन्त्रादिना गन्धकस्य निर्धूमजारणायां त्वेकप्रहरणार्धपलमित एव गन्धको जीर्यते नाधिक इत्यपि बोध्यम् । सिन्दूरभूषणरसमाह—शुद्धसूतमिति । सिन्दूरो गिरिसिन्दूरः । तस्य भक्षणार्थमुपयोगो न कार्यः । स्वरभङ्गकरत्वादिति । तेन शब्देनात्र पारदक्षारैर्मारितं नागभस्म रक्तवर्णं पञ्चमाध्यायोक्तं ग्राह्यम् । सिन्दूरो नागसंभव इति रावणवचनम् । पारदसिन्दूरयोः पलमितयोर्मर्दनेन कज्जलीं विधाय वासारसेन याममात्रं संमर्द्य चक्रिकां वटिकां कुर्यात् । ततो द्वादशाङ्गुलदीर्घां मूषां महामूषाख्यमूषामुत्तानां कृत्वा तन्मध्ये गन्धकं चतुष्पलमितं क्षिप्त्वा तदुपरि चक्राकारेण कृतं तं रसं धृत्वा पिधानेन पिधाय प्रयत्नेन लघु पुटेत् । भाण्डपुटे पचेदित्यर्थः । गन्धकस्य जीर्णतालक्षणं तु चक्रिकायां रक्तवर्णोत्पत्तिरेव । तत्र कृष्णवर्णता यदि दृश्यते तदा चक्रिकां तां पुटे पुनर्निधाय तुषाग्निर्देयः। लशुनेनेति । सर्वसमुदायापेक्षया दशांशं लशुनं कल्कीकृत्य दत्त्वा लशुनरसेनैव मर्दयेत् ॥

इत्येकोनविंशाध्यायपूरणिका ॥

---

## अथ विंशोऽध्यायः ।

**मूलम्**—कान्तगन्धकतीक्ष्णाभ्र० पामाहृद्ग्रन्थिपिष्टिका ॥ ३७ ॥ **टीका**—पक्व लघुपुटपाचितः । एरण्डेति । चञ्चू रक्तैरण्डः। कृतं तदुत्पादकं प्राग्जन्मीयं कर्म च । चुल्ल्यां तुषाग्निं कृत्वा तदुपरि मृच्छरावमुत्तानं गन्धकपूरितं दत्त्वा तन्मध्ये कौशेयवस्त्रबद्धाभ्रकसत्त्वचूर्णपारदकृतपोटलीमन्तराले लम्बमानां पाचयेत् ।मृद्वग्निं संरक्ष्य भूधरपुटे वा । एवमेव ताम्रपिष्टीं संकोच्य कृतगोलकः। कृष्णवज्राभ्रकस्य यत्सत्त्वं तच्चूर्णमेव तत्संकोचः । सत्रिगुणप्राणदाहरीतकीचूर्णस्तीक्ष्णादि तेषां यथायथं सत्त्वभस्मसंकोचः

विजयवटिकामाह—रेणुकेति । व्योषादिनवकमुपरितनं व्योषाग्निवेल्लेत्यादिकुष्ठादिनाशनः कनकाभ्रकसंकोचः । कनकभस्माभ्रकसत्त्वचूर्णम् । त्वग् दालचिनी । एतत्सर्वं तुल्यभागम् । अजमूत्रेण । श्लेष्मकुष्ठमूत्रजित् । तीक्ष्णभस्म, अभ्रकसत्त्वं हेमभस्मसंकोचः । तैलगन्धकपाचितः । कटाहे । तालादिसिन्दुवारान्तैर्मिथः समैः समन्वितः । आर्द्रकरसेन संमर्द्य बदरनिभो वटिकीकृतः । संनिपातकुष्ठजित् । सर्वेश्वररसः—ताम्रादि प्रत्येकं पलमितं लोहपारदं कर्षमानं स्नुह्यर्कक्षीरेण पाठादिरसेन संमर्द्य वालुकायन्त्रे स्वेदयेत् । कणादिभागं यथोक्तं दत्त्वा । सर्वेश्वररसोऽयं सुप्तिजित् । गन्धकारी राजिकातैलपक्वः । ताम्रभस्मज्वालामुखीरसान्तैः संमर्दितसममाक्षिकरसः संमर्दितः सुप्तस्थिरकुष्ठविषं शमयति । प्रतापलङ्केश्वररसमाह । पारदादि सर्वं मिथो धत्तूररसेन संमर्द्य । प्रतापलङ्केश्वरसंज्ञको विपादिकानाशकः । स्नुह्याद्युक्तभागं कर्षमितं पारदं कर्षमितं गृहीत्वा तीक्ष्णसूर्यातपे कटाहे पक्वं लेपेन कुष्ठकिटिभे वायुं च हन्ति । मर्दित इति । सैन्धवादि च लेपेन सिध्मं हन्ति । वराटपिष्टिः । अपामार्गकृष्णपाठाक्षारं जम्बीरादिरसेन संमर्द्य । मेषशृङ्गीरसः । तथाऽतिक्षारादि सर्वं मेषशृङ्गीरसेन भावितं चतुर्थांशताम्रभस्मना सक्तुकाख्यविषेण च कृतावापश्चर्मकुष्ठं हन्ति । पर्पटीरसश्च मेघनादादि, अश्वगन्धाविषं च संमर्द्य । गजचर्मनाशिनी । रसगन्धादिसमं सर्वं शतारुषि कुष्ठे प्रशस्तं स्यात् । हेममाक्षिकादि सर्वं मिथः समं त्रिगुणं पारदं दशमांशं सक्तुकर्षं दत्त्वा वालुकायन्त्रे मञ्जिष्ठादिकषायेण कषाये विपाचितं कृष्णवर्णमिदं भस्म कुष्ठजित् । गणपाठमाह—मञ्जिष्ठाघनदारुकुष्ठखदिरश्रेष्ठा वचा बाकुची पाठा पर्पटराजवृक्षकटुका यष्ट्याह्वमूर्वानिशा । त्रायन्ती किटिभावेल्लवृषकं निम्बामृता वत्सकं काकोली सदुरालभा च परमः कुष्ठामयघ्नो गणः । श्रेष्ठा हरीतकी । किटिभा गन्धकत्रयम् । त्रिविधो गन्धकः । तालेश्वरः कुर्कुटीपत्रसारं शाल्मलीपत्ररसः । मूषागर्भे मल्लमूषायां पुटितं कृत्वा भूधरयन्त्रे पाचयेत् । हिङ्ग्वादिचूर्णैः संमर्द्यते । शोफे पश्चात्कुष्ठे भक्ताम्बुना पाययेत् । अथवा दुग्धेन घृतेन पाययेत् । कामलायां धारोष्णेनाऽऽर्द्रकरसेन वा । अयं रसः सर्वकुष्ठघ्नः । महातालेश्वररसः—तालादि सर्वं समम् । तालद्विगुणं मृतं ताम्रं गन्धकश्च अम्लेन मर्दयित्वा जम्बीररसे संमर्द्य लघुपुटे पचेत् । जम्बीराम्लेन संमर्दितमेकोनत्रिंशांशं गरलं दत्त्वा माषद्वयमितं संमर्द्य शोधनं कुर्यात् । संनिपात एतन्मधूपकुष्ठेन व्योषेण च हितः ।

इति रसरत्नसमुच्चयटीकायां सरलार्थप्रकाशिन्यां वामनात्मजेन
चिन्तामणिना विरचितायां विंशोऽध्यायः ॥ २० ॥

---

## अथ विंशाध्यायपूरणिका—

अथ विसर्पजिद्रसमाह—कान्तेति । कान्तभस्मादि मिथः समं संमर्द्य तं च समुदायपारदसमं तेन संमर्द्य गोलं विधाय वन्ध्याकन्दे धृत्वा भूधरयन्त्रे पुटेदिति । पुनर्योगान्तर-

माह—एरण्डेति । एरण्डः श्वेतैरण्डबीजम् । अन्येषामपि बीजमेव ग्राह्यम् । तुम्बी कटुतुम्बी । अङ्कोलो दीर्घपत्रः कण्टकिवृक्षः । चञ्चू रक्तैरण्डः । योगान्तरमाह—एरण्डेति । मृ[ कृ ]तिं प्रयान्तीति । गलत्कुष्ठलक्षणमाह—पादयोरिति । साधारणीं तच्चिकित्सामाह—सर्वेषामिति । वातादिकुष्ठानां क्रमेण चिकित्सामाह—विपचेदिति । धनपिष्टीमिति । अभ्रकसत्त्वं समं पारदेन संमर्द्य कृतां कज्जलिकाम् । एवं ताम्रसत्त्वं वा लोहकटाहे गन्धकमध्ये विपचेत् । पाकेनावयवान्संकोच्य कृतो गोलकस्तस्य रक्तवर्णोत्पत्तिपर्यन्तं तुषाग्निना विपचेत् । एवमेव कालाभ्रकस्य कृष्णवज्राभकसंकोचः । तत्सत्त्वमादौ घृते पक्वं पश्चाद्गन्धकपाचितः । व्योषादिभिः समः प्रत्येकं स्वसमभागैर्व्योषादिभिर्नवभिर्युत इत्यर्थः । तथा त्रिगुणाभ्यां प्राणदारेणुभ्यां युक्तः । विषं वत्सनाभम् । प्राणदा हरीतकी । रेणुः पांसुका कासीसभस्म । पञ्चमांशेन स्वर्णभस्मयुतः । कनकाभ्रकेति । कनकाभ्रकसंकोचः स्वर्णाभ्रकयोः सत्त्वम् । तीक्ष्णेति । तालं हरितालम् । ताप्यं माक्षिकभस्म । विशाला इन्द्रवारुणी । बोलः हिराबोळ इति लोके । शृङ्गवेरस्याऽऽर्द्रकस्य । विजयाख्यवटिकामाह—रेणुकेति । रेणुका कौन्ती । कपिलेति लोके । विषतिन्दुकं विषमुष्टिः । कुचला इति लोके । व्योषादिनवकमनुपदमुक्तम् । व्योषाग्निवेल्लेति । सप्तकं सप्तपर्णः । ताप एतद्गुटिकाभक्षणोत्तरं दाहे सति तद्वारणार्थं शर्करादि खादेत् । नागबला महाबला । भेण्डाख्यशाकपत्रसमाकृतिविशालपत्रा । अथ सर्वेश्वरं रसमाह—पालिकमिति । ताम्रभस्मादि प्रत्येकं पालिकम् । तथा कर्षमितं लोहभस्म पारदं च सर्वेषां कज्जलीं विधाय स्नुहीक्षीरादिभिः पृथङ्मर्दितां कृत्वा वालुकायन्त्रे क्रमेण मृदुमध्यतीक्ष्णाग्निना काचकूप्यां मुखमुद्रां विना दिवसत्रयपर्यन्तं पाचयेत् । अलिर्भृङ्गराजः । सुप्तकुष्ठघ्नीं गुटिकामाह—गन्ध इति । गन्धकः सर्षपतैलपक्वो मृतो रसः । उभयं मर्दयित्वाऽनन्तरं प्रत्येकं रससमैरर्कादिचूर्णैर्युतो ज्वालामुखीरसेन मर्दितो यदा घनः स्यात्तदा मधुना मिश्रयित्वा पिण्डीकृतः स्थिरसुप्तकुष्ठं हन्तीति । अर्को रूषिका । विषभेदी विषमुष्टिः । कुचला इति लोके । अभया हरीतकी । ज्वालामुखी ज्वालासमपुष्पी । लाङ्गली तत्कन्दरसो ग्राह्यः । केचित्तु ज्वालामुखी क्षुद्रजम्बूरिति वदन्ति । भाटजांबूळ इति लोके । प्रतापलङ्केश्वररसमाह—विपादिकाघ्नमिति । पारदादिपिप्पलीचूर्णान्तं मिथः समं ग्राह्यम् । ततो रसगन्धकयोः कज्जलीं विधाय तत्रावशिष्टं सर्वमेतद्दत्त्वा काञ्चनपत्ररसेन संमर्दितं विपादिकाघ्नं भवति । पादहस्तस्फोटो विपादिका । संप्रति केषांचित्कुष्ठानां नाशकान्पृथक्प्रयोगानाह—स्नुह्या इति । नारिकेलदुग्धं नारिकेलफलमज्जारसः । मर्दित इति । मूलकक्षारोदकेनाऽऽर्द्रकरसेन च मर्दिता गन्धकपिष्टिर्गन्धकपारदकृता कज्जली लेपेन सिध्मं हन्ति । अथवा मिथः समयोर्वराटपारदयोर्मर्दनेन कृता कज्जली जम्बीररसेन मर्दिता सूर्यतापपक्वा सती लेपेन सिध्मं हन्ति । मयूरेति । मयूरक्षारादिशुल्बभस्मान्तं मिथः समं गृहीत्वा मेषशृङ्गीरसेन संमर्दितं लेपेन दद्रुजिद्भवति । मयूरोऽपामार्गः । मोक्षकः कृष्णपाठा ।

त्रिक्षारं यवसर्जकटङ्कणाख्यम् । चतुर्थांशेनेति । पर्पटीरस इति । चतुर्दशाध्याये भैरवनाथोक्तः पञ्चामृतपर्पटीरसस्तत्र पलिकायां कज्जलीद्रावे सति तदपेक्षया चतुर्थांशं ताम्रभस्म तथा सक्तुकाख्यं विषं चाऽऽवपेत् । सक्तुकं श्वेतवर्णं कन्दविषम् । एवं विहितः स रसश्चर्मकुष्ठं हन्ति। मेघनादेति । मेघनादस्तन्दुलीयकम् । अमृता गुडूची । नीली कालाञ्जनरसोपादानभूता गुळीति लोके प्रसिद्धा । गदः कुष्ठमुपलेट इति गुर्जरभाषायाम् । अश्वमेधा अश्वमेधते वर्धयतीत्यश्वमेधाऽश्वगन्धा । अमृतं विषम् । रसगन्धेति । सर्वकुष्ठजिद्रसमाह—हेममाक्षिकेति । स्वर्णमाक्षिकभस्मादि समभागं गृहीत्वा ततो द्विगुणं पारदं च गृहीत्वा गन्धकेन कज्जलीं विधाय पश्चादवशिष्टं द्रव्यान्तरं सक्तुकं च यथोक्तभागं तत्र दत्त्वा मञ्जिष्ठादिवर्गकषायेण संमर्द्य संशोष्य यन्त्रे काचकूप्यां धृत्वा सधूमजारणया कठिनमृदूत्तमशालिमिश्रपाक्यद्रव्यमानानुरोधेन प्रहरचतुष्टयमेकदिनं द्विदिनं वा योग्याग्निं दत्त्वा विपाचयेदिति । सुपाकेन कृष्णमाणिक्यवर्णमेतद्भस्म सर्वकुष्ठघ्नं भवतीति । मञ्जिष्ठादिगणमाह । घनो मुस्ता । दारु देवदारु । कुष्ठं कोष्ठ इति लोके । श्रेष्ठा त्रिफला । त्रायन्ती त्रायमाणा । किटिमार–दुरालभा धन्वयासविशेषः । कुष्ठामयघ्नः कुष्ठरोगघ्नः । सिध्मपामानाशकयोगावाह—आरग्वधेति । सपारदैः । पारदकज्जलीं विधायाऽऽरग्वधरसे तत्कज्जलीसहितगुञ्जादिकल्कं षोडशांशेन दत्त्वा कङ्गुणीतैलं चतुर्थांशं दत्त्वा तत्तैलं यथाविधि पक्वं सिध्मादिघ्नं भवतीति । कटुतैलेन सर्षपतैलन । गन्धकपिष्टिका पारदगन्धककज्जली । तालेश्वररसमाह—हरितालेति । द्विपलमितं हरितालम् । रसस्य द्वे टङ्कणे । एककर्ष इत्यर्थः । तथा गन्धकस्यापि द्वे टङ्कणे । तथा कुर्कुटीरसेन पिष्टं ताम्रभस्म टङ्कणद्वयमितम् । तद्रसपिष्टं तन्मानामितं लोहभस्मापि । सर्वमतदेकीकृत्य प्रत्येकं धात्रीरसेन कुर्कुटीरसेन मधुना च पञ्चवारं संमर्द्य संशोष्य वर्षाभूचित्रकपत्रखण्डपूरितमल्लमूषायां निवेश्य भूधरयन्त्रे संस्थित उपरि लघुपुटेन पाचितोऽयं रसः सिद्धो भवति । तं च पवनव्याधिपीडितो नरस्ताम्बूलीपत्रखण्डरसेन, अथवा हिङ्गुमिश्रजम्बीररसेन, एरण्डतैलेन वा भक्षयेत् । नष्टौजसि शोफे मधूकसारादिचूर्णैर्मिश्रितं कृत्वा जलानुपानेन भक्षयेत् । कुष्ठेऽयं रसो भक्तमण्डेन सह देयः । कामलायां त्वयं रसो घृताद्यन्यतमानुपानेनापि देयः । कुर्कुटी शाल्मली । वर्षाभूः पुनर्नवा । महातालेश्वरमाह—तालताप्येति । एतद्रसपाठे मदनेन वमिं कुर्यादिति पद्यार्धं माषद्वितयसंमितमित्यस्याग्रे पठनीयम् । उक्तः सुशुद्धः पाठः पुस्तकान्तरे दृश्यत एव । यथोक्तभागं वत्सनाभं दत्त्वा संमर्दितमित्यस्याग्रे पठनीयम् । लेखकदोषेणायं विहितो मध्ये पाठः प्रामादिक एव । पुटे पचेत् । भूधरयन्त्रे धृत्वोपरि लघुपुटं देयम् । तालाद्युद्गमेन स्फोटसंभवभयादिति भावः । ततः सिद्धरसस्यास्य षड्भागाः । लोहभस्म चतुर्भागमितं गन्धकमारितं ताम्रमष्टभागमितं सर्वमेतन्निम्बूरसेन संमर्द्य गजपुटपाचितं सिद्धमेनं रसं माषद्वयमितं कुष्ठी नरः शोधनेन शुद्धः सन प्रत्यहं

भक्ताम्बुना सह शीलयेत्। पक्षान्ते पक्षान्ते चामुमेव रसं भक्षयेद्वमनार्थम्। मासान्ते मासान्ते विरेचनार्थं च। केनानुपानेनायं वमनादि कुर्यादित्याकाङ्क्षायामाह–मदनेनेति। मदनेन मदनकषायानुपानेन सह। मदनं मेणफल अथवा गेळफळ इति लोके। पथ्या हरीतकी। तत्कषायानुपानेनेत्यर्थः। क्षयं चेत्यत्र चशब्देन कुष्ठस्य संग्रहः कार्यः। सर्वकुष्ठान्तकृत्तैलमाह—कृष्णाभ्रकमिति। कृष्णवज्राऽभ्रकभस्म। बलिवसा गन्धकम्। नीलज्योती रात्रौ प्रकाशमाना दिव्यौषधी तृणरूपा। तद्रसम्। रसं पारदमभ्रकादिकार्पासतैलान्तं सर्वं समभागं गृहीत्वाऽभ्रगन्धकरसकज्जलीं विधाय तैलसमूहे क्षिप्त्वा मर्दयेत्। तच्च तैलं लेपे भक्षण उपयुक्तं चेत् सर्वकुष्ठघ्नं भवति। कुष्ठघ्नलेपमाह—रसेति। रसादीनि समभागानि गृहीत्वा पारदगन्धाभ्यां कज्जलीं विधाय द्रव्यान्तरं मेलयित्वा मातुलुङ्गरसेन संमर्द्य तत्कृतो लेपः कुष्ठघ्नो भवेदिति। अर्कः शुद्धताम्रचूर्णम्। कनकसुन्दररसमाह—समतुलेति। कनकचूर्णेन समभागं पारदं गृहीत्वा तेन सह संमर्द्य कृता कनकपिष्टी तत्सहिता तत्तुल्या। अभ्रकसत्त्वपिष्टीं द्विगुणगन्धकयुक्तां जलेन गोलकं कृत्वा गोलमूषायां धृत्वा मूषाच्छिद्रं मूषामृदैव निरुध्य शुष्कां खटिकागुडादिना मूषाबहिर्भागे समन्ततो विलिप्य गिरिण्डैर्वराहपुटं देयम्। तत उद्धृतं रसं प्रत्येकं स्वसमभागैस्त्रिकट्वादिभिः स्वार्धभागमितेन वत्सनाभेनैकीकृत्य रससमं शृङ्गीविषं देवदारुं च दत्त्वाऽजामूत्रेण संमर्द्य सिद्धरसोऽयं गुञ्जामात्रया निषेवितो महाकुष्ठमपरमपि रोगं निहन्ति। शृङ्गीविषं कृष्णपिङ्गलं कन्दविषम्। शृङ्गी महोरा इति लोके प्रसिद्धम्। हरिदलाङ्कुशरसमाह–घनभवेति। अभ्रकसत्त्वभस्म कान्तलोहभस्म ताम्रभस्म च सर्वापेक्षया त्रिगुणरसं तुल्यभागं गन्धकं चैभिः सर्वैस्तुल्यभागं टङ्कणं ताप्यभस्म सुगन्धं खण्डसंज्ञं द्रव्यं चन्दनं च संमर्द्य कृतं चूर्णं हरिदलबलखण्डं भवति। हरिदलं कुष्ठविशेषः। तस्य बलं खण्डयतीति भावः। त्रिपुरान्तकरसमाह—रसममृतेति। ऋतं सम्यङ्मृतनमित्यर्थः। तादृशं शृङ्गिकं विषं तदादिकं निशान्तं चूर्णितं मिथः समं गृहीत्वाऽजामूत्रेण पिष्ट्वा बदरबीजतुल्यमानेन कृता गुलिका त्रिविधदोषजं कुष्ठं निहन्तीति। मधुरं मञ्जिष्ठा। दहनश्चित्रकः। सिन्दुवारं निर्गुण्डी। वन्ध्या वन्ध्याकर्कोटकी। कनको धत्तूरस्तद्बीजम्। ऋद्धिर्वृद्धिश्च कोशयामलदेशे प्रसिद्धौ कन्दवल्लीविशेषौ। तल्लक्षणमुक्तं राजनिघण्टे—श्वेतरोमान्वितः कन्दो लताजातः सरन्ध्रकः। तूलग्रन्थिसमो वृद्धिर्वामावर्तफला च सा। वृद्धिस्तु दक्षिणावर्तफला प्रोक्ता महर्षिभिरिति। कृपानिघ्नमनस्कया कृपाधीनमनस्कया। अथ विश्वहितरसमाह–रसेन्द्रेति। एकोनविंशाध्यायोक्तत्रियोनिरसवत्पारदेन लिप्तताम्रस्य। यावकं यवजक्षारम्। हितः। कुष्ठिनामिति शेषः। कुष्ठघ्नानुलेपगुटिकायोगानाह—निर्गुण्डीति। निर्गुण्डीरसपक्वं तैलम्। गन्धकपिष्टिः पारदेन सह मर्दनाज्जाता गन्धककज्जली निर्गुण्डीतैलादि सर्वं समभागं गृहीत्वा संमर्द्य कृतो लेपः कुष्ठघ्नो भवति। महानिम्बस्येति। वर्तुलफलस्यातितिक्तरसस्य निम्बस्य यः सारोऽन्तस्थिररक्तकाष्ठांशस्तत्क-

घायेण मर्दिताम् । कान्ता( आकाशवृन्द्री )पालिकामिति । काकोदुंबारिका खरपत्र उदुम्बरसमानफलः क्षुपविशेषः । कोंकणे खरोतीति नाम्ना प्रसिद्धः । कुष्ठकुठार-रसमाह—रसस्येति । तिलपर्णी तिळवण इति महाराष्ट्रभाषायाम् । तन्म-नीति गुर्जरभाषायां प्रसिद्धा । अलिर्भृङ्गराजः । कर्षकर्षमेकैककर्षमित्यर्थः । तीक्ष्णं मरिचम् । कृमिच्छिदं विडङ्गम् । सितजीरकं शाहाजिरे इति लोके प्रसिद्धम् । कज्जल्यादि सर्वं यथोक्तभागं संमर्द्य तत्स्निग्धमृत्पात्रे भृङ्ग-राजरसेन पचेत् । पाककाले कुष्ठादीनां चूर्णमप्येकैककर्षं तत्र प्रक्षिप्य गुटिकाः कुर्यात् । विश्वा शुण्ठी । अग्निश्चित्रकः । अथ गुञ्जादिचूर्णमाह—गुञ्जेति। रजनी हरिद्रा । उत्तमा त्रिफला। कन्यका गृहकन्यका । घनरवा तन्दुलीयकम् । धूमोद्गमो गृहधूमः । घरोसा इति लोके प्रसिद्धः । एडगजः चक्रमर्दकः । खारी-जलं खारीलवणम् । सर्वं समभागं गृहीत्वा कृतं चूर्णमुद्वर्तनेन पामादिघ्नं भवेत् । वज्रशेखररसमाह—विष्णुक्रान्तेति । घनरसो वालकम् । सर्पाक्षी नाईकन्द इति नाम्ना मालवे प्रसिद्धा कन्दवल्ली । गोजिह्वा पाथरी इति लोकप्रसिद्धं शाकम् । क्षीरिणी क्षीरकाकोली । नीली गुळी इति लोके । ब्रह्मवृक्षः पलाशः । रुद-न्तिका चणकपत्रा सदाऽम्बुकणवर्षणी दिव्यौषधी । रानचणा इति कोंकणे प्रसि-द्धः । निचुलो जलवेतसः । काकमाची मकोय इति ब्रिजभाषायां प्रसिद्धा। कर-डकांगोणीति प्रसिद्धा कोंकणे । पर्पटीरसवत्पक्वं पालकयन्त्रे भैरवनाथोक्तपञ्चा-मृतपर्पटीवद्विपक्वं पाकावसरं खसत्त्वमरुणं च गन्धकतुल्यभागमावपेत् । तथा माक्षी-कभस्म पारदचतुर्थांशमावपेत् । ततो मण्डूर्यादीनां रसैर्भावितमार्दितं ततो दशमू-लकषाये पाकेन लेहीभूतं पृथक्पारदं तुल्यभागस्त्रिजातादचूर्णयुतं स्निग्धभाण्डे संस्थितमेनं रसं माषमितं मञ्जिष्ठादिवर्गकषायानुपानेन सह मासपर्यन्तं शीलयेत् । खसत्त्वमभ्रकसत्त्वम् । अरुणं हिङ्गुलम् । हस्तिकर्णी एरण्डः । अमृता गुडूची । अलिर्भृङ्गराजः । कुष्ठविद्रावणतैलमाह—द्वात्रिंशदिति । द्वात्रिंशत्पलमिताया बाकुच्या द्रोणमितजलेन कषायं कृत्वा तस्मिंश्चतुर्थांशशेषे सति तत्र चतुर्विंशतिपलमितं लशुनकल्कं दत्त्वा ताम्बूलीरसमर्दितं कान्तभस्म पारदभस्म च प्रत्येकं पञ्चनिष्कं दत्त्वा प्रस्थमितं तिलतैलं तत्र क्षिप्त्वा शृतं कुर्यात् । अन्यत् स्फुटार्थम् । नागार्जुन-गुटिकामाह—रसेति । पञ्चाङ्गेति । अस्या गुटिकाया नामद्वयं पञ्चाङ्गगुटिका नागार्जुनी गुटिका चेति । विद्रावयति विनाशयतीत्यर्थः । माणिक्यतिलकरसमाह—रसेति । अलं हरितालम् । पक्वमूषायामिति । पक्वमूषाख्यमूषाया भेषजगर्भिताया मुखं पिधानेन पिधाय खटिकागुडलेपेन दृढं संनिरुध्य पश्चाढकवालुकामग्नं कृत्वा चुल्ल्यामधिश्रित्य यन्त्रभाण्डं दिवसद्वयं पचेदिति । नासत्याभ्यामश्विभ्यां भिषग्भ्यां कीर्तितः । नासत्यकीर्तित इति । परहिताख्यं रसमाह—श्वेतपाठेति । श्वेतपा-ठाया जटा श्वेतवर्णा ग्राह्या । तां मल्लमूषिकां स्थालीयन्त्रमध्ये । पिधान्यामुत्ता-

नार्यां स्थालीमुखपिधान्याम् । समाकृष्य सैन्धवमपसार्येत्यर्थः । व्योषं त्रिकटुकम् । उत्तमा त्रिफला । पारदभस्मादिकं गन्धकचूर्णान्तं सर्वं मिथः समं गृहीत्वा कृतं चूर्णं द्वादश[ हाट ]कं ग्राह्यम् । तच्चूर्णापेक्षया द्वात्रिंशदंशेन तत्र गुडो देयः । भानुना भूरभानुनेति । सहस्ररश्मिना सूर्येणेत्यर्थः । तालकेश्वररसमाह—वीर्यमिति । इह तालेश्वरविधौ पुरारिवीर्यं पारदो नागतुल्यं नवभागो ग्राह्यः । तत्र हरितालं विशुद्धं कृत्वैव संयोजनीयम् । अतो विशेषशोधनं हरितालमात्रस्यैव । विधत्ते—मूत्र इति । दोलायन्त्रभाण्डे भाण्डमध्ये स्थिते गोमूत्रे हरितालस्य यावानेको भागस्तादृशाः षोडशभागा माने यस्य तादृशे हरितालापेक्षया षोडशगुण इत्यर्थः । तादृशे गोमूत्रे पोटलिकाबद्धं हरितालमन्तराले निधाय दीपाग्निना दीपशिखावदल्पज्वालावताऽग्निना तत्परिशोषि यदा स्यात्ततस्तालं शुद्धं स्यात्। सर्वं तालमितरच्च। भृङ्गो भृङ्गराजः। वज्राङ्गकन्दः वन्यसूरणः। लूतीकन्द इति केचित् । पाजणकांदा इत्यन्ये । शाखासु हस्तपादेषु । पक्वत्वं शोथपाकेन । स्तम्भातिरेक इति । मन्यास्तम्भस्यातिरेकेऽधिकतरत्वे सति त्वस्य रसस्यानुपानं गवां पय एव सशर्करं दद्यान्न त्वार्द्रकरसः । प्रबलमन्यास्तम्भविजयायास्य रसस्यौजोबलवर्धकद्रव्यानुपानसापेक्षत्वादिति भावः । त्रिसप्तसंख्यानि त्रिगुणितसप्तसंख्याकानि वासराण्येकविंशतिदिनानि । रसप्रयोगावसितावसितिरवसानं समाप्तिः । एतद्रसप्रयोगसमाप्तौ सत्यामेतद्रससाध्यविशिष्टरोगेषु, अनन्तरं कर्तव्यमाह—सुप्ताविति । सुप्तौ स्पर्शाज्ञत्वे छिन्नादिक्वाथं मुद्गाद्यन्नं च मासद्वयपर्यन्तं दद्यात् । तथोदुम्बराख्यकुष्ठस्य भेषजान्त एतद्रसात्मकभेषजप्रयोगावसानेऽरिष्टस्य निम्बस्य पञ्चाङ्गचूर्णं पलमितं प्रत्यहं त्रिवारप्रयोगेण यथाशक्त्यसकृत्प्रयोगेण वा दद्यात् । मासद्वयपर्यन्तमन्नं तु तुवरीसूपेन सह सघृतान्नं देयम् । कृष्णे कृष्णवर्णविशिष्टे कुष्ठेऽथवा विवर्णे विवर्णकर उक्तातिरिक्तसर्वकुष्ठेऽपि रसप्रयोगावसान आमलकीसमुद्गान्नं च योज्यं मासद्वयपर्यन्तम् । अत्राऽऽमलक्या पादोन्मितत्वमुक्तम् । एकविंशतिदिनैरस्य प्रयुक्तस्य रसस्य गुञ्जात्रयोनं कर्षद्वयमुपयुज्यते । तदपेक्षया चतुर्थांश आमलकीभागः प्रत्यहं भक्षणीयो मासद्वयपर्यन्तम् । अथवा रसप्रयोगावसान एव प्रागदृष्टं विरुद्धं चिह्नं कुष्ठरूपं तापस्फोटाङ्गसंकोचादिहरितालदोषजनितं वा यदि स्यात्तदा स्वनिःसृतानि चूर्णकरणाय शुष्काणि पञ्चाङ्गानि पत्रपुष्पफलत्वङ्मूलरूपाणि निम्बस्यैव चूर्णीकृत्येति शेषः । तस्यैवात्रानुपदोक्तत्वादिति भावः । प्रयुक्तरसचतुर्थांशेन प्रत्यहं द्वित्रिवारं प्रयोगेण प्रयुञ्ज्याद् भक्षयेन्मासयुग्मपर्यन्तम् । खगेश्वरमाह—पलेन प्रमित इति । वसा बलिवसा गन्धक इत्यर्थः । खगः कासीसम् । कूप्यां मूषायाम् । सुदृढे भाण्डे पश्चाद्दृढवालुकापूरणयोग्ये भाण्डे संपुटितमूषां क्षिप्त्वा वालुकया निरुध्य । पचेत् वालुकायन्त्रे पचेदित्यर्थः । कुष्ठनाशनरसमाह—सूतभस्मेति । चित्रं चित्रकम् । द्वादशघ्नं पलानां द्वादशसंख्यया हन्यते ज्ञायत इति व्युत्पत्त्या द्वादशपलमित्यर्थः । हन

गतौ । गत्यर्थानां धातूनां ज्ञानार्थकत्वादिति भावः । आरोग्यवर्धनीं गुटिकामाह—रसगन्धकेति । पुरो गुग्गुलुस्तत्समं पुरसमम् । तिक्ता कटुका । मण्डलमेकचत्वारिंशद्दिनपर्यन्तम । नारायणरसमाह—रसभस्मेति । आदौ रसगन्धककज्जलीं विधाय ततः पुरादि सर्वमेकी कुर्यात् । मेदिनी...रसमाह—पलत्रयमिति । त्रिफलं मृतलोहशुल्बं भृङ्गराजरसादिना पृथक् संमर्द्य गजपुटे पचेत् । पचेद्यामचतुष्टयं काञ्जिकेन मृद्भाण्डे लौहे कटाहे वा पचेत् । तुल्यगन्धेनेति । द्वितीयादिपुटेषु तु विंशत्यंशेनैव गन्धको देयः । हिङ्गुलपक्वलोहविधिवत् । रुद्रांशं द्वादशांशम् । अमृतं विषम् । महावातं धनुर्वातादिकम् । जन्तुघ्नीं गुटिकामाह—सूतगन्धाविति । आखुकर्णी मूषाकर्णी । उन्दिरकानी इति महाराष्ट्रभाषायाम् । त्रिदलेयं वल्ली भूमौ प्रसरणशीला क्षुद्ररोप्यं किरमाणी ओंवा इति महाराष्ट्रभाषायाम् । समुद्रफलं स्वनाम्नैव प्रसिद्धम् । ब्रह्मबीजं पलाशबीजम् । विषतिन्दुकबीजं कुचला इति लोके । एतैर्ब्रह्मबीजादिभिः समभागं विडङ्गं रसतुल्यमारुष्करान्तैर्मर्दितरसतुल्यभागं तच्चूर्णम् । मूर्वाढक इति । मूर्वा तीक्ष्णरसा त्रिदला वल्ली । मोरवेल इति लोके । अश्वमश्वमारः । आदिशब्देन गुडूचीकुटजखदिरादीनां ग्रहणम् । धन्वन्तरिरसमाह—सूतगन्धेति । सौभाग्यं टङ्कणम् । कंकुष्ठं हिमवत्पादजः पाषाणविशेषः । लुङ्गं मातुलुङ्गम् । वज्रधाररसमाह—सर्वांशतुल्यकं तालमिति । अमुं रसं भक्षयित्वा मुसल्यादिचूर्णं कर्षमितं मध्वादिनाऽ( ह्य )नुलिहेदिति । महातालेश्वररसमाह—तालं ताप्यमिति । पुटेल्लघुपुटे पचेदित्यर्थः । सायं सायं त्रिंशद्वारामिति शेषः । अन्तिमं त्रिंशत्पुटं दत्त्वा संशोष्य सर्वं खल्वे क्षिप्त्वा विचूर्णयेत् । अथ कुष्ठकुठारमाह—सूतभस्मेति । विषं वत्सनाभम् । चतुःषष्टि चतुःषष्टिनिष्कम् । पातालगरुडी लोके तानीति ख्याता मृदुवल्ली । मधुपुष्पी दन्ती । वज्रतैलमाह—वज्रीक्षीरमिति । सर्वांशं सर्वसमभागम् । गन्धकादि प्रत्येकं कर्षमितम् । अग्निश्चित्रकः । स्वर्णक्षीरीरसमाह—क्षिप्त्वा तक्रघट इति । काञ्चनी स्वर्णक्षीरी । कण्टकितपत्रफला कृष्णबीजा पीतरसपुष्पा । तस्याः पञ्चाङ्गं ग्राह्यम् । तक्रं माहिषं तत्षोडशगुणं क्षीरमपि तथैव । तच्चूर्णं पञ्चपलं ग्राह्यम् । मूर्छितं रससिन्दूररूपम् । अथ महाभल्लातकतैलमाह—यत्नाद्बुद्धि खण्डितामिति । इष्टिकाचूर्णेन प्रसारितशणवस्त्रसंगृहीतेन साकं भल्लातकानां मर्दनेन त्वचमपनीय पञ्चशतसंख्याकानां तेषां शस्त्रेण खण्डानि कृत्वा तानि द्वादशपलमिते तैले क्षिपेत् । ततो वन्योपलाग्नौ शनैस्तथा पचेद् यथा तत्तैलं ज्वालाग्राहि न भवेदिति । तैले किंचिद्धूमदर्शनं यदा स्यात्तदा तत्क्षण एवाग्नेः किंचिदपचयं कुर्यात् । एवमन्तराऽन्तराऽग्न्यपचयेन तैलपाकं तावत्कुर्याद्यावत्तैलमग्नाः खण्डीकृतभल्लातकास्तैलहृतसारभारा भूत्वोपरि तरेयुः । उपरितरणदर्शनक्षणे तान् बहिर्निष्कास्य चतुर्गुणे जले पाचयेद् यावत्तत्र मधुवर्णदर्शनं भवेत् । तद्दर्शनक्षण एव तदवतार्य रक्षेत् । अथ त्रैलोक्यविजयतैलमाह—सूतभस्मेति । रसं गन्धं रसाञ्जनं यद्गन्धं बोलमित्यर्थः ।

प्रतिनिष्कद्वयं द्वयम् । प्रतिद्रव्यं द्विद्विनिष्कमित्यर्थः । सर्वमेतद्वारुणाम्लेन वारुण्या अम्लमण्डेन सह संमर्द्य कल्कीकृतं तत्रास्मिन्पूर्वोक्तभल्लातकतैले जलपाकात्प्राग्गृहीते तिल-तैले वा विनिक्षिप्य चतुर्गुणं जलं दत्त्वा करीषाग्निना विपाच्य, अथवा जलपक्व-पूर्वभल्लातकतैले कल्कनिक्षेपश्चेज्जलदानं विनैव करीषाग्निना धूमोद्गमपर्यन्तं किंचि-द्घनीभावोत्पत्तिपर्यन्तं च विशोध्यावतारितं रक्षेत् । अथ महामार्तण्डतैलमाह—शाकमिति । अङ्कोल्लो दीर्घपत्रस्तैलबीजः कण्टकिवृक्षः । वह्निश्चित्रकः । अक्षिर्बिभीतकः । स्नुक् स्नुही । निम्बादीनां शाकं पत्ररूपं गर्भशुष्कं नारिकेलम् । तत्फलं हि पक्वं वृक्षात्स्वयं पतितं बहुकालेनान्तर्गतजलशोषणाच्छुष्कमज्जं भवति । शुभ-मविकृतगन्धवर्णरसं तन्नारिकेलमज्जाखण्डं प्रियालमज्जा । वातारिरेरण्डः । तद्बीजं समं सर्वं गृहीत्वा पाता( ल )यन्त्रेण प्रयत्नतस्तैलं ग्राह्यम् । स्वर्णक्षीरी काञ्च-नी । पूर्वतैले पातालयन्त्रेण गृहीते तैले चतुष्प्रस्थमिते विनिक्षिपेदिति । अथ कुष्ठारितैलमाह—नारिकेलमिति । काञ्चनं काञ्चनीसंबन्धि बीजम् । शाककाष्ठं शाकाख्यवृक्षस्य साररूपं काष्ठम् । एतत्तैलपाठः श्वित्रचिकित्सायां विक्षिप्य पठितो दृश्यते । स तु लेखकदोषादिति बोध्यम् । श्वित्रे कुष्ठघ्नयोगस्योक्तिरप्रासाङ्गिकी स्यादिति भावः । प्रागुक्तकाञ्चनीतैलस्य संप्रति कुष्ठे मर्दनं विधत्ते—कुष्ठं चेति । मर्द्यान्मर्दयेत् । वन्यच्छगणेन घर्षितं कृत्वा महामार्तण्डतैलेन लेप्यमिति । लेपान्त-रप्रयोगमाह—कुमारीति । सैन्धवेति । कण्ड्वादिषु मर्दनार्थं मनःशिलादिचूर्णमाह—शिलेति । वरं सैन्धवम् । देवधूपं यक्षधूपम् । निशा हरिद्रा । मिथः समेन ततो द्विप्रस्थं तिलतैलं कुष्ठादिकल्कयुतं चतुर्गुणजलेन पक्त्वा जलशोषणेन सुष्ठु-वर्णगन्धोद्गमेन फेनोद्गमेन च तैलीभूतं खरपाकं सुपक्वतैलमात्रं यदा स्यात्तदाऽवतारितं तदेतेन चूर्णेन सर्पिषा सहैकीकृत्य तेनाङ्गमर्दनं कायकण्ड्वादिहरमित्यर्थः । कुष्ठान्त-पर्पटीरसमाह—पलैकमिति । स्पष्टार्थम् । कासीसरसमाह—पलं रसं हीति । क्रोड-पुटेन वराहपुटेन । कृमिघ्नं रसयोगमाह—अजमोदेति । फलास्थीनि त्रिफलाया अस्थीनि । क्षीरिणमर्कं स्नुहीवृक्षं वा । तत्पल्लवचूर्णं रसो वा । रसगन्धककज्ज-लीम् । अजमोदादिताम्रभस्मान्तं सर्वं समभागं चूर्णीकृत्य तच्चूर्णमाखुकर्णीरसेन सह खादितं तत्कृमिशूलनुद्भवेदिति । अयं योगः कृमिचिकित्सायामग्नितुण्डरसात्प्राक्प-ठनीयः । अनवहितलेखकेनाऽऽकृष्यात्र पठित इति भाति । सर्वेश्वरं रसमाह—शुद्ध-धसूतमिति । चतुर्गन्धं शुद्धं सूतभागापेक्षया चतुर्गुणितं गन्धकम् । उन्मत्तो धत्तूरः । अर्को रूषिका विषमुष्टिः कुपीलुः । हयारिः करवीरः । पीलु वस्त्रवेष्टितं वस्त्राद्बहिः ऽङ्गुलस्थूलमृल्लेपेन पिहितं च गोलकमित्यर्थः । लघुना मृदुना । मिश्रं मिश्रितं कुर्यात् । योगराजगुग्गुलमेकविंशाध्याये वक्ष्यमाणम् । मण्डलं मण्डलाख्यं कुष्ठम् । अथ श्वित्रलक्षणं समासतो दर्शयति—श्वित्रं त्विति । मेदो धातुगतं श्वित्रं तथा-यथोत्तरं बलवत् । वातजश्वित्रात् पित्तजं तद्बलवत्तरं तदपेक्षया कफोत्तरं बलव-

त्तममिति भावः । श्वित्रारिरसमाह—कासीसेति । सुरसा तुलसी । संपुटे शरावसंपुट-मध्ये । मर्दितरसस्याधरोत्तरां शार्ङ्गेरीं दत्त्वा । अस्मिन्ग्रन्थे सर्वत्र शार्ङ्गेरीस्थाने चाङ्गेरीति पाठो दृश्यते सा शाकविशेषा प्रसिद्धा । शार्ङ्गेरी तु न ज्ञायते केन नाम्ना लोके प्रसिद्धेति । तत्पत्राण्यधरोत्तराणि दद्यात् । पुटयेल्लघुपुटे पचेदित्यर्थः । अथ श्वित्रघ्नं रसमाह—रसगन्धकेति । सोमतैलेन सोमराजीतैलेन । चन्द्रप्रभावटिकामाह—पिष्ट इति । मयूरोऽपामार्गः । घननादस्तन्दुलीयकम् । करीषे पक्वं लघुपुटेनेत्यर्थः । किलासघ्नं रसमाह—रसद्विगुणेति । त्रिगुणेति । त्रिगुणं ताम्रपात्रे रसद्विगुणं गन्धकमन्तर्लिप्त्वा तत्पात्रं वालुकायन्त्रभाण्डान्तस्तले न्युब्जं पिधायोपरि वालुकया मृद्भाण्डकण्ठपर्यन्तं संपूर्य पिहितं च कृत्वाऽधस्तान्मन्दं वह्निं कुर्यात् । इति प्रहरद्वयपर्यन्तं पचेत् । द्विपलं पचेन्मानं तु नोक्तम् । केवलं पाककालमा-नज्ञानार्थं किंचिन्मानं गृहीत्वोदाहृतमेतत् । प्रहरद्वयेन द्विपलमिति । एतेन गन्धकस्य मानान्तरं तत्र तत्र दृष्ट्वाऽनुक्तं पाककालमानमप्यूहयेदिति भावः । ततस्तेन पक्व-गन्धकेन कज्जलीं पारदस्य विदध्यात् । तां च खदिरादिरसैः संमर्द्य करीषे लघुपुटपाचितं कृत्वा सिद्धं तं रसं मलयूकषायेण सह पिबेत् । मलयूः काको-दुम्बरिका । खरोतीति कोंकणे प्रसिद्धः क्षुपः । उदयादित्यरसमाह—शुद्धसूत-मिति । ताम्रपात्रेण न्युब्जेन । पार्श्वे पात्रभाण्डसंधिस्थल इत्यर्थः । पात्रार्धे न्युजताम्रपात्रपृष्ठमात्रे कृताल्पालवाल इत्यर्थः । गोमयं जलं गोमूत्रं यथाऽऽलवालं भित्त्वा पार्श्वेन गच्छेत्तथाऽल्पं मुहुर्मुहुर्दद्यादित्यर्थः । काकोदुम्बरिका मलयूः । वह्निश्चित्रकः । तुल्यमेतद्रसतुल्यभागं बाकुचीचूर्णं खदिरकषायेण पिण्डीभावोत्पत्तिपर्यन्तं खदिरकषायेण पक्त्वा पिण्डीभूतं रविक्षीरादिनाऽनुपिबेत् । अम्लपर्णी ह्रस्वसूक्ष्माम्लद-ण्डपत्रा क्षुद्रक्षुपवल्ली । चुक्रिका शाकमित्यपि केचित् । सूर्यावर्तः कृष्णभृङ्गराजः । रक्तमण्डला लज्जालुविशेषः । काञ्चन्या स्वर्णक्षीर्या काञ्जिकेन सह मर्दनेन कल्की-कृतया । श्वित्रान्तकरसमाह—सूते पल इति । संजारयेत्, निर्धूमपुटेन जारये-दित्यर्थः । पुटं तु द्वित्रप्रहरपर्यन्तमत्र दद्यात् । तावतैव गन्धकपाकसंभवादिति बोध्यम् । ततस्तेन पक्वेन सूतेन साकं गन्धकं पलत्रयं खल्वमध्ये दत्त्वा जम्बीर-रसमर्दनोत्तरं जाततत्कज्जलिकापेक्षया प्रत्येकं सप्तमांशेन गृहीतानां बाकु-च्यादीनां पृथक्कषायेणैकैकदिनं मर्दयेत् । कृष्णेन कृष्णभृङ्गराजपत्रेण । तैलवि-मर्दितं तिलतैलेन मर्दितगात्रं पुरुषं सूर्यातपस्थले क्षिपेदुपवेशयेत् । शाययेदित्यर्थः । अथ श्वेतकुष्ठारिचूर्णयोगमाह—पलत्रयमिति । त्रिःसप्तकमेकविंशतिदिनपर्यन्तम् । कृतोऽ-यमिति पाठः । भावनाभिः संस्कृतश्चूर्णोऽयं श्वेतारियोगः । दद्यीत भक्षणार्थमिति शेषः । कषायकादि कषायाम्ललवणकटुकं द्रव्यं प्रायो विवर्जयेत् । एतदेव चूर्ण-क्रमेण वस्वादिपारिभाषितसंख्याशब्देन वाच्यैश्चूर्णीकृतैः कुमार्यादिभिः समुदितैः संयुतं समभागेन सहैकीकृतं भृङ्गराजरसेनैव कल्कीकृतं समधु पूर्वोक्तमानमेव प्रत्यहं भक्षितं

चेयच्छ्वित्रं रजतसमश्वेतं तदपि भ्रमरप्रभं करोतीति । अत्र पद्ये शब्दानां वर्णविपर्ययः क्वचित्क्वाचिद् दृश्यते । पुस्तकान्तरे सुपाठालाभेन यथादृष्टपाठमेवोररीकृत्य व्याख्यायते । कुमार्गो धत्तूरः । अपामार्गो वा । जन्तीशब्दः कृमिपर्यायः। तेन शब्देन नूयत उच्यते स्तूयत इति जन्तीनुः । जन्तुफलशब्दवाच्या काकोदुम्बरिका महाराष्ट्रभाषायाम् । रपक्षः द्विरेफो भ्रमरो भृङ्गराज इत्यर्थः । सागरं समुद्रफलम् । तत्र वसुभागोऽष्टभागो धत्तूरो ग्राह्यः । उडुकशब्दस्य वर्णलिङ्गविपर्यासेन लेखककृतेन, उटिकेति पाठः । उडुकशब्दः सप्तविंशतिसंख्यायां परिभाषितः । तद्भागमितम् । भास्करो द्वादशसंख्याबोधकस्तद्भागमितो भृङ्गराजः । लोकशब्दः सप्तसंख्याबोधकः । तद्भागमितं समुद्रफलम् । अथ भक्षणसेकलेपक्रमेण श्वित्रनाशोपायमाह—गन्धकेति । अश्वत्थस्तस्य त्वग्ग्राह्या । रुचकं सौवर्चलम् । गोजलाप्लुतो गोमूत्रभावितः । मधुना सह लिह्यादिति शेषः । ततस्तैलाक्ताङ्गं धारयेदिति शेषः । हि यस्मात्कारणात् । अङ्गे तादृगातपेन विकृते संतप्ते सति स्फोटाः प्रथिताः स्फुटाः स्युः । तस्मादुष्णेऽङ्गं धारयेदित्यर्थः । तान्स्फोटान् प्रत्यहं त्रिफलाकषायेण सिञ्चेत् त्रिदिनपर्यन्तम् । ततश्चतुर्थदिनमारभ्य सप्तदिनपर्यन्तं प्रत्यहं निशादिभिर्लिप्ते सत्यङ्गे सह गोतक्रेण कोद्रवान्नमद्यात् । चूर्णप्रयोगं श्वित्रनाशकमाह—उदुम्बरस्येति । उदुम्बरस्य काकोदुम्बरस्य । श्वित्रारितैलमाह—अङ्कोलेति । अथाङ्कोलादीनामुचितं श्वित्रनाशयोग्यं यद्यत्पत्रकाष्ठबीजमूलादि तस्य तैलं पातालयन्त्रविधिनोद्धृतं न तु क्वाथयन्त्रान्तरविधिना । अथ कृमिलक्षणमाह—ज्वर इति । अग्नितुण्डरसमाह—रसेति । ब्रह्मबीजं पलाशबीजम् । यः कृमिमान्नरः स । उक्तरीत्येनं भक्षयित्वा पर्पटीरसं वा भक्षयित्वा स्नुहीरसमनुपिबेत् । उक्तमार्तण्डतैलोत्तरमुक्तपाठोऽयम् । कीट( शूल )रसमाह । पञ्चाङ्गशाकवारिणा शाकवृक्षस्य पञ्चाङ्गकषायेणेत्यर्थः । तत्रैव पञ्चाङ्गकषाय एव । क्षीरिणी काञ्चनक्षीरी । पञ्चजयपालान् पञ्चसंख्याकाञ्जयपालबीजनिष्कानित्यर्थः । एनं रसं कीटनाशार्थं मुस्ताद्यनुपानेन सह दद्यात् । कोष्ठशूलं छेत्तुं य इच्छति तस्मा आज्यानुपानेन सह देयः । अथ कृमिशूलघ्नौ योगावाह—अजमोदेति । मधुमिश्रेति । निम्बपल्लवसत्त्वं निम्बपल्लवरसः । अथ कृमिपातकरं रसमाह—शुद्धसूतमिति । अत्र प्रथमं शुद्धसूतमनःशिलयोः कज्जलीं विधाय तत्र भेषजान्तरं योजयेदिति योजनक्रमः । कीटमर्दरसमाह—शुद्धसूतमिति । विषमुष्टिः कुपीलुः । ब्रह्मबीजं पलाशबीजम् । एतत्सर्वं क्रमेणोक्तगुणं भवेदिति । एकभागः पारदः । द्विभागो गन्धकः । त्रिभागा अजमोदा । एवं क्रमगुणोक्तिर्बोध्या ।

इति विंशाध्यायपूरणिका ॥ २० ॥

## अथैकविंशतितमोऽध्यायः ।

अथ महारोगसंज्ञा येषां परिभाषिता तानुक्त्वा वातव्याधिविशेषशीतवातस्य लक्षणमाह—हिमवन्तीति । रोमाञ्चेन ज्वरितानि रोमाञ्चयुतज्वरेण पीडितानीत्यर्थः । अथ वातारिरसमाह—रसभाग इति । अत्र पूर्वकं चूर्णमिति । एरण्डस्नेहमर्दिते गुग्गुलौ वह्नितापेन सुष्ठु द्रुते सति तत्क्षण एव कज्जल्यादिचूर्णं यथोक्तभागं क्षिपेदिति क्रियासौकर्यं बोध्यम् । तेनैव एरण्डस्नेहेनैव। एतद्रसप्रयोगावसरे प्रत्यहं भक्षणार्थं गुटिकामाह—विजयागुटिकामिति । इयं गुटिकैकोनविंशाध्याये प्रागुक्ता बोध्या । शीतारिरसमाह—रसेनेति । वह्निजलैश्चित्रककषायैः । आर्द्रकेणाऽऽर्द्रकरसेन । अथवा घृतप्लुतमरीचचूर्णेन सह पथ्यमित्यस्यान्ते शीतवातः शाम्येदिति वाक्यशेषः । स्पर्शवातलक्षणमाह—अङ्गेष्विति । तत्र सर्वेश्वरं रसमाह—कर्षमात्रमिति । भास्वदिति । भास्वत्ताम्रम् । व्योषगन्धकताम्राणामिति । गन्धको रक्तशिग्रुः । हेम धत्तूरः । अर्को रूषिका । हयारिः करवीरः । वालुकायन्त्रे स्वेदयेत् । काचकूप्यां धृत्वा स्वेदयेदिति शेषः । अर्केश्वररसमाह—रसेन गन्धमिति । ताम्रस्य पत्रेणेति । मृत्पात्रे रसं धृत्वा चक्रीकृतेन ताम्रपत्रेण भाण्डमुखमाच्छाद्य भस्मना संधिं विलिप्य भाण्डं चुल्ल्यामधिश्रित्याधस्तादग्निना यामपर्यन्तं शालिस्फुटनपर्यन्तं वा सुतापनादुत्थाय चक्रीं प्रति विशेषेण संलग्नं रसं प्रगृह्य विचूर्ण्यार्कदुग्धैर्दशवारं गजपुटे पचेत् । मण्डलनाशकं तालादिरसमाह—तालमिति । पारदापेक्षयाऽष्टगुणं हरितालं हरीतकीं च गृहीत्वा कज्जलीं विधाय पश्चाद्धरीतकीचूर्णं दत्त्वा, एकीकृत्य संमर्द्य सर्वसमेन गुडेन सह गुटिकां बद्ध्वा सेवय । राजतरोरारग्वधस्य । स्पर्शवातान्तकृद्वटिकामाह—अष्टाविति । दश द्वौ च गन्धकस्य द्वादशभागा इत्यर्थः । कटुत्रिफलयोर्देहलीदीपन्यायेन त्रिशब्दस्योभयत्रान्वयात् । त्रिकटुत्रिफलयोः प्रत्येकं त्रयो भागा इत्यर्थो बोध्यः । ततोऽश्वगन्धान्तानां पृथक्त्रयो भागाः । रेणुकादीनामेकैको भागः । एकः कल्प्योऽयसस्तथेति । तथाऽयोभस्मैकभागमितं कल्प्यम् । विषं वत्सनाभम् । नागो नागकर्णं एरण्डः । अमृता गुडूची । वायसी काकमाची । तेनेति पञ्चम्यर्थे तृतीया । कल्कीकृततच्चूर्णापेक्षयेत्यर्थः । चतुर्गुणेन चतुःसंख्याकेन गुणेनाऽऽवृत्त्या युक्तं चतुर्गुणं तिलतैलं सुभाण्डके क्षिपेत् । हियावलीति । अहिवल्ली इत्यस्यैव परोक्षशब्दः । गूढशब्दो हियावलीति । यथा वेदे वौषडित्यस्य वडिति परोक्षं तद्वल्लोकभाषायां वा वर्णविपर्ययवर्णलोपवर्णान्तरसहिता अन्वर्थका मूलशब्दा बहवो दृश्यन्ते । ग्रन्थेऽपि लोकप्रसिद्धतादृगानुपूर्वीमादायैव तेषां मूलशब्दानां तथा प्रयोगः क्वचिद्दृश्यते । तथा चाऽऽर्येणापि प्रयुक्तोऽयं शब्द इति बोध्यम् । अहिवल्ली सर्पाक्षी । दद्देद् भक्षणार्थमिति शेषः । पश्चात्, एतद्घृतलेपोत्तरमित्यर्थः । क्षयमेति यत्नादिति । क्षयमस्पर्शक्षयमुक्तेन घृतेन विलेपनाद्भवेति यवानीसिद्धं घृतलेपनमात्रेणाप्युत्तरं

कर्तव्यार्कदुग्धलेपनं विना । अस्पर्शवातारितैलमाह—त्रिगन्धकमिति । खटिकामलसारशुकतुण्डेति गन्धकत्रयं बोध्यम् । स्पर्शवातघ्नं लेपान्तरमाह—यद्वा हलीति । हली लाङ्गली । सिताः श्वेतसर्षपाः । लेपान्तरमाह—आद्याविति । प्रथमं यवचिञ्चाविरेचनदानेन शिराविमोक्षणं कृत्वा पारदलेपमप्यस्पर्शनाशनाय नियोजयन्तीति । अथ गन्धाश्मगर्भरसमाह—गन्धमिति । पारदापेक्षयाऽष्टगुणं शुद्धं गन्धकं गृहीत्वा पारदेन सह कज्जलीं विधाय पश्चात्तं रसं लौहे पात्रे चित्रककषायं दत्त्वा विपाचयेदेकदिनपर्यन्तम् । अथ पाकेन शुष्कं तं गन्धकं रसमवतार्य पारदभागसमं वत्सनाभं च दत्त्वा मर्दितोऽयं रसः सिध्यति । अथ योगिप्रोक्तं गन्धाश्मगर्भरसमाह । तत्र गन्धकस्य कूर्मपुटेनैव शोधनं विधत्ते—गन्धकमिति । भाण्ड इति । भाण्डे गोदुग्धकं दत्त्वा तद्भाण्डं सूक्ष्मवस्त्रेण बद्ध्वा चूर्णितं गन्धकं तद्वस्त्रोपरि निधाय खर्परेण न्युब्जशरावेण प्रावृतं पिहितं कृत्वा शरावोपरि वह्निं तावत्कालं प्रज्वालयेद्यावता स गन्धको द्रुतो भूत्वा वस्त्राद्गोदुग्धे पतिष्यति । एवं विधाय शीतं तं शुद्धं गन्धकं पारदापेक्षयाऽष्टगुणितं खल्वमध्ये दत्त्वा रसं च दत्त्वा मर्दनेन कज्जलीं विधाय कृष्णरूपं तं गन्धकमन्तराऽन्तरा लौहे कटाहे प्रक्षिप्य मुहुर्धूमोद्गमदर्शनक्षणे शीतभूमाववतार्यावतार्य धूमविलये पुनः पुनश्चुल्यामधिश्रयणेनेत्येवंविधयत्नेन मृद्वग्निना तावत्पचेद्यावत्तद्गन्धकस्य कज्जलवर्णस्य रूपमन्यथा रक्तवर्णमाविर्भवेदित्यर्थः । अस्य सप्तगुञ्जात्मकमात्रामारभ्य दिने दिने एकैकगुञ्जावृद्ध्या हरीतकीचूर्णेन सह प्रत्यहं भक्षयेत् । यावदेकविंशतिगुञ्जात्मिका मात्रा स्यात् । ततः परं प्रत्यहमेकविंशतिगुञ्जामात्रमेवैनं रसं भक्षयेदिति । अस्पर्शारिरसमाह—पलाशबीजेति । त्रिदिनं विमर्द्य श्लक्ष्णीकृते मर्दनेन मृदूकृते सति तद्श्लक्ष्णीकृततत्कल्कीभूतचूर्णं प्रति षोडशांशेन कुपीलुचूर्णं दद्यादिति । अथ रक्तवातलक्षणमाह—पादयोरिति । अत्र रक्तदोषप्राबल्यं वातस्य प्राबल्यमिति विशेषो बोध्यः । तत्र चिकित्सामाह—त्रियोनीति । अयं रस एकोनविंशाध्याये प्रागुक्तो बोध्यः । तं भुक्त्वाऽनुपानार्थं हरीतक्यादिचूर्णं पाययेदिति । कोकिलाक्षो विखारा। अथवा तालिमखाना इति लोके प्रसिद्धः । वर्ज्यमाह—सूरणेति । आमवातलक्षणमाह—कट्यामिति । तत्र चिकित्सामाह—एरण्डतैलेति । वातारिरसोऽस्मिन्नेवाध्याये प्रागुक्तो बोध्यः । आमानिलस्यास्येति । एरण्डतैलस्य प्रशस्ततरत्वमाह—आमवातगजेन्द्रस्येति । वातविशेषस्यापस्मारस्य लक्षणमाह—मूर्छेति । तत्र चिकित्सामाह—नियोजयेदिति । पर्पटिकाख्यसूतं स च पर्पटिकासूतश्चतुर्दशाध्याये भैरवनाथोक्तपञ्चामृतपर्पटीरूपो वाताभ्रपर्पटीरूपो वा ग्राह्यः । पर्पटीरसगुञ्ज इति । अपस्मारनाशकचूर्णमाह—सप्तधा नवनीतेनेति । नवनीतेन सप्तधा सप्तवारं भावयेदित्यर्थः । ततस्तच्चूर्णं कल्कीकृत्य चतुर्गुणघृते क्षिप्त्वा तद्घृतं शुद्धदेशे पचेदिति । अत्रानुक्तमपि घृतापेक्षया चतुर्गुणं जलं सामान्यपरिभाषया प्राप्तं देयमेव । वराहकर्णेनेति ।

कर्कोट्या इति । रसेनेति शेषः । कर्कोटी वन्ध्या कर्कोटकी । शुष्कां गवाक्षीमिति । अपस्मारवेग आगते सत्यपीन्द्रवारुणिकामूलादि गोघृतेन संपिष्य तेन नस्यमाचरेत् कुर्यात् । अनागते वेगे तु कुर्यादेव नस्यम् । पूर्वनस्यवदित्यपिशब्दार्थः । श्वेता पराजितेति । श्वेता पराजिता श्वेतपुष्पा गोकर्णी इति लोके प्रसिद्धा । विजयाबीजं हरीतकीबीजम् । उन्मत्तकेति । वा अथवा । तेनैव नरमूत्रेणैव । घृष्ट्वा नस्यं कुरु । श्वेता पराजितेति । निर्गुण्डीबीजकमिति । निर्गुण्डीमूलकमित्यपि पाठः । अथोन्मादवातलक्षणमाह—बहुकृत्वेति । बहुवारं क्रियमाणैः प्रलापैः सह या विस्मृतिः कर्तव्यार्थे भवति । नरश्च हन्ति सर्वत्र धावति चेत्येतदुन्मादलक्षणं ज्ञेयम् । तच्चिकित्सामाह—पर्पटीति । पर्पटी चतुर्दशाध्यायोक्ता । एतदध्यायस्था वातास्रपर्पटा वा ग्राह्या । सघृतमिति । निम्बतैलाभ्यङ्गं कृत्वा सघृतमाषमण्डं घृतमिश्रं पयो वा पाययेदिति । गुर्वन्नमिति । बद्ध्वाऽपीति । माहेश्वराख्यधूपमिति । तमेवाऽऽह— श्रीवेष्टमिति । श्रीवेष्टः सरलनिर्यासः । दारु देवदारु । अथैकाङ्गवातं सलक्षणं तच्चिकित्सां चाऽऽह—एकस्मिन्निति । पर्पटीति । अत्रापि पर्पटीरसः प्रागुक्त एव ग्राह्यः । वक्ष्यमाणं शतावर्यादिगुग्गुलयोगराजं वा । उभयत्रानुपानमाह—एरण्डेति । नलिकेति । नलिकाघटितार्कनिष्कासनयन्त्रयोगेनेत्यर्थः । सर्जतैलं सर्जरसात्तैलमर्कवन्निष्कासयेत् । शतावर्यादिगुग्गुलुमाह—शतावरीति । सारणी प्रसारणी चान्दवेल इति महाराष्ट्रभाषायां प्रसिद्धा । इयं वल्ली विशेषेण गोधूमक्षेत्र उत्पद्य भूमावेव प्रसरति । कणा पिप्पली । अश्वगन्धा आस्कन्धेति लोके । शङ्खिका शङ्खपुष्पी । कचोरः शठी । आदौ शुद्धगुग्गुलं खण्डितं कृत्वा घृतेन सह संमर्द्य कटाहे तं गुग्गुलं निक्षिप्य चुल्ल्यामधिश्रित्य कटाहं वह्नियोगेन तस्मिन्द्रुतावयेव सति तत्क्षण एव तत्र शतावर्यादिचूर्णसमूहं निक्षिप्याऽऽलोडयेत् । ततोऽवतार्य घृतेन सह दृढं संमर्द्यार्धकर्षमितां गुलिकां कुर्यात् । इति गुग्गुलुर्बोध्यः । अथ योगराजगुग्गुलुमाह—पिप्पलीति । अत्रापि गुग्गुलुचूर्णयोः संयोजनविधिः पूर्ववद् बोध्यः । अत्रापि शतावर्यादिमानज्ञानसौकर्यार्थं पूर्ववद्गुलिकाः कार्याः । निष्परिहार इति । प्रत्यहं क्षीराज्यमांसरसमात्रभुक्तानां नराणां त्वयं न केवलं पूर्वोक्तरोगवारणमात्रं करोति किंत्वभ्यासयोगेन वलीपलितनाशनोऽपि भवति । किंचैतेन नर उल्लाघो भूत्वा वर्षशतत्रयमपि जीवेत् । अत्रैकं साधारणं नियममुपदिशति—दोषेति । क्षुधितः सन्दोषाद्युचितं समात्रमन्नमद्यादिति । अतः परं पुस्तकान्तरे पाठो दृश्यते । प्रमेहं योगराजोऽयं दृष्ट्वा दृष्टं जयेदिति । प्रयुक्तोऽयं गुग्गुलुः सर्वविधं प्रमेहं शीघ्रं जयेदिति तदर्थः । अथ द्वितीयं योगराजगुग्गुलुमाह—चित्रकमिति । कारवी शतपुष्पा बाष्पिका वा । यवाग्रजं यवक्षारम् । पत्रं तमालपत्रम् । वडवानलरसमाह—शुल्बमिति । जलनिधेः फेनः समुद्रफेनः । अलुक्समासः । अग्निगर्भाशयोऽग्निजारः । कान्तायः कान्तलोहम् । लवणं सैन्धवम् ।

बहुवचनमत्राविवक्षितम् । हेम धत्तूरः । वचा षड्ग्रन्था । तयोर्भागौ । रसस्य पारदस्य भागो द्वादशिको द्वादशसंख्यापूरकः । तस्थ पूरणे डडिति डट्‌ स्वार्थे कप्रत्यये सिद्धोऽयं शब्दः । वज्राम्बुघृष्टं वज्रकन्दरसमर्दितम् । वज्रकन्दोऽतितीक्ष्णकण्डूलरसोऽयं कन्दः पलाण्डुसदृशपत्र उदधितीरे सहस्रशः समुत्पद्यते । केचित्तु वन्यसूरण इति वदन्ति । तदम्बुमर्दितं शरावसंपुटितं कृत्वा गजपुटे पचेदिति सिद्धोऽयं रस उन्मादापस्मारप्रमुखान् वातरोगाञ्जयेदिति । वातकफोभयप्रधानरोगं धारयितुमयं रसस्तदा शक्नोति यदा वक्ष्यमाणसंस्कारेण संस्कृतः स्यादिति । तत्संस्कारमाह—आर्द्रकस्येति । क्षणं पचेत् । लोहे कटाह इति शेषः । मात्रया वल्लमात्रया नाधिकमात्रया । रसस्यास्य हि तीव्रत्वादिति भावः । अमृतं विषम् । अनु अनुपिबेत् । अथवा त्र्यूषणचित्रकं त्र्यूषणचित्रककषायमनुपानार्थं दद्यात् । अमुमिक्ष्वाकुरसेन सह यदि प्रयुञ्जीत तर्हि स्वेदमयं कुर्यात् । जयया भङ्ग्या सहायं प्रयुक्तश्चेद्दाहं कुर्यादिति । अथ मार्तण्डेश्वररसमाह—समेति । महामूषायां विंशतिपलं स्वर्णमाक्षिकं ताम्रं च निक्षिप्य कोकिलैः शिखरवत्संपूर्य कोकिलानां ध्मानेन मृषाकण्ठप्राप्तिः स्यात् । ततो निष्कास्य लोहपात्रस्था लोहे पाषाणमये वोलूखले खण्डीकृत्य घर्षेच्चूर्णं कुर्यादित्यर्थः । एवं चतुर्वारं कृत्वा सर्वं चूर्णीकृतं तत्तुल्यमाक्षिकार्पितं कृत्वा गजपुटं दद्यात् । द्वितीयादिपुटेषु तु हिङ्गुलदानेन लोहपाकवत् प्रतिपुटं विंशत्यंशेनैव माक्षिकं दद्यात् । एवं विंशतिपुटदानोत्तरं समभागं गन्धकं प्रतिपुटं दत्त्वा तावद्गजपुटावृत्तिः कार्या यावत्क्षीयमाणं तच्छुल्वं पलमात्रमेवावशिष्टं स्यात् । ततस्तत्र गन्धकमारितं पारदं पलमात्रं दत्त्वा शाणमितं हीरकभस्म च दत्त्वा मर्दनेन सिद्धोऽयं रसः । मण्डलार्धपर्यन्तं सेवितश्चेद्वातादिरोगान्हन्तीति । मण्डलार्धमेकविंशतिदिनानि । अथ चतुःसुधारसमाह—समभाग इति । शुद्धे ताप्यसमभागे सुवर्णे वृन्ताकमूषोदरस्थे वाताश्रपर्पटीस्यपरपर्यायं ध्मानेन द्रुते सत्युत्तमं ताप्यं समभागं शुद्धमाक्षिकं दत्त्वा पुनर्ध्मानेन निर्व्यूढं कुर्यात् । द्रवीकृत्यैकीकुर्यादित्यर्थः । तेन च तन्माक्षिकं स्वगुणरूपेण सुवर्णे स्थित्वा मूर्तपरमाणुरूपेणाऽऽकाशे निर्गच्छति । अत एव तुलायां सुवर्णं निर्व्यूढमपि न वर्धते । एवमेवान्यत्रोक्तानां निर्वाहणद्रव्याणां फलं वेद्यम् । यदा ध्मानेन माक्षिकं सर्वं लयमेष्यति तदैकं निर्वाहणं संजातमिति बोध्यम् । प्रतिनिर्वाहणं समभागमेव ताप्यं क्षिपेत् । एवं शतवारं निर्वाहणोत्तरं तत्स्वर्णबीजं रसशास्त्रसिद्धबीजमिति संज्ञितम् । एवमेव समभागताप्येन शतवारं निर्व्यूढं रजतं ताम्रं च सिद्धबीजं कुर्यात् । ततश्चैकैकं कर्षमितं तद्बीजं समावर्त्य वह्नियोगेन मूषायां द्रुतीकृत्य पञ्चपलमिते रसे पारदे प्रक्षिप्य जारयेत्समवायसंबन्धेनैकी कुर्यात् । कथं वक्ष्यमाणप्रकारेण । तमेव प्रकारमाह—तप्त इति । रसं पारदं पञ्चपलात्मकम् । निष्कमितं बीजस्य निष्कमितग्रासमित्यर्थः । कच्छपयन्त्रे पूर्वोक्तकच्छपे यन्त्रे सूत्रस्थानस्थनवमाध्यायोक्त इत्यर्थः । आम्लरसेन सह मर्दयेत् । वक्ष्यमाणबिडान्वितेऽनुपदमष्टमांशेन स्वघ-

टककोष्ठीकुक्षिस्थवक्ष्यमाणबिडान्विते मर्दिततद्ग्रासं जारयेदिति पूर्वत्रान्वयः । कथं वक्ष्यमाणप्रकारेण त्रिंशत्तमाध्यायोक्तप्रकारेण । कच्छपयन्त्रजारणमात्रोक्त्या तप्तखल्वमर्दनोत्तरमादिमग्रासत्रयस्य दोलायन्त्रपाकेन ग्रासं शुष्कपिष्टीरूपं कृत्वा पश्चात्तद्ग्रासत्रयं कच्छपयन्त्रेण जारयेत् । चतुर्थादिग्रासांस्तु कच्छपयन्त्रेणैव जारयेदिति । जारणक्रमः पूज्यपादाद्युक्तोऽत्रैतद्रसजारण आचार्यस्य न संमत इति बोध्यम् । स च वक्ष्यमाणप्रकारः 'स्वप्रमाणो रसस्तिष्ठेज्जीर्णे ग्रासे त्वजीर्यति । पातयेदासवाम्लेन मर्दयेत्स्थापयेच्च तम् । जारणे जारणे वह्निं ग्रासं च परिवर्धयेत्' इति । तेन प्रकारेणाशेषं बीजं जारयेत् । तदेव बिडमाह—बलिकासीसेति । शतवारं चक्राङ्गीरसेन संभिन्नैर्भावितैर्मिथः समैः कृतो यश्चूर्णः स एवात्र बिडरूपो बोध्यः । इति जारितपलमितसूतेन तावतैव गन्धकेन च कज्जली कार्या । अतियत्नतः स्वेदयेत् । तुषैर्गजपुटे पचेदित्यर्थः । त्रिवारमिति । प्रत्यहमेकवारं भक्षणेनास्य रसस्य त्रिवारं बुभुक्षामयं जनयेदिति । चक्राङ्गी अम्लवास्तुकमित्यर्थः । चुका इति लोके । अथ सर्ववातारिरसमाह—गन्धकादिति । खल्वयेन्मर्दयेत् । रक्ताभ्रंतं शुभं वर्णे यथोक्तवर्णगन्धरसस्पर्शसंपत्तिविशिष्टं नूतनं महाविषं रक्तशृङ्गीकमिति केचिद्वदन्ति । तच्च हस्तिनापुरसंनिहितदेशे शृङ्गीमहोरा इति लोकभाषायां प्रसिद्धम् । अन्धयेन्मुखमुद्राशून्यकाचकूप्यां तं गोलकं निक्षिप्य पाचयेदित्यर्थः । हिङ्ग्वष्टकं त्रिकटुकाजमोदासैन्धवजीरकद्वयाहिङ्गुरूपम् । अथ वातविध्वंसनरसमाह—मृतमिति । भागोत्तरविवर्धितमुत्तरोत्तरमेकैकभागेन वर्धितमभ्रकभस्मैकभागं कांस्यभस्म द्विभागमिति रीत्या । वातारिस्त्विह एरण्डतैलम् । प्रपचेत्काचकूप्यां निक्षिप्य मन्दाग्निना प्रपचेदित्यर्थः । चित्राङ्घ्रिश्चित्रकमूलम् । वरणादिगणो वरणसैर्यकयुग्मशतावरीत्यादिरूपोऽष्टाङ्गहृदयग्रन्थोक्तो बोध्यः । वृकोदरीगुटिकामाह—सूतेति । अपरं षट्कोलादि प्रत्येकं पारदतुल्यं भागं ग्राह्यम् । षट्कोलं समरिचं पञ्चकोलम् । चतुर्विधं महाजीर्णं विसूचिकामविषाख्याजीर्णालसकविलम्बिकारूपम् । तूर्णं त्वरया । प्रभावतीवटिकामाह—हेमाभ्रेति । हेमादिभिरामोदान्तैः सिद्धं यत्सप्तकं सप्तसंख्याकद्रव्यसमूहो मिथः समस्तं तदपेक्षया द्विगुणं पारदं च विशोदनवध्वादीनामेरण्डान्तानां पृथग्द्रवैर्मर्दितं कृत्वा तत्र सप्तकद्विगुणमेव कङ्गुणीतैलं गन्धकं राजिकां च दत्त्वा संमर्द्य कल्करूपं कृत्वा तस्य वटीं कलायमितां कुर्यात् । पिबत एनां भक्षयित्वा पिप्पलीचूर्णसहितं जलमनुपिबतो नरस्येयं प्रभावती मरुद्विकारादीञ्जयेदिति । हेम स्वर्णम् । अभ्रमभ्रकम् । अलकं हरितालम् । तीक्ष्णं तीक्ष्णलोहम् । तार्क्ष्यं माक्षीकम् । कमलं ताम्रम् । आमोदयति स आमोदः कस्तूरी । विशोदनवधूः शुनी । शुनकचिल्लीशाकं वास्तुभेदः । स्नुक् स्नुही । वह्निश्चित्रकः । विजया हरीतकी । कटु राजिका । एकाङ्गरोगे चिकित्सामाह—अष्टेति । पर्पटीरसं भैरवनाथोक्तपञ्चामृतपर्पटीरसम् । अथवाऽर्धकर्षमितयोगराजगुग्गुलुमपि घृतानुपानसहितं खादेदिति । विजयभैरवतैलमाह—धान्याम्लेति ।

सुरभित्रयं श्वेतपीतरक्तभेदेन त्रिविधो गन्धकः। तेन सह पारदस्य कज्जलीं विधाय धान्याम्लपिष्ट्या तया लिप्ता लिप्तपटेत्यर्थः। एतादृशी तिलतैलाक्ता ततो दीप्ता दीप्ताग्रा या पटस्य वस्त्रखण्डस्य वर्तिस्तन्मुखात्तदग्रावयवात्प्रवृत्तमधस्थापितपात्रे गलितं तैलं विजयभैरवाख्यं प्रसिद्धं तद्वातामयान् जयतीति। अतः परं रसतालशिलागन्धमित्यादिना केवलं पद्यानुपूर्वीभेदेन विजयभैरवनामात्रत्यसूततैलस्यैव दत्त्वा पठितोऽयं ग्रन्थः पद्यत्रयात्मकः। अतः क्षेपकोऽयमिति मत्वा न व्याख्यातः। स्वच्छन्दभैरवरसमाह–तीक्ष्णेति। प्रत्येकं स्वसमभागैस्तीक्ष्णादिभिः सहितः स्वसमभागगन्धकयुतः पुनर्मर्दितः काचकूप्यां निक्षिप्य गन्धकमानानुसारेण सुपाकपर्याप्तिकालपर्यन्तं पाचितः पृथक्स्वसमभागैर्व्योषादिभिः सह मुण्ड्यादिरसेन त्रिदिनं मर्दितः सेवितो वातादीञ्शमयेदिति। तीक्ष्णं तीक्ष्णलोहम्। अयस्कान्तं कान्तलोहम्। गोदन्तो हरितालविशेषः। यो हरितालो गोदन्तसमश्वेतवर्णः सूक्ष्मपीतराजीविशिष्टः स गौरवः। गोशृङ्गवद्धः सन् गोर्दोहं तृणभक्षणं च प्रतिबध्नाति। अयं तिबेट इति ख्याते देशे कुम्भकोणसंनिहितदेशे चोपलभ्यत इति श्रूयते। विषं वत्सनाभम्। आर्द्रकैरार्द्रकरसैः। सूततैलमाह—रसगन्धेति। ऊर्ध्वभागे संदंशादिनाऽऽकाशे धृत्वा प्रदीपयेज्ज्वालयेत्। भक्षयेत्ताम्बूलपत्रादिना साकम्। षडङ्गगुग्गुलुमाह—रास्नेति। घृतसितं घृतभावितं गुग्गुलुम्। अनु अनुदिनम्। आमवातादिवातघ्नान्विविधयोगानाह—धूमसारमिति। धूमसारं गृहधूमम्। एरण्डतैलमिति। एरण्डतैलसर्पिषी त्रिफलादिकल्काच्चतुर्गुणे ग्राह्ये। तच्चतुर्गुणं जलं सामान्यपरिभाषया देयम्। एतद्घृतमानन्दभैरवाख्यं प्रसिद्धम्। निर्गुण्डीति। रक्तैरण्डस्येति। इन्द्रवारुणिकेति। सर्वाङ्गवातघ्नीं वटीमाह—मृतमिति। त्र्यम्बकेश्वररसमाह—सूतकरयेति। पञ्चपलमितं पारदमेकपलमितं ताम्रचूर्णं पृथग्ग्राह्यम्। प्रथमं पारदं तत्तुल्यं गन्धकं चैकीकृत्य जम्बीररसेन मर्दयेत्। पश्चात्तत्र ताम्रपिष्टं दत्त्वा नागवल्लीदलरसेन सर्वं संमर्द्य पिष्टं कल्कं प्रकल्पयेत्। ततः संशोष्य शरावसंपुटे रुद्ध्वा तद्भूधरयन्त्रे प्रहरपञ्चकपर्यन्तं लघुपुटैरर्धेभपुटैः पचेत्। ततो मिथः समं मिश्रितं त्र्यूषणचूर्णमादाय तत्र दत्त्वा मर्दनेनायं रसः सिध्यतीति। गगनगर्भां वटीमाह—सूताभ्रमिति। कम्पिल्लं कपिला इति लोके। पर्पटिकी कट्फलम्। वातगजाङ्कुशरसमाह—मृतं सूतमिति। शृङ्गीकं कृष्णपिङ्गलवर्णं विषं शृङ्गीमहोरा इति नाम्ना प्रसिद्धं हास्तिनापुरनिकटे। अग्निमन्थमरणिका। वातरक्तस्य लक्षणं चिकित्सां चाऽऽह—संधिष्विति। त्रिनेत्ररसः शूलगजकेसरी पूर्वोक्ता पर्पटी चतुःसुधेत्यपरपर्याया वातास्रपर्पटी तथोदयभास्करोऽष्टादशाध्याये प्रागुक्ता वेद्याः। सर्वेश्वराख्या या प्रागुक्ता पर्पटी साऽपि सर्वावरणेषु योज्या। अथ चन्द्रावलेहमाह—एलाया इति। लेहवत्साधिते लेहवद्घनत्वापन्नं यथा स्यात्तथा पक्के सति तत्र द्राक्षादिद्रव्यं चूर्णीकृत्य पृथक्पलमितं दद्यात्। तथा तत्रक्षीर्याश्चतुःपलं क्षिपेत। ततो दर्व्याऽऽलोडनेनैकीभूतं तन्मधःश्रित्य तस्मिञ्शीतीभूते क्षौद्रप्रस्थं दद्यात्।

एतद्भेषजं लेहाख्यं पित्तोन्मादादिषु चन्द्रवदाह्लादकत्वाच्चन्द्रेतिनाम्ना शास्त्रे कथि- तमित्यर्थः । अथैलेयसर्पिराह । ऐलेयकस्येति । ऐलेयकं विडङ्गसमानाकारं सुग- गन्धिद्रव्यम् । तद्रसापेक्षया तु घृतं समभागदुग्धं तत्र दत्त्वा चतुर्थांशं पचेत् । तत्र चन्दनादिसमूहकल्को घृतापेक्षया चतुर्थांशेन देयः । सिता शर्करा । तुगा वंशरोचना । अथैलेयप्रयोगमाह । ऐलेयकस्येति । ऐलेयकतैलमाह । ऐलेयक- स्येति । चूर्णमिति । चूर्णं कल्कीकृत्य विनिक्षिपेत् । चोचं त्वचम् । मलयज- मतिसुगन्धिसारं चन्दनम् । वारि वालकम् । सरलं सरलनिर्यासः श्रीवेष्टकाख्यः । कुमुदं श्वेतकमलम् । उत्पलं नीलकमलम् । द्वे मेदे मेदामहा मेदेतिख्यातौ कन्द- विशेषौ । उक्तं च राजनिघण्टे—महामेदाभिधः कन्दो लताजातः सुपाण्डुरः । मेदाऽपि शुक्रकंदः स्यान्मेदोधातुमिव स्रवेदिति । मेदा गौडदेशे प्रसिद्धा । काकोली क्षीर- काकोली लताविशेषौ । जीवकर्षभकौ गौडदेशे प्रसिद्धौ । तत्र ऋषभकस्य बैलघाटीति नाम लोके प्रसिद्धम् । मधूलिका यष्टीमधु । मृगनाभिः कस्तूरी । अजगन्धा वन्यतुलसी । शशाङ्कः कर्पूरः । अथैलेयकामृतप्राशमाह—ऐलेयकमिति । पृथग्द्विप- लिकमैलेयकादिचूर्णं प्रत्येकमर्धपलिकं सरलादिचूर्णं चैलेयकादिचतुष्टयरसे शतावरीरसे पृथक्सप्तवारं भावितं शुष्कं [illegible]त इक्ष्वामलकरसाभ्यां क्षौद्रेण च सप्तधा भावितं छाया- शुष्कमेतत्प्रातः पयसा सह पी[illegible]तमङ्गदाहादीन्हन्तीति । विदारी विदारिकन्दः । मधूकं मधूकपुष्पम् । गोस्तनी द्राक्षा । सरलं देवदारुसमस्तैलप्रधानः सुगन्धिकाष्ठवृक्षः चीडेतिनाम्ना प्रसिद्धो हिमालये । तन्निर्यासोऽत्र ग्राह्यः । विदारी क्षीरविदारी गुर्जरे प्रसिद्धा ।

इति रसरत्नसमुच्चयटीकायां खरेइत्युपाह्वेन वामनात्मजेन चिन्तामणिना कृतायां सरलार्थप्रकाशिन्यां चिकित्सास्थान एकविंशोऽध्यायः ॥ २१ ॥

---

## अथ द्वाविंशोऽध्यायः ।

**मूलम्**—भेदावन्ध्येत्यादि । अथ वन्ध्याभेदान्कारणानिबन्धनात्तच्चिकित्सां चाऽऽह । भेदा इति । आदिवन्ध्या जन्मतो वन्ध्या । रक्तेन विकृतरक्तेन । भूतेति । भूतपिशाचादि- कोपस्तेन तथा कुलदेवताप्रमुखदेवानां कोपस्तेन, अहिताहारविहाररूपेणापचारेण च । दोषै- र्दुष्टमेदः संसृष्टदोषैः । अगम्यायोनिगमनाद्यपचारेण । शुक्रतः शुक्रक्षयेण । सप्रसवाऽपि स्त्री वन्ध्येत्युच्यते । तत्प्रसवस्य निष्फलत्वात् । सा तु चतुर्विधा । तत्र प्रथमा गर्भ- स्रावी स्मृता । जयसुन्दररसमाह—सुवर्णमिति । ताप्यं माक्षीकसत्त्वम् । वैकृतं वैक्रान्तजं च सत्त्वम् । लक्ष्मणातोयैर्लक्ष्मणाकन्दरसेन । बन्धुजीवो बन्धूकः । दुपारी इति पुष्पक्षुपो लोके प्रसिद्धः । ताम्रपत्रं पिधानार्थं मुखे न्यसेत् । पुटं दद्या- दिति । भूधरपुटेन पचेदित्यर्थः । तावद्पलैः पुटमुपरि देयम् । छागस्य वन्यस्य

गोमयस्य कर्षमितैः कृतैरुपलैरातपशोषणेन कठिनैर्गिरिण्डैर्यावद्भिर्गजाख्यपुटपर्याप्ती राज-हस्तगर्तापूरणपर्याप्तिः स्यादिति । एतद्रसप्रयोगसमाप्तिपर्यन्तमन्तराऽन्तरा ऋतुस्नातायै मांसविशेषभक्षणं स्नानदिने विधत्ते---पुत्रिण्या इति । पुत्रिण्यै पुत्रकामायै । जरत्कौशिकचक्षुषी, अतिवृद्धघूकाख्यपक्षिणश्चक्षुर्द्वयमांसं गव्याज्यपक्वं भक्षणार्थं दद्यात् । अथ रत्नभागोत्तरं रसमाह—वज्रमिति । पुष्पं पुष्परागम् । पञ्चगुञ्जामितमिति । भागोत्तरमिति । परमिति । यथोत्तरं यस्य भागस्य क्रमवृद्ध्या गृहीतसर्वरत्नानां समुदायः पञ्चगुञ्जामितः स्यात्तथा भागमितं ग्राह्यमित्यर्थः । स च भागश्चतुःसर्षपात्मकः संभवति । चतुःसर्षपं वज्रम् । मरकतमष्टसर्षपम् । पद्मरागं द्वादशसर्षपमिति क्रमवृद्धिर्बोध्या । एषां रत्नानां लौकिकनामानि चतुर्थाध्यायव्याख्यायां स्पष्टीकृतानि । तत्सर्वं रत्नं तन्त्रोक्तविधानेन चतुर्थाध्यायोक्तविधानेनेत्यर्थः । तत्तुल्यं वैक्रान्तभस्मतुल्यम् । तुल्यां मिथस्तुल्यभागाम् । पर्पटीं विधायोर्ध्वदण्डलौहपलिकायन्त्रमध्ये लौहे कटाहे वा बदरकाष्ठाग्निना द्रुतीकृत्य आर्द्रच्छगणस्थकदलीदले क्षिप्त्वा पर्पटीं विधायेत्यर्थः । तां च परिचूर्ण्य । अथ चक्रिकाबन्धरसमाह—गन्धक इति । निःसाराकारमूषायां निःसारं विषाणं तदाकारमूषायाम् । पुस्तकान्तरे विषाणाकारमूषायामिति पाठोऽपि दृश्यते । करिपुटार्धेनार्धेभपुटेन । नागोदरोपविष्टकौ विकुतगर्भविशेषौ । वर्धमानरसमाह—पलार्धप्रमित इति । अर्धपलं शुद्धं स्वर्णं वज्रमूषायां महामूषायां वा निक्षिप्य ध्मानेन तस्मिन्द्रुते सति तन्मध्ये शुद्धं ताम्रं कर्षमितं दत्त्वा किंचिट्टङ्कणं दत्त्वा धमनेनैकी कुर्यात् । पश्चादेकीभूतं तत्स्वर्णं महामूषायां निक्षिप्य तत्समभागं शुकपिच्छमामलसारगन्धकं निक्षिप्य धमेत् । गन्धकक्षयपर्यन्तमित्येकवारं निर्वाहणं भवति । एवं प्रतिनिर्वाहणं समभागं गन्धकं दत्त्वा शतवारं निर्वाहयेत् । एवं निर्व्यूढं ताम्रमिश्रं तत्स्वर्णं सिद्धबीजं भवति । ततः सारणायन्त्रे मूषायां सारणातैलेनार्धोदरं पूरयित्वा जीर्णषड्गुणगन्धकं द्विपलं रसं पारदं च क्षिप्त्वा तत्सिद्धबीजं स्वर्णं सारणाविधिना सारयित्वा पारदोदरे लीनं कारयित्वा पश्चात्पिष्टीरूपं प्राप्तं तं पारदं मर्दनेन वाससा वस्त्रेणाऽऽवेष्ट्य पोटलिकां बद्ध्वा सूत्रस्थानोक्त इष्टिकायन्त्रे घटकगर्तामध्ये मातुलुङ्गरसमर्दितं चतुर्निष्कमितं दत्तं बलिं गन्धकमूर्ध्वमधश्च विनिधाय मध्ये धृतं तं रसं संवेष्ट्य निरुध्य कपोतपुटेन स्वेदयित्वेत्यर्थः । स्वेद्याऽऽवेष्ट्य च वाससा, इति पुस्तकान्तरे पाठानुरोधेनेयं व्याख्या बोध्या । इति मुहुर्मुहुर्गन्धकाल्पमात्रादानेन पुनः पुनः पुटेन च चतुर्गुणं गन्धकं जारयित्वा जारितगन्धकं तं रसं चूर्णीकृत्य वस्त्रेण परिगाल्य षष्ठांशेन वज्रभस्मसमभागेन वैक्रान्तभस्म च निक्षिप्य शिवलिङ्गीपत्ररसेनाऽऽपूर्य मर्दनं च संशोष्य मूषासंपुटितं कृत्वा द्वादशवनोपलैरेकं पुटं दद्यादिति द्वादशपुटानि दद्यात्तावन्त्येव पुटानि मधुना बन्धुजीवरसेन लक्ष्मणाकन्दरसेन च पृथक्पृथग्दद्यात् । पुनः संचूर्ण्य सिद्धोऽयं रसः । वन्ध्या नारी पूजितपुत्रिण्याख्यपूर्णिमाया

एकान्तेत्यपरपर्यायाः पूजां विधिना कृत्वा तदङ्गदेवता योगिन्यादिप्रमुखाश्च संपूज्यैनं यथाविधि याः स्त्रियो भक्षयेयुस्ता आदिवन्ध्याप्रमुखाः षण्मासाभ्यन्तरे दीर्घजीविनं पुत्रं प्राप्नुयुः । अष्टमाध्याये सारणानिरुक्तिव्याख्यायां सारणायन्त्रं सारणातैलं च स्पष्टीकृतम् । सारणाविधिरपि तत्रैव द्रष्टव्यः । गन्धकजारणाविधिस्तु आचार्यस्त्रिंशाध्याये वक्ष्यति, इति तत एवावधार्यः । पुत्रिणीपूर्णिमा मार्गशीर्षपूर्णिमा ज्येष्ठमासपूर्णिमा च । तत्पूजाविधिरस्मिन्नेवाध्याये वक्ष्यमाणो बोध्यः । योगिन्यश्चतुःषष्टिसंख्याका ललितादेवीव्रतपूजोक्ता ग्राह्याः । पितृदेवताशब्देन ब्राह्म्यादिषण्मातरो ग्राह्याः । मातॄणामपि पितृशब्दवाच्यत्वादिति । अथ द्रुतिसारं रसमाह । युक्तं हीति । तुल्यभागयाऽभ्रकद्रुत्या युतं स्वर्णय( यु )कर्षमात्रयुतं पारदं चिरकालं पिष्ट्वा पिष्टीकृतं पारदं मल्लसंपुटे क्षिप्त्वा प्रतिपुटं निष्कमात्रं गन्धकं दत्त्वा शतवारं कुक्कुटपुटानि दद्यात् । इति सिद्धोऽयं रसो गन्धकद्रावसहितः सेवितश्चेत्पुत्रकामाया वन्ध्यामयनाशनः । सूतिकारोगादीनपि हन्ति तीव्रक्षुधाकरश्च । भूतादि दृष्ट्वा ये नरा भीता भवन्ति तेभ्यो भूतादिसंबन्धभयाभावकरः । लोहला अस्फुटवाचः । अत एव तेन रोगेणाऽऽर्तास्तेषां तथा जडानां मन्दबुद्धीनां च वचाचूर्णसहितोऽयं रसो मण्डूकीरसानुपानेन सह देयः । स्वर्णं कर्षः । मण्डूकी ब्राह्मी । अथ गर्भोत्पादकान् विविधौषध्यादिप्रयोगानाह । समूलपत्रामिति । सर्पाक्षी नाइकन्द इति मालवे प्रसिद्धः । कर्म निषिद्धं कर्म । देवदालीयेति । इयं वल्ली तिक्तरसा एरण्डफलसमफला देवडङ्गरीतिमहाराष्ट्रभाषायाम् । बन्दालदोडी इति व्रिजभाषायाम् । पूर्ववत्क्रमोऽनुक्रमः । ऋतुकाले स्नानदिनादारभ्य सप्तदिनपर्यन्तं प्रत्यहमेतद्भेषजपानं निषिद्धवर्जनं चेत्यादिरूपो बोध्यः । शीततोयेनेति । रुद्राक्षं विशिष्टं रुद्राक्षं गौरीहररूपम् । सर्पाक्षीमिति । पुनरुपदेशोऽयं गणेशमन्त्रसहितत्रिदिनमात्रप्रयोगविधानार्थं बोध्यः । महागणेशमन्त्रोऽत्राथर्वशीर्षोक्तो ग्राह्यः । अनेन मन्त्रेणाभिमन्त्रितजलस्य पानं मार्जनं च तथैतेन संमन्त्रितभस्मधारणरूपं रक्षाकरणं बोध्यम् । सुश्वेतेति । पूर्ववदिति । अथ तासां वन्ध्यानां मध्ये या पुत्रवती एकवारमात्रप्रसूरित्यर्थः । साऽपि पूर्ववत्कुरुते । एते योगास्तस्या अपि फलप्रदा भवेयुरिति भावः । किं चान्यदपि तदर्थं कथ्यते च । तदाह । पेषयेदिति । विष्णुक्रान्तां समूलां महिषीक्षीरेण कल्कीकृत्य महिषीनवनीतेन सह सा काकवन्ध्या ऋतुकाले पिबेदिति । पथ्यमिति । युक्त्या कालमात्रारुचिकरद्रव्यादियोगेन सहितं पूर्ववद्यथापूर्वमुक्तं क्षीरशाल्यन्नमुद्गं चेति तदेवात्रापि ग्राह्यम् । अश्वगन्धयेति । पुष्यभास्करे पुष्यनक्षत्रयुक्ते रविवासरे । मृतवत्साचिकित्सामाह । मार्गशीर्षे इति । मार्गशीर्षपूर्णिमायामथवा ज्येष्ठपूर्णिमायाम् । नूतनकलशं कर्पूरचन्दनादितोयेन पूरयित्वा शाखाभिराम्रादिपञ्चपल्लवयुक्तशाखाभिर्नारिकेलादिफलैश्च समायुक्तं रत्नयुक्तं पत्राकारषट्कोणमण्डलमध्ये प्रयोगोक्तमन्त्रैः संस्थाप्य तत्रस्थपूर्ण-

पात्रमध्ये पुत्रिणीपूर्णिमाभिमानिदेवतामेकान्ताख्यां वक्ष्यमाणेन सबीजनाममन्त्रेण गन्धाद्युपचारैः संपूज्य षट्सु पत्राकारकोणेषु क्रमेण ब्राह्म्यादिषण्मातृकाः ॐ ह्रां ह्रीं ब्राह्म्यै नमः। ॐ ह्रां ह्रीं माहेश्वर्यै नमः। इति वक्ष्यमाणमन्त्रबीजैर्नामयुतैरोङ्कारैः पूजयेत्। पूजयेन्मन्त्रबीजेन ॐकारैर्नामसंयुतैरिति पाठस्यैषा व्याख्या ज्ञेया। पाठान्तरं च न मनोरममित्युपेक्षितम्। आहृत्य भो ब्राह्मि तुभ्यमिमं पिण्डं ददामि इमं गृहाण। इत्याहृत्याऽऽह्वानं प्रतिमातृकं कृत्वेति पिण्डान्पृथक्कल्पयेत्पृथक्दद्यादित्यर्थः। ततो गृहाद्बहिः शुचिस्थाने भूतप्रेतादयः काकादयश्च बलिकाङ्क्षिणः प्रसिद्धास्तेषामपि नाम पूर्ववत्संबोध्य पिण्डं दत्त्वा तैर्भुक्ते सति पिण्डे गृहमागत्य देवताचक्रसमीप उपविश्य योगं ध्यानमुत्तरपूजां च कृत्वा व्रतसाङ्गतासिद्ध्यर्थं कन्यकाप्रमुखाः संपूज्य भोजयित्वा दक्षिणां दत्त्वा देवताग्रे निवेद्य संप्रार्थ्य देवतां च विसृज्य कलशोदकं नद्यां च विसृज्य शकुनं कार्यसिद्ध्यसिद्ध्योः सूचकं दर्शनशब्दादि वीक्षयेत्। यदि चाषभासभरद्वाजनकुलादीनां दर्शनं मनोहारिशब्दानां च श्रवणं संपत्तिकीर्त्यादिभिर्वर्धमानपुरुषाणां दर्शनमित्यादिशुभशकुनं दृष्ट्वा मदीयं कार्यं सिध्यतीति वदेत्। विपरीतशकुनदर्शने तु सुसिद्धिदमेनं पूजाव्रतयोगमागामिन्यां पुत्रिणीपूर्णिमायां पुनः कुर्यात्। पूजामन्त्रमाह। ॐ ह्रामिति। दीर्घजीविपुत्रकरं योगमाह। प्राङ्मुख इति। वन्ध्याकर्कोटकी फलशून्या कर्कोटकी। अथ गर्भरक्षणकरीं गर्भिण्या विविधरोगाचिकित्सामाह। अकस्मादिति। नीलोत्पलमिति। मृणालं कमलनालम्। खण्डमादिलोपतन्त्रयुक्त्या श्रीखण्डं ग्राह्यम्। श्रीखण्डं चन्दनम्। श्रीपर्णी काश्मर्यः। शिवण इति नाम्ना प्रसिद्धा लोके। मधुर्मधुकः। जूर्तिषु ज्वरेषु वृक्षकत्वक् कुटजत्वक्। दारु दारुहरिद्रा। गोपी उत्पलसारिवा। अब्दो मुस्ता। श्रीपर्ण्यादिक्वाथो बलादिक्वाथ इवातीसारनुद्भवति। आर्द्रमार्द्रकम्। आर्द्रकक्वाथसिद्धानुचूर्णिताम्। आर्द्रकक्वाथेन पक्वां ततः शुष्कामनु पश्चाच्च चूर्णीकृतां कणां संयोज्य घृतादिषु तान् घृतादीन् शोफादिवारणाय नित्यं सेवेत। वर्षाभूः पुनर्नवा। दुग्धयवागूः दुग्धमिश्रिता यवागूः। द्वे कणे पिप्पली जलपिप्पली चेति पिप्पलीद्वयम्। क्षीरयवाग्वाऽपि सहितं क्षीरं क्षीरमिश्रयवागूं चेत्यर्थः। अथ गर्भिण्याः सप्तमासपर्यन्तं गर्भरक्षणकरीं प्रतिमासचिकित्सामाह। अर्धार्धश्लोकेन—सुरदार्विति। वयस्था आमलकी। यष्टिका मधुयष्टिका। ताम्रवल्ली मञ्जिष्ठा। अश्मन्तकः संश्लिष्टयुग्मपत्रकोऽयम्। क्षीरिशुङ्गः क्षीरिवृक्षांकुरा रक्तवर्णाः। वल्ली लता। प्रियंगुर्गहुला इति लोके। शृङ्गीका कर्कटशृङ्गी। कशेरुर्मुस्तासदृशो वर्तुलो मधुरो लोमशस्तडागकन्दः। कचरा इति लोके। सप्तश्लोकार्धेति। सप्तसंख्याका ये श्लोकार्धास्तत्र निर्दिष्टान् सप्तयोगान् सपयस्कान् सप्तसु मासेषु क्रमेण पिबेत्। पृथक्पर्णी पृश्निपर्णी। विकृतवातपीडितगर्भस्य भेदौ गर्भसंग मूढगर्भाख्यौ निर्दिश्य मूढगर्भलक्षणमाह—त्रिलोमेति। स्तम्भाध्मानमिति। स्तम्भो मलमूत्रस्तम्भः। श्वसनकस्य मुखनासिकावा-

योर्महापूतिगन्धस्तत्र चिकित्सामाह—बीजमिति । हलिनीमूलिकेति । हलिनी लाङ्गली । विशल्यां निःसृतगर्भाख्यशल्याम् । सा हलिनी श्वेतपुष्पा प्रयुक्ता चेत्तत्क्षण एव विशल्यां कुरुते । अपरानिष्कासनयोगानाह—सिद्धार्थेति । सिद्धार्थः श्वेतसर्षपः । गोलोमी वचा । पटु सैन्धवम् । अपरां जरायुम् । सिद्धं पक्वं सर्षपतैलम् । अथ सूतिकारोगचिकित्सामाह—कोरण्टकमिति । लोहखण्डेति । पलमूलमिति । बृहत्पञ्चमूलं ग्राह्यम् । भद्रा बला । चतुर्थांशं भूनिम्बादिकल्कं दत्त्वा चतुर्गुणं जलं च दत्त्वा साधितं तैलं सूतिकारोगनुत् । सप्तच्छदः सात्वीण इति लोकभाषायाम् । अथ सौभाग्यशुण्ठीमाह—अञ्जलीति । अञ्जलिः पलचतुष्टयम् । अष्टपलमिते जल आढकदुग्धसहितेऽर्धतुलशर्करां दत्त्वा गुटिकाकरणयोग्ये दर्वीलेपिनीत्यर्थः । पाके संजाते तत्रैलादिचूर्णं पृथक्पलमितं यथोक्तभागं मिश्यादिचूर्णं चैकीकृत्य क्षिपेत् । रिङ्गणिका कष्टकारी । एतेनैव शब्देन महाराष्ट्रभाषायां व्यवहारो दृश्यते । कण्टकारीबोधार्थं तदनुरोधेनैव कण्टकारीति व्याख्यातम् । भृङ्गं भृङ्गराजम् । योनिशूलादिनाशकयोगानाह—निर्गुण्डीति । गुडजीर्णेति । इन्द्रगोपो वर्षाकालोद्भवो रक्तवर्णः कीटविशेषः । माकन्देति । माकन्दादिभिः कृतो लेपो योनिं संवृतां संकुचितां कुर्यात् । माकन्द आम्रवृक्षः । तुलिकं कार्पासगोलकावृतमुखी तृणकाष्ठादिशलाका । श्रीपर्णी काश्मर्यः । शिवण इति लोके । अथ पर्पटीरसमाह—मञ्जारीमितेति । मार्जारी बिडाली । तस्या एवाऽऽचार्यैवसतिदेशे लोकभाषायां मञ्जारीति व्यवहारः । महाराष्ट्रभाषायामपि रेफशून्यः सानुनासिको व्यवहारः । माजरीति लौकिकशब्द एवात्र प्रयुक्तो दृश्यते । स च बिडालपदकवाचकः । उत्तरपदलोपतन्त्रयुक्त्या बिडालपदकं कर्षस्तन्मितैर्वज्रहेमरजतैर्भस्मीकृतैः । तथा कर्षभागेनैव यथोत्तरं वर्धितैः क्रमेणैककर्षद्विकर्षत्रिकर्षमितैर्भस्मीकृतैरभ्रकताम्रकान्तैः । तथा द्विकर्षमितपारदेन प्रत्येकं द्विकर्षमितैः श्वेतपीतरक्तगन्धकैर्जातः । आदौ पारदगन्धकानां कज्जलीं विधाय ततो वज्रभस्मादि सर्वं दत्त्वा संमर्द्य लौहे कटाहे चुल्लीस्थ ऊर्ध्वदण्डायां लोहदर्व्यां वा क्षिप्त्वा बदरकाष्ठाग्निस्वेदेन द्रवीकृत्याऽऽर्द्रगोमयस्थकदलीदले द्रुतं तत्प्रक्षिप्य तद्दलेनैवाऽऽच्छाद्य निपीडनेन संजात इत्यर्थः । पुनः सूतिकारोगनाशकलोहविशेषानाह—स्वर्णेति । स्वर्णाद्यन्यतमो लोहः सुष्ठु मारितः सूतिकासर्वरोगनाशनः । तथा तत्तद्रोगोक्तानुपानयोगेन सर्वरोगान्तरघ्नोऽपि भवतीति । अथ बालरोगचिकित्सामाह—गर्भेति । पाषाणद्वितयं तद्द्वितयवादनं कर्णसंनिधाविति शेषः । कांस्यभाजनं तद्वादनमित्यर्थः । घृतं च रोहिणी कल्केति । रोहिणी कटुरोहिणी । गन्धोत्पलं सौगन्धिककमलम् । तज्जटाजलेन पिष्टा तथैव कल्किता कटुकी चाल्पमात्रया पायिता ज्वरघ्नी भवेत् । भृङ्गक्षौद्रं भ्रामरं मधु । मध्वम्बिति । मधु मधुयष्टी । अम्बु वालकम् । शृङ्गी कर्कटशृङ्गी । अब्दं

मुस्ता । एषां चूर्णम् । गोजलं गोमूत्रम् । गन्धा अश्वगन्धा । बला नागबला । सुगन्धा रास्ना । अत्र माक्षिक विहाय मधुयष्ट्यादीनां कल्को घृते चतुर्थांशेन देयः । पक्वं घृतमवतार्य यदा शीतं स्यात्तदा मधु, अष्टमांशेन तत्राऽऽवपेदिति वैद्यसंप्रदायः । क्षीरेऽश्वगन्धवातामसुतान्ताः । सह साधितामिति । वातामो बदाम इति लोके । सुतान्ता बहुसुता शतावरी तत्कल्कसहितं साधितम् । स च कल्कोऽत्र घृते चतुर्थांशेन देयः । क्षीरं घृतापेक्षया चतुर्गुणम् । तथामानं जलमप्यत्र चतुर्गुणं दद्यात् । उन्नीय तालुकमिति । प्रतिसार्येति । अतियत्नत इति । मुखान्तरतालुदेशेऽङ्गुष्ठाग्रेणोत्पीडनेनोन्नीय ततो यवक्षारक्षौद्रेऽङ्गुष्ठाग्रे धृत्वा मुखान्तःप्रवेशितेन तेनैवाङ्गुष्ठेन प्रतिसार्योर्ध्वभागे घर्षयित्वा विलिप्य वा पश्चाद्गोमयरसेन बालैः पीतं विश्वादि तथा स्तन्यमधुभ्यां पीतं पथ्यादि बालानां तालुकण्टकरोगं निहन्ति । पथ्या हरीतकी । जलुकाभिः समन्वितं संयोजितं कुर्यात् । रक्तनिर्हरणार्थमिति शेषः । शृतेति । शैलं शिलापुष्पम् । एल्वालुकमेलावालुकं सुगन्धिद्रव्यविशेषः । अजादुग्धेनेति । जातिपत्ररसोपेतैस्तद्रसभावितैर्जीरकाञ्जनचूर्णैः संमिश्रं रसाञ्जनं तथा पूर्वप्रोक्तरसैरपि त्रिफलाबदरीपत्ररसैरपि संमिश्रं रसाञ्जनं विशेषेण पानलेपनयोः प्रशस्तं भेषजमस्ति । अपुष्पाश्वत्थेति । अपुष्प उदुम्बरः । कुचन्दनं रक्तचन्दनम् । ग्रहघ्नीं गुटीमाह—मञ्जिष्ठेति । उग्रा वचा । माहेश्वराख्यं धूपमाह—श्रीवेष्टेति । श्रीवेष्टः सरलनिर्यासः । दारु देवदारु । ग्रहघ्नानि तैलान्याह—छिन्नेति । छिन्ना गुडूची । हंसाङ्घ्रिर्हंसपादी लज्जालुः । भानुपत्रमर्कपत्रम् । स्फूर्जकमिति । स्फूर्जकं तन्दुलीयामिति राजनिघण्टे इति केचित् । श्वेतपत्रं श्वेतसर्षपः । निम्बेति । अथ सर्वग्रहादिवारकं धूपमाह—शैलेयेति । शैलेयं शिलाजतु । गुग्गुलुः कणगुग्गुलुः । रसो बोलः । रक्त्या बोल इति लोके । हिराबोल इत्यपि लोके प्रसिद्धः । पुरो महिषाक्षगुग्गुलू रक्तवर्णोऽयम् । प्रचण्डोऽर्कवृक्षः । दीप्यको वा यवानीत्यपरपर्यायो द्रव्यापहृतचोरको यवानीविशेषः । किरमाणी ओवा इति महाराष्ट्रभाषायाम् । सुरसः सब्जा इति लोके । सरस इति पाठे रसो रालस्तत्सहित इत्यर्थो बोध्यः । कुन्दुरुः कवड्या ऊद इति लोके । कुष्ठमुपलेट इति गुर्जरभाषायाम् । कोष्ठ इति महाराष्ट्रभाषायाम् । ध्यामकं रोहीषतृणम् । सुरभिगन्धो गन्धकः । रसः पारदः । उभयोर्मिश्रिता कज्जलीत्यर्थः । एभिः कृतो धूपः सौभाग्यादिगुणकृद्भवतीति । पिशिताशिनो राक्षसाः । आजिर्युद्धम् ।

इति रसरत्नसमुच्चयटीकायां खरेइत्युपाह्वेन वामनात्मजेन चिन्तामणिना विरचितायां चिकित्सास्थाने द्वाविंशोऽध्यायः ॥ २२ ॥

## अथ त्रयोविंशोऽध्यायः ।

अथ सकारणसंप्राप्तिलक्षणोन्मादकथनपूर्वकं तच्चिकित्सां वक्तुकाम आह—आधीति । आधिर्मनोव्यथा । व्याधिः शरीरचित्तोभयव्यथा । अत्रोक्तकारणैर्दुष्टा दोषा उद्गता हृदि स्थिताः सन्तः कर्तव्याकर्तव्यविचाराभावरूपं बुद्धेः कालुष्यं विधाय हतं दुष्टं दुर्वारं यत्सुखदुःखयोर्मथनं तत्करणादुन्मादेति ख्यातं रोगमातन्वते कुर्वते । मन उन्मथनपूर्वकं माद्यते यस्मिन्निति व्युत्पत्त्या सिद्धोऽयं शब्दः । अत्रेति । अस्मिन्ग्रन्थेऽर्कमूर्तिरिति नाम्नाऽभिहितस्य रसस्याभावात्तेनार्कमूर्तिशब्देनात्र मार्तण्डेश्वरनामको रस एकविंशाध्यायोक्तो ग्राह्यः । उन्मत्तको धत्तूरः । तुम्बिनी कटुतुम्बी । ग्रहघ्नं धूपमाह—कार्पासेति । कार्पासास्थि कार्पासबीजम् । बृहती कण्टकारी । निर्माल्यं शिवनिर्माल्यम् । पिण्डीतको मदनकः । मांसी जटामांसी । वृषदंशविण्मार्जारविट् । नागेन्द्रद्विजो गजदन्तः । शृङ्गं हरिणशृङ्गम् । अथापस्मारलक्षणं समासत आह—कुब्धैरिति । धातुभिर्वातादिदोषैः । दोःपादौ हस्तपादौ । बीभत्साः क्रिया वक्रदर्शनाङ्गकम्पसंकोचलालास्रावादयः । तत्र चिकित्सामाह—रसगन्धकेति । शिला मनःशिला । तेजनीबीजं कङ्गुणीबीजम् । एतत्सर्वं निम्बुद्रवातं निम्बुद्रवमर्दितं कृत्वा तेन कल्केनान्तर्लिप्तां ताम्रीं पात्रीं चुल्लीस्थमृद्भाण्डमध्ये न्युब्जां निधाय तत्पार्श्वे ऊर्ध्वे चावशिष्टं भाण्डोदरं भस्मनाऽऽपूर्य भाण्डान्ते भाण्डमुखे धृतामाच्छादनार्थं धृतां खर्परिकां शराविकां संधिभागे रुद्ध्वा मृत्कर्पटेन रुद्ध्वाऽधो द्विरात्रि( त्र )पर्यन्तं मन्दाग्निना पचेत् । ततः सिद्धस्यास्य रसस्य यथानुपानभक्षणोत्तरमर्धप्रहरे गते सति तेन सिद्धेन सार्षपतैलेन सव्योषणस्यापस्मारिणो नस्यं कारयेत् । कथं सिद्धं कुर्यात्तदाह—षोडशपलमिते सार्षपतैले तत्कल्कितं कल्कीकृतं तद्व्यादि दत्त्वा तत्सार्षपतैलं पचेत् । तेन नस्यं कारयेदित्यन्वयो बोध्यः । अथापस्मारिणो भोजनार्थं शाकौदनादिषु देयं घृतस्य पाकविधिमाह—कृष्णधत्तूरेति । कृष्णबीजादिधत्तूरस्य पञ्चाङ्गं तदपेक्षया षड्गुणितं कृष्णगोनवनीतकं तच्चतुर्गुणं माषक्वाथं च दत्त्वा तत्पचेत् । अन्यत्सुगमम् । योगान्तरमाह—उद्बद्धेति । गले रज्जुनोद्बद्धोऽत्यन्तं दृढं बद्धो यो मानवस्तद्गलसंसक्तां रज्जुमिति । अत्रोद्बद्धच्छागलगले इति पाठो युक्तः । स तु नोपलभ्यते । पुनरपस्मारघ्नमञ्जनयोगमाह—कृष्णामिति । उपोषितं श्वानं विरेकेण संशोध्य ततः सदधिसिततिलभोजनं कारयित्वा तद्ग्रावोत्था कठिनतद्विष्ठोत्था ये सिततिलास्तज्जतैलमग्निज्वलितवर्तितो गृहीतमञ्जनं निम्बसारकाष्ठजपात्रे घृतं नेत्रे दत्तं चेदपस्मारहरं भवतीति । अथोन्मादघ्नीं रसवटिकामाह—हेम्न इति । शुद्धहेम्ना सह समभागपारदस्य पिष्टीं कृत्वा विषं दशमांशेन दत्त्वा स्रोतोञ्जनं च पारदसमं दत्त्वा शूलिनीदेवदालिजलैः पृथग्भावनां दत्त्वा तद्गन्धकतैले पचेत् । घनत्वोत्पत्तिपर्यन्तं तत्कृता कलायमिता वटी भक्षणेनापस्मारघ्नी भवतीति । प्रत्ययाख्यसूतमाह—त्रिलोहेति ।

त्रिलोहं स्वर्णरजतताम्रात्मकम् । तत्पिष्टं तद्भस्मास्रोतोञ्जनं सृष्टित्रयं च तः सह समभागं पारदं शूलिन्यादितोयैः संमर्द्य गन्धकतैलपक्वमपस्मारघ्नं भवेदिति । अयं सूतः सृष्टित्रयं स्त्रीपुंसोः शुक्रयुग्ममप्रसूतस्त्रीरजश्चेति बोध्यम् । शूलिनी । त्रयोदशाध्यायोक्तं मञ्जारीमितित्यादिग्रन्थेन द्वाविंशाध्यायोक्तं वा । तथा ब्राह्मीरसेन साकं पर्पटीसूतं चापस्मारनुत्तये भक्षयेदिति । पुनः पर्पटीरसमेवानुपानविशेषेण योजयित्वाऽऽह—पर्पटीरसेति । आकुलीति । आवलो इति गुर्जरभाषायाम् । तत्रानुपाने विकल्पमाह—सघृतमिति । घृतयुग्धकमिति । सर्वेश्वररसमाह—रसमिति । भस्मीकृतं पारदं तथा भारङ्गमूलादि प्रत्येकं चूर्णीकृतं पलमितं गृहीत्वा सर्वमेकीकृत्य भारङ्गमूलादीनामेव समुचितानां क्वाथेन त्रिदिनं संमर्द्याम्लवेतसरसार्कक्षीराभ्यां पृथक्पञ्चदिनं संमर्द्यामरीरसेनैकविंशतिदिनानि संमर्द्य चित्रकक्वाथेन पिष्टं संमर्दितं कृत्वा सिद्धमेतद्भेषजं त्रिवल्लमितं सेवितमुन्मादापस्मारहरं भवेदिति । फेनफलमहिफेनफलम् । मृगविषाणे हरिणशृङ्गम् । अमरी आकाशवल्ली तन्तुमयीयं निष्पत्रा वृक्षोपर्येवोत्पद्य तिष्ठति । अथ नेत्ररोगान् समासत उद्दिशति—कृष्ण इति । कृष्णे नेत्रकृष्णभागे पञ्चरोगाः । संधिषु वर्त्मसितयोः संधिषु नवैव रोगाः । शुक्लभागे त्रयोदश रोगाः । अखिले सर्वनेत्रे षोडश रोगाः । वर्त्मजा रोगाश्चतुर्विंशतिसंख्याकाः । दृशो रोगाः सप्तविंशतिसंख्याका इति चतुर्नवतिः । एतान्व्याधीन्व्यपहर्तुं प्रतीकर्तुं यो भिषग् विजानाति स विदुषां भिषजामग्रे समर्थो भवेत् । अग्रगण्यो भवेदित्यर्थः । अथ तच्चिकित्सां वक्तुकामः प्रथममभिष्यन्दचिकित्सामाह—शिलयेति । मनःशिलाहतं नागभस्म समभागेन रसराजप्रवेशितं कुर्यात् । चुल्लीस्थितलोहकटाहे पारदं क्षिप्त्वा नागभस्म तत्र दत्त्वाऽधो मन्दाग्निं कुर्वन् भिषङ्मर्दनेन तद्भस्म पारदग्रसितं कुर्यादित्यर्थः । पारदापेक्षया द्विगुणं शुद्धं तुत्थम् । ईषदल्पमष्टमांशेन दत्त्वा द्रोणपुष्पीजलैः संमर्द्य कृता वर्तिः किंचिद्दीर्घगुटिकाऽञ्जनेनाभिष्यन्दविनाशिनी भवेदिति । कार्पासेति । इन्दुः कर्पूरः । स च कार्पासीरसेन पिष्टो मर्दितः कार्यः । तन्मधु मधुयष्टि । चूर्णं ताम्रचूर्णम् । रसाञ्जनं चैतत्सर्वं मिथः समं ताम्रपात्रे तिलपर्णीरसेन संमर्द्य कृता वर्तिर्वाताभिष्यन्दजिदञ्जनेन । तिलपर्णी सूक्ष्मबीजो तीक्ष्णगन्धविशिष्टपत्रः श्वेतपीतान्यतरवर्णः पुष्पमञ्जरीविशिष्टः क्षुपो वर्षाकाले प्रादुर्भवतीति । शुल्बेति । शुल्बचूर्णादि यथोक्तभागं प्रत्येकं आर्द्रकादिरसैः सह ताम्रपात्रे घृष्ट्वा पश्चात्कृतवर्तिर्भिषजमेतदञ्जनदानावसरे दध्ना सह घृष्टं कृत्वाऽञ्जनेन श्लेष्माभिष्यन्दघ्नं भवतीति । जीमूतोऽप्यकचूर्णम् । मयूरोऽपामार्गः । रसेन्द्रेति । इन्दुः कर्पूरः पारदाद्दष्टमांशकर्पूरः । पारदापेक्षया दशमांशं वत्सनाभविषमेतत्सर्वं ताम्रपात्रे जलादिरसैः संमर्द्य कृतवर्तिः संनिपाताभिष्यन्दघ्नम् । चूर्णमिति । रसेन्द्रसमचारितम् । साम्येन पारदे दत्त्वा तेन ग्रसितमित्यर्थः । तत्प्रकारस्तु प्राग्नुपानमेवोक्ते बोध्यः । नागेति । इन्दुः कर्पूरः । रत्नं प्रवालं मौक्तिकं वा । आकरणमाकरः खनिः । तज्जं सैन्धवं लवणं सैन्धवमित्यर्थः ।

सामुद्रवारणार्थमाकरोति विशेषणम् । नागचूर्णादि सर्वं मिथः समं कांस्यपात्रे ( खल्वे ) गृहीत्वा ताम्बूलीदलरसेन सह ताम्रमयमर्दकेन संमर्द्य सिद्धमेतद-ञ्जनं पित्ताभिष्यन्दादिघ्नं भवेदिति । ताम्रादिवर्तिमाह—ताम्रेति । अहिर्नागः । तारं रजतम् । रसः पारदः । पीतकं स्वर्णं स्वर्णमाक्षिकम् । सुरीतिर्वा । रोहिणी हरीतकी । इन्दुः कर्पूरः । शौण्डी पिप्पली । नदीजं यामुनं सौवीरम् । पुराण-कांस्यं कांस्यकिट्टम् । सर्वं समभागं गृहीत्वा सर्वसमं हंसपादीमूलचूर्णं मिश्रयित्वा हंसपादीरसेनैव संमर्द्य कृता वर्तिः सर्वनेत्ररोगान्हन्तीति । पारदादिवर्तिमाह—पारद-नागेति । पारदनागरसाञ्जनानि मिथः समानि गृहीत्वा तत्त्रये समं दृढसंध्यादि-त्रयं दत्त्वा सर्वमेतच्चिञ्चापत्ररसेन सप्तदिनपर्यन्तं पिष्ट्वा ततस्तत्ताम्रपात्रे पर्युषितं कृत्वा कृता वर्तिश्छायाशुष्का, अथ नेत्रे कृताञ्जना सती, अधिमन्थादिघ्नी भवतीति । दृढसंधिर्हडजोडीति ख्याता । मूलकं शाकविशेषः । सरजं सौवीराख्यमञ्जनम् । अधि-मन्थादिघ्नीं पारदवर्तिमाह—पारदनागेति । वत्ता विशिष्टा हरीतकी वर्तुलफला । सिन्धूद्भवं सैन्धवम् । तुत्थं मयूरतुत्थम् । फेनं समुद्रफेनम् । वरा त्रिफला । गान्धिनी गजभक्ष्या । सालईवृक्ष इति लोके प्रसिद्धः । आभा बब्बूलबीजम् । पुत्र-जीवो जीयापोता इति नाम्ना लोके प्रसिद्धः । कनकं सुवर्णम् । शिफा शता-ह्वा । चिञ्चा चिञ्चात्वक् । षड्विधमौर्वं लवणमिति । दशमाध्यायोक्तं षड्विधं लव-णमौर्वं च । और्वमुर्वीजं पांसुजं लवणमित्यर्थः । एतत्सर्वं निम्बपत्ररसैः सह संमर्द्य ताम्रपत्रे लिप्त्वा ततस्तत्कृता वर्तिरधिमन्थादिघ्नी भवेदिति । अथ कर्पूराद्यञ्जनमाह । कर्पूरादिचूर्णानि मिथः समानि नन्द्यावर्तरसैरसकृत्त्रिवारं पिष्ट्वा विशोष्य पुनर्मधुना सह पिष्ट्वा छायाशुष्कं तच्चूर्णं शृङ्गमयपात्रे स्फटिकमयपात्रे वा विनिहितमञ्जनेन शुक्लार्मादीन्निराकरोतीति । नन्द्यावर्तस्तगरम् । गरुडाञ्जनमाह—कतकेति । कतकं जलप्रसादकरं फलम् । निवळीफलमिति लोके प्रसिद्धम् । अब्दो मुस्ताऽभ्रकं वा । वराटकं कपर्दिका । त्रिपटु त्रिलवणम् । अयस्तीक्ष्णं लोहचूर्णम् । हिमं कर्पूरम् । रोहिणी हरीतकी । नृकरोटिका नरकपालास्थि । उरगं नागचूर्णम् । अञ्जनं सौवीरम् । कतकादीनि मधुकान्तानि मिथः समानि करञ्जवल्कलरसेन पिष्ट्वा पिष्टं शुष्कं चूर्णं दृष्टिं गरुडदृष्टिसमां कुर्यादिति । तिमिरघ्नमञ्जनमाह—रसेन्द्रेति । भुजगो नागचूर्णम् । ईषत्कर्पूरमष्टमांशेन कर्पूरयुक्तम् । गन्धकादिति । नेपालेति । नेपालं ताम्रम् । जलजं मौक्तिकम् । रुद्ध इति । स्फाटिकपात्रे पारदं धृतं कपर्दटङ्कणैराच्छाद्य तदुपरि दत्तेन लाक्षाजम्बीरयोर्द्रवेण पूरयित्वाऽऽच्छाद्य मासपर्यन्तं पश्चाच्छुष्करसं सकर्पदटङ्कणं तं पारदं संमर्द्य शुष्कः स रसः पट-लादिहर इति । पुष्पघ्नीं वर्तिमाह—स्वर्णमिति । संयुक्ता संमिलिता वर्तिर्गुटिका पुष्परोगं हन्तीति शेषः । विषमिति । शम्बूकमिति । शिग्रुमूलमिति । श्वेतमिति ।

निर्घृष्येति । शिग्रुबीजतैलाञ्जनमाह—चिञ्चादलेति । कांस्ये कांस्यपात्रे । ततो भावितशिग्रुबीजात् । सूतं निःसृतम् । शशी कर्पूरः । कारवेल्लेति । भृङ्गराजेति । बीजपूररसैरिति । शम्बूकमिति । अजस्येति । कृष्णमांसान्तो यकृन्मांसान्तः । अजापित्तेति । मरिचमिति । मत्कुणे रक्ते भावितामिति शेषः । नवनेत्रदात्रीं वटीमाह—ताम्रेति । द्विरष्टाविति । सैन्धवस्याष्ट भागाश्चेति । सर्वमेतदजाक्षीरेण सह ताम्रपात्रे संपिष्य छायाशुष्कं चूर्णमेतत्स्फटिकपात्रे काचकूप्यां वा निधापयेदिति । कणादिवर्तिमाह—कणेति । वचायुग्वचासहितेत्यर्थः । कणादिभिस्ताम्रान्तैः क्रमेण द्विगुणधरणवृद्धैः । यथा—कणा पिप्पली एककर्षा । लवणं सैन्धवं द्विधरणसहितमेककर्षम् । वचा चतुर्धरणसहितैककर्षेति द्विधरणवृद्धिर्बोध्या । इयं वर्तिः सर्पिःक्षौद्रविशिष्टाञ्जनेन निशि सर्पिःक्षौद्रयुक्तं भक्षितं त्रिफलाचूर्णमिव सर्वनेत्ररोगान्हन्तीति । ताम्रद्रुतिमाह–आर्द्रेति । आर्द्रादीनां मध्ये कस्यचिदेकस्य स्वरसपिष्टेन ताम्रसमांशेन गन्धकेन प्राग्वत्पञ्चमाध्यायोक्तो यो गन्धकेन पारदसहायेन ताम्रमारणविधिः कामलाचिकित्सायां त्रियोनिरसवद्वा मारितं ताम्रं तथा ताम्रवर्णं मारितं वज्राभ्रं तुत्थं च प्रत्येकं दशनिष्कं गृहीत्वा तत्सर्वं कन्दुकस्थं स्थालीयन्त्रघटकस्थाल्यन्तर्धृतं कृत्वा त्रिंशत्कर्षं गन्धकमल्पशो निष्कमितं दत्त्वा शरावपिधानमृत्कर्पटसंधिलेपाभ्यां धूमं रुद्ध्वा चुल्ल्यां मन्दाग्निना विभर्जयेत्तावद्यावदुपरि क्षिप्तं तृणमग्निर्दहेत् । ततः पिधानमपसार्य पुनः कर्षमितं गन्धकं दत्त्वा पिधाय भर्जयेत् । एवं त्रिंशत्कर्षगन्धकभर्जनोत्तरं निष्कासितमेनं रसं जलप्रस्थे क्षिप्त्वा संमर्द्य जल एव भावयेद्वासयेदेकदिनपर्यन्तम् । ततो निःसृतमुपरिस्थं प्रसादं निर्मलं जलं निष्कास्य तत्र तुत्थभस्म नीरशिलाजमेकैककर्षं दत्त्वा छायायां विशोषयेत् । इयं ताम्रद्रुतिराज्यादिसहिताऽञ्जनेन काचादीञ्जयेदिति । आर्द्राऽऽर्द्रकम् । लकुचमाम्लमधुरं फलं बेळगांवसंनिहितदेशे प्रसिद्धम् । तथैतद्भागीरथीतटे लिच्चा इति नाम्ना प्रसिद्धम । भृङ्गो भृङ्गराजः । नीरशिलाजमातपे धृतसशिलाजितपात्रस्थजल उपरि संतानिकारूपेणाऽऽगतं शिलाजं मलमृत्पाषाणरहितं शुद्धं शिलाजितमित्यर्थः । तलस्थं किट्टं लेपेन पामादिजिद्भवेत् । अथ द्वितीयां ताम्रद्रुतिमाह—शुल्बमिति । ताम्रभस्मादिचतुष्कं प्रत्येकमष्टसंख्याकं गृहीत्वा रुद्रजटारसभृङ्गराजरसान्यतररसेन सुश्लक्ष्णं संमर्द्य लघुपुटं दत्त्वा निष्कासितं शीतलमिदमेव भेषजं पुनः स्थाल्यां विन्यस्य तस्य मध्ये निष्कनिष्कमानेन गन्धकं दत्त्वा स यथा जीर्णः स्यात्तथा तं गन्धकं पूर्ववत्पचेत् । एवं शतनिष्कं गधकमसकृद्दत्त्वा पाकेन भस्मीभूतमेतद्भेषजं प्रस्थमितवारिणा संमर्द्य जल एव वासनादुपरि प्रसन्नं जलं वस्त्रेण गालितं संगृह्य तत्र चूर्णीकृतं रक्तवर्णं तुत्थसत्त्वं कर्षांशं दत्त्वा तथा सितं श्वेतवर्णं स्रोताञ्जनं च कर्षांशं दत्त्वा तत्सर्वं कांस्यपात्रमध्ये छायायां धृत्वा शोषयेत् । तामपि ताम्रद्रुतिं जानन्ति भिषजः । रुद्रजय ईश्वरीत्यपरपर्याया ।

अत ऊर्ध्वमार्द्रकस्य रस पिष्टामित्यादिग्रन्थः केनचित्प्रक्षिप्तः क्षेपकः पाठोऽयमिति भाति। आर्द्रालकुचेत्यादिग्रन्थेनानुपदं प्रागुक्तेन समानार्थकत्वात्। तेन गतार्थोऽयं पाठ इति व्याख्यायामुपेक्षितः॥

इति रसरत्नसमुच्चयटीकायां खरेइत्युपाह्वेन वामनात्मजेन चिन्तामणिना विरचितायां चिकित्सास्थाने त्रयोविंशोऽध्यायः॥ २३॥

---

## अथ चतुर्विंशोऽध्यायः।

अथ कर्णरोगचिकित्सां वक्तुकाम आदौ समासतस्तदुद्देशमाह—शूला इति। दोषा वातपित्तकफरक्तसंनिपाताः। तेषां चयेन वृद्ध्या कृतो योऽभिभवः पीडा तद्रूपेणोत्पन्नाः कर्णशूलाख्याः पञ्च रोगाः। प्रतीनाहरुक् प्रतीनाहाख्यो रोगः। कर्णकण्डूः। कर्णविद्रधिः। पालिशोथः। परिपोटः। उत्पातः। लेही। अर्बुदः। कर्णशोफः। कर्णार्शः। कृमिकर्णकः। कूचिकर्णकः। विदारी तद्युक् तत्सहित इत्यर्थः। मन्थ उन्मन्थकः। सती विद्यमाना या तन्त्रिका सा तन्त्रिकाख्य इत्यर्थः। संतन्त्रिका इत्यपि पाठः। कर्णनादः। पिप्पली। दुःखवृद्धिर्दुःखवर्धनः। बधिरस्तद्भावो बाधिर्यम्। पूतिकर्णकः। इति पञ्चविंशतिसंख्याकाः कर्णरोगाः। तच्चिकित्सामाह—कर्णशूलहर इति। क्षेप्यः कर्णान्तरिति शेषः। अब्धिफेन इति। समुद्रफेनादिचतुष्टयं मिथः समं चूर्णीकृत्य सुतैलं नूतनं निर्मलं तिलतैलं संपाद्य तस्मिन्पलद्वयमित आर्द्रकरसेन पक्के सति उष्णे सत्येव तस्मिन् तदब्धिफेनादिचूर्णं क्षिप्त्वाऽवतार्य शीतलेन तत्तैलेन कर्णे क्षिप्तेन कर्णगता गोमक्षिका शीघ्रं बहिर्गच्छेदिति। गवादिशरीरे स्वभावतो निवसन्ती मक्षिका विशिष्टा गोमक्षिकेत्युच्यते। गोमाशी इति लोके प्रसिद्धा। तिलपर्णीति। तिलपर्णी। उग्रगन्धपत्रः क्षुपविशेषः। तिळवण इति महाराष्ट्रभाषायाम्। अर्कपत्रेति। अर्कपत्ररसपक्कं तैलं पूरणात्कर्णशूलनुद्भवेदिति। लशुनस्येति। मेघनादस्तन्दुलीयकम्। मुसलीति। कतकमिति। निवलीबीजम्। लवणं सैन्धवम्। आरनाल काञ्जिकम्। पुत्रजीवेति। पुत्रजीवो जीयापोता इति लोके प्रसिद्धः। उरुमूलं विशालवास्तुस्फोटम्। तगरमिति। तगरं सुगन्धिद्रव्यमेतत्स्वनाम्नैव प्रसिद्धम्। ब्रह्मवृक्षः पलाशः। तस्य ब्रह्मवृक्षस्य। मुशलीति। चर्मचेटस्येति। चर्मचेटो वाघूळपक्षी। पाकोळी इति नाम्नाऽपि लोके प्रसिद्धः। वराहोत्थेनेति। कर्णरोगहररसमाह—वज्रेति। वज्रं हीरकम्। वैक्रान्तो वज्रपाषाणः। विमलं रौप्यमाक्षीकम्। तुत्थं मयूरतुत्थम्। नागः सीसकम्। विषं वत्सकम्। तुल्यैर्मिथः समानभागैर्माक्षिकान्तैर्या कृता कज्जली तां लशुनादिरसैः पृथक् सप्तवारं भावयेत। अरुणी जया तन्मूलकस्य। कुष्ठादितैलमाह—कुष्ठेति।

कुष्ठादिकल्कचतुर्गुणं तैलम् । तच्चतुर्गुणबस्तमूत्रेण सिद्धं कर्णरोगहृदिति । अथ नासारोगानुद्दिशति—षट् पीनसा इति । मलादोषास्तैस्त्रिभिस्त्रयः । चयेन संनिपातेनैकः । रक्तेनैकः । दुष्टाख्ययैक इति षट् । पूयास्रः पूयरक्तः । दीप्तः । पुटकः । अपीनसान्तैर्नामभिर्नासायां गदा अष्टादश भवन्ति । अथ तच्चिकित्सामाह—पूयास्रमिति । कृतनस्येन । श्वेतजीरं संगजिरें इति नाम्ना लोके प्रसिद्धो श्लक्ष्णपाषाणविशेषः । घृताक्तमिति । हिङ्गु ह्यञ्जनात्कामलां जयेदिति । अथ मणिपर्पटीमाह–वज्रमिति । पुष्पं पुष्परागम् । सुचूर्णितं भस्मीकृतं मिथः समस्य रसं हिङ्गुलं गन्धकं चेति त्रयस्य प्रथमं कज्जलीं विधाय प्रत्येकं पारदतुल्यभागं वज्रभस्माद्यपि तत्र दत्त्वा संमर्द्य कृतां कज्जलीं लोहपात्रेऽधःस्थाग्नितापेन द्रवीकृत्य पर्पटीं कुर्यात् । अथ मुखरोगान्संख्ययोद्दिशति—एक इति । स च गञ्जालजी इत्याख्यातः । वातदूषितजिह्वा । पित्तदूषिता । कफदूषिता । अलसकः । अधिजिह्वः । उपजिह्व इति जिह्वागताः षट् । तालुपिटिकाः । गलशुण्डिका । तालुसंहतिः । अर्बुदम् । कच्छपः । पुप्पुटः । पाकः । तालुशोष इत्यष्टौ तालुगताः । वातजमुखपाकः । ऊर्ध्वगदः । पित्तजमुखपाकः । रक्तजमुखपाकः । कफजमुखपाकः । कफार्बुदम् । संनिपातजमुखपाकः । पूतिवक्त्रत्वमित्यष्टौ वक्त्रजाः । दालनः । दन्तहर्षः । दन्तभेदः । दन्तचालः । करालः । अधिदन्तः । दन्तशर्करा । कपालिका । श्यावदन्तः । कृमिदन्तक इति दश रोगा दन्ते । खण्डौष्ठः । ओष्ठकोपः । पित्तौष्ठः । कफौष्ठः । संनिपातौष्ठः । रक्तौष्ठः । ओष्ठार्बुदम् । मांसौष्ठः । मेदौष्ठः । क्षतजौष्ठः । जलार्बुदमित्येकादश रोगा ओष्ठे । शीतोदः । उपकुशः । दन्तपुप्पुटकः । दन्तविद्रधिः । सुषिरः । महासुषिरः । अधिमांसकः । विदर्भः । दन्तनाडी पञ्चविधा । एवं दन्तमूले त्रयोदश रोगाः । वातरोहिणी । पित्तरोहिणी । कफरोहिणी । रक्तरोहिणी । संनिपातरोहिणी । शालूकः । वृन्दः । तुण्डिकेरी । गलौघः । वलयम् । गलायुकः । शतघ्नी । गलविद्रधिः । गलार्बुदम् । वातजगलगण्डः । कफजगलगण्डः । मेदोजगलगण्डः । स्वरघ्न इति गलेऽष्टादश रोगा भवन्ति । अथैषां चिकित्सामाह—चूर्ण त्विति । गलकीलः । गले कील इव लम्बमानो वदनाकारो यो गलरोगस्तत्प्रणुत्यर्थं तद्वारणार्थं सनागां सशुंठिकं हरीतकीसहितं वा तस्मिन्रोगे भानुदुग्धमिश्रेण सैन्धवेन लेपनं कुर्यात् । अथवा भल्लातकतैलेन लिप्त्वा तदुपरि चूर्णं सुधां बन्धयेत् । उत्तेजयति घर्षणेन निर्मलान्करोति । जयाऽरणिका । तैलोपहितेन तैलालोडितेन । पर्पटीरसमुक्तमणिपर्पटीरसं भक्षयित्वा गण्डूषं कृत्वा पश्चान्मुखशोषवारणार्थं वटिकां मुखे धारयेत् । तामेव वटिकामाह—महाराष्ट्रिकेति । महाराष्ट्री जलपिप्पलिका तच्चूर्णं निम्बादिरसेन पृथक् चतुर्वारं विभाव्य कृता गुटिका मुखशोषहरा । श्वतमिति । सर्पाक्षी नाईकन्दनाम्ना मालवे प्रसिद्धः । माहिषीक्षीरेति । रजनी हरिद्रा । मुखच्छायेति । गोमयस्येति । उभे

हरिद्रे । हरिद्रा दारुहरिद्रा चेति । एतेनैवाजाक्षीरपक्वहरिद्रादिचूर्णोद्वर्तनेनैव । गोमूत्रैरिति । वर्टी कुर्यात् । मुखमध्ये धारयित्वोत्पन्नलालास्रावार्थमिति शेषः । गृहधूमारनालेन गृहधूममिश्रितकाञ्जिकसहितं कुष्ठादिक्वाथं समधुसैन्धवं गण्डूषार्थं कुर्याद्वा । अथवा जलस्थाने गृहधूमारनालं दत्त्वा तेन कृतं यत्कुष्ठादिक्वाथं कुर्यात् । तेनापि मुखधारितेन दौर्गन्ध्यनाशो भवतीत्यर्थः । गोमयैर्गोमयरसेन् क्वथिता हरीतकी मिशी कृष्णासमन्विता मुखे बहुदिनानि धृता सती दुरामोदं दुर्गन्धं हरेदिति । मिशी शतपुष्पा । लाजेति । लज्जेत्यपि पाठः । लज्जा लज्जालुः । तुल्यं मिथस्तुल्यभागम् । निर्गुण्डीति । औत्पलं कन्दं कमलकन्दम् । ताम्रपात्रेति । सौराष्ट्री तुवरी । विशालेति । जातीति । जातिः पुष्पवल्लीविशेषः । जाई इति लोके प्रसिद्धा । मूलबीजमिति । मूलबीजं मूलकशाकबीजम् । किंचिल्लवणेति । ताम्बूलचूर्णदग्धो भक्षितेन ताम्बूलमिश्रचूर्णेन दग्धजिह्वो यो नरस्तस्य तिलतैलगण्डूषः सलवणकाञ्जिकगण्डूषो वा सुखकरो भवेदिति । एतस्यार्धम्, वचार्धमिति एतस्यैतत्सर्वद्रव्यस्य समुदितस्य यो भागस्तदपेक्षयाऽर्धभागा वचा ग्राह्या । पारदमिति । विमला रौप्यमाक्षीकम् । ताप्यं स्वर्णमाक्षीकम् । लेपयेदिति । भानुदुग्धमर्कदुग्धम् । ताप्याभ्रेति । काञ्चनी काञ्चनक्षीरी । विषं बत्सनाभम् । निजद्रावेण गण्डमालावतः पुरुषस्य मूत्रेण । तच्चूर्णेन मुण्डीमूलचूर्णेन । तन्मूलं काञ्चनीमूलम् । हेमेति । स्वसमभागाभ्यां हेमताराभ्यां युक्तो मर्दनेन पिष्टीकृतः पारदः क्षीरमर्दितस्तालकश्चैकीकृत्य पश्चात्क्षौद्रे मधुनि तिलतैले च क्रमेण प्रस्विन्नो मन्दाग्निना पाचितः स रसो मुखमध्ये धृतश्चेद्दन्तदार्ढ्यकृद्भवेदिति । तदर्थं स्वर्णादिधातुबद्धरसगुटिकामपि मुखमध्ये धारणार्थं देहि । ततस्तस्या गुटिकायाश्चालनं मुखमध्ये मुहुर्मुहुरितस्ततः संचालनं तथैव दन्तानां घर्षणमपि कार्यम् । तामेव दन्तदार्ढ्यकरीं गुटिकामाह—रूप्यादीति । आदिशब्देन हेमसूतौ ग्राह्यौ । सर्वं समभागं संमर्द्य कृतां पिष्टीं वस्त्रपोटलिकया बद्ध्वा निम्बुफलमध्ये निक्षिप्य पञ्चदिनपर्यंतं धारयेत् । गुलिकां तत्पिष्टिगुलिकाम् । तालकल्कमध्ये क्षिप्त्वा । वस्त्रबद्धां तत्कल्कपोटलिकां दोलायन्त्रमध्ये तिलतैले पचेत् । ततस्तालकल्कमपकृष्य निष्कासितां मलापकर्षणमिति पाठे तामेव गुटिकां मूषामध्ये धृत्वा काचचूर्णटङ्कणसौवीरं तत्र दत्त्वा दृढं ध्मात्वा तेन निर्मलामित्यर्थः कार्यः । अथ शिरोरोगोद्देशपूर्वकं तच्चिकित्सामाह—शिरस्तोदाश्च षट् प्रोक्ता इति । गिरिकर्ण्या इति । मूलं गिरिकर्णीमूलम् । गुडमिति । मरिचमिति । शिरोरोगनाशकं रसमाह—मृतसूतेति । पीतमिति । कुङ्कुममिति । कुङ्कुमादिघृतान्तं यथोत्तरं गुणवृद्धियुतम् । भृङ्गी भृङ्गराजः । स्वर्णेन स्वर्णमयपत्रेण । अभ्रजीर्णरस इति । जीर्णाभ्रकग्रासः । रसः पारदः । तीक्ष्णं तीक्ष्णलोहम् । सुरायसं कान्तलोहम् । पारदभस्मादींस्ताम्रभस्मान्तान् मिथः समान् गृहीत्वा संमर्द्य तच्चूर्णं माष-

मितं भक्षितं सूर्यावर्तादीन्नाशयेत् । कटुतैलं राजिकातैलम् । अत्र स्नुहीक्षीरादीनि द्रवाणि कटुतैलसमानि ग्राह्याणि । किंचात्र जलमनुक्तमपि पञ्चमं तैलसममेव दद्यात् । हलिनी लाङ्गली । विषं वत्सनाभम् । विशाला इन्द्रवारुणी । हलिन्यादिकल्कं तैलचतुर्थांशेन दत्त्वा सिद्धमेतत्तैलम् । अम्लपिष्टं निम्बूरसाद्यम्लपिष्टं तीक्ष्णाद्द्विगुणं विषाद्भागं किंचिन्मिश्रयित्वा लेपेन खलतिघ्नं भवेदिति । अथ व्रणभेदानुद्दिश्य चिकित्सामाह—दोषैरिति । शुल्बचूर्णमिति । रसे जीर्णे पारदेन मारितमित्यर्थः । मदयन्ती मोगरा इति नाम्ना प्रसिद्धा पुष्पवल्ली । पटोलेति । जात्यादिघृतमाह—जातिपत्रमिति । तुत्थं रसाञ्जनं मयूरतुत्थं वा । पत्रकं तमालपत्रम् । अपामार्गेति । व्रणे मललेखनार्थं चूर्णमाह—पारदस्येति । कमलस्य ताम्रस्य । अथ भङ्गाख्यव्रणभेदवर्णनपूर्वकं तच्चिकित्सामाह—भङ्गेष्विति । पर्पटीरसं चतुर्दशाध्यायोक्तं पर्पटीरसमष्टादशाध्यायोक्तं वा सर्वेश्वरपर्पटीरसं प्रयुञ्ज्याद्भक्षणार्थं युञ्ज्यात् । वज्रीमिति । वज्रीं वज्राङ्गीमस्थिसंधानकेत्यपरपर्यायां बालकेन शालवृक्षनिर्यासेन सह संमर्द्य भङ्गव्रणप्रणुत्त्यै भक्षणार्थं लेपार्थं च प्रयुञ्ज्यात् । बोलकेनेति पाठे बोलको हिराबोळ इति प्रसिद्धो लोके । तथा कान्तं लोहचूर्णम् । पाषाणः शैलेयम् । तुत्थं मयूरतुत्थं मिथः समस्तैः सह समभागं मेषीदुग्धे संमर्द्य लेपादिविधमस्थिभङ्गं निहन्ति । समासतो भगंदरलक्षणमाह—गुदस्येति । तच्चिकित्सामाह—आदाविति । लाङ्गलीति । रवितापडवरसमाह—शुद्धसूतमिति । तयोस्तुल्येन रसगन्धकयोस्तुल्येन ताम्रपत्रेण रोधयेदिति । सप्तपुटैः सप्तलघुपुटैः । ताम्रचूर्णमिति । ताम्रभस्मेति । पुनरुक्तमेतत्पद्यम् । भूलतोत्थमिति । भूलता भूनागः । ग्रन्थितं ग्रन्थ्याकारम् । ग्रन्थनादेव तद्दुःखग्रन्थिमाहतं ग्रन्थिनाम्ना शास्त्र आहतं परिज्ञातम् । तं ग्रन्थिमरिभेदादिभस्म विमर्दयेत् । अतो हेतोस्तेन भस्मना कृतो लेपो मेदोग्रन्थिविनाशनः स्यात् । मेदोवृद्धिमसौ तेनेति । असौ कल्को भक्षणेन मेदोवृद्धिं हन्ति । तेन मेदोवृद्ध्या जनितं पूर्वोक्तं रोगं ग्रन्थ्यादिरोगं च हन्तीति । अलं हरितालम् । पुत्रजीवो जीयापोता इति नाम्ना लोके प्रसिद्धः । संधिग्रन्थिर्हस्तपादादिसंधिदेशे जातो यो ग्रन्थिः । स यदि तापोपद्रवयुक्तः स्यात् तदा रात्रा तत्संधिग्रन्थौ क्षीरमोदनं चैकीकृत्य संनिदध्याद्बन्धयेदित्यर्थः । पादाङ्गुष्ठाग्रावयवे रक्तस्रावं कुर्यात् । कक्षग्रन्थिगलग्रन्थिविषये तु हस्ताङ्गुष्ठाग्रे तं रक्तस्रावं कुर्यात् । तच्छिराणां तत्रैव संबन्धात् । पुत्रजीवस्तु न केवलं तान्ग्रन्थीन् किंत्वन्यं स्फोटकमपि विनाशयेत् । गुञ्जेति । यष्टी यष्टीमधु । तलस्फोटं हस्तपादतलस्फोटम् । पेटारी पेटकारी । मुष्टिर्विषमुष्टिः । अर्बुदस्वरूपमाह—मेदोऽत्र(?)दोषमिति । यत्र दुष्टमेदसहितो दोषो मांसोत्थो मांसधात्वाश्रयो यो ग्रन्थिस्ततो ग्रन्थेरपि महद्भवति तदर्बुदं ज्ञेयम् । तद्यदि दुष्टरुधिरं स्रवेत् तर्हि तदेव शोणि-

तार्बुदं जानीयात्। तच्चिकित्सामाह—तन्दुलीयेति। नागकन्या गुडूची। वरी त्रिफला। पुटपक्वो गोर्वरपुटपक्वः। अर्बुदादिजिदित्यत्राऽऽदिशब्देन शोणितार्बुदपरिग्रहः। पुनरप्यर्बुदवारकमुपायान्तरमाह—लिप्तमिति। मेदार्बुदं तत्सैवं यवक्षारविलिप्तं चेद्गन्धोपलस्याऽशनैः कृतैश्चेति गन्धकस्यासकृद्भक्षणेन रक्तेन रक्ताशिग्रुणा सह मिश्रैः शिरीषबीजैश्च भक्षणलेपाभ्यामुपयुक्तैः शाम्यति नान्यथैव। अथ गण्डमालापचीलक्षणं समासत आह—मेदोत्थेति। मेदोत्था दोषाः। गलादिषु मन्यासु वा गण्डान्वार्ताकीफलसमादिविशेषणविशिष्टान् गण्डान्ग्रन्थीन्कुर्वते सा गण्डमालेत्युच्यते। गण्डमालाघटकाः क्षयवृद्धिभागिनी दूर्वेव। ते एव समकालं मिथो विसंदृशपाकाद्यवस्थापन्नाश्चेत् सैव गण्डमालापचीत्युच्यते। सुरवारुण्या इति। सुरवारुण्या इन्द्रवारुण्याः। महेन्द्रकन्या महेन्द्रवारुणी। पित्तं चेत्युभयं श्लक्ष्णं च यथा स्यात्तथा परिघृष्टं लेपेन गण्डमालामपाकरोति। अर्केति। पुष्पे इति। चुच्छुन्दरीति। अपच्यादिहरं लेपमाह—गुञ्जेति। मिथः समभागं सर्वं गोमूत्रमर्दितं लिप्तं चेत्, अपच्यादिहरमे। रजनी हरिद्रा। शठी धत्तूरः। भूः सौराष्ट्री। अश्वमारा करवीरम्॥

इति रसरत्नसमुच्चयटीकायां खरेइत्युपाह्वेन वामनात्मजेन चिन्तामणिना विरचितायां चिकित्सास्थाने चतुर्विंशोऽध्यायः॥ २४॥

---

## अथ पञ्चविंशोऽध्यायः।

अथ क्षुद्ररोगानुद्दिशति—व्यङ्ग इति। विस्फोटोऽष्टाङ्गहृदये क्षुद्ररोगे न परिगणितः। जतुमज्जतुशब्दविशिष्टनामा जतुमणिरित्यर्थः। गन्धः गन्धनामा। अलजी। अष्टाङ्गहृदये न परिगणिता। अत्र शर्करा इति रोगनाम्ना पठिता। सा त्वष्टाङ्गहृदये नैव क्षुद्ररोगे पठिता। शर्कराऽर्बुदस्यैव हि पूर्वावस्थापन्नत्वादिति तदाशयः। तथाऽलजी न तत्र पठिता। कच्छपासमानाकारत्वात्। जालो जालगर्दभः। अश्मगर्दभः पाषाणगर्दभः। मसूरिकाऽप्यष्टाङ्गहृदये नात्र गणिता। स्वतन्त्रमसूरिकाग्रहणेनैव तन्निर्वाहात्। गर्दभी गण्डाह्वा च तत्र न पठिता। तेनात्र क्षुद्ररोगा अष्टत्रिंशत्संख्याकाः परिगणिता भवन्ति। तच्चिकित्सामाह—सर्पिषेति। पर्पटी चात्र विद्रधिचिकित्सोक्ता सर्वेश्वरपर्पटी चतुर्दशाध्यायोक्ता पञ्चामृतपर्पटी वा ग्राह्या। तर्कालेति। इङ्गुदीति। उद्धृत्येति। कुनखं शस्त्रादिनोद्धृत्य स्नुग्भवं क्षीरं कुपर्णी टङ्कणं चेति सर्वमेतत्कल्कीकृत्य तेन नखदेशं सम्यग्वृढं निरुध्य निबध्य नखमूलदेशे दाहं च क्षाराग्निभ्यः कृत्वा सुनखी भवेदिति। कुपर्णी कुत्सितगन्धपर्णी। तिलपर्णी। व्रणेति। व्रणं सर्वं पूति पूयेन युक्तं नखविवरम्। अभया हरीतकी।

एकैव शीघ्रं रोपयति । सैव यद्यास्फोतादिक्षीरैर्युक्ता स्यात्तर्हि रोपयेदिति किं वक्तव्यम् । एतेनात्राभयायाः शक्त्युत्कर्ष आस्फोतादीनां क्षीररसाद्युपयोगश्च प्रदर्शितः । आस्फोता गिरिकर्णी । तस्या आसारः स्वरसः । तथैव कुरण्टकस्वरस एव तदासारशब्देन ग्राह्यः । तत्रोपायान्तरमाह—सकुष्ठमिति । पुत्रजीवस्येति । एकवीर एकलकण्टो इति गुर्जरभाषायाम् । काटे असाणा इति महाराष्ट्रभाषायाम् । यष्टीति । यष्टी मधुयष्टी । सर्वं समं मिथस्तुल्यभागम् । लिङ्गव्याधाविति । लिङ्गव्याधि-र्लिङ्गार्शप्रमुखः । जलैः क्वाथद्रव्यापेक्षया चतुर्गुणैः शृतं शृताख्यं यत्क्वाथं कषायम् । घोण्टापथरी बोर इति उत्तरदेशे प्रसिद्धम् । दगडी बोर इति महाराष्ट्रभाषायाम् । सारं वृक्षान्तःस्थो दृढकाष्ठांशः । सुगन्धकघृतैः आमलसाराख्यगन्धकमिश्रैर्घृतैः । आपतनमावनं पक्वलिङ्गे प्रक्षेपोपयुक्तमित्यर्थः । यवचिञ्चा चिञ्चासमानपत्रा वाराणस्यादि-संनिहितदेशे प्रसिद्धा । काटेधोतरा इति महाराष्ट्रभाषायां प्रसिद्धः । क्षुप इत्यपि केचित् । चूर्णेनेति । चूर्णेन सुधाख्येन । सर्पाक्षी नाइकन्द इति लोके । अथ लिङ्गव्याधिनाशकं धूमपानप्रयोगमाह । लवङ्गजानां लवङ्गवृक्षजपुष्पाणां लवङ्गाख्यानां नवकं नवसंख्याकसमूहः । कर्पूरं लोकप्रसिद्धं सुगन्धिकर्पूरम् । दरदं हिङ्गुलम् । ब्रह्मवृक्षः पलाशवृक्षः । तद्बीजं ग्राह्यम् । सर्वं खल्वे विचूर्णयेत् । कियत्कालपर्यन्तं तदाह—यावत्कज्जलसंनिभां श्यामतां प्राप्नुयात्तावत्कालपर्यन्तम् । ततस्तत्समुदायसमं ब्रह्मवृक्षबीजं कोकिलाक्षपञ्चाङ्गं तद्बीजं वा तत्र दत्त्वा पुनः संमर्दयेत् । रविवारे रविवारमारभ्य सप्तदिनपर्यन्तम् । तामेकां पुडिकां समादाय तत्स्थं भेषजमङ्गारेऽङ्गारपूरिते शरावे निक्षिप्य सच्छिद्रसंबद्धाष्टाङ्गुलवंशनाडीकेन न्युब्जशरावेण संगोप्याऽऽच्छाद्य मुखं नासिकातिरिक्तसर्वमुखभागमाच्छाद्यासंवृतनासिकया यन्त्र-नालिकागतं धूमं यातायातेन स्वभावतो गतागतेन न त्वाकर्षणवेगसहितेन । तद्-धूमग्रहणसमये मुखे च ताम्बूलपत्रवीटिकां धारयेत् । ताम्बूलपत्रवीटिका चूर्णपूग-लवङ्गाद्युपस्करसहितं ताम्बूलमित्यर्थः । पश्चात्सप्तदिनोत्तरं प्रत्यहं पथ्यमन्नं लवणर-हितं देयम् । शाखोटः साहोडा, अथवा हेदी इति महाराष्ट्रभाषायाम् । पाद-कण्डूहरामिति । नवनीतेन सह शाखोटत्वक्चूर्णस्य म्रक्षणमभ्यज्य मर्दनं कुर्यादि-त्यर्थः । तदनन्तरं हयारिपत्रधूपेन सह पाददाहहृत्क्वाथे पादं धृत्वा स्वेदनं कुर्यात् । धूपं कृत्वा तथा स्वेदं कुर्यादित्यर्थः । पाददाहहरद्रव्याणि सारिवादिगणोक्तानि । तथा पित्तरक्तोत्तगवृतौ एलेयामृतप्राशोक्तानि च बुध्येत । सारिवादिगणोऽष्टाङ्गहृदये द्रष्टव्यः । तिलेति । तिलवाकुचीचूर्णं समधुसर्पिर्भक्षितं पादकण्डूप्रशान्तिकरम् । नवनीतेन सह तच्चूर्णम्रक्षणमपि तथाफलम् । तथा सघृतपथ्याचूर्णमर्दनमपि तथा-फलम् । तथा वृक्षेऽर्धपरिपाकदशां प्राप्तया यवचिञ्चया सह घृतेन मर्दनं हिम-कालजपादस्फुटितत्वनिवृत्तिकरम् । शिलादिनेति । आदिशब्देन लोहकाष्ठकठिन-लोष्ठशर्करातृणशलाकादीनि ग्राह्याणि । तेन पादतलभेदे सति षड्गुणं द्रवं

तापेन किंचित्सद्रवरूपं कृत्वा लेपार्थं पादतले क्षिपेत् । तमेव षण्णां गणमाह— गुडेति । मदनलेपमाह--मदनमिति । पादस्फोटे पूर्वोक्तप्रकारेण भिन्ने सति शीतकालेन बा तलभेदे सति । मदनं सिक्थकम् । मोम अथवा मेण इति महाराष्ट्रभाषायाम् । तत्र लेपान्तरमाह--मदनमिति । मदनं मदनफलम् । मदनादि-सर्वं महिषीनवनीतेन संमर्द्य सुतप्तस्य तस्य कल्कीभूतचूर्णस्याऽऽलेपनात् । सुतप्तं लेपनं भवेदिति पाठोऽपि साधुरेव । काञ्चनमारग्वधचूर्णम् । खुडं वातरक्तम् । शिला शिलाजतु । कर्षार्धमिति । स्यातां पीनौ स्थिरौ स्तनाविति पाठः । श्यामा उत्पलसारिवा । निशा हरिद्रा । कुरवस्येति । शुल्बचूर्णं रसे जीर्णमिति । रसे जीर्णं पारदं भस्मना मारितमित्यर्थः । मद्यन्ती मोगरा इति सुगन्धिपुष्पवल्ली लोके प्रसिद्धा । स्नायुकं नारु इति नाम्ना लोके प्रसिद्धः । रसः पारदः । श्लीपदनाशकरसमाह--ताम्रभस्मसमं सूतमिति । नागवल्ली ताम्बूलवल्ली । मेघनादस्तन्दुलीयकम् । वर्तुलपालिकाबन्धविशिष्टगर्तागर्भकां चक्राकारगर्तां चक्रयन्त्रमित्याचक्षते । तत्र गर्भगर्तोदरे लघुशरावसंपुटितमेनं रसं निधाय पालिकाबन्धं पिधानेन पिधाय मृत्कर्पटादिना संधिं रुद्ध्वा बाह्यगर्तां पिधानोपरि भागं च समन्ततो वन्योपलैः संपूर्यैकदिनपर्यन्तं पचेत् । अन्तराऽन्तरा वन्योपलभस्म बहिर्निष्कास्य वन्योपलपूरण-ज्वालनं च कुर्यात् । अष्टप्रहरपर्यन्तमयं पाकक्रमो विधेय इति बोध्यम् । तानि पुनस्तैनैवेति । तानि रीतिपत्राणि तेनैव धाराविशिष्टरीतिशस्त्रेणैव घर्षयेत् । घर्षणेन कणरूपाणि कुर्यादित्यर्थः । तच्चूर्णं कूष्माण्डफलरसेन भावयित्वा तद्गोलकं वस्त्रेण वेष्टयित्वा बहिर्मृदा विलिप्य संशोष्य लघुमृद्भाण्डे तद्गोलकं निधाय भाण्डमुखं पिधाय संधिरोधं मृत्कर्पटादिना कृत्वा महापुटं दद्यात् । एवं प्रतिपुटं कूष्माण्डवारिणा घर्षणं कृत्वा त्रीणि महापुटानि दत्त्वा ततः ककुभवारिणा संमर्द्य गजपुटं दद्यात् । वल्मीकमृद्रसैर्वल्मीकमृत्संबन्धिजलेन प्रतिमेषाख्योऽयं रसास्त्रिवल्लमितो देयः । वल्मीके मृत्तिकया च तस्य वल्मीकवतः पुरुषस्य वल्मीकाख्यं रोगं विलिप्यायं रसो देयः । उभयप्रयोगोऽपि समानकाले कार्य इत्यर्थः । अमरी अमरवल्ली । उत्तरवारुण्या लोके उतरणी इति ख्यातायाः । दुग्धफलपत्रा, इयं वल्ली कारवल्ली-समानकण्टकितद्वित्रफलगुच्छा विराजते । अयं रसश्च वासाकषायानुपानेन कफस-मीरणं जयेत् । अत ऊर्ध्वं परिगणितापरिगणितक्षुद्ररोगान् स्त्रीपुरुषसाधारणान् प्रतिचिकित्सते—विडङ्गमिति । वरेति । वरा त्रिफला । असनो बीजकः । अग्निश्चित्रकः । तच्चूर्णं हरिद्राक्वाथमधुप्लुतं कृत्वा यो नरः पिबेत् स मासेन कृशो भवेदिति । विपरीतरतं तदुच्यते—यत्र पुरुष उत्तानोऽधःशायी तदुपरि न्युब्जशायिनी स्त्री चेति । तद्विषये प्राप्ते सति लिङ्गे तत्र दाह उत्पद्यते कार्श्यं चेति । प्रत्यग्र इति । वाजीकरणादिसेवनेन नूतनदेह इव भूत्वा स पुरुषस्त-

च्छास्त्रसंमतं प्रशस्तं मैथुनासनं कृत्वा स्त्रीकर्तृकयोनिसंकोचनेन लिङ्गाकर्षणमानयेत् । कारयेदित्यर्थः । एवमल्पकालपर्यन्तं कृत्वा विमुक्तमैथुनो लिङ्गं शीतोदकेन क्षालयेत् । पृष्ठके पृष्ठभागे । बोलबद्धेति । बोलबद्धरसस्त्रयोदशाध्याये प्रागुक्तः । मत्स्याक्षी सूक्ष्मदीर्घतिक्तपत्रा । अतिक्षुद्रक्षुपोऽयं सजलदेशसंनिहितभागे तिष्ठति । जलब्राह्मीत्यपरपर्याया । बाम्ब इति महाराष्ट्रभाषायाम् । हुनगुन्दा इति कर्नाटकदेशे । केन कृत्वा लेपयेत्तदाह—सामुद्रेति । चूर्णं सुधा । मस्पर्शारिप्रलेपनमिति । मक्षिकायाः स्पर्शेन स्वगृहस्पर्शमात्रेण तन्तुसक्तपादायाः गन्तुमसमर्थायाः शत्रुर्भवति, इति व्युत्पत्त्या मस्पर्शारिर्गुदजसूत्रेण गृहकर्ता तन्तुवायः कीटविशेषस्तस्य प्रलेपनं रोगस्थाने कार्यम् । तिलजीवनं तिलक्वाथः । अनेकैरिति । अनेकद्रव्यसंयोगजं यद्विषं तत्कृतकं कृत्रिममित्यर्थः । मेघनादेति । मेघनादस्तन्दुलीयकम् । ज्येष्ठाम्बुत्रैफलोदकं शतावरी शिफा वा पारदभस्मना सह पीता विषं हन्ति । सुरभीति । सुरभिर्गौः । शशिराजी सोमराजी । कुनटीरस इति । कुनटी मनःशिला । रसः पारदः । पुटितो भावितः पुटपाचितः । तुषपुटे दत्त्वा पाचितो भस्मीकृतः पारदो लूताविकारजित् । नागदमनी सापसंदी इति नाम्ना प्रसिद्धा कोंकणदेशे । उत्पलसारिवासमानदीर्घपत्रा सूक्ष्मदण्डा इयं वल्ली द्वित्रिहस्तोच्छ्राया तिक्तरसा वल्ली सत्यपि स्वतन्त्रा एव तिष्ठति न वृक्षाश्रयेण । शिरीषस्य कृष्णपुष्पशिरीषस्य । व्योषेति । व्योषकल्कं दत्त्वा एरण्डपत्रस्वरसपाचितम् । मेघनादी तन्दुलीकम् । तार्क्ष्यमिति । विषार्तो यो नरस्तार्क्ष्यसंज्ञकमुक्तं विषारिरसं वन्ध्याकन्दरससहितं भक्षयेत् । तस्मात्पुरुषात् तद्विषाणि नाशं यान्ति । मृतं संजीवनम् । विषमिति । टङ्कणेन सह मर्दनेन मारितं विषं वत्सनाभं विषमूर्च्छया मृतप्रायनरस्य संजीवनं भवेदिति । अतिगुह्योपदंशिना । सविषप्राणिविशेषविज्ञानरहितः केवलं विषलक्षणलक्षित उपदंशो दन्तक्षतदेशो यस्य विषार्तस्य तेन पुरुषेण टङ्कणरज उपयोक्तव्यम् । दिवा सूर्योदयमारभ्य सूर्यास्तपर्यंतम् । ब्राह्मतरोः पलाशवृक्षस्य । अर्कस्नुहीपयसा इत्यपि पाठः । कनकसारेति । कनकसारादिरसैः सिद्धो मर्दितो यो हरः पारदस्तस्य निषेवणादिति । कनकसारो बीजकः । सुतीक्ष्णं मरिचम् । हपुषा शेरणीति लोकभाषायां प्रसिद्धा ।

इति रसरत्नसमुच्चयटीकायां खरेइत्युपाह्वेन वामनात्मजेन चिन्तामणिना विरचितायां चिकित्सास्थाने पञ्चविंशोऽध्यायः ॥ २५ ॥

## अथ षड्विंशोऽध्यायः।

अथ रसायनानि भेषजान्याह। तत्राऽऽदौ साधारणान् रसायनभेषजगुणानाह—दीर्घमिति। जराकारणान्याह—पन्था इति। पन्थाः पथा पादचारप्रवासः। तच्चिकित्सामाह—हलिनीति। हलिनी लाङ्गली। उपविषविशेषः। हस्तिपर्णी मोरवेल इति प्रसिद्धा वल्ली त्रिदला। लवलिकाऽऽमलकविशेषः। हरपरेवडी। अथवा रायआवळी इति महाराष्ट्रभाषायां प्रसिद्धा। मत्स्याक्षी सूक्ष्मतिक्तपत्रा जलब्राह्मी। अथवा बाम्ब इति प्रसिद्धा। मूकमूषायां मल्लमूषायाम्। त्रिःपक्वौ त्रिवारं लघुपुटेन पक्वावित्यर्थः। अथादित्यादित्यरसमाह—आवर्तितेति। आवर्तिते वह्नितापेन द्रुते सति। मुद्रगूढेति। रसमेनं ताम्रपत्रसंपुटे धृत्वा मृद्वस्त्रेण संधिं विलिप्य संशोष्य भूधरपुटं दद्यादिति। अथ सर्वरोगघ्नं रसमाह—मूषामिति। तिन्दुकविस्तारां तिन्दुकफलसंनिवेशयोग्यविस्ताराम्। आयामे दैर्घ्ये षोडशाङ्गुलां मूषामुच्छ्रितां स्थूलचुल्ल्यधिष्ठितमृद्भाण्डमध्ये य उदरावकाशस्तच्चतुर्थांशो वालुकापूरितो भागस्तत्स्थः स्वपादांशः स्वकुघ्नभागो यथा स्यात्तथा वालुकाभिः पूरयेत्। भाण्डचतुर्थांशावकाशं वालुकया प्रपूर्य तदुपरि—उच्छ्रितामेनां मूषां निधाय तन्मूषाकण्ठाधोभागपर्यन्तं वालुकाभिः पूरयेदित्यर्थः। तन्मूषामध्ये प्रथमं रससमभागं गन्धकमधो निधाय तदुपरि रसं निधाय तदुपरि समभागं गन्धकं निधाय मन्दाग्निना याममात्रं पचेत्। घटिकाद्वयोत्तरं धूमबाष्पोद्गमरूपेण गन्धोद्गमावसरे मुहूर्ते मुहूर्ते वायस्यादिरसं पृथक्क्रमेण क्षिपेत्। वायसी काकमाची। नागिनी नागदन्ती। अतिदीर्घपत्रा दीर्घश्वेतपत्रपुष्पा नागदवणीति महाराष्ट्रभाषायाम्। मत्त उन्मत्तो धत्तूरः। मेघनादस्तन्दुलीयकं द्विमाषप्रमितं खादेदिति शेषः। अरुणागस्ती रक्तपुष्पोऽगस्तिः। क्षीरिणी दुग्धिका। एषां यवादीनाम्। त्रिपञ्चरात्रेण पञ्चदशरात्रेणेत्यर्थः। विडङ्गसारो विडङ्गसत्त्वम्। अथ ज्योतिष्मतीकल्पमाह। ज्योतिष्मती मालकांगोणीति लोके प्रसिद्धा। उत्तमं परिपक्वं तद्बीजतैलं तिलवदाहरेत्। अथवा जलदानेन विना कल्कीकृतं तद्बीजं मुष्टिना निपीड्य प्रकारान्तरेण वा तैलमाहरेत्। अत्र चतुर्थांशमाक्षिकं पाकोत्तरमवतारितशीततैले देयम्। तैलेन पूरयेत्। ताम्रपात्रं ज्योतिष्मतीतैलेन पूरयेत्। षण्मासोत्तरं तत्पात्रं बहिर्निष्कास्यार्कयन्त्रेणोत्थापयेत्। तत्तैलं यथाबलं माषकर्षादिमानमितं प्रत्यहं भक्षणेन त्रिवर्षकाले गते सत्ययं महाकविर्भवति। त्रिपुरुषायुषः त्रिशतायुषः स्यात्। सातला रीठा इति ख्याता। कृमिशत्रुर्विडङ्गम्। अयःकपाले लोहपात्रे। एकरात्रपर्यन्तमुषितम्। नीलज्योती रात्रिसमयेऽग्निरिव प्रकाशमानं तृणजातीयं महौषधम्। तन्मिश्रं कान्तभस्म वसन्ते रुदन्तीधात्रीपत्रैः सह ग्रीष्मे त्रैफलोदकेन वर्षासु मध्वाज्याभ्यामिति क्रमेण वत्सरार्धप्रयोगो बोध्यः। यावच्च स्याद्यावत्कालं जीवेत तावत्कालपर्यन्तमित्यर्थः। रजनी

हरिद्रा । तार्प्यं स्वर्णमाक्षीकम् । अब्दो मुस्ता । अग्निश्चित्रकः । पुनर्नवाङ्घ्रिः पुनर्नवामूलम् । गिरिजं गैरिकम् । हेमतो हेमभस्मनः । कान्तशरावके त्रिफलका हरीतक्यामलकं बिभीतका अस्थिसहिता रात्रिसमये पर्युषिता अत एव भिन्नाः क्लिन्नाः प्रातर्मुष्टिमिताः पलमिताः पश्चादबीजास्थिरहिताः । कान्तभस्मगुणानाह—एतत्स्यादिति । कान्ताभ्रकरसायनमाह । सिद्धं परिपाकेन भसितरूपम् । तन्मलयुजि, अन्तःप्रक्षिप्तकान्तलोहकिट्टयुते पलाशवृक्षजोलूखले । तत्किट्टं घृतैर्मिश्रं कृत्वा विमृद्यात् । ततो मिश्रं तत्किट्टं प्रस्थमितं गव्याज्यमेकत्र कृत्वाऽऽढकमितैर्ब्राह्मीरसैः पचेत् । अत्र कल्कं च पाठादीनां घृतचतुर्थांशेन दत्त्वा सिद्धं घृतं कीटार्यादिचूर्णसहितं यो नरो भक्षयेत्स सप्तरात्रं सेवित्वा सौकर्यसुकरत्वं कार्यक्षमत्वं प्राप्नुयात् । कीटारिः कीटमारी । कान्ताभ्रेति । भृङ्गीरसो भृङ्गराजरसः । लोहाभ्राविति । हाटकं सुवर्णम् । तुल्यभागं सर्वं कमारीरसे संमर्द्य कृतं गोलकम् । वरा त्रिफला । आज्ञासिद्धमिदं सफलमेव भवतु इति वाक्सिद्धिविशिष्टकृष्णात्रेयाज्ञासिद्धम् । इह तानिति । इह–उक्तरोगचिकित्सायाम् । लक्ष्मीविलासरसमाह—वेदेति । भूस्तुवरी चतुर्भागा । सूतः पारद एकभागः । गन्धको द्विभागः । उष्णं मरिचं षड्भागम् । तिन्दुर्विषतिन्दुः कुपीलुः षड्भागः । टङ्कष्टङ्कणः षड्भागः । एतत्सर्वं भृङ्गराजादिरसैः पृथक्त्रिवारं भावयित्वा गोलकीकृत्यार्कपत्रैः संवेष्ट्याङ्गुलस्थूलार्द्रमृदा बहिर्विलिप्य पुटपाकेन पचेदिति । आर्द्रमार्द्रकम् । गुञ्जा गुञ्जापत्रम् । यवनी यवानी । वरा त्रिफला । अथ सौशृताख्यपाकमाह—वाराहीति । कनका स्वर्णजीवन्तिका । अहिरहिका शाल्मलिः । खरा खरगन्धा नागबला । वानरी कपिकच्छुः । सप्तद्रव्याणां पृथक् पृथग्दुग्धपाकभावनया सप्त भावना भवन्ति । नारिकेलं सच्छिद्रं नारिकेलमज्जागोलकं तदुदरे शुष्कमेतच्चूर्णं संभृत्य पूरयित्वा रुद्ध्वा सनारिकेलसर्वचूर्णापेक्षया द्वात्रिंशद्गुणितदुग्धेन तथा उत्क्वाथ्य पक्कं घनत्वं प्राप्तं स्वाङ्गशीतमवतार्य शुष्कं चूर्णीकृत्य घृतेनार्धचतुर्थांशमितेन प्रपचेत् । कथमुत्कथनं दुग्धेन कार्यं तदाह । दर्व्या संवर्तितं मुहुर्मुहुरितस्ततः संचालितम् । जातीफलमिति । उष्णमवतार्य तत्क्षणे षोडशांशेनाऽऽवपेदित्यर्थः ॥

इति रसरत्नसमुच्चयटीकायां खरेइत्युपाह्वेन वामनात्मजेन चिन्तामणिना विरचितायां चिकित्सास्थाने षड्विंशोऽध्यायः ॥ २६ ॥

---

## अथ सप्तविंशोऽध्यायः ।

अथ वाजीकरणफलं तन्निरुक्तिं च क्रमेणाऽऽह—वाजीकरणमिति । वाजीकरणं भेषजमन्विच्छेद्रसायनसेवनेन दृढबलो भूत्वा पश्चादिच्छेदित्यर्थः । वाजीवाश्व इवाप्रतिहतोऽकुण्ठितशक्तिवेगः सन् बह्वीरङ्गनाः प्रयाति । सुखोपयोगाद्बालानां यतः

षोडशवर्षाणां दृष्टार्तवानां प्रमदानां मैथुनकालेऽश्रमेण सेवनं वाजीकरणभेषजसेविनो भवति । पुनः पुनर्बलवृद्धिरेव च भवति । अतः प्रयोगान्वक्ष्यामीत्यन्वयः । तत्र प्राक्कर्तव्यमाह—शुद्धकाय इति । वमनविरेचनादिना निर्मलदेहे सति । कुलीरशृङ्गी कर्कटशृङ्गी । तेन रसेन । अङ्कोलजटारसं दत्त्वेत्यर्थः । गुटिकीकृतमाजमांसगोलकमध्ये न्यस्तं कृत्वा मांसपिण्डं सूत्रेण बद्ध्वा तिलतैले विपाचितं कृत्वा तप्ततत्तैल एव तावत्कालपर्यन्तं मज्जयीत यावता गुटिकायां सिन्दूरवर्णोत्पत्तिः स्यादिति । ततस्तद्भक्षणोत्तरं साक्षान्मैथुनं विना चुम्बनालिङ्गनसंभाषणादिमात्ररूपं स्त्रीसेवनमावश्यकम् । अन्यथाऽस्य पुरुषस्य लोचनं स्फुटति । किंच स रसोऽस्य शरीरं माऽऽक्रामति । शरीरान्तस्थसर्वधातुषु न व्याप्नोत्येकीभावं च न गच्छति । गुदादिमार्गेण बहिर्गच्छतीत्यर्थः । क्रान्तेन रसेन तु शरीरे मन्मथो वर्धत एव । साक्षान्मैथुने सति तु मरणभयम् । अतो जितेन्द्रियो भूत्वा रसप्रयोगकालसमाप्तिपर्यन्तं मन्मथवेगशान्त्यर्थमुक्तप्रकारेणैव स्त्रीसेवनं कुर्वीतेति भावः । मुशलीति । मूषास्थं मल्लमूषास्थं तुषाग्निना गजपुटपाचितम् । अथ हेमसूताभ्ररसमाह—शाल्मलीति । तद्युक्तः शाल्मलीरसेन मर्दितः कदलीकन्दरसादिषु प्रत्येकं सप्तवारं दोलायन्त्रे पाचितः । पृथक्समैः शाल्मल्यादिचूर्णैर्युक्तः कार्यः । कामदेवरसमाह—हेमेति । हेम स्वर्णभस्म । चतुर्थांशेन । तं च रम्भाफलमध्ये मिश्रं कृत्वा दद्यात् । क्षीरा क्षीरविदारी । अथ मदनसुन्दररसमाह—गन्धकेनेति । समभागगन्धकेन सह पिष्टः कज्जलीकृतस्ततः कह्लाररसेन सप्तदिनपर्यंतं मर्दितः पश्चाद्विवृतमुखकाचकूप्यां संभृत्य वालुकायन्त्रमध्ये मृदुमध्याग्न्यादिक्रमेण गन्धकमानानुरोधेनोचितकालपर्यन्तं पाचितः सिद्धो मदनसुन्दराख्योऽयं रसो वृष्यो भवतीति । कह्लारं प्रभूतसुगन्धयुक्तं कमलम् । अर्धपलगन्धकस्य सधूमजारणमेकप्रहरेण संभवति । मृदुमध्याग्निभ्यामिति साधारणनियमं पर्यालोच्य गन्धकमानं गृहीतं दृष्ट्वा पाककालनिर्णयः कार्यः । अथ पूर्णचन्द्ररसमाह—कामदेव इहेति । अनुपदमुक्तः कामदेवो रसः । स एव सोच्चटो रक्तपुष्पागस्त्यप्रसूनरसभावितः पूर्णचन्द्र इति ख्यातः शुक्रधातुपूरको भवति । सुदृशां स्त्रीणां सुखाय रतिकर्मसमर्थं रसत्रयम्—कामदेवमदनसुन्दरपूर्णचन्द्रेतिरसत्रयं हरिरुक्तवान् । अथ मदनमुन्मदरसमाह—माषार्धमात्रमिति । पारदमर्धमाषमितं मोचारसेन शाल्मलीरसेन सहैकविंशतिदिनानि संमर्द्य तेनैव शाल्मलीरसेनैव पारदतुल्यगन्धकमपि तावन्ति दिनानि संमर्द्य तं गन्धकं गोघृतमध्ये पक्वं कृत्वा शाल्मलीरसेनैव विभाव्य संशोध्यैकीकृतयोः काचपात्रे स्थितयोस्तयोरेकां गुञ्जां ताम्बूलवल्लीदलेन सह संमर्द्य निशायां निषेव्य पक्वकदलीफलयुतं दुग्धमनुपिबेत् । अयं रसः संसारसारभूतविषयसेविनां नराणां सन्मित्रं मित्रमिव भवति । यतोऽयं मदनं गतविच्यवनैः शुक्रच्युतिरहितैः सुरतैर्मर्दयेदुत्तेजयेत । हर्षमुज्ज्वलयेत् प्रमदासु

हान् मैथुनश्रमेण विह्वलयेत् । अतोऽयं सुह्रदिति पूर्वत्र संबन्धः । कुसुमायुधरसमाह—सूतस्येति । सुवर्णभस्म पादन्यूनपलं त्रिकर्षम् । सुवर्णमाक्षीकं भस्मीकृतं तथा रौप्यमाक्षीकमिति द्विविधं ताप्यम् । तच्च प्रत्येकं पारदसमानभागम् । असितघनं कृष्णवज्राभ्रभस्म, इति त्रीन्कर्षान्मितान् गृहीत्वाऽत्र ग्राह्यं लोहं तीक्ष्णाख्यं दरदेन हन्यात् । तत एकशः कृत्वा मर्दितं सर्वं चूर्णं वालुकायन्त्रमध्य आच्छादनरहितायां पक्वमूषायां संभृत्य तच्चूर्णोपरि ब्राह्म्यादिरसं पुनः पुनरल्पाल्पं दद्यात् । प्रत्येकं यथोक्तदिनपर्यन्तं पचेत् । प्रत्येकमेकात् । पृथगेकैकस्माद्द्रव्याद्रसं दत्त्वा । त्र्यहं त्र्यहं पचेत । कुञ्जरवल्ली ताम्बूलवल्ली । उत्तरपदलोपतन्त्रयुक्त्या ग्राह्या । तच्छुण्डिका शुण्डाकारा तत्पिप्पली । मेषी मेषशृङ्गी । ताली तालमूलिका मुशली । कुञ्जरशुण्डिका हस्तिशुण्डी, अर्बुदाचले प्रसिद्धा । हुतवहो रक्तचित्रकः । एषां तोयानि । ततो निष्कासितमेनं रसं ब्राह्म्यादिसमूहकषायेण संमर्द्य लघुपुटं दद्यात् । तव मनः सुलोचनाऽऽतैः सह सुरतानि कर्तुं यदि स्यात्तर्हि मदनस्याश्रयममुं रसमाश्रय । गुम्फनागिरा काव्यसंबन्धिवाचा यथा सुष्ठुकाव्यरसः सर्वप्रियः स्यात् तथा युवाऽपि सुशृङ्गाररसः सर्वस्त्रीप्रियो भवेदिति भावः । नीरसो हि स्त्रीणां प्रियो न भवति । वाजीकरणसूतेन्द्रमाह—मुक्ताफलमिति । पारदगन्धकौ कज्जलीकृत्य मुक्ताफलादिभस्म तत्र दत्त्वा रक्तोत्पलपत्राणां रसैर्मर्दयेत् । न घनत्वोत्पत्तिपर्यन्तम्, किंतु सूक्ष्मकणाविश्लेषेण पत्तलीकृतं सर्वत्र विरलीकृतमेव यावत्स्यात्तावत्कालपर्यन्तं मर्दयेत् । पत्तलीकृते तस्मिन्माषचतुष्टयं गन्धकं दत्त्वा पुनः संमर्द्य संशुष्कं तत्काचघटीमध्ये नीत्वा संभृत्य वालुकायन्त्रे पचेदिति । पुद्गलं शरीरम् । पूर्वरोगोक्तमेतद्रससेवनात्प्राग्येन रोगेण पीडितस्तद्रोगोक्तं पथ्यं रोगनाशपर्यन्तं कार्यम् । तदूर्ध्वं तु शाल्यादि पथ्यमेव योजयेत् । एवमेव वाप्यं पुष्करमूलं दुग्धे वापयित्वा दद्यात् । अथवा मधुयष्ट्याद्यन्यतमं चूर्णितं शाल्मलीसत्त्वयुक्तं वाप्यमिश्रभ्रीजतशम्बूकभस्मयुक्तं वा कृत्वा समध्वाज्यानुपानं दद्यादिति । वाजिगन्धाऽश्वगन्धा । शम्बूकाः कृष्णभूमिजा अतिक्षुद्रशङ्खाः । मदनकामदेवरसमाह—गोलमिति । विपिहितं तेनैवेति । कूष्माण्डखण्डेनैवाऽऽच्छादितं कृत्वा । माषैर्माषपिष्टैः । तच्चूर्णेन संहिते कूष्माण्डचूर्णेन संयुक्ते तस्मिन् रसे वक्ष्यमाणद्रव्याणां चूर्णं यथोक्तभागं दत्त्वा महाबलादीनां रसेन क्रमेण सप्त भावना देयाः । सुरकृता गुडूची । जया अरणिका । कृष्णा पिप्पली । मोजफलं कदलीफलम् । द्वौ च यष्टी द्विपलमितं यष्टीमधु । शुभा गोरो[ च ]ना । सा पलद्वयमिता ग्राह्या । महाबला भेण्डाख्यशाकक्षुपसमानविशालपत्रपुष्पदण्डा । बला सुगन्धमूला क्षुपोऽयम् । चिकणा खरेटीति वा महाराष्ट्रभाषायाम् । नागबला पीतपुष्पा । इयं मुद्रा इति लोके प्रसिद्धा । केचिदस्याः सहदेवीति नाम वदन्ति । पीतपुष्पा बला

या तु सहदेवीति सा स्मृतेति निघण्टुप्रामाण्यात् । मत्स्याण्डिका समला पीतशर्करा । सुरभेर्गोः । संनिहितोपकरणेऽपि रतिसमये स्त्रीभिः पराजितं पुरुषं प्रत्येतद्रससेवनोपदेशमुखेनैतद्रसशक्त्युत्कर्षमाह—अलमिति । अयि कामुक किमर्थं मलयपर्वतसंनिधिवायुं भजसि । रतिसमये स्त्रीर्जेतुं तस्योपयोगो न भविष्यति । एवमर्थोऽग्रेऽपि बोध्यः । कुमुदबान्धवश्चन्द्रः । मधुव्रतसखा वसन्तः । सोऽप्यसमर्थः । भ्रमरशब्दस्तदर्थं भ्रमरसांनिध्यम् । स शब्दोऽप्यसमर्थः । शब्दश्रवणार्थं त्वया कलितः । धृता मानिता इत्यर्थः । पञ्चमसहायभूताः पिकाः कोकिलाः के सहाया भविष्यन्ति । चतुर्णां कुण्ठितशक्तिदर्शनेन तेषामपि सहायत्वं न स्यादिति संभावनया कुत्सार्थे किंशब्दप्रयोगो द्रष्टव्यः । तर्हि किं करणीयमित्याशङ्कयाऽऽह—रतीति । रतिरूपा सरोजिनी सूर्यविकासिकमलिनी । तस्या उत्साहप्रदं भास्कररूपं मे मया विहितं निर्दिष्टं वा । अमुं रसं विशङ्कितं भज । अथ कामधेनुरसमाह—हेमाभ्रेति । अत्र हेमादिलोहा अष्टाविंशाध्यायोक्तशुद्ध्या शुद्धा द्वितीयाध्यायोक्ताभ्रसत्त्वशुद्ध्या शुद्धमभ्रकसत्त्वं भूनागसत्त्वं च काचादिशोधनीयगणेन शुद्धं सर्वमेतद्यथोक्तभागं गोस्तनाख्यमूषामध्ये क्षिप्त्वा वह्नियोगेन द्रावितं कृत्वैकीभूतस्य तस्य शीतस्य कानसाख्येन तीक्ष्णलोहशस्त्रेण चूर्णीकृत्य तच्चूर्णेन सह विंशतिपलं सूतं खल्वे मर्दनेन पिष्टीं कृत्वा तां च पातनायन्त्रे घटकाधोभाण्डमध्ये निक्षिप्य पारदमुत्थापयेत् । तत्र वह्नियोगेन हेमादि त्यक्त्वा पारद ऊर्ध्वपात्रेऽन्तः संलग्नो भवति । तं च निष्कास्याधःपात्रस्थं हेमादि च निष्कास्य तेन हेमादिना सह तं पारदं पुनः खल्वे धृत्वा मर्दनेन पिष्टीं कृत्वा पूर्ववदेव पातनायन्त्रेणोत्थापयेत् । एवं पुनः पुनः करणेन पारदः शतवारमुत्पातितो द्विपलशेष एव यदा स्यात्तदा तं सूतं रसार्णवोक्तरम्भादिगणजरसेन संमर्द्य संशोष्य पक्कमूषामध्ये धृत्वा पिधाय संधिरोधं कृत्वा मन्दाग्नियुतचुल्लीमध्ये संन्यस्य क्षिप्त्वा भस्मरूपं कुर्यात् । यदा भस्मार्थतादृक्पाकविधिना स रसो भस्मीभूत एकपल एवावशिष्टः स्यात्तदा तत्र रसभस्मनि वज्रभस्मादि यथोक्तभागं दत्त्वा खल्वमध्ये द्विदिनं संमर्द्य ततस्तत्सर्वं लोहकटाहमध्ये क्षिप्त्वा चत्वारिंशत्पलमितं शाल्मलीमूलजं क्काथमल्पाल्पं दत्त्वा मृद्वग्निना जारयेत् । तत्र क्काथस्याल्पाल्पदानं पाक्यभेषजस्योपर्येव कार्यं यथा कषायेण भेषजमार्द्रं कृत्वाऽधिकपातं नान्यत्र गच्छेत्कटाहमध्ये पार्श्वे वा भेषजस्य न गच्छेत् तथा दग्धं रजः प्रतिभस्मीभूतरसस्योपर्येव पतेत्तथा कषायं नालीपातेन प्रदापयेत्सूक्ष्मच्छिद्रसहिताधस्तलां वंशादिनलिकां कषायेण प्रपूर्य तां चाऽऽकाशे तिर्यगवस्थितदण्डे बद्ध्वा तस्याश्छिद्रमार्गेण बालसदृशसूक्ष्मधारया यः कषायादेरधः पातः स नालीपात इत्युच्यते । परिभाषाध्याये प्राक् संन्यासलक्षणं पठितम् । रसस्यौषधयुक्तस्य भाण्डे रुद्ध्वाऽतियत्नतः । मन्दाग्नियुतचुल्ल्यन्तः

क्षेपः संन्यास उच्यते । इति । रसार्ण[वो]क्तरम्भादिगणपाठश्च—रम्भा वीरा स्नुही क्षीरं कञ्चुकी यवचिञ्चिका । वाराही चैव गोरम्भा मीनाक्षी काकमाचिका । एभिर्मर्दितसूतस्य पुनर्जन्म न विद्यते । इति । अत्र शिष्टद्विपलसूतस्य रससारोक्तचतुःषष्टिबीजानां जारणं कृत्वा तुलायां द्विपलिकमात्रां दृष्ट्वा जीर्णबीजमेनं संन्यासाद्भस्मतां नयेदिति गुरुचरणसंप्रदायोऽवबोद्धव्यः । उमापतिरसमाह—कृष्णाभ्रकस्येति । कृष्णाभ्रकस्य कृष्णवज्राभ्रकस्य धान्याभ्रं भृङ्गराजरसे क्षिप्त्वा त्रिदिनपर्यन्तं वासयित्वा ततस्तस्मादुद्धृते धान्याभ्रे तुत्थभस्मादित्रयं प्रत्येकं तत्समभागं क्षिप्त्वा छागास्थिचूर्णादि यथोक्तभागं निक्षिप्य पञ्चाजेन सह संमर्द्य तद्गोलीकृत्यैकत्र राशीकृत्य विशोष्य गुलिकाकरणयोग्यं कृत्वा कृतगुटिका जलघृष्टेन पाण्डुना खटिकाख्यद्रव्येण त्रिलिप्तान्तर्भागे भाण्डे हरेन्नयेत् । नीत्वा स्थापयेदित्यर्थः । तासां सर्वमनुपानगुणादि पुरा द्वितीयाध्यायोक्ताभ्रकसत्त्ववद्बोध्यम् । एकमपि वक्ष्यमाणद्रव्यासहायमपि । अथ तस्य सत्त्वस्य त्रिफलाक्काथेन प्रतिपुटं संमर्द्य शतवारं वराहपुटानि दद्यात् । तेन मृतं तदभ्रसत्त्वं पारदभस्मादि च यथोक्तभागं सर्वं कान्तलोहमयखल्वे निक्षिप्य घृतादिना षोडशगुणेन सहाष्टयामपर्यन्तं संमर्द्य कृतं कल्कं कान्तमयकरण्डमध्ये स्थापयेत् । धान्याभ्रलक्षणं द्वितीयाध्याये पञ्चाजं च दशमाध्याये प्रागुक्तं बोध्यम् । पुरो गुग्गुलः । अथ महाकनकसुन्दररसमाह—कान्तेति । कान्तबीजं काञ्चनबीजं पारदसमभागं त्रिंशाध्यायोक्तप्रकारेण जारयित्वेष्टिकायन्त्रेण समभागं गन्धकं च जारयित्वा पश्चादेकादशाध्यायोक्तप्रकारेण तादृक्पारदो मारितः कार्यः । ततः पातनायन्त्रेणोत्थापितं पारदं तं चतुर्निष्कमितमेकनिष्कमितं स्वर्णभस्म कान्तपात्रे निक्षिप्य पञ्चाशन्निष्कमितं शुद्धगन्धकं मुहुर्मुहुर्निष्कद्वयमितं चतुर्निष्कं वा दत्त्वा दत्त्वा जारयेत् । कथम् । अन्धवडवाग्निना यन्त्रेण । तद्यन्त्रं यन्त्राध्यायेऽनुक्तमप्यग्नियुतचुल्ल्यां कण्ठदघ्नजलपूरितघटमुखे समविस्तारं कान्तपात्रं निधायाथवा खण्डितमुखे चुल्ल्यधिश्रिते विशालखर्परे तादृग्लोहपात्रे वा जलपूरित उत्तानकान्तपात्रघटितेन सच्छिद्रेण न्युब्जपिधानेन पिधाय चुल्लीस्थतीव्राग्निनाऽग्निवर्णोष्णजलोष्मणा कान्तपात्रस्थं गन्धकादि जारयेत्तावत्, यावत्पञ्चाशन्निष्कमितो गन्धको जीर्णः स्यात् । जलस्थोऽग्निर्वडवाग्निः । स चाऽऽच्छादितोऽन्ध इत्युच्यत इति ज्ञात्वैतादृशं यन्त्रं विहितमत्रोपयुक्तं स्यादिति भाति । इदं रक्तवर्णोत्पत्तिलक्षितं जीर्णगन्धकस्य पारदस्य चूर्णम् । अमुनैव प्रकारेण कान्तपात्र उक्तयन्त्रोपयोगेनैव साधयेत पाचयेत् । तदनु तस्मिंश्चूर्णभाण्डेऽवस्थापयेदिति शेषः । एकपादमेकपादोपलक्षिततृतीयभागमित्यर्थः । अमृतार्णवरसमाह—कृत्वेति । उ(अ)पले खल्वे निक्षिपेत् । निक्षिप्य मर्दयेदित्यर्थः । सारघं मधु । मदनसंजीवनरसमाह—त्रिपलमिति । हेम विमलम् । संप्रति लोकेऽप्रसिद्धं तद्नाम्ने स्वर्णमाक्षिकं ग्राह्यम् । मण्डूकब्राह्मी

मुण्डूकपर्णी ब्राह्मीसमानपत्रा। इयं रक्तदण्डा। हस्तिशुण्डी शुण्डासमानफला वल्ली। अर्बुदाचले प्रसिद्धा। कृष्णनिर्गुण्डी कृष्णपुष्पपत्रा निर्गुण्डी। मदनमोदकरसायनमाह—त्रैलोक्येति। त्रैलोक्यविजया भङ्गा। तदौषधं भङ्गापत्रं तच्च सबीजं भर्जितं ग्राह्यम्। तत्सर्वमौषधं चूर्णीकृतं सितया तावत्या जलं दत्त्वा पाकीकृतया सह ग्राह्यम्। यावत्या तया सह संमर्दितं चूर्णं बन्धनगोलकत्वं प्राप्नुयात्। अष्टमांशघृतेन मधुना च युतं तथा त्रिंशदंशात्रिसुगन्धिकर्पूराभ्यां मिश्रितं कृत्वा मोदकान्परिकल्प्य घृतभाण्डे निधापयेत्। एतद्भेषजं कामवृद्ध्यर्थं नारदेन प्रकीर्तितम्। तेन स्त्रीणां सहस्राणि रेमे स यदुनन्दनः। अथ स्त्रीणां सत्वरं द्रावणेन तृप्तिकरणाय लिङ्गलेपमाह—शशीति। शशिः कर्पूरः। माक्षिकं मधु। हेमरसं धत्तूरपत्ररसं सर्वं समभागं गृहीत्वाऽगस्त्यपत्ररसेनाऽऽप्लाव्य कृतो लेपो युवतीनां मैथुनावसरे तृप्तिकरः। अत एव वश्यकरः। गर्भरजो गर्भाशयजमार्तवम्। अथ पुष्पधन्वाख्यं रसमाह—रम्भाकन्द इति। शुद्धानां हेमतारार्काणां मिथः समानां सूक्ष्मचूर्णं समभागपारदेन सह मर्दनाज्जातां पिष्टीं कदलीकन्दमध्ये संभृत्य तत्कन्दशकलेन पिधाय वस्त्रेण संवेष्ट्य, अङ्गुलस्थूलं मृल्लेपं कृत्वा गजपुटे पचेत्। ततः पाकेन रक्तवर्णां तां पिष्टीं तत उद्धृत्य पक्वपिष्टीभूतरसापेक्षया त्रिगुणगन्धकं प्रतिपुटं तद्रसापेक्षया चतुर्थांशदानक्रमेण दत्त्वा मूषासंपुटितां कृत्वा भूधरयन्त्रे पचेत्। ततस्तद्रसतुल्यं कान्तलोहभस्म च प्रतिपुटं चतुर्थांशदानक्रमेण दत्त्वा मूषासंपुटितं कृत्वा भूधरयन्त्र एव पचेत्। ततस्तं रसं खल्वमध्ये शाल्मल्यादिरसेन मर्दयेत्। पूर्वोक्तयुक्त्या मदनसंजीवनरसोक्तघृताद्यनुपानयोगेन। पुनर्लिङ्गलेपमाह—सिन्दूरेति। रसेन्द्रचूडामणिरसमाह—सूतेति। सूतादिकं स्वर्णमाक्षीकभस्मान्तं यथोत्तरमेकैकभागवृद्ध्या गृहीतं धूर्तपत्रादीनां प्रत्येकं रसेन संमर्द्य सर्वार्धभागमहिफेनकं तत्र दत्त्वा सुरसपुष्पाणां रसेन चन्दनादिरसः कुङ्कुमनाभिजद्रवाभ्यां च पृथक् पृथक् संमर्द्य भावयेत्। सिद्धो रसोऽयं शर्करामधुसंयुतो भक्षितो मैथुनकाले शुक्रस्तम्भकृद्भवेत्। तृतीययामे दिवा तृतीययामे कामशान्त्यर्थं कातामेव सेवेतेत्युक्तं तत्र हेतुमाह—किं कामे इति। दृढशरीरं कामयमानानां काम उत्पन्ने सति तच्छान्त्यर्थं स्त्रीवर्ज्यं सर्वं नोपयोगि। यतस्तदेकैकविषयमात्रसुखदं न तु स्त्रीवत्सर्वविषयसुखदम्। विकारकारी नेत्रस्फुटनादिविकारकारी। भुजङ्गो नागः। ताप्यं रौप्यमाक्षीकम्। विमलो विमलाख्यो धातुः पाषाणविशेषः। माक्षीकं स्वर्णमाक्षीकभस्म। विजया भङ्गा। सप्तसप्तः सप्तपर्णः। अमृतवल्ली गुडूची। भार्गिका ब्राह्मणयष्टिका। सुरलताऽमरवल्ली। इयं सूक्ष्मतन्तुमयी वृक्षोपर्येवोत्पद्य तिष्ठति। जलं वालकम्। वारिवाहो मुस्ता। मधुयष्टिका यष्टीमधु। भुजगदृष्टिर्गन्धनाकुली। आर्द्रमार्द्रकम्। करहाटः कमलकन्दः। श्रावणी मुण्डी। नाभिजं कस्तूरी। अथ कामेश्वरमोदकमाह—सम्यङ्मारितमिति। कट्फलं कट्फलम्। इक्षुरकं कोकिलाक्षबीजम्। मदनमुन्मत्तबीजम्। असनो बीजकः। वत्सकं

कुटजम् । शाल्मल्यङ्घ्रि शाल्मलीमूलम् । कपिभवं बीजं कपिकच्छूबीजम् । सर्वतुर्यांशा भङ्गा । विलेह्यं लेहम् । पेयं क्षीरसिताऽनु क्षीरमिश्रितशर्करा अनुपेयम् । स्थिराधियां योगिनां ध्यानोत्तरं सेवितोऽयं रसः । कृकवाकुः कुक्कुटः । तस्य यद्गुरुपिच्छं महत् पिच्छम् । यावत्तु तिष्ठति तावद्वीर्यं न मुञ्चतीति शेषः । पुण्डरीकस्येति । पुडरीकं श्वेतकमलम् । पूर्णचन्द्ररसमाह—सूतं गन्धमिति । कूष्माण्डैः कूष्माण्डरसैः । भूधरे भूधरयन्त्रे । वाशब्दः समुच्चये । तापे शाल्मलीनीरयुतमेतद्भेषजं योज्यम् । वा समुच्चये । सिताया विपक्कं सितापाकमिश्रं भोज्यं भोज्यम् । यष्टिं शैलेयं वा सूतभस्माश्वगन्धामिति पाठः । गन्धादित्रय मध्वाज्याभ्यां सह लीढं पुष्ट्यादि कुर्यात् । अथवा शिलाजतुमिश्रं सूतभस्म समध्वाज्यं लीढं तद्गुणम् । अथवा पुष्ट्याद्यर्थमश्वगन्धामेव शाल्मलीसत्त्वयुक्तां समध्वाज्यां लिह्यात् । अथवा तां भस्मीकृतशम्बूकैराज्यमर्दितैः सहितां लिह्यात् । कर्पूरेति । कर्पूराख्यो यो रसस्तद्युक्तं पारदयुतं च सौभाग्यं टङ्कणं लिङ्गलेपार्थमेकां क्रियते । अयं लेपो मदनजीवनाख्योऽस्ति । अथ महाकल्करसमाह—धान्याभ्रमिति । साधयेत् स्थालीपाकेन साधयेत् । ततोऽजादुग्धादिना संमर्द्य गजपुटं दद्यात् । ताम्रस्य नेपालताम्रस्य । शुल्वभस्म । म्लेच्छताम्रभस्म । कोरकाय कङ्कोलाय । दस्राभ्यामश्विभ्याम् । मण्डलं द्विचत्वारिंशद्दिनसमूहः । तत्र दशदिनपर्यन्तं प्रत्यहमेकैकां भक्षयेत् । द्वितीये दिनदशके प्रत्यहं गोलीद्वयम् । तृतीये गोलीत्रयम् । चतुर्थे गोलीचतुष्टयम् । एवं प्रतिमण्डले कार्यम् । अयं स्वर्गस्थसुधासमो गुणैरस्ति । अतोऽयं धात्वादिक्षयेण मृतैर्मृतप्रायैर्नरैः सेव्यः ॥

इति रसरत्नसमुच्चयटीकायां रूरेइत्युपाह्वेन वामनात्मजेन चिन्तामणिना विरचितायां चिकित्सास्थाने सप्तविंशतितमोऽध्यायः ॥ २७ ॥

---

## अथाष्टाविंशोऽध्यायः ।

संप्रति लोहकल्प उच्यते । रसोपरसमारितानामेव हि लोहानां भस्मादिरूपेण मृदुत्वापन्नानां रसायनोपयोगित्वाद्वक्ष्यमाणरसकल्पोक्तजारणायामपि संस्कृतबीजत्वार्थं मुख्योपयोगित्वाच्च देहलीदीपन्यायेनोभयत्रोपयोगार्थमन्तराऽयं कल्पोऽभिधीयते । पञ्चमाध्यायोक्तविविधसिद्धानां लोहानां तु चिकित्सास्थानोक्तरसघटकतयैवोपयोगः । यद्यपि केचिल्लोहकल्पोक्ता अपि लोहविविधप्रयोगाः पञ्चमाध्यायेऽपि निर्दिष्टास्तथाऽपि तेषा मुख्योपयोगा न रोगवारणरसमात्रसिद्ध्यर्थं किंतु रसायनजारणग्रासयोरेव सिद्ध्यर्थम् । तत्र तत्पाठस्तु प्राचीनग्रन्थोक्तसंकीर्णविविधपाठानां संग्रहरूपेणाभिहितः । यथा विधिसिद्धान्येतानि लोहानि स्वातन्त्र्येण भेषजान्तरयोगेन च भक्षणार्थानि रसायन-

वाजीकरणजारणोपयोगीनि च भवन्ति । पञ्चमाध्यायोक्तानि तु रोगवारणचिकित्सोपयोगीन्येवेति विषयविभागप्रदर्शनार्थं स्वातन्त्र्येण भक्षणजन्यजीर्णाजीर्णादिर्लक्षण-परिज्ञानादिबहुवक्तव्यत्वाच्च पार्थक्येनात्र ग्रन्थे लोहकल्प एवाऽऽचार्येणाऽऽरभ्यते। एवं च पञ्चमाध्यायोक्तविधिनाऽस्य कल्पस्य गतार्थत्वमिति भावः । तत्राऽऽदौ रसाख्य-भेषजस्य विशिष्टं फलमाह—अल्पमात्रेति । अथात्र शास्त्रे रसशब्दाभिधेयार्थमाह—लोहमिति । मृतं लोहं सुवर्णादि भस्मीकृतम्। कन्दविषं विषकल्पे वक्ष्यमाणम्। सूतः पारद इति त्रयं रसशब्देन निगद्यते । कार्य इति । अत्र लोहसंस्कारावसरे लोहेन पानार्थं निर्वापपाकादिना शोषणार्थं कर्तव्यो यस्त्रिफलादिकषायः स क्वाथ्य-द्रव्यापेक्षयाऽष्टगुणं जलं दत्त्वा पाकेन षोडशांशावशेषितः कार्यः । न तु चतुर्थां-शावशेषितः । अथ स्वर्णशोधनमाह—अथेति । पञ्चमृदा—इष्टिकागैरिकालोणेतिग्र-न्थेन सूत्रस्थानोक्तपञ्चमृद्भिः कर्षमितं स्वर्णपत्रं लिप्त्वा संशोष्य शरावसंपुटस्थं कृत्वा त्रिंशद्वनोपलैर्लघुपुटे पचेत् । पश्चादाहत्याऽऽहत्य तेन शुद्धवर्णं भवति । रूप्यस्य पत्रं त्वङ्गारशकट्यां लघुमूषामध्ये धृत्वोपरि पार्श्वे च कोकिलैः संपूर्य धमनेनाग्निवर्णं यदा स्यात्तदा टङ्कणमावाप्य द्रुतं दृष्ट्वा तत्क्षण एव सम-भागं नागमावाप्य पुनः कोकिलैः संपूर्य धमनेनोर्ध्वज्वालावत्कोकिलाग्निना सीसक्ष-यपर्यन्तं धमेत्। अथवा भूधरयन्त्राग्निना पचेत्तेन तदपि शुद्धवर्णं भवति । ताम्र-पत्रस्य तु स्नुह्यर्कक्षीरादिभिर्लेपनं कृत्वा संशोष्य प्रताप्य तप्ततप्तं तत्पत्रं निर्गुण्ड्या रसे सिञ्चेत् । एवं पुनः पुनः कार्यम् । तेन तदपि शुद्धवर्णं भवति । नागं वङ्गं वा चुल्लीस्थे लोहकटाहे क्षिप्त्वाऽधःस्थाग्निना द्रुते सति तत्र निर्गुण्डीमू-लचूर्णमावाप्य निर्गुण्डीरस एव सिञ्चेत् । एवं पुनः पुनः कार्यम् । तेन तदपि शुद्धवर्णं भवति । अथ कान्तलोहलक्षणं समासेनाऽऽह—यत्पात्रेति । तारेणाऽऽव-र्तेत । तारेण सह द्रुतीकृतं चेदेकी भवति तदुत्तमं च ज्ञेयम् । विस्तरेण लक्षणं तु पञ्चमाध्योक्तं वेद्यम् । पुटानले योग्यपुटानले । तुल्यस्य मिथस्तुल्यस्य कज्ज-लीकृतस्य ताप्यभस्मादेः पादेन । प्रकारान्तरेण लोहमारणमाह—अथवेति । पलाशः पलाशरसः । पारिभद्रः पांगारा इति महाराष्ट्रभाषायाम् । तद्रसमर्दितया मनोह्वया। भर्जयेल्लोहकटाहे । चिञ्चादीनां रसेन क्षीरेण वा । अक्षो बिभीतकः । भिक्षु-मुण्डी । वीरद्रुरर्जुनः । बोधिवृक्षः पिप्पलः। अहिमारो गन्धी हिवर इति लोके । अहिदमनी नागदमनी। सापसंदी इति महाराष्ट्रभाषायाम् । अहिमारादीनां रसेनाहिं नागलोहं भर्जयेदिति पूर्वत्र संबन्धः । स्त्रीस्तन्ये इति । स्त्रीस्तन्य हिङ्गुलं संमर्द्य तेन लोहपत्राणि विलिप्य रुद्ध्वा गजपुटे पचेदित्यर्थः । कान्त इति । मूषामध्ये मधुसर्पिःसहितं कान्तभस्म क्षिप्त्वा तद्भस्मापेक्षया षोडशांशं शुद्धं माक्षिकचूर्णं दत्त्वा रजतं किंचित्किंचित् दत्त्वा च दृढं धमित्वाऽऽवर्तितं द्रवरूपं कृत्वा पश्चात्तद्रजतं तुलायामधिकं न भवेच्चेत्कान्तमेतत्सम्यन्मृतमिति जानीयात । हेम्न इति । वरी

शतावरी । समांशेति । प्राग्वदिति । समांशं गन्धकं दत्त्वा मारितं ताम्रं प्राग्वत्पूर्वोक्तभावनानुपानसहितं बृंहणादिगुणम् । त्रिधातुं ताम्रमाह—धान्याभ्रकमिति । धान्याभ्रकं कृत्वा मारितमित्यर्थः । तादृशमभ्रकभस्म । तुत्थं तुत्थभस्म । तदुभयसहितं दशनिष्कं ताम्रं ताम्रभस्म गुल्मादिजिद्भवेदिति । ताम्रद्रुतिमाह—आर्द्रेति । समांशगन्धकेन मारितं समांशं गधकं दत्त्वा कज्जुकस्थशरावसंपुटस्थं गजपुटेन मारितमित्यर्थः । तत्प्राग्वद्दश दशनिष्कं गृहीत्वा तच्चुल्ल्याधिश्रितस्थाल्यां निक्षिप्य तत्र त्रिंशत्कर्षं गन्धकमल्पशो निष्कं निष्कं दत्त्वाऽधस्तात्तुषाग्निना धूमं दत्त्वा न तु धूमरोधं कृत्वा धूमनिर्गमनार्थं सच्छिद्रपिधानेन पिधाय स्थालीयन्त्रेण भर्जयेत्पचेदित्यर्थः । प्रसादान्निःसृतं मर्दितभेषजं पात्रे धृत्वा तदुपर्यागतो यो जलप्रसादः प्रसन्नं जलमित्यर्थः । तच्च निःसृतं वस्त्रगालितं प्रत्येकं कर्षमिततुत्थादियुतं कृत्वा विशोष्य सिद्धेयं ताम्रद्रुतिः । आर्द्रा—आर्द्रकम् । लकुचं लिच्चा इति हरिद्वारसंनिहितदेशे प्रसिद्धं कर्नाटके च बढारफलेति प्रसिद्धम् । तुत्थनीलं मयूरतुत्थम् । शिलाजं शिलाजतु । आकुली—आवीरमिति केरलदेशे प्रसिद्धम् । आहुल्यं निघण्टेऽभिहितम् । आवळा इति गुर्जरभाषायाम् । महाराष्ट्रभाषायां चर्मकारामली चांभारआवली । अथवा तरवट इति प्रसिद्धं ग्राह्यमिति भाति । प्रमेहजिद्योगमाह—मारितमिति । कार्पासवासितम् । एकरात्रपर्यन्तं वासितकार्पासबीजमज्जं माहिषतक्रं तदनुपानसहितं मिथः समं त्रपुसादिचूर्णं प्रमेहजिद्भवेदिति । नवनवतिरिति । नवाधिका नवतिभागाः । कनक आरग्वधः । कृष्णलोहेनेति । अयमेव योगो नागसमभागं कृष्णलोहभस्म दत्त्वा दार्व्यादिकषायपेषितं कृत्वा शतगुलिकात्मकोऽभयादिकषायानुपानं पिबतोऽतिबलकाङ्क्षिणो नरस्य योक्तव्यः । यतोऽयं लोहयुतो योगो बलेनोपचितो बलवृद्धियुतो भवतीति । केवलप्रमेहनाशार्थं तु तक्रानुपान एव योक्तव्यः । तन्नाशबलवृद्ध्युभयार्थं तु कृष्णलोहभस्ममिश्र इति भावः । कृष्णलोहं कान्तलोहम् । प्रत्यहमेका गुलिका, इति क्रमेण शतदिनपर्याप्ताः शतं गुलिका भवन्ति । तत्र पूर्ववयस्कः षोडशवर्षपर्यन्तवयस्कः कुमारो बालः । स चैतद्भेषजस्योपयोगेन सम्यग्गुणलाभाय वर उत्तमः । ततस्त्रिंशद्वर्षपर्यन्तवयस्को युवा । स तु मध्यो मध्यमो भवति । ततः सप्ततिवर्षपर्यन्तवयस्कोऽधमः । तेषु क्रमेण, एकगुणकालपर्यन्तं शतदिनपर्यन्तं सेवितमेतद्भेषजं पूर्णगुणावहम् । यूनि तु द्विगुणकालोपयुक्तं दिनशतद्वयपर्यन्तम् । मध्ये तु दिनशतत्रयपर्यन्तमुपयुक्तं पूर्णगुणावहं भवेदिति । न्यायोऽयं सर्वरसायनकालव्यवस्थापको बोध्यः । एरण्डेति । एरण्डादिकं सैन्धवान्तं प्रत्येकमयश्चूर्णसमं गृहीत्वा तत्सहितमयश्चूर्णं लोहभस्मचूर्णमन्तर्धूमं विदह्य पुटपाकेन भर्जितं कृत्वा सिद्धं तत्सोष्णाम्बुशूलजिद्भवेदिति । वह्निश्चित्रकः । क्षुद्रशङ्खः कृष्णमृद्धामिस्थः शम्बूकः । त्रिफलेति । इत्थमेव लोहचूर्णं त्रिफलादिरसैर्भावितं शुष्कं कृत्वा गुडादिमिश्रं कृत्वा भक्षितं मितदुग्धमांसरसाशिनो जलतक्रान्यतरानुपायिनो नरस्य जीर्णज्वरादिकं हन्यात् । पथ्येति ।

गुडस्येति । व्योषेति । व्योषाग्निवेल्लत्रिफलामुस्तरूपनवकं बोध्यम् । घस्मरं नाशकम् । निम्बसारेति । निम्बवृक्षान्तःकठिनरक्तकाष्ठो निम्बसारः । तदादिगन्धकान्तं मिथः समं चूर्णम्। अथवाऽर्जुनपत्रीभृङ्गराजादीनां मिथः समं चूर्णं मध्वादिसहितं जरादिघ्नम् । अर्जुनपत्री मधुकेति । मधुकादीनां त्रिगुणवर्धितं चूर्णं गुडूचीरसभावितं साज्यादिकं भोजनस्याऽऽदिमध्यान्तेषु सेवितं क्रमेण वातपित्तामयादीञ्जयेत् । अथ भल्लातकरसायनमाह—भल्लातकेति । लोहस्थे पक्के पदस्थे चतुर्थांशावशिष्टे सति । मानिकामर्धप्रस्थाम् । पुष्परसस्य मधुनः । अथ खण्डसाद्यं लोहरसायनमाह--वासेति । वासादिभिः प्रत्येकं मुष्टिमितैः संकुट्टितैः सह ताम्रपात्रस्थेऽपां शूर्पे द्रोणे पक्केऽष्टांशशिष्टे सति तत्क्वाथं गालयित्वा तत्र प्रस्थमितं खण्डं शर्करां सर्पिश्च दत्त्वा स्वर्णमाक्षिकेण मारितस्य रूक्षलोहस्य तीक्ष्णाख्यस्य रुक्मलोहस्येति पाठे रुक्मं स्वर्णं तत्सदृशसारलोहस्य तीक्ष्णलोहविशेषस्याञ्जलित्रयं क्षिप्त्वाऽग्निना पक्के लेहरूपं प्राप्ते सति तत्र कुस्तुम्बुर्वादिकं प्रत्येकं शुक्त्यंशं प्रस्थार्धं मधु च क्षिपेत् । अभीरुः शतावरी । पुष्करं पुष्करमूलम् । भिक्षुर्मुण्डी । अथ कान्ताभ्रकरसायनमाह—अथेति । तत्राऽऽदौ रोगानुरोधेन भावनाविशेषपूर्वकं तत्पाकमाह । पित्ते पित्तजरोगे । ससैन्धवेनोष्णजलपिष्टेन कुठारच्छिन्नेन महाराष्ट्रभाषायां वासनवेल इति ख्यातेन सह संमर्दितं कान्तभस्म पिण्डीकृतमिष्टिकायन्त्रे घटकगर्तामध्ये धृत्वा पिधायोपरि लघुपुटेन पक्त्वेत्युत्तरत्र संबन्धः । पित्तरोगे तु तद्भस्म गर्भजलाम्बुना नारिकेलोदकेन सह संमर्द्य वयस्तम्भे तारुण्यरक्षण उक्तौभयानुपानेन । गलरोगे ताप्येन माक्षीकभस्मना सह । कण्डूरोगे मनोह्वया सह। स्रोतोविबन्धे चतुर्थांशमरिचकषायेण सह संमर्द्य । इष्टिकायन्त्रे क्षिप्त्वा पक्त्वा च तत उद्धृत्य वज्रमूषामध्ये धृत्वा ध्मात्वा किंचिट्टङ्कणं दत्त्वा द्रुतीकृत्य लोहपात्रे स्थितत्रिफलाक्वाथे निषिक्तं तत्कान्तं पर्पटाकारं भवेत् । पश्चात्तच्चूर्णीकृत्य त्रिफलाक्वाथेन संमर्द्य स्थाल्यां विपाच्य संपुटितं कृत्वा षोडशाङ्गुलगर्तामध्ये पुनः पुनः पुटेत् तावत्कालपर्यन्तं यावदेतस्य भस्मनो वारितरत्वकज्जलवर्णत्वोत्पत्तिपरिदर्शनं भवेदिति । तत आर्द्रादिरसैर्मुहुस्तथा कुर्यात्पेषणपाचनपुटानि कुर्यादित्यर्थः । ततो रक्तवर्णं वज्राभ्रमेकरात्रपर्यन्तं काञ्जिके प्लुतं मग्नं कृत्वा द्वितीयाध्यायोक्तरीत्या धान्याभ्रकं कृत्वा काञ्जिकेन पिष्ट्वा घृतादिभिः प्रत्येकं पेषणादिक्रियात्रयं कुर्यात । एवं रीत्योभयस्य कज्जलवर्णोत्पत्तिपर्यन्तं भावनादि कुर्यात् । अत ऊर्ध्वमेतद्रसायनसंस्कारोपयोगिदन्त्यादिगणमाह—दन्तीति । अथ दोषानुरोधेन संयोजनार्थमुभयोर्मात्राविशेषानाह—पलानीति । सर्वत्र सर्वविधे वाताधिकरोगे कान्तभस्मनः पञ्च पलानि सार्धे द्वे पले चाभ्रकचूर्णतोऽभ्रकभस्मनस्तु सार्धानि सप्त पलानि । पित्ताधिके तु प्रत्येकमुभयोरपि सपादपञ्चपलानि । कफाधिके पुनरुभयोः पञ्च पलान्येव । एवं मानयुक्ते कान्ताभ्रके लोहकटाहमध्ये क्षिप्त्वा त्रिफलाक्वाथमाढकं क्षिप्त्वा तथा रोगे प्रकर्षेण स्थितो यो दोषस्तदनुगुणस्य शास्त्रोक्तक्वाथस्याष्टौ पलानि दत्त्वा पयसोऽपि

तथैव पलानि दत्त्वाऽऽज्यस्य षोडश पलानि सिञ्चेत्क्षिपेत् । वाताद्यपेक्षया विविधः पाकः कर्तव्यो भवति । तद्यथा । वातरोगवारणार्थं पाकः पङ्कसमानः पत्तलः कार्यः । तदपेक्षयाऽधिको घनः पचनात्प्राग्घस्तनिपीडनेन पूर्णपोलिकाकारजलालोडितगोधूमपिष्टवत्, उद्मन्थवद्वा यो दर्वीलेपी भवति तथा कार्यः । कफरोगार्थं त्वतिघनो वालुकासमकणरूपः कार्यः । तथा भूते पाके फेनरहिते वर्णादिसंपन्ने सति केवलं दन्त्यादिगणचूर्णं षोडशांशेनाऽऽवाप्य तत्र स्थापितेनेतरेण तत्तद्दोषजरोगचिकित्सोक्तभेषजचूर्णेन सहितं वाऽऽवाप्यावतार्य घृतेन सह सर्वं संपेष्य भाण्डे निधापयेत् । रसायनगुणलाभाय तद्रसायनस्य कल्पनापाकं दोषविशेषानुरोधिविधिविशेषसहितं पाकं श्लेष्मणीव वालुकानिभं कुर्यात । स्वस्थो नीरोगो रसायनगुणैषी यः पुरुषः स शरन्निदाघभिन्नर्तौ प्रत्यहं घृतमधुमात्राभ्यां सहितमेतद्रसायनं किंचिद्गृहीत्वा लौहे खल्वे लोहपुत्रिकया मर्दितं कृत्वा वक्ष्यमाणमात्रया मितं भक्षयेत् । तदाह—द्वाविति । आरम्भदिनात्प्रभृति दिनद्वयपर्यन्तं प्रत्येहं द्वे द्वे गुञ्जे द्विद्विगुञ्जामितमित्यर्थः । एवमग्रेऽप्यर्थः कार्यः । ततः परं द्वे द्वे दिने द्वंद्ववृद्धिः कार्या । तृतीये दिने चतुर्थे च प्रत्यहं गुञ्जाचतुष्टयम् । पञ्चमे षष्ठे च दिने प्रत्यहं षड् गुञ्जाः । सप्तमेऽष्टमे च दिनेऽष्टौ गुञ्जाः । नवमदशमे च दश गुञ्जाः । एकादशे द्वादशे च द्वादश । त्रयोदशे चतुर्दश च चतुर्दश । पञ्चदशे षोडशे च दिने षोडश । सप्तदशेऽष्टादशे च दिने प्रत्यहमष्टादश गुञ्जाः । एकोनविंशे विंशतितमे च दिने विंशतिगुञ्जाः । ततः परं प्रत्यहं विंशतिगुञ्जा एव । तासामपि द्वौ समांशौ भागौ कृत्वा भोजनात्प्राक् ततोऽर्धं भागं दशगुञ्जामितं भोजनोक्तकालयोः सायंप्रातारूपयोर्भक्षयेत् । व्याधिक्षीणोऽपि नर उक्तमात्रविभागेनैवैतद्रसायनं सर्वदा शरन्निदाघकालेऽपि सेवयेत् । अतः परमस्मिन्रसायनेऽवस्थानुरोधेन सेव्यविवर्जनीयसेवाकालजीर्णाजीर्णलक्षणतदुपद्रवोपचारादि दर्शयति—लोहादिति । सप्तसप्ताहं चतुर्दश दिनानि । पूर्णेति । इयं क्रिया रसायनसेवनरूपा द्विगुणा द्विगुणकालपर्यन्तं सेविता चेत् पूर्णा पूर्णफलदा भवति । अस्यामधिककालभेषजसेवाक्रियाशीलनावसरे पथ्यापथ्यसेवावर्जनादिरूपा यन्त्रणा प्रागुक्तकालभेषजसेवावसर इव नास्ति । लोहाप्रवृत्तौ तस्य जाठराग्निधात्वग्निपाकपूर्वकं सकलशरीरानभिव्याप्तौ । किं तु कोष्ठ एव स्थितौ । सामान्येति । उक्तरीत्या भावनादिभिः सिद्धिं सुपाकसिद्धिं प्राप्य तत एतद्रसायनं तत्तद्रोगोक्तभेषजयोगयुतं कृत्वा तद्भावितं कृत्वा ततस्त्रिफलाक्वाथेन सर्पिषा च लौहे कटाहे पक्वं कृत्वा साधितं भक्षयेत् । अथवोक्तरीत्या साधितमेकैकमेव कान्तमभ्रकं वा भक्षयेत् । इहैकैकभक्षणप्रयोगावसरे । लोहरसायनं लोहाभ्रकरसायनम् । माद्यद्दन्तिबलः । अङ्कोलेति । मणिर्हीरकभस्म । तदलाभे वैक्रान्तभस्म वज्राभ्रभस्म वा ग्राह्यम् । माणिमन्थं सैन्धवम् । अङ्कोलेति । कान्ताभ्रेति । पुन-

नेवाङ्घ्रिः पुनर्नवा मूलम् । गिरिजं शिलाजतु । व्योषमिति । दोषा रजनी हरिद्रा । श्रेष्ठा त्रिफला । सितेतरतिलाः कृष्णातिलाः । आकुली चर्मकारामलकी । रजः पर्पटकम् । कान्तनागाख्यमञ्जनमाह—बद्ध्वेति । कमलिनीपत्रपुटे धात्रीस्वरसं दत्त्वा तन्मध्ये व्यस्तमहिं नागं चूर्णितं भर्जितं युक्त्या पोटलिकाकारं बद्ध्वा त्र्यहं स्थापयेत् । ततस्तद्भृङ्गराजरसेन धौतं प्रक्षालितं कृत्वा ततो द्विगुणं चुम्बकलोहभस्म तेन सह युक्तं कृत्वा मिलिततदुभयापेक्षया षड्गुणं रक्तमारीषरसं लौहकटाहे क्षिप्त्वा तन्मध्ये धृतं यदेतच्चूर्णं काष्ठमय्या दर्व्या संचाल्य कल्कमात्रशेषं यथा स्यात्तथा मन्दवह्निना शोषयेत् । ततः कल्कशोषितमेतच्चूर्णं शीतोदके क्षिप्त्वाऽऽलोडनेन जल ऐक्यं प्राप्तं तद्वस्त्रेण गालयेत् । गालितजलाद् युक्त्या घनं चूर्णभागमादाय संशोष्याल्पमूषामध्ये क्षिप्त्वा कोकिलैः संपूर्य धमनेन द्रावयेत् । एतज्जलसहिताञ्जनेन नयनामृतं भवति । किंच क्षीरं षोडशगुणं दत्त्वा कान्तपात्रे शृतमेतत्कान्तनागद्रुतिरूपं भेषजं सर्वोत्तमं रसायनं भवतीति। अथ मृत्युहारिरसमाह—अयःपात्रमिति। तिलसमस्थूलं चतुरङ्गुलदीर्घविस्तारं पत्रीकृतमयःकान्तं लोहं तीक्ष्णलोहं वा पात्रमितमाढकमितं गृहीत्वा प्रतप्तं प्रतप्तं कृत्वैकाविंशतिवारमामलकीफलस्वरसे निर्वापयेत् । ततस्तस्याऽऽमलकीफलस्वरसस्य शतपलं लोहमय्यां स्थाल्यां क्षिप्त्वा तल्लोहं पत्रीकृतं च धात्रीरसोत्तरं यथा स्यात्तथा धात्रीफलरसगूढं तत्र क्षिप्त्वा पिधानमृद्वस्त्रसंधिरोधादिना सुपिहितं कृत्वा भस्मराशिमध्ये स्थापयेत् । भक्षणविधिमाह—ततः समन्तत इति । प्रत्यहं भक्षणमात्रापर्याप्तं तद्द्रुतिलोहं ततस्तत्पात्रादुद्धृत्य लोहपात्रान्तरे प्रक्षिप्याङ्गुष्ठपर्वप्रवेशयोग्योदरमुखेनाऽऽयसस्रुवेण समन्ततः संमर्दनेन कल्कीकृतं समांशधात्रीरसेन पक्कं कृत्वा प्रत्येकं समांशाभ्यां मधुसर्पिर्भ्यां सह सेवेत । प्रत्येकं ताम्रादीनामप्येवंरीत्यैव रसायनं कार्यम् । गायत्री खदिरः । मध्विति । विडङ्गसारो विडङ्गफलरसः । आयुष्काम इति । उग्रगन्धा वचा । कामकामो मदनकामः । कनकं स्वर्णभस्म । रसी भवन्ति—अमृतसमानि भवन्ति ॥

इति श्रीरसरत्नसमुच्चयटीकायां खरे इत्युपाह्वेन वामनात्मजेन चिन्तामणिना विरचितायां चिकित्सास्थानेऽष्टाविंशोऽध्यायः ॥ २८ ॥

## अथैकोनत्रिंशोऽध्यायः।

अथ क्रमप्राप्तं द्वितीयं रसं विषाख्यं शिवोक्तिमुखेन वर्णयति—ईश्वर इति । शृण्विति । यत्र तत्रेति । यत्र यत्रेत्यर्थः । सविस्तरं ये भेदाः कथितास्तान्भेदान् प्रवक्ष्यामीत्यन्वयः । तदुत्पत्तिभूमिकामाह—देवेति । बलिराजः स्वपक्षसहित इति शेषः । निर्गतचतुर्दशरत्नानां मध्ये क्रमेणाऽऽगतं पञ्चमं विषमिति

बोधनाय ततः पूर्वमागतानि चत्वारि रत्नान्याह—अमलेति । नागराजेन वासुकिना । विनिर्गता, अहिराजमुखादिति शेषः । उत्पन्नं बहिरागतं चेति शेषः । उत्कटः प्रवृद्धः । कन्दरूपेण कुत्रापि क्षीरात्सप्तविधं विषमिति पाठ उपलब्धश्चेत्साधीयान् । कन्दविषस्य त्रयोदश भेदानाह—कर्कटमिति । तेषां समासतो वर्णभेदानाह—कपिवर्णमिति । संप्रति विषस्य वर्णभेदैश्चातुर्वर्ण्यं तत्प्रयोजनं पार्थक्येनाऽऽह—ब्रह्मेति । मारण इति । क्षुद्रकार्ये वशीकरणदृष्टिबन्धादिरूपे । तथोपन्नं महाविषमिति पुनः कथनेन युक्त्या सेवितं चेदिदमप्यमृतमिव सुखदं भवति । अत एवास्य रत्नत्वमिति । युक्तिश्च मात्राहितमितपथ्याहारसेवनापथ्यादिपरिवर्जनादिरूपा । तत्राऽऽदौ तन्मात्रामाह—आरोटमिति । विषाद्रसायनगुणैर्विना पुरुषेणाऽऽदौ क्षेत्रकरणार्थं रसायनरूपविषवेगसहिष्णुपटुशरीरकरणार्थमारोटसूतस्थान आरोटमारोटवत्क्षेत्रकरणं विषं प्रथमदिने सर्षपमात्रमेव भक्षयेत् । ततः प्रत्यहं राजिकावृद्ध्या मासत्रयप्रयोगेण सेवितं विषं कुष्ठादिहरं भवेत् । श्वेतं कुष्ठं श्वित्राख्यं छिन्नभिन्नं छिन्नशकलरूपभेदेन विशिष्टमेकाख्यं कुष्ठम् । क्लिन्नाह्वं शतारुरित्यपरपर्यायम् । शवगन्धि शवगन्धरूपोपद्रवविशिष्टं सामान्यं कुष्ठम् । कामरूपो मदनतुल्यरूपः । सात्म्येत्युक्तम् । विकारायेति । अमृतं निसर्गत एव सात्म्यमित्युक्तम् । शीलितं विषमप्यमृतवत्सात्म्यमित्युक्तम् । उभयमप्येतत् सहसा मात्राद्यविचार्य प्रयुक्तं चेद्विकाराय मृत्यवे वा भवति । विकृत इति । उन्मादापस्मारादिविकृत्यापन्नः । भङ्गमता तत इति । भङ्ग इव वेदना भवेदित्यर्थः । कफान्तं रेचनं तथेति । ईश्वरी रुद्रजटा शिवलिङ्गी वा । त्रिशूलीम् । देवकाण्डर इति नाम्ना सरयूपारीणदेशे प्रसिद्धेयं नदीतीरे हेमन्ततौ कर्दमसंनिधावुत्पद्यते । तद्रसमर्दनेन त्वचि स्फोटः संजायते । प्रथममिति । विषबाधानुत्पत्त्यर्थमश्वगन्धादिकं प्रथमं भक्षयित्वा तदनन्तरं गरलं विषं सेवयेत् । छागलोत्थं छागलजं मांसम् । एतत्सर्वं सर्वदा सेवयेत् । अथ सेव्यं विषमाह—उद्धृतमिति । यस्य लतादेः कन्दविषमुद्धार्यं तस्य फलपाकेन युक्ते काल एव तदुद्धरेत । तथा उद्धृतं तथा नवादिगुणयुक्तमपि सक्तुकादिकं षड्विधमेव कर्मण्यं रसायनकर्मार्हं भवति । अतस्तदेव ग्राह्यम् । ततोऽन्यत्कालकूटादिकं सर्वं वर्जयेत् । तीक्ष्णविषदानोत्तरं तीक्ष्णतीक्ष्णमन्यद्विषं कदाऽपि न देयम् । कर्मण्यमपि विषमतिमात्रया दत्तं चेत्तदुपरि घृतं पातुं देयम् । दधिधूमोत्थं दधित्थं कपित्थं धूमोत्थं गृहधूमाख्यम् । अगारेति । मेघनादेन तन्दुलीयकेन । अलिपल्लवान् भृङ्गराजपल्लवान् । अथ विषदानस्य गुणं योग्यं कालं पुरुषं चाऽऽह—विषमिति । तद्दाननिषेधविषमाह—न वर्षास्विति । विषशीलिनः पुरुषस्य सामान्यं वर्ज्यमाह—अभ्यस्तेऽपीति । रूक्षाशिनो नरस्य विषं बाधकं भवति । तदाह—दृग्विभ्रममिति । मिथ्यादर्शनमित्यर्थः । विषस्याऽऽदौ रोगवारणार्थं रसायनार्थं च देयविषस्याऽऽदौ दातुं प्रशस्यते । रोगविशेषान् बृंहणविषसाध्यानाह—तदिति । यकृन्मूत्रेणेति । यकृज्जे कफजे च ज्वरेऽजामूत्रेण देयम् रोध्रेति । षड्ग्रन्था वचा । निकुम्भेति । निकुम्भो दन्ती । कुम्भस्त्रिवृत् । शिखिकर्णीरसोपेतमिति । शिखिकर्णी त्रिपर्णी । मोरवेल इति महाराष्ट्रभाषायाम् । सितारसेति ।

सितारसः शर्करापाकः। विषं वत्सनाभम्। सितारसाद्यन्विताः क्षुद्रोशीरादयः श्वासादिघ्ना भवन्ति। ता एव विषान्विताश्चेच्छर्दिघ्ना अपि भवन्ति। विषा अतिविषा। क्षुद्रा कण्टकारी। मधुयष्टी मधु। क्षारः टङ्कणः। च्यवनप्राशोऽष्टाङ्गहृदये द्रष्टव्यः। अथ विषविद्रावणं घृतमाह—विजयेति। विजया हरीतकी। जीर्णभुक् प्राग्भुक्तेऽन्ने जीर्णे सति भोजनं कुर्वन् यथाबलं घृतमेतत्पिबेत्। गलग्रहेति पद्यार्धोत्तरं विषविद्रावणं नाम घृतं विषरुजं हरेदिति पाठः। मुस्तेति। कृच्छ्रघ्नमिति। विषं पथ्यादियुतं मूत्रकृच्छ्रघ्नं भवेत्। विषं गोमूत्रादियुतमेकतः कृत्वा पीतमश्मरीं वज्रवद्दारयेत्। त्रिफलेति। पिप्पलीति। द्रवन्त्यादियुतं विषमपि शूलहरं भवेत्। विषं वेल्लमिशिक्षारयुतं गुल्मादिघ्नम्। वायसी काकमाची। पयस्या दुग्धिका। प्लीहघ्नो रोहीतकः। इभकणा गजपिप्पली। चित्रकेति। सचन्द्रहासादिभिः सव्योषादिभिरगारधूमसहितैर्बस्तमूत्रेण कल्कीकृतैश्वित्रकादिभिः कृतो लेपो विचर्चिकादिहरः। चन्द्रहासा गुडूची। एडगजश्चक्रमर्दकः। अथ लेपान्तरान् कुष्ठघ्नानाह—भल्लातकेति। तुम्बुरुश्चिरफल इति महाराष्ट्रभाषायाम्। कुष्ठेति। कुष्ठादिहराणि तैलान्याह—करञ्जेति। दारु देवदारु। करञ्जेति। सिन्दुवारवचाक्ष्वेडैः क्ष्वेडं विषम्। अश्वमारः करवीरकम्। वाप्यं पुष्करमूलम्। भद्रश्रीरिति। भद्रश्रीश्चन्दनः। दारु देवदारु। विषेण संसृष्टम्। तत्संसृष्टं ककुभादिपिष्टम्। कौष्ठिकैः कुष्ठनाशकैः पूर्वोक्तैः। आस्तिकोक्तं श्वित्रारि तैलमाह—लाक्षेति। मही कटुकी। सप्ताह्वाऽश्वगन्धा। नागपुष्पं नागकेशरम्। नतं तगरम्। दन्ती उदुम्बरपर्णिका। विषं वत्सनाभम्। हस्तिविषं हस्तिमदोदकम्। तैलं तिलतैलम्। श्वित्रस्याभ्यञ्जनमिति। ऐरण्डतैलमिति। कोलकं चीरनिष्क्वाथ इति। कोलं चित्रकः। कक्षारः अर्कः। सूर्योऽर्कवृक्षस्तन्मूलं ग्राह्यम्। चित्रकार्कमूलयोः क्वाथे स्नुक्क्षीरे च ज्योतिष्मतीतैलाच्चतुर्गुणे तैलचतुर्थांशेन लाङ्गल्यादिकल्कं दत्त्वा विपाचितं ज्योतिष्मतीतैलं लेपेन पानेन च कुष्ठमनिलत्वग्गदांश्च नाशयेदिति। अगारधूमेति। बस्तमूत्रे कल्कितैर्गोमूत्रपिष्टैर्वा भल्लातकादिभिः कृतो लेपो विचर्चिकादिहरः। शम्याकेति। तद्गुणं विचर्चिकादिहरं विषादिकं मनःशिलान्तं च तक्रपिष्टमपि तद्गुणम्। किंच पटोलाद्यपि तक्रलेपेन कुष्ठजित्। करञ्जेति। आस्फोता गिरिकर्णी। नतं तगरम्। क्ष्वेडं विषम्। कुष्ठादितैलमाह—कुष्ठेति। कुष्ठं कोष्ठ इति महाराष्ट्रभाषायाम्। भद्रश्रीश्चन्दनः। दारु देवदारु। स्वरसं बीजपूरस्येति। वीरा इति। वीरा काकोली। देवदार्विति। घृतधूपितं तिमिरापहमित्यन्वयः। इन्द्रायुधं वज्रं हीरकम्। अथ पिल्लादिघ्नीं रसक्रियामाह—समुद्रफेनेति। स्फटिका पाषाणविशेषः। कुरुविन्दं माणिक्यम्। एतानि कूर्मपृष्ठान्तानि मिथस्तुल्यानि रूपार्धभागा मनःशिला मनःशिलापेक्षया मरिचमर्धभागं तदपेक्षया सैन्धवमर्धभागं ततोऽर्धभागं लौहं रज इति यथोत्तरं क्रमेणार्धभागानि। अयसा समं विषं च गृहीत्वा

मधुना साकं संमर्द्य कृता रसक्रियाऽवलेहसमानद्रवरूपा रसक्रियेयं मधुना पिल्लशुक्लार्मकाचजिद्भवेदिति । नेत्रे विषौषधदानोत्तरं साधारणं कर्माऽऽह—अभीक्ष्णमिति । अथ सूर्यप्रभावर्तिमाह—रक्तचन्दनेति । सूतकः पारदः । अभया हरीतकी । लोध्रो लोध्रवृक्षत्वक् । उषणं मरिचम् । उग्रा वचा । समविषैः सह विषैः, न तु सर्वतुल्यविषैरित्यर्थः । वर्तयो दीर्घगुलिकाः । अञ्जनेन शुल्कार्मादिघ्नाः । रसोनवर्तिमाह—रसोनेति । रसोनकन्दो लशुनकन्दः । रसोनकन्दादिभिर्वर्तिरूपं हितं भेषजं पिल्लेक्षणे अञ्जयितुं कार्यम् । तद् दत्त्वा सर्पिषाऽक्षितर्पणं कुर्यात् । पक्वं यथाविधिपक्वम् । रोचना गोरोचना । शुक्रे नेत्रस्थे शुक्ररोगे स्वर्जिकाक्षारादिसहितं शुक्लं शुक्लपुष्पं वत्सनाभं वरं श्रेष्ठं भेषजमस्ति । एतदेव भेषजं कर्णे पूरितं तीव्रकर्णशूलादिहरम् । प्रत्यक्पुष्पी अपामार्गः । कतादिनस्यमपि शिरोरुक्शमनं भवेत् । कतं कतकबीजम् । जलप्रसादकरम् । तिन्दुसमुद्भवं तिन्दुफलम् । एलादिवटिकामाह—एलेति । धृता मुखमध्ये धृताः । कटुतैलं सर्षपतैलम् । हलिनी लाङ्गली । अष्टगुणामिति । अम्लपिष्टं विषाद्भागमष्टगुणं दत्त्वा कृतः सैन्धवकार्पासीफलकल्कः सघृतो साजक्षीरो वा लेपेन शत्रुणा कपटेन विषदिग्धं विषलिप्तं शरीरधृतं यदायुधं तत्संबन्धिपीडानुद्रवतीति । वृश्चिकाली मेषशृङ्गी । महासहा माषपर्णी । कृतमालेति । कृतमाल आरग्वधः । अपचीघ्नं तैलमाह—काकादनीति । काकादनी काकनासा । कावलीति प्रसिद्धा कोंकणे । इयमर्कफलसमानाकारकार्पासगर्भितफला वल्ली । मागधिका पिप्पली । नलिका नाडीशाक इति लोके प्रसिद्धा । तुण्डिका बिम्बी । जीमूतो जालिनीफलं कडुघोसाली इति ख्याता । तस्याः फलं ग्राह्यम् । कर्कोटो वन्ध्याकर्कोटकी । विशाला इन्द्रवारुणी । कृतवेधनोऽनेकधारायुक्तो धामार्गवः । अपच्यादिहरं लेपमाह—गुञ्जेति । भूः सौराष्ट्री । सर्पदष्टानां षष्ठे सप्तमे वा वेगे मूलविषमाह—अतीत इति । भक्षणार्थं त्रिविधां तन्मात्रामाह—चतुर्भिरिति । चतुर्यवमिता हीना मात्रा भवति । षड्भिर्मध्यमा । अष्टाभिरुत्तमा । लूतादष्टस्य पुरुषस्य विषे रक्तस्थे सति तु मूलविषं पाने तु सहसा नैव दद्यात् । तर्ह्यादौ किं कुर्यात्तदाह—दंशं दंशभागं वर्धय शस्त्रेण च्छिन्नं कुरु । छित्वा हरणोत्तरं विषांशो निष्कासित इति ज्ञात्वा ततो विषशेषवारणार्थं पञ्चक्षीरिवृक्षाणां वटादीनां दुग्धसहितघृतैः सह संयुक्तं पीतं विषं लूताविषं हन्ति । द्रामिली एला । मनःशिलेति । अञ्जनं स्रोतोञ्जनम् । अलं हरितालम् । एला इलाइचीति लोके । सरक्तं मञ्जिष्ठासहितं रक्तशिग्रुसहितं वा । अम्लकर्णी आम्लपर्णी । नागदमनी निर्विषीति वङ्गभाषायाम् । सापसंद्री इति महाराष्ट्रभाषायाम् । महारोगघ्नीं गुटिकामाह—विषशुल्वेति । कौन्ती रेणुकबीजम् । हरिद्रादिपिण्डमाह—हरिद्रेति । मरिचानि चेति । चशब्देन विषसंग्रहः । सघृतमानिलम् । घृतसहितं भक्षितमानिलं वातजं ज्वरं व्यपोहति । नागपुष्पं

नागकेशरम्। शतपत्रं कमलम्। जयाख्यां वटिकामाह। गुडादिभिर्गुलिकाकृतं भस्मसूतं जरां जयेत्। अत्र पूर्वश्लोकादनुवृत्त्या लब्धं विषं सूतभस्म समं ग्राह्यम्। प्रतिजयां वटीमाह—वचेति। उपकुल्या पिप्पली। द्वितीयां जयवटिकामाह—वासेति। कान्तादिगुटिकामाह—कान्तेति। शिलाधातु शिलाजतु। महाविषं वत्सनाभम्, न तु महाविषाख्यम्। तस्य कल्पेऽसंग्रहात्। विषशीलनफलमाह—शत्रुप्रयुक्तादिति। गरादल्पवीर्याद्विषात्। अकालमृत्युग्रहपाप्मनः, अकालमृत्युग्रहजरोगादित्यर्थः॥

इति रसरत्नसमुच्चयटीकायां खरेइत्युपाह्वेन वामनात्मजेन चिन्तामणिना विरचितायां चिकित्सास्थान एकोनत्रिंशोऽध्यायः॥ २९॥

---

## अथ त्रिंशोऽध्यायः।

अथ क्रमप्राप्तस्य तृतीयरसस्य पारदाख्यस्य कल्पमाह। तत्र संस्काररूपः कल्पैकदेशो दीपनसंस्कारान्तः सूत्रस्थाने प्रागुक्त एव। तावच्छुद्धिशुद्धं पारदं मूर्छयित्वा तेन यद्यपि रोगवारणकार्यं निर्वाहितं तथाऽपि चञ्चलस्य तस्य रसायनादावनुपयोगाद्ध्वंसस्य तस्य पक्षच्छेदेनैव स्थैर्यं संभवति। स च पक्षच्छेदोऽभ्रकसत्त्वजारणेनैव भवेदित्यभिप्रायेण जारणाविधिरारभ्यते—पीतासवाम्लमिति। त्रिरात्रं भावनायोगेन पीतं संशोषितमासवाम्लं सूत्रस्थानोक्तं येन तथोक्तमासवाम्लभावितमित्यर्थः। एतादृशं खात्सत्त्वं मुहुः कृष्णवज्राभ्रकसत्त्वम्। खं गगनमभ्रकमित्यर्थः। तदलाभे कान्तात्सत्त्वं तदलाभे तु तीक्ष्णसत्त्वं पारदापेक्षया चतुःषष्टितमांशेन मितं तप्तखल्वस्थपारदमध्येऽल्पशस्त्रुटिशः क्षिप्त्वा श्लक्ष्णं यथा स्यात्तथाऽम्लेन त्रिदिनं विमर्दयेत्। ततः क्षारादिलेपितान्तर्भागे वस्त्रावृते भूर्जपत्रे पोटलिकारूपेण बद्धं दोलायन्त्रे तिर्यक्स्थितदण्डे बद्धसूत्रेणान्तरले धृतं पारदं समरसेऽम्ले पात्रस्थकाञ्जिकादिरूपेऽम्ले मग्नं कृत्वा त्रिदिनं स्वेदयेत्। स्विन्नं तं निष्कास्योष्णारनालेन धौतं शुष्कं कृत्वाऽङ्गुलिना संमर्द्य कच्छपयन्त्रमूषामध्येऽष्टमांशबिडसहितं संस्थाप्य त्रिदिनं पचेत्। ततो निष्कास्य रसं ग्रासजरणपरीक्षार्थं तुलायां धृत्वा परीक्षेत्। कथं तदाह—स्वप्रमाण इति। प्रमाणाधिक्यं चेत्तं पारदं पातनायन्त्रेण ग्रासमधस्त्यक्त्वा, ऊर्ध्वगमनेन, ऊर्ध्वपात्रस्थं कुर्यात्। ततो निष्कास्य पातनायन्त्राधस्तलस्थेन तेन ग्रासेन सहाऽऽसवाम्लेन तप्तखल्वे संमर्द्य कच्छपयन्त्रे स्थापयेत्। त्रिदिनं पचेच्च। एवं ग्रासजारणपर्यन्तं पुनः पुनः कुर्यात्। इत्येकं जारणम्। द्वितीयं ग्रासं द्वात्रिंशदंशमेवमेव जारयेत्। षोडशांशं तृतीयग्रासमष्टमांशं चतुर्थांशं चतुर्थं पञ्चमांशं द्वितीयांशं षष्ठं च समभागं ग्रासं जारयेत्। एवमुत्तरोत्तरं जारणायां क्रमेण वह्निवृद्धिरपि कार्या। द्विगुणेति। रसायनगुणफलककुमारत्वसिद्ध्यर्थं

द्विगुणाभ्रकसत्त्वयोजनमुक्तं हि सूत्रस्थाने--हराद्भवो यो द्विगुणाभ्रजीर्ण इत्यादि। पूतीलोहं नागं वङ्गं च। रसकं जसदम्। गन्धकत्रयं पीतादिभेदेन समुदायस्यैव निषेधः। केवलपीतगन्धकस्य ग्रहणं त्विष्टमेव। धातुवादे तु नायं निषेधः। किंतु रसायनार्थरसजारण एवेति बोध्यम्। जारणोपयोगिवडवानलविडमाह। तद्धटकद्रव्याणां मध्य एकैकस्य द्वयोर्द्वयोर्वा भिन्नभिन्नद्रव्यरसेन भावना शतवारं कार्या। तदाह--गुञ्जेति। चूलिका चूलिकालवणम्। भूः सौराष्ट्री। खगं कासीसम्। एवमिति। एवंरीत्याऽभ्रकसत्त्वजारणेन हंसः पारदोऽग्निसहः स्थिरो भवति। तथा ज्ञात्वा नियामकौषधी(ध)सिताङ्कोलानां रसादिभिः संयुक्तस्ततो मर्दितः केवलो नियामकौषध्यादिरहित एव वा। अस्य यन्त्रस्थ इत्यत्र संबन्धः। अथवा सत्त्वीकृतैर्वैक्रान्तकान्तसस्यकमाक्षीकविमलाद्रिदरदरसकैः सह युक्तोऽथ मर्दितो वा पारदः पातनायन्त्रे न्युब्जोर्ध्वपात्रोदरे लिप्तः क्रमवृद्धेन तत्पात्रपृष्ठस्थाग्निना पाचितोऽपि नाध आश्रयेन्नाधो गच्छेत्। तथा तद्यन्त्रघटकाधः पात्रोदरे लिप्तः चुल्लीस्थाग्निना तापितोऽपि नोर्ध्वं पात्रोदरं गत्वाऽऽश्रयेत्तथाभूतः पारदश्छिन्नपक्षो ज्ञेयः। कान्तभस्मन ऊर्णादिभिः सह पिण्डीं बद्ध्वा कोष्ठ्यां धृत्वा भस्त्राधमनेन दृढाङ्गारैः सत्त्वं मुण्डवर्णं पतति। एवं विधिनैव तीक्ष्णसत्त्वं पातयेत्। रसहृदय ऊर्णादिपिण्डी कथिता। ऊर्णाटङ्कणगुडपुरलाक्षसर्जरसैः सर्वधातुभिः पिष्टैः। छागीक्षीरेण कृता पिण्डी शस्ता हि सत्त्वविधाविति। नियामकौषधानि शतावरीप्रमुखाणि रससारे पूज्यपादै रसकादिगन्धकस्य विडद्रव्याणां चास्थिराणां स्थिरीकृत्यैव तानि धातुवादे रसायने योज्यानीत्युक्तम्। तथा च तद्ग्रन्थः--चोरहंसशिलाकाङ्क्षीकासीसा अलकस्तथा। एषामस्थिरसत्त्वानां स्थिरीकुर्याद्विचक्षणः। दग्धात्तुषात्तु भागैकं मृदो भागद्वयं तथा। किंचित्कार्पासकं दत्त्वा कुट्टयेन्मृत्तिकां दृढम्। मृत्पोलिकां ततः कृत्वा बुद्ध्या विस्तार्य यत्नतः। बुध्ने मृदाऽधिका कार्या वेष्टयेत्कूपिकां ततः। यत्नेन वेष्टितां कूपीं छायायां शोषयेत्ततः। अञ्जनं तीक्ष्णसंयुक्तं तत्समं टङ्कणं कुरु। अन्धमूषागतं ध्मातं वरनाग इति स्मृतः। चोरभागचतुष्कं तु वरनागैकसंयुतम्। तत्सर्वं रेतयित्वा तु रक्तवर्गेण भावयेत्। सूर्यतापेन संशोष्य काचपात्रे निधापयेत्। वैश्वानरः प्रदातव्यो वर्धमानो ह्यहर्निशम्। स्वाङ्गशीता यदा कूपी यत्नात्तां स्फोटयेत्ततः। अत ऊर्ध्वं तु तल्लग्नमेकी कृत्वा च मर्दयेत्। भावयेद्रक्तवर्गेण काचकूप्यां निधापयेत्। तावदेव प्रकर्तव्यं यत्नात्सत्त्वं स्थिरं भवेत्। स्थिरीभूतं यदा सत्त्वं स्वेदयेज्जलयन्त्रगम्। रसको बन्धमाप्नोति नात्र कार्या विचारणा। सप्तरात्रमिदं कार्यं सत्त्वबन्धनमुत्तमम्। एवं स्थिरत्वमन्येषामस्थिराणां च चोरवत्। अभावे वरनागस्य लोहचूर्णेन कारयेत्। अमुनैव प्रकर्तव्यं स्थिरत्वं गन्धकस्य च। अथवा गन्धकं शुद्धं नवसारसमन्वितम्। रक्तवर्गेण संभाव्य चक्रयन्त्रे स्थिरी कुरु। अस्थिराण्यपि सर्वाणि स्थिरत्वं प्राप्नुवन्ति हि। स्थिरीकरणमाख्यातं चक्रराजे सुशोभने। अन्ये च ये विडाख्याताः श्रेष्ठाश्चारणकर्मणि। तेषां च चक्रस्य-

त्रेण स्थिरत्वं कारयेद् बुधः । आवश्यक एवायं स्थिरीकरणविधिः । अन्यथा तद्विनाशेन तज्जातं पारदरञ्जनमपि नश्येत् । रञ्जने रसकेभ्योऽपि संभवतीत्यपि तत्रैवाभिहितं यन्त्रयोगेण रञ्जनरसनिष्कासनविधिमुक्त्वा । तथा हि--मणैकं लोहचूर्णस्य स्वर्जिकाया मणद्वयम् । त्रिभागं चूर्णकं दत्त्वा एकस्थमतिमर्दयेत् । क्षिप्त्वा चूर्णं बृहद्भाण्डे जलमूत्रेण पूरयेत् । चुल्लिकोपरि संस्थाप्य वह्निं प्रज्वालयेत्ततः । यदा फेनः समागच्छेच्छ्वेतवर्णस्तदूर्ध्वतः । अन्यपात्रे तदा स्थाप्य यावद्बध्नाति रक्तताम् । पश्चात्तं रक्तफेनं [ च ] पात्रमध्ये क्षिपेत्पुनः । क्षीणे मूत्रे जलं दद्याद्यावद्रक्तं च दृश्यते । तावद्रक्तं च गृह्णीयात्पुनः पात्रे निधापयेत् । यदा रक्तं न दृश्येत तदा वह्निं निवारयेत् । रक्तं वस्त्रेण संगाल्य मलशेषं विवर्जयेत् । श्वेतफेनेन संयुक्तं तस्यैतज्जलशोषणम् । काचसारितघट्यां तु तद्धार्थं तदनन्तरम् । बृहद्भाण्डं समादाय कुक्षौ च छिद्रयुग्मम् । भाण्डमध्ये घटीं क्षिप्त्वा मुखं छिद्रे नियोजयेत् । तदाऽऽस्ये काचनालं स्यात्तच्च नालमधोमुखम् । रुद्ध्वा तदा तयोः संधिमर्धं च नालकं दिहेत् । भाण्डं वालुकयाऽऽपूर्य तस्य द्वारं निरुध्य च । वह्नेः प्रज्वालनं तावद्यावत्तन्नालकं द्रवेत् । शीतयन्त्रं समुत्तार्य घटीं प्रक्षालयेत्ततः । द्रावं क्षिप्त्वा पुनर्दद्यात्पुनः पाको विधीयते । एवं रक्तद्रुतिः प्रोक्ता देगयन्त्रेऽतिशोभनाम् । तालोनागः शिलाचौरः शुल्वो हंसश्च गन्धकः । एते रङ्गं विमश्नन्ति विद्रां गैरिकं तथा । वालुकादेगयन्त्रेण पिच्छकेशा द्रवन्ति च । अम्लाद्विद्रावणं कार्यं यन्त्रेणानेन यत्नत इति । चोरो रसकम् । हंसो हिङ्गुलः । अत्रायं विधिराचार्येण विस्तरशयाप्युक्तः । अथास्य पारदस्य भस्मविधिरनेकप्रकारैराह--अथेति । अपामार्गबीजानि संकुटथोष्णजले क्षिप्त्वा हस्ताभ्यां निष्पीडनेन जलोपरि तैलमागत्य तरति तच्चुल्लस्या ग्राह्यम् । अथवा पातालयन्त्रेण ग्राह्यम् । तेन तैलेन मर्दनेन कल्कीकृतैः पुष्करतण्डुलैः सह मर्दितः पश्चात्संपुटितः पारदश्चतुर्भिर्लघुपुटैर्भस्मतां भवति । प्रतिपुटं मर्दनं कार्यम् । अथवा मलयूक्षीरेण सह संमर्द्य कल्कीकृतो यः श्वेतहिङ्गुस्तेन सह मर्दितः शरावसंपुटमध्ये घृतश्चतुर्भिर्लघुपुटैर्भस्मी भवति । अथवा गोमूत्रेण द्रोणपुष्पीरसेन च कान्तपात्रे पचनाद्भस्मसाद्भवति । तथा कटुतुम्बीबीजतैलेन कृष्णधत्तूरतैलेन वा विमर्दितो लघुपुटेन भस्मी भवति । अथवा गन्धर्वतैलेनैरण्डतैलेन भावितो मृणालतन्तुवर्तिमध्ये स्थितो याममात्रं तद्दीपशिखयुतो भस्मी भवेत् । अथवा समभागकान्तभस्मयुतो लघुपुटेन भस्मी भवति । अथवा वन्ध्याकर्कोटीकन्दमध्ये गुडूचीकन्दमध्ये वा धृतो भूधरयन्त्रे पुटनाद्भस्मी भवति । अथवा चपलाख्यरसेन युतेन समभागेन युतो निर्गुण्डीरसयुतो वा संमर्दितो भूधरपुटेन भस्मी भवति । अथवा वाराहीकन्दरसमर्दितेन समभागेन रसकेन युतो भूधरयन्त्रे पुटनाद्भस्मी भवति । अथवा रससमभागेन गन्धकेन युतेन चक्रमर्दरसेन चक्रमर्दसमर्दितेन गन्धकेनेत्यर्थः । तेन युक्तं वाससा बद्ध्वा रसं गन्धकतैले तुषाग्न्युपरिस्थमृत्पात्रे तावत्पचेद्याव-

द्राखोटबन्धनं भवेत् । पश्चाल्लघुपुटेन भस्मी भवति । गन्धकतैलं तु सूत्रस्थान एवा-भिहितम् । अथवा समभागगन्धकं पारदं संपिष्य कान्तसंपुटे धृत्वा पचेत् । अथवा द्विगुणं गन्धकं दत्त्वा कज्जलीं विधाय कान्तसंपुटे धृत्वा लघुपुटेन रसो भस्मी भवति । अथवा तृतीयांशं गन्धकं दत्त्वा समभागकान्तपर्पटमिश्रितं कृत्वा शरावसंपुटे धृत्वा लघुपुटे पचेत् । अथवा मारणगणमूलिकारसेन संमर्द्य लोहपर्पटि-कासंपुटमध्ये धृत्वा धमेत् । तेन भस्म भवति । उत्खनेत् । शस्त्रेण लोहपात्रा-त्संलग्नं भस्मोद्धरेत् । तस्य भस्मनः सर्वरोगनाशकत्वं योगभेदेनाऽऽह—रोगोक्तेति । समुस्तेति । अथाष्टगुणगन्धकजारणामाह—लोहमयीमिति । लोहमयीं मूषां कुर्यात् । कथंभूताम् । अन्तस्तले हेमाद्रिरसमर्दितं पारदं लशुनपिण्डमध्ये दधतीम् । पुनः कथं-भूताम् । निर्गुण्डीस्वरसेन मर्दितचतुर्थांशगन्धकयुक्तया गन्धकद्रवस्याधस्तात्पारदोपरि पतनार्थं तलच्छिद्रयुक्तया गर्भस्थमूषिकया युक्तां गर्भमूषिकासञ्जनार्थमन्तर्गलघटितवलयां सपिधानकाम् । पुनः कथंभूताम् । चुल्लीस्थविशालजलपात्रे स्थितस्य खर्परस्य द्वारि मुखे लम्बमानां न तु स्थापितां पार्श्वे उच्छ्रिततिर्यग्लोहदण्डयोः कठकेऽवलम्बेन सा लम्बिता स्थातुमर्हति, एतादृशीं मूषामूर्ध्वे वनोपलैः खदिराङ्गारैरधश्च पाचयेत् । हेम धत्तूरः । " कुट्टमानस्य लोहस्य स्थूलकणरूपाणि खण्डानि बद्धपारदस्य च हननेन निर्गतान्कणांश्चैकीकृत्य संमर्द्याग्नौ लोहकटाहे प्रतापनेनैकीभूतं द्रुतं तत आर्द्रगो-मयोपरिस्थकदलीदले प्रक्षिप्तं सगोमयकदलीदलेन न्युब्जेनाऽऽपीडनेन पर्पटाकारं भवति । अयं लोहपर्पटो बोध्यः । तदुक्तं ग्रन्थान्तरे—लोहस्य कुट्टमानस्य सूतकस्य दलानि वै । पतन्ति तानि स्वीकृत्य ख्यातोऽयं लोहपर्पट इति "। एवं जीर्णगन्धकः पारदः क्षयकुष्ठनुद्भ-वेत् । रुचकं सौवर्चलम् । पुटपाचितसूरणः पलाशपत्रेण संवेष्ट्य पुटपाचितसूरण इत्यर्थः । वनसूरणस्य हि कण्डूवादि तादृग्वेष्टनेनैव नश्यति । क्षीरिण्या इति । उदश्विदम्भसा—उद-श्विता । शृतेन क्षीरिण्यास्त्वक्पल्लवकृतेन क्वाथेनायं पारदोऽतीसारं जयति । क्षीरिणी पीतपुष्पा दुग्धिका । त्वक्शब्देन तद्दण्डो ग्राह्यः । कषायीति । कषायिपल्लवैः । जम्ब्वाम्रादिपल्लवैः संवेष्ट्य पुटपाकेन पाचितं बालबिल्वफलं तन्मज्जेत्यर्थः । बिल्वकर्कटिकागर्भं बाल-बिल्वमज्जायुतं मसूरक्वाथोदकं सरसं वा बिम्बिसीं हन्ति । मृतरसः क्षारादिसहितो मूत्रकृच्छ्रं हन्ति । क्षारो यवक्षारः । पारदभस्मेति । इदं पद्यद्वयं प्रागुक्तमपि पारदभस्ममहिमप्रदर्शनार्थमत्र पुनरनुवदति । रजतोपलो रौप्यमाक्षिकम् । कपित्था-त्खपुरः कपित्थनिर्यासः । दिवसादौ प्रभातकाले प्रत्यहमेतदल्पाल्पमात्रया विंशतिवारं मधुलीढं कार्यम् । न्यग्रोधादिक्वाथयुक्तोऽपि रसो मेहहरः । न्यग्रोधादिगणोऽसना-दिगणश्चाष्टाङ्गहृदये द्रष्टव्यः । चिञ्चालशुनगोमूत्रैः सहायं गुल्मादिहरः । चिञ्चा चिञ्चाक्षारः । नवनीतेति । सुधाक्षीरं स्नुहीक्षीरं तेन भाविता वासिता याऽभया हरीतकी नवनीतमिश्रितया तया सहितोऽयमुदरे हितः । यष्टीकषायेण सहितः सः रसः कामलामये हितः । फलत्रि-

कादिक्काथेनेति । फलत्रिकादिद्रव्याणि पाण्डुरोगचिकित्सायां हंसमण्डूररसोक्तानि वेद्यानि । विश्वादिसहितः सः शोफे प्रशस्तः । विश्वा शुण्ठी । अमृतारससहितो निम्बादिचूर्णयुतः सः शोफे प्रशस्तः । रसोनेति । लशुनादिभिर्मिथः समैस्तुल्यभागं भल्लातकं सर्वं कल्कीकृत्य चतुर्गुणं तैलं क्षीरे विपाचितं रसं च लीढ्वा कुष्ठी त्रिकटुना शरीरं लिम्पेत् । अथवा भूशिरीषसुपर्णाक्ष्योः पञ्चाङ्गं चूर्णितं मधु घृतं पारदं च लीढ्वा त्रिकटुना तनुं लिम्पेत् । कुष्ठान्मुच्यत इति शेषः । एवमग्रेऽपि वाच्यम् । भूशिरीषः कृष्णशिरीषः । सुपर्णाक्षी पातालगरुडी । वासनवेल इति लोके प्रसिद्धा । अथवा पूर्वोक्तभेषजं लीढ्वा राजिकातैलयुक्तया रसगन्धकपिष्ट्या वा तनुं लिम्पेत् । कर्पूरेति । कर्पूरमूल्यादिभावितरसेन सह वा मधु लिह्यात् । अथवा कर्पूरमूल्यादिचूर्णं मधु च पारदेन सह लिह्यात् । कर्पूरमूली कर्पूरगन्धिनी । कर्पूरच्छिछ्लीति ब्रिजभाषायाम् । पातालमूली पातालगरुडी । फेनिलफलेति । फेनिलफला रिठा इति लोके प्रसिद्धा । अहिनागदमनी । सापसंदीति लोके प्रसिद्धा । दर्वीकन्दो दर्वीकरकन्दः । नाईकन्द इति मालवे प्रसिद्धः । फेनिलमूला...। चित्रकेति । वानरी आत्मगुप्ता । वायसतुण्डी काकमाची । मृतगगनेति । अभ्रकभस्म । मरीची अर्कमूलम् । वायसी काकमाची । तालपत्री मुरा । सलिलरिपुरगस्त्यः । कृष्णा पिप्पली । असितसोमः काला विधारा इति लोके प्रसिद्धः । वरातिलः कृष्णतिलः । शशिलेखा बाकुची । शाखोटो हदीवृक्ष इति लोके । सर्वमेतन्मिथः समं ग्राह्यम् । मृतो रसः पारदभस्म । गुडाभयेति । गुडसहितं यदभयागुडूच्यम्बु तद्युतो वातशोणितं जयेत् । हिङ्गुवेति । हिङ्ग्वादिकल्कं दत्त्वा कृतेन सर्पिषा पारदोऽपस्मारादीञ्जयेत् । मधूकादियुतोऽञ्जनेन तानेव जयेत् । कुनटी मनःशिला । तार्क्ष्यं रसाञ्जनम् । धान्याम्लेति । धान्याम्लं काञ्जिकं तेन पिष्टा अष्टसंख्यासहिताः पिप्पली-( ल्यः ) येषु तादृशान् कार्पासबीजान् हस्ते संमर्द्य निष्कासितं तैलं घृतसूतयुक्तमञ्जनेन विशीर्णरोमरोगघ्नम् । बर्बुरेति । बर्बुरनिम्बकिसलास्तत्किसलयाः । आजं पुरीषं च तेषां धूमैर्युक्तं धूपितमित्यर्थः । पश्चात्स्त्रीस्तन्येन घृष्टं यत्कास्यं तत्किट्टामिक्षुरबीजम् । अश्म मनःशिला । इति त्रयं भल्लातधूमेन धूपितं रसाञ्जनं चेत्युभयमञ्जनेनाभ्यङ्गस्नानजामाक्षिरुजं निहन्ति । महाभेरीमूलमिति । महाभेरीमूलमिन्द्रवारुणिकामूलम् । तुरगपृथुकाऽश्वगन्धामूलम् । बोधकुवलं विकासितकमलम् । जीमूतान्मेघादुपात्तं संगृहीतं मौक्तिकमित्यर्थः । रविजधरं सूर्यकिरणधारि सूर्यविकासिकमलम् । तत्पर्णजजलेन मृदितो यः पारदो मौक्तिकसहितस्तैलसहितलेपेन नेत्रजाड्यं हरति । गुदजेषु लेपेन गुदजानर्शांसि नाशयति । अथ केशरञ्जनमाह—वटेति । वटप्ररोहो वटाङ्कुरः । पिण्डीतवृक्षो मदनः । तस्य मूलानां त्वक् । कृष्णसैर्यकः कृष्णपुष्पसैर्यकः । केतकीस्तनः केतकीपुष्पम् । भृङ्गो भृङ्गराजः । अयःशकलं लोहचूर्णम् । महानीलं सुभाण्डस्थं मण्डलं धान्यमध्यगं स्थापितं कुर्यात् ।

अभ्यङ्गेन परमत्यन्तं केशरञ्जनं भवेत् । त्रिफलेति । तेषां त्रिफलादीनां लेपास्तानि ग्रन्थीन्घ्नन्ति । तेषां मूलरसान्वितं भस्मीभूतपारदमिलितं नारिकेलोदकं पीतं मसूरिकाघ्नम् । माञ्जिष्ठादिलेपं सिध्मादिनाशकमाह—मञ्जिष्ठेति । शबरोद्भवं रोध्रम् । तुवरिका काङ्क्षी । नेपाली मनःशिला । गदा कुष्ठम् । पाण्डुपरिपक्कमित्यर्थः । चन्दनयुगं रक्तश्वेतभेदेन । कालेयकं कालानुसार्यमत्यन्तसुगन्धि चन्दनम् । पत्तङ्गं रक्तचन्दनसमं काष्ठम् । रक्तचन्दनमेवेत्येके । कनकत्वचमारग्वधत्वचं धत्तूरत्वचं वा । सिक्थं मदनम् । तुत्थं मयूरतुत्थम् । कार्पासादिरसतैलयुतोऽयं पारदोऽस्थिस्रावे योज्यः । विषादौ तन्दुलीयक्षीरान्यतरमूलरसेन योज्यः । क्षीरा काकोली । तन्दुलोदकसंमिश्रोऽपि पानादिना तथाफलः । सुरभिर्गौः । रुद्राक्षः कुबेराक्षः । फेनिलः रिठा इति लोके प्रसिद्धः । रसोनो लशुनम् । उग्रा वचा । राजी सर्षपः । वराङ्घ्रिस्त्रिफलामूलम् । पिशाचा जटामांसी । पञ्चपर्णस्य पञ्चाङ्गुलस्यैरण्डस्य बीजम् । विषपर्णतो विषमपर्णतः सप्तपर्णस्य मूलम् । सर्वथा पानादिभिराहिविषापहम् । अहिः सर्पः । कपित्थपञ्चकं कपित्थपञ्चाङ्गम् । जलं पारदश्चेति त्रयमाखुविषघ्नम् । कांस्य इति । ताम्बूल्या अङ्ध्रिस्ताम्बूलीरसेन सह कांस्यपात्रे पिष्टं यन्नागरं शुण्ठीसूतसहितं( ? )लेपेन वृश्चिकविषघ्नं भवेत् । तथा क्षीरीपत्रं पिप्पली च सूतसहितामजादुग्धेन संमर्द्य लेपादपि वृश्चिकविषघ्नम् । तद्वत्कार्पासपत्रं सूतेनोपेतं सर्पिषा सह संमर्द्य विलेपोऽपि तथाफलः । भावितानिति । चणकाम्लेन बाकुचिकादीन्घस्रमेकदिनपर्यन्तं भाविनान्वासितान्कृत्वा तेनाम्लेन चणकाम्लेनैव । द्वितीयदिने तानेव बाकुचिकादीन्संमर्दयेत् । तथा संमर्दनेन कुट्टितस्य कल्कीकृतस्य बाकुचिकादीनां मध्ये कस्यचिदेकस्य निष्पीडितरसेन पारदेन सहितेन संमर्दितेन प्रक्षालितो विषदिग्धव्रणो निश्चयेन शममाप्नोतीति । संप्रतीति सेविष्यमाणरसायनानिर्बाधं पूर्णगुणलाभाय तदधिकरणं यत्स्वशरीरं रोगजरादिदूषितमबलं रसायनविनानर्हं तस्य नीरोगबलशालिसुशरीरकरणार्थकं क्षेत्रीकरणाख्यं संस्कारं कृषीवलैर्बीजवापात्प्राक्कर्तव्यक्षेत्रसंस्कारमिव रसायनार्थिभिः कर्तव्यमाह—रसायनोक्तेति । अष्टाङ्गहृदयादिग्रन्थोक्तहरीतक्यादिभक्षणविधिना शुद्धोऽपगतपुराणपुरीषादिस्ततः पूर्वंलब्धबलः पुरुषः प्रत्यहं प्रातःकाले प्रथमप्रहरेऽग्निरक्षणाय कणादिचूर्णमुष्णवारिणा सह पिबेत् त्रिदिनम् । पश्चात्त्रिदिनानन्तरमभ्रककान्तयोरेकीकृतं भस्म भृङ्गराजादिकषायेण पृथग्भावयित्वा लोहसंपुटे सुगुप्तं स्थापितं प्रातर्मात्रायुतं मधुसर्पिषा सह प्रत्यहं खादेत् । रात्रौ तु कणापथ्याचूर्णं खादेत् । एवं मासपर्यन्तं कृत्वा ततः पुनरप्येतदेव भस्म सूतस्य पारदस्य पातनाभस्मना युक्तं कृत्वा तथा मधुसर्पिषा युक्तं कृत्वा मासपर्यन्तं खादेत् । अथानन्तरं तदेवाभ्रकान्तभस्म जीर्णाल्पहेमचतुर्थांशजीर्णस्वर्णकस्य रसस्य भस्मना युक्तं कृत्वा शतावरीमूलरसेन सह षण्मासपर्यन्तं खादेत् । अथवा भावितां त्रिफलां मृताभ्यां हेमरसाभ्यामुपेतां खादेत् षण्मासपर्यन्तम् । ऊर्ध्वपातनाभस्मयन्त्रविधिसहितं रससंकेतकलिका-

यामभिहितम् । तथा हि—कार्यं स्थालीद्वयं मध्ये सर्वतः षोडशाङ्गुलम् । लव-णेनेषदार्द्रेणाऽऽपूर्य स्थालीमधोगताम् । संधिं वस्त्रे मृदा लिम्पेत्संपुटीकृत्य चान्यया । त्रिद्वारचुल्लके स्थाप्य चतुर्द्वारं दृढाग्निना । पचेत्तत्स्वाङ्गशीतं चेदुद्धृत्य लवणं त्यजेत् । लावणीमूर्ध्वगां कृत्वा क्षेप्योऽन्यस्यां रसेश्वरः । पूर्ववत्संपुटीकृत्य पश्चात्तु चुल्लके न्यसेत् । दृढं कृत्वाऽऽलवालं तु जलं तत्र विनिक्षिपेत् । उष्णं पुनः पुनः क्षिप्त्वा क्षिपेच्छीतं मुहुर्मुहुः । त्रिद्वारे काष्ठमेकैकं दीर्घं हस्तमितं क्षिपेत् । हस्त-घत्पिण्डमानं तु द्द्यादौ प्रज्वालयेत्सुधीः । द्वे द्वे काष्ठे च तस्योर्ध्वे तदूर्ध्वे त्रितयं क्षिपेत् । यावद्यामद्वयं पश्चादङ्गारांश्च जलं त्यजेत् । ऊर्ध्वस्थाल्यां तु यल्लग्नं तदूर्ध्वं भस्म सिद्धिदमिति । 'अथवा गन्धकेन मारितं पारदमामलकीरसेन मारितं कान्तं चेत्येतदुभयं मिलितं सत्रिफलाचूर्णं खादन्नाचन्द्रतारकं जीवेत् । अथवा चित्र-कादिचूर्णः पारदसहितस्त्रिमधुरेण सह भक्षितो जराघ्नः । अञ्जनपत्रिका काजळी इति लोके प्रसिद्धा । अथवा कृष्णकार्पासी ग्राह्या । त्रिमधुरं शर्करामधुघृतात्मकम् । रसौषधीनामिति । सर्पाक्ष्यादीनां सूत्रस्थानोक्तानां स्वरसभावितानां चूर्णः सितादियुतो रससहितो जरां हन्ति । तथा स्वर्णं चतुर्थांशं पारदे कृत्वा कृता या पिष्टिस्तया सहितं कान्तपात्रे शृतं क्षीरमपि तद्गुणम् । एतावत्पर्यन्तं नानाप्रयोगजातं सर्वं क्षेत्रीकरणमिति ख्यातम् । अथ वेधकं रसं वज्रपञ्जराख्यमाह—वज्रभस्मेति । पुटानले पचेत् । भूमिमध्ये गोर्वरपुटे पचेदित्यर्थः । तत्तुल्यं मारितमन्यं सूतम् । तेन हंसपादीरसेनैव पूर्ववन्मर्दितं यावच्छक्यं यावन्ति पुटानि दातुं शक्नुयात् तावत्पुटैः पचेत् । सप्ताधिक-पुटैः पचेदित्यर्थः । अथवा स्वर्णपत्रं यावन्मानं वसुमता ग्रहीतुं शक्यं संभवेदित्यर्थः । तच्चतुर्थांशमानेनानेन भस्मनाऽम्लपिष्टेन स्वर्णपत्रं लिप्त्वा लघुपुटेन मारयेत् । शरण्यो रक्षणार्हः । अयमेव रसः सूत्रस्थाने रसबन्धप्रकरणे शङ्खलाबद्धसूतनाम्नाऽभिहितो वक्ष्य-माणग्रन्थेऽस्य वेधकत्वकथनेनास्य विधौ पारदो रागसारणान्तसंस्कारसंस्कृत एव ग्राह्य इत्यभिप्रायो ग्रन्थकृता युक्त्यैव सूचितः । अथवा धातुष्वव्यभिचारेण व्याप्तिपरीक्षा-करणायैव हि सारणादिसंस्काराः । तच्चास्य रसस्य वक्ष्यमाणानां च व्यापनमाचार्येणा-व्यभिचारेणैवानुभूतं विना सारणसंस्कारं घटकद्रव्यसंयोगमानशक्तिवैचित्र्यात् । अत एव जारणोत्तरं सारणसंस्कारोऽत्र यथाविधि वर्णित इत्याशयमाचार्यस्य केचिदाहुः । अन्ये तु तादृशसंस्कारसंस्कृतो रसस्तीव्रतरशक्तिको मनुष्याणामाधुनिकानामसह्य इति तत्सं-स्कारानभ्युपगमहेतुं वदन्ति ।' आवश्यका अपि ते संस्कारा विस्तरभयादेवात्र ना-भिहिता इति मम भाति । अथ पञ्चामृतरसमाह—हेमेति । हेममाक्षिकादि-चतुष्टयं भस्मीकृतं समभागजीर्णहेम्नि पारदे प्रवेशयेत् । तप्तखल्वे मर्दनेन चारयेत् । ग्रासयेदित्यर्थः । ततः सा पिष्टिका भवति । दिनत्रयं मर्दनेन । ततस्तां पिष्टीं काचकूपीमध्ये संभृत्य मुखमुद्रां दत्त्वा वालुकायन्त्रे पचेत् । संप्रति क्रामणमाह—घनसारेति । रसं भक्षयित्वेतत्समस्तं व्यस्तं वा भक्षितं रसस्य तस्य सर्वधातुव्यापकत्वं

करोति । कटुकीपलमिति पाठः । घनसारादिचूर्णितं पलमितमनुभक्षयेत् । केवलं ताम्बूलवल्लीदलपलं वाऽनुभक्षयेत् । घनसारः कर्पूरः । प्रियां भजेत् । मैथुनमात्रं विहाय चुम्बनालिङ्गनदर्शनं तन्मधुरशब्दश्रवणसुखं तद्विषयं भजेदित्यर्थः । अन्यत्पथ्यमाह—शालीति । वर्ज्यमाह—अभ्यङ्गमिति । कटुतैलं राजिकातैलम् । छत्राकं मिश्रेयाशाकम् । मारकं तन्दुलीयकमूलकादि । गरुडी पातालगरुडी । वासनवेल इति लोके प्रसिद्धा । बंधकं रसं वज्रपञ्जरादिम् । क्षेत्रीकरणं भेषजं प्रथमं भक्षयित्वाऽनन्तरमेव बंधकं रसं सेवेत । यतः क्षेत्रीकरणं विना केवलतादृशरसमात्रसेवनं सर्वाङ्गविकारकरं भवति । अथ मृतसंजीवनीं गुटिकामाह—कान्तेति । कान्तादिसत्त्वानां वज्रहेमरसानां भस्मीकृतानां सर्वेषां मिथः समानां सप्तदिनपर्यन्तमम्लरसपिष्टानां गोलकं कृतं गोजिह्वादिकल्केन प्रत्यहं लेपयेत् । ततो भूधरयन्त्रे सूर्योदयमारभ्य सूर्यास्तपर्यन्तं पचेत् । प्रत्यहं गुटिकां निष्कास्य गोजिह्वादिकल्कलेपो देयः । गोजिह्वा पाथरीति लोके प्रसिद्धा । वायसी काकमाची । पक्षपर्यन्तमेवं विधिना सा गुटिका कठिना भवति । ततो यवचिञ्चादिकल्केनान्तर्लिप्तायां वज्रमूषायां तां गुटिकां क्षिप्त्वा खदिराङ्गाराग्निना तस्यां द्रुतायां सत्यां मुहुर्मुहुष्टङ्कणादिदानेन विशुद्धायां सत्यां तत्र समं हेमभस्म वडवानलादिविडयोगेन जारयेत् । समचीर्णेति । हेमभस्म समं चीर्णं ग्रस्तं ततो जीर्णं च येन तादृक्पारदो माक्षीकयोगेण मारितः सन् वृष्यो भवति । कृष्णरम्भाफलद्रुतं तत्फलमध्ये चिरं धारणेन सद्रवं भस्मीभूतं पूर्वोक्तमेव पारदं कर्पूरं चागस्त्यरसेन सह पीत्वा पुरुषो वृषायते । युगस्वभावादिति । देशकालादिसंपदुपेतानामेवौषधीनां रसायनानां च यथोक्तगुणत्वं बोध्यमिति भावः । तदेव संपदं श्लोकत्रयेणाऽऽह—जित्वेति । प्रमाणसिद्धं शास्त्रं मिथ्या नैव स्यादिति श्रद्धां बद्ध्वा तदुक्तरसायनादिरहस्यमेव प्रयोक्तव्यमित्याह—एतदिति । फले व्यभिचारस्तु कुवैद्यचिकित्सादरणेत्याह—लोभयन्तीति । ननु रिष्टाभासेन सर्वेषां रोगाणां ज्ञानाभावेन च शास्त्रक्रियानिपुणस्यापि क्वचित्फलव्यभिचारो भवेदेवेत्याशङ्क्य कुवैद्यवत्तदपराधः शास्त्रे नाङ्गी क्रियत इत्याह—प्रदीपभूतमिति । भिषजा द्रव्यलोभं विहाय चिकित्सा कर्तव्येत्याह—क्वचिदिति । असाध्यरोगिणो दुष्टरिष्टस्य च चिकित्सा कार्येत्याह—यावदिति । वृत्तय उपजीविकाः । ता एव न केवलं तेषां किंतु लोकोत्तरं पूज्यत्वमपीत्यर्थवादेनाऽऽह—यज्ञस्येति । यज्ञपुरुषस्य । संप्रत्याचार्यः स्वाभिमानं परिहरन्नाह—रसरत्नेति । आद्रियन्तां बुधैरिति शेषः ॥

इति श्रीरसरत्नसमुच्चयटीकायां खरे इत्युपाह्वेन वामनात्मजेन चिन्तामणिना विरचितायां चिकित्सास्थाने त्रिंशोऽध्यायः ॥ ३० ॥

Library IIAS, Shimla
S 615.537 C 363 R
00005572